१

संस्कृत-पाठ-माला।

[संस्कृत-भाषाका अध्ययन करनेका सुगम उपाय]

प्रथम भाग।

लेखक

पं. श्रीपाद दामोदर सातवलेकर

अध्यक्ष- स्वाध्याय-मण्डल, साहित्य-वाचस्पति, गीतालंकार

अष्टादश वार

संवत् २०१६, शक १८८१, सन १९५९

मूल्य ५० नये पैसे

उद्देश्य

संस्कृत भाषा अत्यंत प्राचीन भाषा है। यह भाषा संपूर्ण आर्योंकी प्रधानभाषा है। इसी भाषाके अन्य नाम देवभाषा, देववाणी, गीर्वाणभाषा आदि हैं। आर्योंके संपूर्ण धर्मग्रन्थ संस्कृत भाषामें हैं, इसलिये सब आर्योंको संस्कृत भाषाका अध्ययन अवश्यमेव करना चाहिये। हरएक मनुष्यको संस्कृत भाषाका अभ्यास सुगम हो, इसीलिये यह 'संस्कृत-पाठ-माला' लिखी है। इसमें पाठविधि ऐसी सुगम रखी है कि जो मनुष्य प्रतिदिन घंटा या आधा घंटा इस पुस्तकका अभ्यास करेगा, उसको एक वर्षके अंदर रामायण तथा महाभारत समझनेके लिये जितना ज्ञान चाहिये उतना प्राप्त हो सकता है। आशा है कि संस्कृतके प्रेमी इन पुस्तकोंसे अवश्य ही लाभ उठावेंगे।

लेखक
श्रीपाद दामोदर सातवलेकर

मुद्रक और प्रकाशक — वसंत श्रीपाद सातवलेकर, बी. ए.
भारत मुद्रणालय, स्वाध्याय मण्डल,
पोस्ट- 'स्वाध्याय मण्डल (पारडी)'
पारडी [जि. सूरत]

संस्कृत-पाठ-माला ।

प्रथम भाग

पाठ १

निम्नलिखित शब्दोंका स्मरण कीजिये—

अहं = मैं	वदामि = (मैं) बोलता हूं ।
त्वं = तू	वदसि = (तू) बोलता है ।
सः = वह	वदति = (वह) बोलता है ।

वाक्यानि ।

अहं वदामि = मैं बोलता हूं ।
त्वं वदसि = तू बोलता है ।
सः वदति = वह बोलता है ।

ये वाक्य संस्कृतमें उलटे शब्द रखकर भी बोले जाते हैं, जैसे—

वदामि अहं ।' वदसि त्वं । वदति सः ।
अहं वदामि । त्वं वदसि । सः वदति ।

ये दोनों वाक्य शुद्ध हैं । अर्थात् इस वाक्यके शब्द उलटसुलट रखनेसे भी संस्कृतमें कोई व्याकरणकी अशुद्धि नहीं होती । यह एक प्रकारकी संस्कृतमें सुविधा है । अब निम्नलिखित शब्द पढिये—

पठामि = (मैं) पढता हूं ।
पठसि = (तू) पढता है ।
पठति = (वह) पढता है ।
पश्यामि = (मैं) देखता हूं ।

पश्यसि	=	(तू) देखता है ।
पश्यति	=	(वह) देखता है ।
खादामि	=	(मैं) खाता हूं ।
खादसि	=	(तू) खाता है ।
खादति	=	(वह) खाता है ।
गच्छामि	=	(मैं) जाता हूं ।
गच्छसि	=	(तू) जाता है ।
गच्छति	=	(वह) जाता है ।

अब आप निम्नलिखित वाक्य स्वयं जान सकते हैं—

अहं पठामि । त्वं पठसि । सः पठति । अहं पश्यामि । त्वं पश्यसि । सः पश्यति । अहं खादामि । त्वं खादसि । सः खादति । अहं गच्छामि । त्वं गच्छसि । सः गच्छति । अहं वदामि । त्वं वदसि । सः वदति ।

निम्नलिखित हिन्दी वाक्योंका संस्कृत वाक्य बनाइये—

वह बोलता है । तू बोलता है । मैं बोलता हूं । वह जाता है । तू जाता है । मैं जाता हूँ । वह खाता है । तू खाता है । मैं खाता हूँ । वह देखता है । तू देखता है । मैं देखता हूँ । वह पढता है । तू पढता है । मैं पढता हूँ ।

पाठ २

इस पाठमें आप निम्नलिखित शब्द ध्यानमें रखिये—

तत्र = वहां		यत्र = जहां	
कुत्र = कहां		अत्र = यहां	

इन शब्दोंका उपयोग करके आप अब बहुतसे वाक्य स्वयं बना सकते हैं ।

अहं तत्र पठामि ।	मैं वहां पढता हूं ।
त्वं कुत्र पठसि ?	तू कहां पढता है ?

सः अत्र पठति ।	वह यहां पढ़ता है ।
सः यत्र पठति,	वह जहाँ पढ़ता है,
तत्र अहं पठामि ।	वहां मैं पढ़ता हूं ।

इसी प्रकार निम्नलिखित वाक्य बनते हैं—

अहं अत्र पश्यामि । त्वं कुत्र पश्यसि ? सः तत्र पश्यति । यत्र सः पश्यति, तत्र अहं गच्छामि । सः तत्र खादति । त्वं कुत्र खादसि ? यत्र सः गच्छति, तत्र अहं गच्छामि ।

अब निम्नलिखित शब्दोंका स्मरण कीजिये—

न = नहीं	किं = क्या ?
नहि = नहीं	कः = कौन ?

इन शब्दोंका उपयोग करके आप ये वाक्य बना सकते हैं—

कः वदति ?	कौन बोलता है ?
सः किं वदति ?	वह क्या बोलता है ?
सः तत्र न वदति किम् ?	वह वहां नहीं बोलता है क्या ?
सः तत्र न वदति ।	वह वहां नहीं बोलता ।
त्वं तत्र किं खादसि ।	तू वहां क्या खाता है ?
अहं न खादामि ।	मैं नहीं खाता ।
सः न गच्छति ।	वह नहीं जाता ।
त्वं न पश्यसि ।	तू नहीं देखता ।

अब विना प्रयत्न आप निम्नलिखित वाक्य समझ सकते हैं—

अहं तत्र न पश्यामि । सः अत्र पश्यति । त्वं तत्र किं पश्यसि ? सः तत्र न गच्छति । त्वं कुत्र गच्छसि ? अहं तत्र गच्छामि । यत्र सः गच्छति, तत्र त्वं किं न गच्छसि ? यत्र सः गच्छति, तत्र अहं गच्छामि । यत्र यत्र सः पश्यति, तत्र तत्र सः गच्छति । यत्र यत्र

त्वं गच्छसि, तत्र तत्र अहं गच्छामि। यत्र अहं पश्यामि, तत्र त्वं किं न पश्यसि ? यत्र सः पश्यति, तत्र अहं पश्यामि।

देखिये, थोडेसे प्रयत्नसे आप कितने वाक्य बोल सकते हैं। अब निम्न-लिखित शब्द ध्यानमें रखिये—

यदा	= जब	नैव	= नहीं, बिलकुल नहीं
सदा	= हमेशा	तदा	= तब
कदा	= कब	इदानीं	= अब
		च	= और

अब इन शब्दोंका उपयोग कीजिये। देखिये, कितने वाक्य आप बना सकते हैं—

किं त्वं तत्र गच्छसि ?	क्या तू वहां जाता है ?
नहि, अहं न गच्छामि।	नहीं, मैं नहीं जाता।
किं न गच्छसि ?	(तू) क्यों नहीं जाता ?
यदा सः तत्र गच्छति,	जब वह वहां जाता है,
तदा अहं तत्र गच्छामि।	तब मैं वहां जाता हूं।
कदा सः तत्र गच्छति।	कब वह वहां जाता है ?
यदा त्वं तत्र गच्छसि।	जब तू वह जाता है।

इस ढंगसे आप स्वयं कई वाक्य बना सकते हैं। आप नये वाक्य बनाकर कागजपर लिखेंगे, तो बहुत लाभ हो सकता है। अब निम्नलिखित वाक्य पढते ही आपकी समझमें आ सकते हैं

संस्कृत-वाचन-पाठः।

सः सदा पठति। त्वं सदा किं न पठसि ? यदा सः पठति, तदा त्वं किं न पठसि ? कः तत्र गच्छति ? सः तत्र न गच्छति। यदा त्वं तत्र पश्यसि, तदा सः अत्र वदति। यदा त्वं तत्र खादसि, तदा अहं अत्र खादामि।

पाठ २

निम्नलिखित हिंदी वाक्योंका संस्कृत वाक्य बनाइये—

मैं पढता हूँ। वह नहीं पढता है। मैं देखता हूँ। मैं खाता हूँ। वह नहीं खाता है। वह कब खाता है? मैं कब पढता हूँ? और तू कब पढता है? वह कब पढता है? जब वह पढता है, तब तू क्या पढता है? मैं जाता हूँ तब तू जाता है। मैं खाता हूँ तब तू खाता है।

'सः (वह)' के स्थानपर आवश्यक नाम रखकर भी इसी प्रकार वाक्य बन सकते हैं। देखिये—

रामः = राम	सूर्यः = सूर्य
कृष्णः = कृष्ण	वायुः = वायु
हरिश्चन्द्रः = हरिश्चन्द्र	सोमः = सोम

रामः गच्छति।	राम जाता है।
कृष्णः वदति।	कृष्ण बोलता है।
हरिश्चन्द्रः पठति।	हरिश्चन्द्र पढता है।
सोमः न गच्छति।	सोम नहीं जाता।
रामः किं न पठति?	राम क्यों नहीं पढता?
कृष्णः तत्र न पश्यति।	कृष्ण वहां नहीं देखता।

इसी प्रकार निम्नलिखित वाक्य सुगमतासे बन सकते हैं—

कृष्णः न गच्छति। रामः न वदति। सोमः गच्छति। वायुः सदा गच्छति। कृष्णः किं न वदति? बलरामः किं न पश्यति? गोविंदः न खादति। सः तत्र किं न खादति? यदा रामः अत्र पठति, तदा सः तत्र खादति। यदा कृष्णः तत्र गच्छति, तदा सः नैव पठति।

अब निम्नलिखित शब्दोंका स्मरण कीजिये—

आगच्छामि = (मैं) आता हूं। आगच्छसि = (तूं) आता है।

आगच्छति = (वह) आता है।

इनका उपयोग करनेसे निम्नलिखित वाक्य बन सकते हैं—

अहं आगच्छामि । त्वं आगच्छसि । सः आगच्छति । अहं न आगच्छामि । त्वं न आगच्छसि । सः न आगच्छति । त्वं तत्र किं न आगच्छसि ? सः सदा तत्र नैव गच्छति । कदा त्वं तत्र पश्यसि ? यदा सः रामः तत्र गच्छति तदा त्वं तत्र आगच्छसि किम् ? किं सः तत्र न आगच्छति ?

अब आप निम्नलिखित शब्दोंको कंठ कीजिये—

किमपि	= कुछ भी	ह्यः	= कल (गत दिन)
इदानीं	= अब	श्वः	= कल (आगामी दिन)
अधुना	= अब	परश्वः	= परसों
अद्य	= आज	निरंतरं	- निरंतर
		कथं	= कैसे

इन शब्दोंका प्रयोग करके अब आप वाक्य बोल सकते हैं—

सः किमपि न वदति	वह कुछ भी नहीं बोलता ।
रामः किमपि न पठति ।	राम कुछ भी नहीं पढता ।
अद्य कृष्णः तत्र पठति ।	आज कृष्ण वहां पढता है ।
अधुना अहं पठामि ।	अब मैं पढता हूं ।
इदानीं त्वं पठसि ।	अब तू पढता है ।
कथं सः किमपि न पठति ?	कैसे वह कुछ भी नहीं पढता है ?

अब आपकी योग्यता इतनी हुई है कि आप निम्नलिखित वाक्य बिना कष्ट समझ सकते हैं—

संस्कृत-वाचन पाठः ।

रामः इदानीं तत्र गच्छति । श्रीकृष्णः अधुना अत्र पठति । गोविंदः इदानीं नैव गच्छति । त्वं किमपि किं न पठसि ? सः कदा पठति ? त्वं किमपि किं न खादसि ? विश्वामित्रः अद्य तत्र पठति । यदा सः पठति, तदा त्वं कुत्र गच्छसि ? यदा सः तत्र पठति, तदा अहं तत्र नैव गच्छामि । किं त्वं तत्र न गच्छसि ? अद्य अहं तत्र नैव गच्छामि । सः सदा किमपि खादति । कथं सः सदा खादति ?

यदा सः तत्र किमपि खादति, तदा त्वं किमपि किं न वदसि ? अहं तदा तत्र नैव गच्छामि । त्वं अधुना वदसि । सः इदानीं पश्यति । सः किं पश्यति ? सः सदा तत्र नैव गच्छति । कदा त्वं तत्र पश्यसि ? यदा सः रामः तत्र गच्छति, तदा त्वं तत्र आगच्छसि किम् ? किं सः तत्र न आगच्छति ?

यहां पाठकोंको ध्यान रखना चाहिये कि ' सः ' शब्दका विसर्ग व्यंजनके पहले और बहुतसे स्वरके पहले भी लोप हो जाता है । जैसे—

स वदति । स गच्छसि । स खादति । स तत्र गच्छति ।

संधि ।

संस्कृतमें दो शब्द परस्पर समीप आनेसे पहले शब्दका अन्तिम वर्ण और दूसरे शब्दका प्रथम वर्ण एक दूसरेके साथ विशेष नियमोंसे मिलते हैं । इसका नाम ' संधि ' है । इस समयतक सन्धि किये बिना ही पूर्व पाठोंमें वाक्य दिये हैं । अब इस पाठमें उन वाक्योंके ही सन्धि बनाकर बताते हैं । सन्धि इस प्रकार बनती हैं—

सन्धि बिना वाक्य	सन्धि करके वाक्य
वदामि — अहम्	वदाम्यहम् ।
सः — वदति	स वदति ।
तत्र — अहं पठामि	तत्राहं पठामि ।

इन सन्धियोंके नियम आगे दिये जायेंगे, परन्तु यहां सन्धियोंके साथ परिचय होनेके लिये पूर्व पाठोंके संस्कृत वाक्य संधि बनाकर दिये जाते हैं। जहां सन्धि नहीं होते, वहां सन्धि नहीं बनाये हैं ।

संस्कृत-वाचन-पाठः ।

स पठति । स पश्यति । स खादति । स गच्छति । स वदति । अहं तत्र पठामि । त्वं कुत्र पठसि ? सोऽत्र पठति । स यत्र पठति, तत्राहं पठामि । अहमत्र पश्यामि । स तत्र खादति । यत्र स पश्यति, तत्राहं गच्छामि । स तत्र गच्छति । त्वं कुत्र खादसि ? यत्र स गच्छति, तत्राहं गच्छामि । को वदति ? स किं वदति ? स तत्र

किं वदति ? स तत्र न वदति । त्वं तत्र किं खादसि ? अहं न वदामि । स न गच्छति । त्वं न पश्यसि ।

इन संधि किये वाक्योंकी तुलना प्रथम और द्वितीय पाठके वाक्योंके साथ कीजिये । इससे आपको पता लगेगा कि सन्धि कहां और किस प्रकार बने हैं ।

पाठ ४

संस्कृतमें नामोंकी विविध विभक्तियोंके जो विभिन्न रूप होते हैं, उन्हें अब देखिये—

१ देवः	= देव	४ देवाय	= देवके लिये
(हे) देव	= हे देव !	५ देवात्	= देवसे, देवके पाससे
२ देवं	= देवको, देवके प्रति	६ देवस्य	= देवका
३ देवेन	= देवने	७ देवे	= देवके अन्दर, देवमें

इसी प्रकार अकार-अन्तवाले पुल्लिंगके शब्दोंके रूप होते हैं ।

देव, कृष्ण, राम, धनंजय, गोविंद आदि शब्द अकारान्त हैं, अर्थात् इनके अन्तमें 'अ' स्वर है । 'राम' शब्द र्+आ+म्+अ=राम, ऐसा बना है । इससे पाठक जान सकते हैं कि किस प्रकार राम शब्द अकारान्त है । पाठकोंसे कुछ शब्दोंके अन्तिम स्वरोंका परिचय यहां करा देना चाहिये, इसलिये निम्न शब्द देखिये—

१ अकारान्त शब्द	= देव, सूर्य, सोम	(अन्तिम अ कार)
२ आकारान्त शब्द	= विश्वपा, शंखध्मा	(अन्तिम आ कार)
३ इकारान्त शब्द	= हरि, रवि, कवि	(अन्तिम इ कार)
४ ईकारान्त शब्द	= नदी, दासी, श्री	(अन्तिम ई कार)
५ उकारान्त शब्द	= विष्णु, भानु, गुरु	(अन्तिम उ कार)
६ ऋकारान्त शब्द	= पितृ, मातृ, भ्रातृ	(अन्तिम ऋ कार)

इसी प्रकार शब्दोंके अन्तका स्वर पहचानना चाहिये । इसका उपयोग बहुत है, इसलिये पाठक इसको ठीक प्रकार समझें । अस्तु । यहां अकारान्त पुल्लिंग शब्दके रूप बताये हैं और फिर दूसरे एक शब्दके रूप बताये जाते हैं—

पाठकोंके मनमें ये रूप अब ठीक प्रकार आ ही गये होंगे। इसी प्रकार अकारान्त पुल्लिंग शब्दोंके रूप पाठक करें। अकारान्त पुल्लिंग शब्द ये हैं—

देवः	= देवता	हस्तः	= हाथ
भूपः	= राजा	करः	= हाथ
नरः	= मनुष्य	पादः	= पांव
पुरुषः	= पुरुष	गल्लः	= गाल
जनः	= मनुष्य	स्कन्धः	= कंधा
शब्दः	= शब्द	दन्तः	= दांत
वर्णः	= रंग	ओष्ठः	= होठ
कृष्णः	= काला, कृष्ण	केशः	= केश, बाल
मनुष्यः	= मनुष्य	कर्णः	= कान

इन शब्दोंके सातों विभक्तियोंके रूप बनाकर उनके वाक्य बनावो—

१ सोमः	= सोम	४ सोमाय	= सोमके लिये
हे सोम !	= हे सोम !	५ सोमात्	= सोमसे
२ सोमं	= सोमको, सोमके प्रति	६ सोमस्य	= सोमका
३ सोमेन	= सोमने	७ सोमे	= सोममें

अब आप इन शब्दोंका प्रयोग कर सकते हैं। देखिये—

हे पुरुष ! त्वं तत्र गच्छसि किम् ? – (हे पुरुष ! तू क्या वहां जाता है ?)

भूपः वदति — (राजा बोलता है)
जनः पठति — (मनुष्य पढता है)
नरः गच्छति — (मनुष्य जाता है)

पाठ ५

हे राम ! सः पुरुषः तत्र पठति। हे नर ! त्वं फलस्य वर्णं पश्यसि किम् ? भूपस्य हस्तः। स शब्दं वदति। मनुष्यस्य स्कन्धे केशः। कृष्णस्य वर्णः कृष्णः। रामस्य वर्णः न कृष्णः। पुरुषः भूपं पश्यति।

निम्नलिखित भाषावाक्यके संस्कृत वाक्य बनाइये—

राजाका हाथ। मनुष्यका शब्द। सोमका वर्ण। वह वहां जाता है। वह मनुष्य वहां नहीं जाता। तू वहां क्यों जाता है? वह वहां क्यों नहीं जाता? सोम वहां क्यों नहीं जाता? कृष्ण वहां हमेशा जाता है। रामचन्द्रका हाथ। राजाका दांत। राजा वहां खाता है। मैं यहां खाता हूं। वह वहां जाता है। मैं वहां पढता हूं। तू वहां बोलता है। राजा मनुष्यको देखता है। मैं राजाको देखता हूं।

निम्न शब्द स्मरणमें रखिये—

अस्ति = (वह) है	आगच्छति = (वह) आता है
असि = (तू) है	आगच्छसि = (तू) आता है
अस्मि = (मैं) हूं	आगच्छामि = (मैं) आता हूं
भवति = (वह) होता है	पतति = (वह) गिरता है
भवसि = (तू) होता है	पतसि = (तू) गिरता है
भवामि = (मैं) होता हूं	पतामि = (मैं) गिरता हूं

इन क्रियापदोंका प्रयोग करके अब आप वाक्य बनाइये—

सः अस्ति।	वह है।
सः तत्र न अस्ति।	वह वहां नहीं है।
अहं अत्र अस्मि।	मैं यहां हूं।
अत्र अहं अस्मि।	यहां मैं हूं।
अस्मि अहं अत्र।	हूं मैं यहां।
मनुष्यः भूपः भवति।	मनुष्य राजा होता है।
भूपः मनुष्यः भवति।	राजा मनुष्य होता है।
नरः अत्र आगच्छति।	मनुष्य यहां आता है।
भूपः सदा तत्र न भवति।	राजा हमेशा वहां नहीं होता है।
अहं अधुना तत्र न आगच्छामि।	मैं अब वहां नहीं आता हूं।

सः पुरुषः सदा किं पतति ?	वह मनुष्य हमेशा क्यों गिरता है ?
किं त्वं पुरुषस्य स्कंधं पश्यसि ?	क्या तू पुरुषका कंधा देखता है ?
किं स कृष्णस्य दन्तं न पश्यति ?	क्या वह कृष्णका दांत नहीं देखता है ?
इदानीं भूपस्य हस्तात् केशः पतति ।	अब राजाके हाथसे केश गिरता है ।
स पुरुषः कुत्र अस्ति ?	वह पुरुष कहां है ?
इदानीं स पुरुषः तत्र नास्ति ।	अब वह पुरुष वहां नहीं है ।
भूपः इदानीं कुत्र गतः ?	राजा अब कहां गया ?
अहं अस्मि भूपः ।	मैं हूं राजा ।
स भूपः नास्ति ।	वह राजा नहीं है ।

अब आप निम्नलिखित वाक्य पढकर समझ सकते हैं—

अहं इदानीं न पठामि । स सदा तत्र पश्यति । त्वं इदानीं किं खादसि ? अहं न किमपि वदामि । रामः यत्र गच्छति, तत्र सोमः सदा आगच्छति । कः पुरुषः भूपं पश्यति ? इदानीं स पुरुषः भूपं पश्यति । कदा त्वं तत्र गच्छसि ? यदा सः नरः तत्र न गच्छति, तदा त्वं अत्र आगच्छ । रामः भूपः अस्ति । कृष्णः इदानीं रामं वदति । सोमः इदानीं कुत्र अस्ति ? यत्र हस्तः पतति, तत्र केशः नास्ति । यत्र रामः पश्यति, तत्र स पुरुषः नास्ति । यदा त्वं आगच्छसि, तदा अहं गच्छामि । त्वं किमपि किं न वदसि ? स इदानीं किमपि न पठति । यथा कृष्णः पठति, तथा रामः पठति । यथा अहं गच्छामि, तथा त्वं किं न गच्छसि ?

निम्नलिखित भाषावाक्योंके संस्कृत वाक्य बनाइये—

मैं जाता हूं । मैं अभी जाता हूं । मैं आज नहीं जाता । मैं आज वहां नहीं जाता । तू वहां आज जाता है । क्या तू आज वहां जाता है ? तू आज वहां क्यों नहीं जाता ? अब तू यहां आता है ? नहीं, मैं आज वहां नहीं जाता हूं ।

पाठ ६

निम्नलिखित वाक्योंके भाषावाक्य बनाइये—

अहं गच्छामि। अहं अद्य गच्छामि। अहं अद्य न गच्छामि। अहं अद्य तत्र न गच्छामि। त्वं अद्य तत्र न गच्छसि। किं त्वं अद्य तत्र गच्छसि? अद्य तत्र त्वं किं न गच्छसि? अधुना त्वं अत्र आगच्छसि? नहि, अहं अद्य तत्र न आगच्छामि।

देवः कुत्र अस्ति? भूपः तत्र न अस्ति। केशस्य कः वर्णः? केशस्य कृष्णः वर्णः। दंतस्य वर्णः कः? ओष्ठस्य वर्णः कः? हस्तस्य कः वर्णः? अत्र सः पुरुषः अस्ति किं? स अत्र अस्ति। पुरुषः भूपं पश्यति। भूपः नरं पश्यति किम्?

निम्नलिखित वाक्य पढ़िये—

१ अहं नैव गच्छामि। २ त्वमद्य कुत्र गच्छसि? ३ सोऽद्यात्राऽऽगच्छति। ४ त्वं तत्राऽद्य गच्छसि किम्?

संधि किये हुए वाक्य।

कृष्णो न गच्छति। रामो न वदति। सोमो गच्छति। वायुः सदा गच्छति। कृष्णः किं न वदति? जयचंद्रः किं न पश्यति? सर्वमित्रो न खादति। स तत्र किं न खादति? यदा रामोऽत्र पठति, तदा स तत्र खादति। यदा कृष्णस्तत्र गच्छति, तदा स नैव पठति।

यदि कोई कठिनता हुई, तो पाठ ३ में ये वाक्य देखिये।

अकारान्त पुल्लिंग नामोंके रूप करना पाठक अब जानते हैं। अकारान्त नपुंसकलिंग नामोंके रूप भी, प्रथमा और द्वितीयाको छोड़कर शेष विभक्तियोंके पूर्ववत् ही होते हैं—

१ पुस्तकं = पुस्तक	४ पुस्तकाय = पुस्तकके लिये
हे पुस्तक != हे पुस्तक!	५ पुस्तकात् = पुस्तकसे
२ पुस्तकं = पुस्तकको, पुस्तकके प्रति	६ पुस्तकस्य = पुस्तकका
३ पुस्तकेन = पुस्तकने	७ पुस्तके = पुस्तकमें

पाठक इसमें देख लें कि प्रथमा और द्वितीया किंवा केवल प्रथमाको छोडकर शेष रूप पुल्लिंगके समान ही हुए हैं। यदि पाठक यह एक नियम ध्यानमें रखेंगे, तो पुल्लिंग और नपुंसकलिंग अकारांत नामोंके रूप बनाना उनके लिये अत्यन्त सुगम बात होगी।

अब यहां कई नपुंसकलिंग अकारांत शब्द देते हैं—

नयनं	= आंख	पात्रं	= बर्तन
नेत्रं	= आंख	जलं	= पानी
उदरं	= पेट	सलिलं	= पानी
नखं	= नाखून	अंबरं	= आकाश
ललाटं	= मस्तक	कमलं	= कमल
वस्त्रं	= वस्त्र, कपडा	पुष्पं	= फूल
भूषणं	= गहना	फलं	= फल
नगरं	= शहर	पुस्तकं	= किताब
पत्रं	= पान, पत्ता	द्वारं	= दरवाजा
वनं	= वन	गृहं	= घर

ये अकारान्त नपुंसकलिंगी शः

रूप आप सुगमतासे बना सकते हैं। देखिये, इनसे कैसे वाक्य बनते हैं—

१ सः रामस्य नयनं पश्यति।	१ वह रामका आंख देखता है।
२ रामः कृष्णस्य वस्त्रं न पश्यति।	२ राम कृष्णका वस्त्र नहीं देखता।
३ देवदत्तः भूपस्य नगरं न गच्छति।	३ देवदत्त राजाके नगरको नहीं जाता।
४ सोमः फलं खादति।	४ सोम फल खाता है।
५ स इदानीं फलं किं न खादति?	५ वह अब फल क्यों नहीं खाता?
६ स अधुना पुस्तकं पठति।	६ वह अब किताब पढता है।

अब आप निम्नलिखित वाक्य पढते ही समझ सकते हैं—

हरिश्चन्द्रस्य भूषणं कुत्र अस्ति? त्वं फलं किमपि किं न खादसि? यत्र सः पठति, तत्र रामचन्द्रस्य पुस्तकं अस्ति किम्?

यत्र भरद्वाजः पठति, तत्र रामचन्द्रस्य पुस्तकं न अस्ति। भूपस्य नगरं कुत्र अस्ति? कृष्णस्य पात्रे जलं न अस्ति। पात्रं कुत्र अस्ति? पात्रं अत्र अस्ति। सः नगरात् नगरं गच्छति। जले कमलं अस्ति। सलिले कमलं न अस्ति। द्वारं कुत्र अस्ति? गृहस्य द्वारं अत्र अस्ति। वने सलिलं न अस्ति। यत्र जलं न अस्ति, तत्र स किं न गच्छति? त्वं अत्र किं न आगच्छसि? अहं न पतामि।

निम्नलिखित भाषा-वाक्योंके संस्कृत वाक्य बनाइये—

घरका द्वार यहां है। रामचन्द्रका वस्त्र कहां है? जलमें कमल क्यों नहीं है? कृष्णका भूषण कहां है? देवदत्तका पुस्तक यहां नहीं है। राजाका नगर कहां है? वह नगरसे जाता है। यह फल खाता है। तू फल क्यों नहीं खाता?

संधि।

संस्कृत वाक्योंमें निम्नलिखित प्रकार मेल (संधि) होते हैं। इनका स्मरण करना उचित है।

न	+ अस्ति	—	नास्ति	(नहीं है)
न	+ एव	—	नैव	(बिलकुल नहीं)
किं	+ अस्ति	—	किमस्ति	(क्या है)
अहं	+ अस्मि	—	अहमस्मि	(मैं हूं)
किं	+ अपि	—	किमपि	(कुछ भी)

इनका उपयोग निम्न प्रकार होता है—

स तत्र नास्ति।	वह वहां नहीं है।
तत्र पुस्तकं नैव अस्ति।	वहां पुस्तक बिलकुल नहीं है।
तत्र किमपि नास्ति।	वहां कुछ भी नहीं है।
अत्र अहमस्मि।	यहां मैं हूं।
त्वं किं किमपि न पठसि?	तू क्यों कुछ नहीं पढता?
भूपस्य नगरे भूपः अस्ति।	राजाके नगरमें राजा है।

पाठ ७

किं त्वं नगरात् आगच्छसि ?	क्या तू नगरसे आता है ?
नहि, अहं वनात् आगच्छामि ।	नहीं, मैं वनसे आता हूं ।
वने किमस्ति ?	वनमें क्या है ?
वने सलिलं अस्ति ।	वनमें जल है ।
जले कमलं नास्ति ।	जलमें कमल नहीं है ।
पुस्तके पत्रं अस्ति किम् ?	पुस्तकमें पत्र है क्या ?
देवदत्तस्य पुस्तके पत्रं नास्ति ।	देवदत्तके पुस्तकमें पत्र नहीं है ।

संधि ।

पाठकोंका संधियोंके साथ थोडा परिचय हुआ है । विशेष परिचय होनेके लिये पाठ ६ के कुछ वाक्य यहां सन्धि करके दिये जाते हैं—

अहमिदानीं न पठामि । स सदा तत्र पश्यति । त्वमिदानीं किं खादसि ? अहं न किमपि वदामि । रामो यत्र गच्छति, तत्र सोमः सदाऽऽगच्छति । कः पुरुषो भूपं पश्यति ? इदानीं स पुरुषो भूपं पश्यति । कदा त्वं गच्छसि ? यदा स नरस्तत्र न गच्छति, तदा त्वं अत्राऽगच्छ । रामो राजाऽस्ति । कृष्णस्तदानीं रामं वदति । सोम इदानीं कुत्रास्ति ? यत्र यत्र हस्तः पतति, तत्र तत्र केशो नास्ति । यत्र रामः पश्यति, तत्र स पुरुषो नास्ति । यदा त्वमागच्छसि, तदाऽहं गच्छामि । त्वं किं किमपि न वदसि ? सः इदानीं किमपि न पठति । यथा कृष्णः पठति, तथा रामः पठति । यथाऽहं गच्छामि, तथा त्वं किं न गच्छसि ?

पाठक यहां देखें कि संधि कहां हुए हैं और कहां नहीं ।

हरएक भाषामें गुण बतानेवाले शब्द होते हैं । उनको ' विशेषण ' कहते हैं । जैसा ' काला कपडा ' इसमें ' काला ' यह विशेषण है । इसी प्रकार संस्कृतमें भी बहुत विशेषण हैं और उनका उपयोग वाक्योंमें करना आवश्यक होता है । विशेषणोंका उपयोग इस पाठमें बतानेका विचार है, इसलिये यहां थोडेसे विशेषण दिये जाते हैं—

विशेषण

श्वेत	= सफेद।	दीर्घ	= लम्बा।
कृष्ण	= काला।	विशाल	= बडा।
रक्त	= लाल।	कृपण	= कंजूस।
पीत	= पीला।	उदार	= उदार।
हरित	= हरा।	बलिष्ठ	= बलवान्।
नील	= नीला।	ह्रस्व	= छोटा।
शुभ्र	= श्वेत।	वदान्य	= दाता।
अन्ध	= अन्धा।	नवीन	= नया।
बधिर	= बहरा।	पुराण	= पुराना।
वाचाल	= बहुत बोलनेवाला।	धनाढ्य	= धनी।
धीर	= धैर्यवान्।	विज्ञ	= ज्ञानी।
वीर	= शूरवीर।	कोमल	= कोमल।
शोभन	= उत्तम।	मूढ	= मूर्ख।

विशेषणके रूप विशेष्यके समान ही होते हैं। विशेषण द्वारा जिसका गुणवर्णन किया जाता है, उसको विशेष्य कहते हैं।

यहां विशेषणोंके उपयोग करनेकी रीति देखिये—

श्वेतः अश्वः — सफेद घोडा।
श्वेतं कमलं — सफेद कमल।
श्वेता ज्योत्स्ना — सफेद चांदनी।

यहाँ अश्व शब्द अकारान्त पुल्लिंग होनेसे 'अश्व' शब्दके समान 'श्वेत' शब्दका रूप हुआ है। उसी प्रकार 'कमल' शब्द नपुंसकलिंग और 'ज्योत्स्ना' शब्द स्त्रीलिंग होनेके कारण दूसरे वाक्यमें श्वेत शब्दका रूप 'कमल' और 'ज्योत्स्ना' शब्दके रूपके समान बना है। इसीसे ज्ञात हो सकता है कि किस ढंगसे विशेषण विशेष्यके साथ चलता है। अब आप निम्नलिखित वाक्य देखेंगे, तो विशेष्य और विशेषणका उक्त नियम आपके ध्यानमें आ सकता है—

शोभनं वनं।	विशालं उदरं।	नवीनं कमलं।
पुराणं वस्त्रं।	शुभ्रं पुष्पं।	नीलं कमलं।
रक्तं वस्त्रं।	हरितं वनं।	शोभनं पुस्तकं।
पीतं पुष्पं।	शोभनं जलं।	पीतं वस्त्रं।

ये नपुंसकलिंग विशेष्य और उनके साथ विशेषण हैं। अब पुलिंग विशेष्य और उनके साथ विशेषणके रूप देखिये—

शोभनः पुरुषः। विशालः कर्णः। नवीनः बालकः।
पुराणः पुरुषः। शुभ्रः वर्णः। नीलः वर्णः।
रक्तः वर्णः। हरितः वृक्षः। शोभनः गल्लः।
बलिष्ठः पुरुषः। धीरः पुरुषः। वाचालः मनुष्यः।

ये विशेषण स्त्रीलिंग शब्दोंमें कैसे लगते हैं वह देखिये—

उत्तमा स्त्री। शोभना माता। नवीना पुत्री।

ये विशेष्य स्त्रीलिंग होनेसे विशेषण भी उसी प्रकार हो गये हैं। यही बात पाठक निम्नलिखित वाक्योंमें देख सकते हैं—

शोभनस्य नगरस्य विशालं द्वारं।	उत्तम नगरका बडा फाटक।
धनाढ्यस्य पुरुषस्य रक्तं वस्त्रम्।	धनी मनुष्यका लाल कपडा।
शोभने जले नवीनं कमलम्।	उत्तम जलमें नवीन कमल।

इन वाक्योंमें पाठक देख सकते हैं कि विशेष्यके रूपोंके समान ही विशेषणके रूप बने हैं। संस्कृत भाषाकी यह विशेषता पाठक अवश्य ध्यानमें धारण करें।

संधि।

पाठक संधियोंके साथ अब अच्छी प्रकार परिचित हुए हैं। वे ही संधि बनाकर निम्नलिखित वाक्य लिखे हैं। इन्हें पढनेसे पाठकोंको पता लग सकता है कि कहां, किस प्रकार सन्धि हुए हैं—

संस्कृत–वाचन–पाठः।

अहं वदामि। वदाम्यहम्। त्वं वदसि। वदसि त्वम्। स वदति। वदति सः। अहं पठामि। पठाम्यहम्। अहं पश्यामि। पश्याम्यहम्। अहं खादामि। खादाम्यहम्। अहं गच्छामि। गच्छाम्यहम्। स गच्छति। स वदति। स खादति। स पश्यति। स पठति। तत्राहं पठामि। त्वं कुत्र पठसि? सोऽत्र पठति। स यत्र पठति, तत्राहं पठामि। अहमत्र पश्यामि। त्वं कुत्र पश्यसि? स तत्र पश्यति।

❀

अब कुछ संस्कृत वाक्य पढ़िये—

रामचंद्रस्य नवीनं गृहं शोभनं अस्ति।	रामचन्द्रका नवीन घर सुन्दर है।
श्रीकृष्णस्य पुराणं नगरं कुत्र अस्ति?	श्रीकृष्णका पुराना शहर कहां है?
विज्ञस्य पुरुषस्य शोभनं पुस्तकं अत्र नास्ति।	ज्ञानी मनुष्यका उत्तम पुस्तक यहां नहीं है।
त्वं विशालं वनं इदानीं गच्छसि किम्?	तू विशाल वनके प्रति अब जाता है क्या?
नहि, इदानीं अहं भूपस्य शोभनं नगरं गच्छामि।	नहीं, अब मैं राजाके सुन्दर नगरको जाता हूं।
सः पुरुषः भूपस्य शोभनात् नगरात् इदानीं एव आगच्छति।	वह मनुष्य राजाके सुन्दर नगरसे अभी आता है।
सः बलिष्ठः पुरुषः इदानीं कुत्र अस्ति?	वह बलवान् पुरुष अब कहां है?
बलिष्ठस्य पुरुषस्य शरीरं शोभनं अस्ति।	बलवान् पुरुषका शरीर सुन्दर होता है।
रामः वनं गच्छति।	राम वनको जाता है।

पाठ ८

अब निम्नलिखित शब्द स्मरण कीजिये—

१ अहं = मैं	५ मत् = मुझसे
२ मां = मुझे, मुझको	६ मम = मेरा
३ मया = मैंने	७ मयि = मुझमें
४ मह्यं = मेरे लिये	

अब इनका उपयोग देखिये—

अहं मम गृहं इदानीं एव गच्छामि ।	मैं अपने घर अभी जाता हूं ।
त्वं मम गृहं इदानीं एव आगच्छसि किम् ?	क्या तू मेरे घर अभी आता है ?
स पुरुषः मां वदति ।	वह मनुष्य मुझसे कहता है ।
अहं नगरात् नगरं गच्छामि ।	मैं शहरसे (दूसरे) शहर जाता हूं ।
मम गृहं शोभनं नास्ति किम् ?	क्या मेरा घर सुन्दर नहीं है ?

अब इस अवसरपर ये शब्द ध्यानमें रखिये—

सह = साथ	सकाशात् = पाससे
साकं = साथ	सत्वरं = शीघ्र
प्रति = प्रति	दत्तः = दिया हुआ
कृतः = किया हुआ	उक्तः = कहा हुआ
गतः = गया हुआ	पठितः = अध्ययन किया हुआ

मया सह स पुरुषः आगच्छति ।	मेरे साथ वह पुरुष आता है ।
स मम सकाशात् सत्वरं गतः ।	वह मेरे पाससे शीघ्र गया ।
मया रामाय फलं दत्तम् ।	मैंने रामके लिये फल दिया ।
भूपेन मह्यं धनं दत्तम् ।	राजाने मेरे लिये धन दिया ।
मया उक्तं ।	मैंने कहा ।
मया कृतं ।	मैंने किया ।
मया इदानीं एव कृतम् ।	मैंने अभी किया ।
मया साकं स गच्छति ।	मेरे साथ वह नहीं जाता है ।

पाठ ९

अहं सत्वरं आगच्छामि । किं त्वं मम गृहं प्रति इदानीं एव सत्वरं न आगच्छसि ? स कुत्र गतः ? मया धनं न दत्तं । मया किं इदानीं उक्तम् ? त्वं इदानीं किमपि किं न वदसि ? स इदानीं कुत्र गतः ? त्वं इदानीं यत्र गच्छसि तत्र स आगच्छति किम् ?

पुरुषस्य वस्त्रं कुत्र अस्ति ? स इदानीं फलं खादति। मम पुस्तकं यत्र अस्ति, तत्र त्वं इदानीं किं न गच्छसि ?

निम्नलिखित भाषावाक्योंका संस्कृत कीजिये—

मैं अब नहीं जाता हूं। तू मेरे साथ आता है। वह मेरे साथ क्यों नहीं आता ? मेरा पुस्तक कहां है ? जहां मेरा घर है, वहां तू अब आता है ? मैं अपने घर जाता हूं। क्यों तू नहीं आता ? वह आता है। मैं शीघ्र जाता हूं।

निम्नलिखित शब्द ध्यानमें रखिये—

१ त्वं = तू	५ त्वत् = तेरे पाससे
२ त्वां = तुझे, तुझको	६ तव = तेरा
३ त्वया = तेरेसे, तुझसे	७ त्वयि = तुझमें
४ तुभ्यं = तेरे लिये	

'युष्मत्' (तू) इस शब्दके ये सातों विभक्तिके रूप हैं। इसीसे निम्नलिखित वाक्य बनते हैं—

अहं त्वया सह नगरं गच्छामि। त्वं मया सह नगरं गच्छसि। स मया सह तत्र न गच्छति, परंतु त्वया सह अत्र पठति। तव गृहं शोभनं अस्ति। मया तुभ्यं धनं दत्तम्। त्वया मह्यं धनं न दत्तम्। स पुरुषः मम पुस्तकं त्वया सह पठति। त्वं वीरः पुरुषः असि। स शोभनः भूपः अस्ति। तव वीरः पुत्रः कुत्र अस्ति ? तव गृहे त्वं किं न पठसि ? अत्र त्वं कदा आगच्छसि ? तव फलं कुत्र अस्ति ? यत्र बलभद्रस्य वस्त्रं अस्ति। त्वया अद्य किमपि न कृतम् किं ? तव नगरात् अहं अद्य इदानीं एव आगतः।

मैं तेरे साथ शहरको जाता हूं। तू मेरे साथ शहरको जाता है। वह मेरे साथ वहां नहीं जाता है, परन्तु तेरे साथ यहां पढता है। तेरा घर सुन्दर है। मैंने तेरे लिये धन दिया। तूने मेरे लिये धन नहीं दिया। वह मनुष्य मेरी पुस्तक तेरे साथ पढता है। तू वीर पुरुष है। वह उत्तम राजा है। तेरा वीर पुत्र कहां है ? अपने घर तू क्यों नहीं पढता है ? यहां तू कब आता है ? तेरा फल कहां है ? जहां बलभद्रका वस्त्र है। तूने आज कुछ भी नहीं किया ? तेरे नगरसे मैं आज अभी आ गया।

संधि किये हुए वाक्य ।

पूर्व पाठोंमें दिये वाक्योंके संधि नीचे दिये हुए वाक्योंमें देखिये । इन वाक्योंको पाठक पूर्व पाठोंमें देख सकते हैं ।

तदाऽहं तत्र गच्छामि । तदा तत्राऽहं गच्छामि । तदा तत्र गच्छाम्यहम् । कस्तत्र गच्छति ? तत्र को गच्छति ? गच्छति कस्तत्र ? यदाऽहं तत्र न पश्यामि, तदा तत्र स गच्छति । यदा तत्राऽहं न पश्यामि, स तदा तत्र गच्छति । यदा तत्र न पश्याम्यहं, स तदा तत्र गच्छति । यदा त्वं तत्र न पश्यसि, तदा सोऽत्र वदति । यदा त्वं तत्र पश्यस्यत्र तदा स वदति । यदा त्वं तत्र पश्यसि, तदा स वदत्यत्र । कदा त्वमत्र खादसि ?

यत्र स पश्यति, तत्राहं गच्छामि । स तत्र खादति । त्वं कुत्र खादसि ? यत्र स गच्छति, तत्राऽहं गच्छामि । को वदति ? स किं वदति ? स तत्र न वदति। त्वं तत्र किं खादसि ? अहं न वदामि । नाऽहं वदामि । न वदाम्यहम् । स गच्छति । त्वं न पश्यसि ।

तदाऽहमत्र खादामि । यदा त्वं तत्र खादस्यहं तदाऽत्र खादामि । यदा त्वं तत्र खादसि, तदाऽत्राहं खादामि । यदा त्वं तत्र खादसि, तदाऽत्र खादाम्यहम् ।

अहं तत्र न पश्यामि । तत्राहं न पश्यामि । न तत्र पश्याम्यहम् । स तत्र न गच्छति । त्वमत्र किं पश्यसि ? त्वं किं पश्यस्यत्र ? किमत्र त्वं पश्यसि ? अहं तत्र गच्छामि । तत्राऽहं गच्छामि । गच्छाम्यहं तत्र । यत्र स गच्छति, तत्राहं गच्छामि । यत्र स गच्छत्यहं तत्र गच्छामि । यत्र स गच्छति, गच्छाम्यहं तत्र । यत्र स गच्छति, गच्छामि तत्राहम् । यत्राहं पश्यामि, तत्र त्वं किं न पश्यसि ? यत्र पश्याम्यहं तत्र त्वं किं न पश्यसि ? यत्र स पश्यति, तत्राहं पश्यामि । यत्र स पश्यति तत्र पश्याम्यहम् । यत्र स पश्यत्यहं तत्र पश्यामि ।

नहि, नाहं तत्र गच्छामि । नहि, न तत्राहं गच्छामि । नहि, न तत्र गच्छाम्यहम् । नह्यहं तत्र गच्छामि ।

सूचना ।

इसमें वाक्योंके शब्द इधर उधर करनेसे सन्धियोंमें कौनसा और कैसा भेद होता है, यह बताया है। पाठक थोडे ही परिश्रमसे कौनसा शब्द आगे पीछे किया है, यह जान सकते हैं ।

अब निम्नलिखित शब्द स्मरण कीजिये—

यदि = यदि	नोचेत् = नहीं तो
तर्हि = तो	युक्तं = ठीक
कथं = कैसे	सत्यं = सच

यदि त्वं तत्र न गच्छसि, तर्हि अहं अत्र एव आगच्छामि।	यदि तू वहां नहीं जाता, तो मैं यहां ही आता हूं ।
यदि त्वं वदसि, तर्हि अहं वदामि ।	यदि तू बोलता है, तो मैं बोलता हूं ।
यदा त्वं पठसि, तदा अहं न पठामि ।	जब तू पढता है, तब मैं नहीं पढता ।
यदि त्वं इदानीं फलं न खादसि, तर्हि अहं नैव फलं खादामि ।	यदि तू अब फल नहीं खाता, तो मैं भी फल नहीं खाता हूं ।
सत्यं वदामि ।	मैं सच कहता हूं ।
त्वं युक्तं वदसि ।	तू ठीक कहता है ।
स न सत्यं वदति ।	वह सच नहीं बोलता ।
कथं त्वं एवं वदसि ?	कैसे तू ऐसे बोलता है ?

अब आप निम्नलिखित वाक्य पढते ही समझ सकते हैं—

यदि त्वं गच्छसि, तर्हि अहं न गच्छामि। यदि स भूपः अत्र आगच्छति, तर्हि अहं किमपि न वदामि। कुत्र त्वं इदानीं गच्छसि ? यत्र त्वं न गच्छसि। स किं न किमपि वदति ? न युक्तं उक्तं त्वया। स इदानीं न सत्यं वदति। स सर्वदा एव सत्यं वदति। इदानीं त्वं किं वदसि ? यदा त्वं वदसि तदा सः किं करोति ? यदा रामः फलं खादति तदा गोविंदः कुत्र भवति ?

अब निम्नलिखित भाषावाक्यके संस्कृत वाक्य बनाइये—

तू कहां जाता है ? वह अब कहां है ? राजा नगरमें है । तू अपने घरमें है । मैं तेरे घरमें हूं । तू तेरे घरमें नहीं है । अब तू मेरे घरमें पुस्तक पढता है । तू उत्तम शब्द बोलता है । वह अब सत्य नहीं बोलता । तू अब ठीक क्यों नहीं बोलता ? तू जहां जाता है, वहां वह नहीं जाता । मैं अभी शीघ्र जाता हूं । वह घरमें नहीं है । वह अब घरमें ही है ।

संधि किये हुए वाक्य ।

रामो गच्छति । कृष्णो वदति । सोमो न गच्छति । कृष्णस्तत्र न पश्यति । तत्र कृष्णो न पश्यति । तत्र न कृष्णः पश्यति । न कृष्णस्तत्र पश्यति । कृष्णो न गच्छति । न कृष्णो गच्छति । रामो न वदति । न रामो वदति । सोमो गच्छति । वायुः सदा गच्छति । सदा वायुर्गच्छति । कृष्णः किं न वदति ? किं कृष्णो न वदति ? किं न कृष्णो वदति ? जयचन्द्रः किं न पश्यति ? किं जयचन्द्रो न पश्यति ? किं न जयचन्द्रः पश्यति ? सर्वमित्रो न खादति । न सर्वमित्रः खादति । स तत्र किं न खादति ?

पाठ १०

अब निम्नलिखित शब्द स्मरणमें रखिये—

१ कः	= कौन	४ कस्मै	= किसके लिये
२ कं	= किसे	५ कस्मात्	= किसके पाससे
३ केन	= किससे, किसने, किसके द्वारा	६ कस्य	= किसका
		७ कस्मिन्	= किसमें

इन शब्दोंका उपयोग निम्नलिखित प्रकारसे कीजिये और वाक्य बनाइये—

कः सः पुरुषः अस्ति ?	कौन वह मनुष्य है ?
त्वं कं पुरुषं पश्यसि ?	तू किस पुरुषको देखता है ?
तुभ्यं केन नरेण धनं दत्तम् ?	तुझे किस मनुष्यने धन दिया ?
कस्मै जनाय त्वया वस्त्रं दत्तम् ?	किस मनुष्यके लिये तूने वस्त्र दिया ?
कस्मात् नगरात् त्वं इदानीं आगतः ?	किस नगरसे तू अब आ गया है ?
कस्य गृहे सः इदानीं अस्ति ?	किसके घर वह अब है ?
कस्मिन्नगरे कमलं नास्ति ?	किस शहरमें कमल नहीं है ?

अब आप निम्नलिखित वाक्य पढते ही शीघ्र समझ सकते हैं ।

कः मनुष्यः अत्र अस्ति ? अत्र कः पुरुषः न अस्ति ? अहं एव अत्र इदानीं अस्मि । इदानीं त्वं पुस्तकं पठसि किम् ? स कृपणः पुरुषः तत्र नास्ति । अत्र त्वं कदा आगच्छसि ? त्वं सदा सत्यं वदसि, तथा अहं सदा युक्तं वदामि ।

अब निम्नलिखित शब्द स्मरण कीजिये—

लिखति = (वह) लिखता है	तिष्ठति = (वह) खडा रहता है
लिखसि = (तू) लिखता है	तिष्ठसि = (तू) खडा रहता है
लिखामि = (मैं) लिखता हूँ	तिष्ठामि = (मैं) खडा रहता हूँ
पचति = (वह) पकाता है	धावति = (वह) दौडता है
पचसि = (तू) पकाता है	धावसि = (तू) दौडता है
पचामि = (मैं) पकाता हूँ	धावामि = (मैं) दौडता हूँ

संधि किये हुए वाक्य ।

रामोऽत्र पठति, तदा तत्र स खादति । यदात्र रामः पठति, तदा तत्र स खादति । रामो यदाऽत्र पठति, तदा तत्र स खादति । यदा कृष्णस्तत्र गच्छति, तदा स नैव पठति । कृष्णो यदा तत्र गच्छति, तदा स नैव पठति । यदा तत्र गच्छति कृष्णस्तदा स नैव पठति । अहमागच्छामि । आगच्छाम्यहम् । त्वमागच्छसि । अहं नागच्छामि । नागच्छाम्यहम् ।

यदा त्वं लिखसि, तदा स तत्र धावति। यदा स गृहे तिष्ठति, तदा अहं पुस्तकं न पठामि। यदा स धावति तदा स फलं न खादति। यदा त्वं पचसि तदा अहं लिखामि। स पुरुषः इदानीं धावति। स वीरः पुरुषः कदा अत्र आगतः? त्वं किमपि किं न लिखसि? स किं अत्र तिष्ठति? स किं धावति?

निम्नलिखित हिन्दी वाक्योंका संस्कृत बनाइये—

जब तू बोलता है, तब वह दौडता है। वह क्यों पकाता है? वह क्यों नहीं आया? वह कहां है? मैं यहां हूँ। वह मनुष्य आज क्यों दौडता है? जब तू फल खाता है, तब वह पत्र लिखता है। यदि तू नहीं देखता, तो वह नहीं जाता। तू यहां क्यों खडा है? वह यहां क्यों नहीं है? तू उसको पत्र क्यों नहीं लिखता है? तू कहां देखता है? तू वहां क्यों नहीं देखता है?

अब निम्नलिखित वाक्य आप पढते ही समझ सकते हैं—

त्वं इदानीं किं पश्यसि? सः अधुना कुत्र गतः? राम इदानीं तत्र नास्ति किम्? अहं नगरात् इदानीं एव आगतः। अहं शीघ्रं पुस्तकं पठामि। तव पुस्तकं अहं नैव पठामि। मम पुस्तकं एव अहं पठामि। त्वं इदानीं मम पुस्तकं पश्यसि। यदा त्वं तत्र गच्छसि, तदा स कुत्र भवति? यदि त्वं फलं न खादसि, तर्हि अहं न खादामि। अधुना स पत्रं लिखति। स पुस्तकेन सह अत्र आगच्छति। त्वं रामेण सह अत्र आगच्छसि किम्? कथं स तत्र न गच्छति? पुस्तकस्य पत्रं कुत्र अस्ति? तव गृहं कुत्र अस्ति? मम गृहं तव गृहस्य समीप एव अस्ति।

त्वं इदानीं सूर्यं पश्यसि। सूर्यः कुत्र अस्ति? सूर्यः आकाशे अस्ति। अधुना रामः कुत्र गतः? रामः इदानीं स्वगृहं गतः। यत्र स गतः तत्र त्वं किं न गच्छसि? अहं तत्र गच्छामि, परन्तु सः न गच्छति।

पाठ ११

अब आपके दस पाठ हुए हैं। इतने पाठोंसे आपकी योग्यता कितनी हुई है, यह आप इस पाठमें देखिये। इस परीक्षाके लिये श्रीमद्भगवद्गीताके दो श्लोक यहां देते हैं—

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया॥
तमेव शरणं गच्छ सर्वभावेन भारत।
तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्॥

(भ. गी. अ. १८।६१,६२)

पदानि— ईश्वरः। सर्व+भूतानां। हृद्+देशे। अर्जुन। तिष्ठति। भ्रामयन्। सर्व+भूतानि। यंत्र+आरूढानि। मायया॥ ६१॥

तं। एव। शरणं। गच्छ। सर्व+भावेन। भारत। तत्+प्रसादात्। परां। शांतिं। स्थानं। प्राप्स्यसि। शाश्वतम्॥ ६२॥

अन्वयः— हे अर्जुन! सर्व-भूतानां हृद्देशे ईश्वरः तिष्ठति। मायया यन्त्र-आरूढानि सर्व-भूतानि भ्रामयन्॥ ६१॥

हे भारत! तं एव सर्व-भावेन शरणं गच्छ। तत्-प्रसादात् परां शांतिं शाश्वतं स्थानं प्राप्स्यसि॥ ६२॥

पाठको! आपको प्रायः इन श्लोकोंका आशय समझमें आया ही होगा। यदि नहीं आया है, तो यह अन्वय दो चार बार पढिये, तो भाव अवश्य ध्यानमें आ जायगा। आपकी सुविधाके लिये शब्दार्थ यहां दिया जाता है-

हे अर्जुन! (सर्व-भूतानां) सब प्राणियोंके (हृद्-देशे) हृदयप्रदेशमें (ईश्वरः) ईश्वर (तिष्ठति) ठहरा रहता है और (मायया) कुशलतासे (यंत्र-आरूढानि) यंत्रपर लगाये हुए चित्रोंके समान (सर्व-भूतानि) सब भूतोंको (भ्रामयन्) घुमाता है॥ ६१॥

हे (भारत) अर्जुन ! (तं एव) उसीको (सर्व-भावेन) पूर्ण भक्तिसे शरण (गच्छ) जा । (तत्-प्रसादात्) उसके प्रसादसे तू (परां) श्रेष्ठ शांति तथा शाश्वत स्थान (प्राप्स्यसि) प्राप्त करेगा ॥ ६२ ॥

इन दो श्लोकोंका आधा भाग तो आपकी समझमें आ गया था । कई शब्द आपको परिचित नहीं थे, इसलिये शेष आधा भाग आपके ध्यानमें नहीं आया था । यदि थोडे अधिक शब्द आपको परिचित हो जायेंगे, तो इस प्रकारके श्लोक भी आप अवश्य समझ जायेंगे, इतना विश्वास आपके मनमें इस समय अवश्य हुआ होगा ।

यदि थोडेसे प्रयत्नसे आप ये श्लोक समझ सकते हैं, तो आप यदि एक वर्ष इसी प्रकार करेंगे, तो रामायण, महाभारत समझनेमें आपको कोई कठिनाई नहीं होगी ।

पूर्वोक्त श्लोकोंसे बननेवाले कई वाक्य देखिये—

हृद्देशे ईश्वरः तिष्ठति । हृदये ईशः अस्ति । तं शरणं गच्छ । ईशं शरणं गच्छ । ईश्वरं शरणं गच्छ । परां शांतिं प्राप्स्यसि । शाश्वतं स्थानं प्राप्स्यसि ।

इसी प्रकार अन्य वाक्य भी बहुतसे हो सकते हैं, उनको यहां देखिये-

युद्धदेशे अर्जुनः तिष्ठतिः । रथे कृष्णः तिष्ठति । नगरे भूपः तिष्ठति । द्वारदेशे नरः तिष्ठति । भूपं शरणं गच्छ । नरं शरणं न गच्छ । शोभनं पुस्तकं प्राप्स्यसि । विपुलं धनं प्राप्स्यसि । गृहे धनं भवति ।

इस प्रकार आप अनेकानेक वाक्य बनाते जायेंगे, तो संस्कृत-भाषामें आपको प्रगति होनेमें बडी ही सहायता होगी ।

ईश्वरः कुत्र अस्ति ? ईश्वरः हृद्देशे तिष्ठति । मनुष्यस्य हृदयप्रदेशे ईशः अस्ति । मम हृदय-देशे ईश्वरः अस्ति किम् ? तव हृदये ईश्वरः अस्ति एव । अहं तं ईश्वरं सर्व-भावेन शरणं गच्छामि । त्वं तं ईश्वरं सर्व-भावेन शरणं गच्छ । तत्प्रसादेन त्वं परां शांतिं

प्राप्स्यसि, तथा शाश्वतं स्थानं तत्र प्राप्स्यसि। कः मनुष्यः इदानीं गच्छति ? सः मनुष्यः इदानीं किं पठति ? यदा स अन्नं खादति तदा त्वं किं करोषि ? यथा बालकः धावति, तथा त्वं अपि धावसि किम् ? कदा त्वं अद्य मम गृहं आगमिष्यसि ? तत्र एव त्वं गच्छ यत्र सः पुरुषः अस्ति। तस्य कूपस्य एव जलं अत्र आनय। यदा त्वं गच्छसि, तदा स आगच्छति।

संस्कृत—वाक्यानि।

यदा त्वं लिखसि, तदा स तत्र धावति। यदा स गृहे तिष्ठति, तदा अहं पुस्तकं न पठामि। यदा स धावति, तदा फलं खादति। यदा त्वं पचसि, तदा अहं लिखामि। सः पुरुषः इदानीं धावति। स वीरः पुरुषः कदा अत्र आगतः ? त्वं किमपि किं न लिखसि ? स किं अत्र तिष्ठति ? स किं धावति ?

अब इन वाक्योंको आप विनायत्न समझ सकते हैं—

त्वं इदानीं किं पश्यसि ? स अधुना कुत्र गतः ? रामः इदानीं तत्र नास्ति किम् ? अहं नगरात् इदानीमेव आगतः। अहं शीघ्रं पुस्तकं पठामि। ईश्वरः कुत्र अस्ति ? ईश्वरः हृद्देशे तिष्ठति। मनुष्यस्य हृदयप्रदेशे ईशः अस्ति। मम हृदयप्रदेशे ईश्वरः अस्ति किम् ?

पाठ १२

निम्नलिखित शब्द कण्ठ कीजिये—

१ सः = वह
२ तं = उसको
३ तेन = उसने, उससे
४ तस्मै = उसके लिये
५ तस्मात् = उससे
६ तस्य = उसका
७ तस्मिन् = उसमें

इनका अब वाक्योंमें उपयोग कीजिये—

तव पुस्तकं अहं नैव पठामि। मम पुस्तकं एव पठामि। त्वं इदानीं मम पुस्तकं पश्यसि। यदा त्वं तत्र गच्छसि, तदा स कुत्र भवति? यदि त्वं फलं न खादसि, तर्हि अहं न खादामि। अधुना स पत्रं लिखति। स पुस्तकेन सह अत्र आगच्छति। त्वं रामेण सह अत्र आगच्छसि किम्? कथं स तत्र नागच्छति? पुस्तकस्य पत्रं कुत्र अस्ति? तव गृहं कुत्र अस्ति? मम गृहं तव गृहस्य समीप एव अस्ति।

तव हृदये ईश्वरः अस्ति एव। अहं तं ईश्वरं सर्वभावेन शरणं गच्छामि। त्वं तं ईश्वरं सर्वभावेन शरणं गच्छ। विपुलं धनं प्राप्स्यसि। गृहे धनं भवति।

मम गृहे श्रीरामचन्द्रः अस्ति। तेन सह अहं भ्रमणाय गच्छामि। त्वं केन सह भ्रमणाय गच्छसि?

तस्य गृहं अत्र नास्ति।	उसका घर यहां नहीं है।
स इदानीं कुत्र अस्ति?	वह अब कहां है?
तस्य नगरं अधुना गच्छ।	उसके शहरको अब जा।
तेन तुभ्यं किं दत्तम्?	उसने तुमको क्या दिया?
केन तस्मै फलं दत्तम्?	किसने उसे फल दिया?
तस्मात् नगरात् अत्र आगच्छ।	उस नगरसे यहां आ।
तस्य ईश्वरस्य वाचकः प्रणवः अस्ति।	उस ईश्वरका वाचक प्रणव (ॐकार) है।

अब आप निम्नलिखित वाक्य पढते ही समझ सकते हैं—

संस्कृत-वाचन-पाठः।

तस्मिन् नगरे तव गृहं कस्मिन् स्थाने अस्ति? रामचन्द्रस्य गृहस्य समीपे मम गृहं अस्ति। सूर्यस्य प्रकाशे सः तिष्ठति। त्वं सूर्यस्य किरणे पुस्तकं किं पठसि? तेन मह्यं पुस्तकं दत्तं, तत्

अहं इदानीं चन्द्रस्य प्रकाशेन पठामि। त्वं दीपस्य प्रकाशे पुस्तकं पठसि किम् ? नहि, नहि, अहं दीपस्य प्रकाशे पुस्तकं न पठामि। अहं ह्यः रामचन्द्रस्य गृहं गतः। तत्र इन्द्रदत्तः किं पश्यति ? स फलं किं न खादति ? सोमेन दत्तं फलं स न खादति। रामस्य शोभनं पुस्तकं कुत्र अस्ति ? तत् नगरं गच्छ। स त्वां तत्र पश्यति। अहं अत्र त्वां पश्यामि। कथं स तत्र गच्छति ? स तत्र नास्ति।

ये शब्द अब स्मरण कीजिये—

वद	= बोल।	चल	= चल।
पठ	= पढ।	पत	= गिर जा।
भव	= हो।	कुरु	= कर।
पश्य	= देख।	देहि	= दे।
खाद	= खा।	ब्रूहि	= बोल, कह।
गच्छ	= जा।	लिख	= लिख।
आगच्छ	= आ।	तिष्ठ	= ठहर।
पच	= पका।	भ्रामय	= घुमा।
धाव	= दौड।	नय	= ले जा।
प्रापय	= पहुंचा।	उपविश	= बैठ।
		आनय	= ला।

अब इनका उपयोग करके वाक्य बनाइये—

हे रामचन्द्र ! त्वं फलं खाद।	हे रामचन्द्र ! तू फल खा।
हे मनुष्य ! पुस्तकं पठ।	हे मनुष्य ! तू पुस्तक पढ।
त्वं तत्र गच्छ।	तू वहां जा।
इदानीं सत्वरं धाव।	अब शीघ्र दौड।
सत्यं वद।	सच बोल।
पत्रं लिख।	पत्र लिख।
फलं तत्र नय।	फल वहां ले जा।

संस्कृत-वाचन-पाठः ।

ब्रूहि, स इदानीं कुत्र गतः ? वद, त्वं किं अधुना पठसि ? चक्रं भ्रामय इदानीं । अधुना धाव । फलं शीघ्रं खाद । रामस्य शोभनं पुस्तकं कृष्णस्य गृहं नय । तव रक्तं वस्त्रं कः पश्यति ? मम पीतं वस्त्रं शीघ्रं तत्र नय । अत्र एव उपविश । इदानीं अहं अत्र एव तिष्ठामि, शीघ्रं अत्र आगच्छ ।

तं तस्य गृहं प्रापय । मम पत्रं तत्र नय । तस्मै एकं पत्रं देहि । तं देशं गच्छ । अधुना ब्रूहि, त्वया किं उक्तम् ? स कदापि युक्तं न वदति । अहं सदा युक्तं सत्यं एव वदामि । गृहस्य समीपं स लिखति । स इदानीं वने वृक्षस्य समीपे तिष्ठति । फलं देहि, पुस्तकं नय, पत्रं लिख ।

पाठ १२

अब इस पाठमें निम्नलिखित शब्द कण्ठ कीजिये—

१ यः	= जो	५ यस्मात्	= जिससे
२ यं	= जिसको	६ यस्य	= जिसका
३ येन	= जिसने	७ यस्मिन्	= जिसमें
यस्मै	= जिसके लिये		

इनका उपयोग आप करेंगे, तो आप बहुतसे उपयोगी वाक्य बना सकते हैं । देखिये—

१ यः शूरः पुरुषः इदानीं मम नगरे अस्ति, स एव तत्र अद्य गच्छति । २ यं त्वं इदानीं तत्र पश्यसि, स एव स भूपः । ३ येन तुभ्यं धनं दत्तं स एव वीरः अस्ति । ४ तस्मात् नगरात् इदानीं यः मनुष्यः आगतः स एव यज्ञदत्तशर्मा अस्ति । ५ यस्य पुरुषस्य

पुस्तकं त्वं पठसि, स एव मम गृहे इदानीं अस्ति। ६ यस्मिन् गृहे सः नरः अस्ति, तत् गृहं कुत्र अस्ति ? ७ तस्य भूपस्य किं नगरम् ?

१ जो शूर मनुष्य अब मेरे नगरमें है, वही वहां आज जाता है। २ जिसको तू अब वहां देखता है, वह राजा है। ३ जिसने तुझे धन दिया, वही शूर है। ४ उस नगरसे अब जो मनुष्य आया, वही यज्ञदत्तशर्मा है। ५ जिस मनुष्यकी पुस्तक तू पढता है, वह मेरे घरमें इस समय है। ६ जिस घरमें वह मनुष्य है, वह घर कहां है ? ७ उस राजाका शहर कौनसा ?

अब निम्नलिखित शब्द स्मरण कीजिये—

वदिष्यति	= बोलेगा	(वह)	खादिष्यामि	= खाऊंगा	(मैं)
वदिष्यसि	= बोलेगा	(तू)	गमिष्यति	= जायगा	(वह)
वदिष्यामि	= बोलूंगा	(मैं)	गमिष्यसि	= जायगा	(तू)
द्रक्ष्यति	= देखेगा	(वह)	गमिष्यामि	= जाऊंगा	(मैं)
द्रक्ष्यसि	= देखेगा	(तू)	पक्ष्यति	= पकायेग	(वह)
द्रक्ष्यामि	= देखूंगा	(मैं)	पक्ष्यसि	= पकायेग	(तू)
खादिष्यति	= खायेगा	(वह)	पक्ष्यामि	= पकाऊंग	(मैं)
खादिष्यसि	= खायेगा	(तू)	करोमि	= करता हूं	(मैं)

इनका उपयोग करके अब आप वाक्य बना सकते हैं—

१ यदा त्वं तत्र गमिष्यसि, तदा अहं त्वां द्रक्ष्यामि। २ कदा त्वं भूपस्य नगरं गमिष्यसि ? ३ यदा त्वं श्वः तत्र गमिष्यसि, तदा अहं अपि तत्र एव आगमिष्यामि। ४ यदा त्वं फलं खादिष्यसि, तदा अहं अपि फलं खादिष्यामि। ५ यदा रामः अन्नं पक्ष्यति तदा त्वं अपि अन्नं खादिष्यसि। ६ यदा स पुस्तकं पठिष्यति, तदा अहं अपि पठिष्यामि। ७ यदि त्वं तत्र न गमिष्यसि, तर्हि अहं अन्नं अपि न खादिष्यामि। ८ अहं मम गृहं अद्य इदानीं गच्छामि, त्वं श्वः आगमिष्यसि। ९ कः इदानीं तत्र गमिष्यति ? १० अहं अद्य अन्नं नैव पक्ष्यामि। ११ स कदा त्वया सह अत्र आगमिष्यति ?

भाषा-वाक्य ।

१ जब तू वहां जायगा, तब मैं तुझे देखूंगा । २ कब तू राजाके नगरको जायगा ? ३ जब तू कल वहां जायगा, तब मैं भी वहां ही आऊंगा । ४ जब तू फल खायेगा, तब मैं भी फल खाऊंगा । ५ जब राम पकायेगा, तब तू भी अन्न खायेगा । ६ जब वह पुस्तक पढेगा तब मैं भी पढूंगा । ७ यदि तू वहां नहीं जायगा, तो मैं अन्न भी नहीं खाऊंगा । ८ मैं अपने घर आज अभी जाता हूं, तू कल आवेगा । ९ कौन अब वहां जायगा ? १० मैं आज अन्न नहीं पकाऊंगा । ११ वह कब तुम्हारे साथ यहाँ आयगा ?

पाठ १४

इस पाठमें आप निम्नलिखित शब्द ध्यानमें रखिये—

धाविष्यति	= दौडेगा	(वह)	चलिष्यामि	= चलूंगा	(मैं)
धाविष्यसि	= दौडेगा	(तू)	भविष्यति	= होवेगा	(वह)
धाविष्यामि	= दौडूँगा	(मैं)	भविष्यसि	= होवेगा	(तू)
प्रापयिष्यति	= पहुंचायेगा	(वह)	भविष्यामि	= होऊंगा	(मैं)
प्रापयिष्यसि	= पहुंचायेगा	(तू)	पतिष्यति	= गिरेगा	(वह)
प्रापयिष्यामि	= पहुंचाऊंगा	(मैं)	पतिष्यसि	= गिरेगा	(तू)
चलिष्यति	= चलेगा	(वह)	पतिष्यामि	= गिरूंगा	(मैं)
चलिष्यसि	= चलेगा	(तू)			

अब इनका उपयोग करके आप कई वाक्य बना सकते हैं—

संस्कृत-वाक्यानि ।

१ अहं इदानीं धाविष्यामि । २ किं त्वं न धाविष्यसि ? ३ किं स मम पत्रं तं नरं प्रापयिष्यति ? ४ यदि स नगरं गमिष्यति तर्हि तव पत्रं प्रापयिष्यति । ५ तत् कथं भविष्यति ? ६ तत् एवं

भविष्यति। ७ स इदानीं कूपे पतिष्यति। ८ नहि नहि, स इदानीं तस्मिन् कूपे नैव पतिष्यति। ९ पश्य तं, कथं स धावति? १० अहं पश्यामि, परंतु स इदानीं न धावति। ११ त्वं कुत्र पश्यसि?

भाषा-वाक्य।

१ मैं अब दौडूंगा। २ क्या तू नहीं दौडेगा? ३ क्या वह मेरा पत्र उस मनुष्यको पहुंचायेगा? ४ यदि वह शहरको जायेगा, तो तेरा पत्र पहुंचायेगा। ५ वह कैसे होगा? ६ वह ऐसा होगा। ७ वह अब कूएँमें गिरेगा। ८ नहीं, नहीं, वह अब उस कूएँमें नहीं गिरेगा। ९ देख उसे, कैसा वह दौडता है। १० मैं देखता हूं, परन्तु वह अब नहीं दौडता। ११ तू कहां देखता है?

अब निम्नलिखित शब्द स्मरण कीजिये—

मध्याह्ने	= मध्य दिनमें	सायं	= शामको
दिवा	= दिनमें	यथा	= जैसा
रात्रौ	= रात्रीमें	तथा	= वैसा
प्रातः	= सबेरे	द्रुतं	= शीघ्र

इन शब्दोंका उपयोग करके अब वाक्य बनाइये—

संस्कृत—वाक्यानि।

१ स मध्याह्ने कुत्र गच्छति? २ यत्र रामः गच्छति, तत्र एव स गच्छति। ३ त्वं रात्रौ कुत्र गमिष्यसि? ४ अहं तव गृहं गमिष्यामि। ५ स सायं नैव गमिष्यति। ६ यदा स गमिष्यति, तदा त्वं किं करिष्यसि?

भाषा-वाक्य।

१ वह मध्य दिनमें कहां जाता है? २ जहां राम जाता है, वहां ही वह जाता है। ३ तू रात्रिमें कहां जावेगा? ४ मैं तेरे घर जाऊंगा। ५ वह शामको नहीं जावेगा। ६ जब वह जायगा, तब तू क्या करेगा?

संस्कृत-वाचन-पाठः ।

अहं तव गृहं सायं आगमिष्यामि । त्वं मम गृहं सायं सत्वरं आगच्छ । स अद्य तस्य नगरं गमिष्यति, फलं भक्षयिष्यति । यथा स पुस्तकं पश्यति तथा पठति । नहि, नहि, सः पुस्तकं पश्यति, परंतु नैव पठति । स इदानीं पुस्तकं पश्यति, परन्तु किं न पठति ? त्वं तत्र दिवा किं न गमिष्यसि ? रामचन्द्रः रात्रौ दीपस्य प्रकाशेन पुस्तकं पठिष्यति । त्वं यदि अन्नं पक्ष्यसि, तर्हि अहं खादिष्यामि । तस्मिन् वने इदानीं सलिलं शोभनं भविष्यति । तस्मिन् गृहे श्वेतं वस्त्रं नास्ति । कस्मिन् गृहे रक्तं पत्रं अस्ति, वद । शीघ्रं ब्रूहि । तव पुस्तकं नवीनं अस्ति, परंतु मम पुराणं अस्ति । यदा धनाढ्यः पुरुषः गमिष्यति, तदा अहं अपि गमिष्यामि ।

पाठ १५

इस पाठमें निम्नलिखित शब्द स्मरण कीजिये—

करिष्यति = (वह) करेगा	दास्यामि = (मैं) दूंगा
करिष्यसि = (तू) करेगा	नेष्यति = (वह) ले जायगा
करिष्यामि = (मैं) करूंगा	नेष्यसि = (तू) ले जायगा
दास्यति = (वह) देगा	नेष्यामि = (मैं) ले जाऊंगा
दास्यसि = (तू) देगा	

इन शब्दोंका अब उपयोग कीजिये—

१ त्वं कर्म करिष्यसि किम् ? २ नहि, अहं अद्य नैव करिष्यामि । ३ स कर्म कदा करिष्यति ? ४ यदा त्वं करिष्यसि, तदा स करिष्यति । ५ स मह्यं फलं दास्यति । ६ त्वं मह्यं पुस्तकं नैव दास्यसि किम् ? ७ त्वं इदानीं पुस्तकं तत्र नय । ८ अहं तत्र

इदानीं नैव गमिष्यामि । ९ त्वं कदा तत्र गमिष्यसि ? १० अहं श्वः गमिष्यामि । ११ तर्हि अद्य कः गमिष्यति ? १२ प्रायः भूमित्रः अद्य सायं तत्र गमिष्यति । १३ त्वं पत्रं कदा लेखिष्यसि ? १४ अहं पत्रं अधुना एव लिखामि । १५ यदा त्वं अन्नं पक्ष्यसि, तदा स कुत्र भविष्यति ? १६ यदा अहं अन्नं पक्ष्यामि, तदा स स्वगृहे एव भविष्यति । १७ अहं कदापि नैव पतिष्यामि ।

१ क्या तू कार्य करेगा ? २ नहीं, मैं आज कभी नहीं करूंगा । ३ वह कार्य कब करेगा ? ४ जब तू करेगा तब वह करेगा । ५ वह मुझे फल देगा । ६ क्या तू पुस्तक नहीं देगा ? ७ तू अभी पुस्तक वहां ले जा । ८ मैं वहां अब नहीं जाऊंगा । ९ तू कब वहां जायेगा ? १० मैं कल जाऊंगा । ११ तब आज कौन जायगा ? १२ प्रायः भूमित्र आज शामको वहां जायेगा । १३ तू पत्र कब लिखेगा ? १४ मैं पत्र अभी लिखता हूं । १५ जब तू पकायेगा, तब वह कहां होगा ? १६ जब मैं पकाऊंगा, तब वह अपने घरमें ही होगा । १७ मैं कभी नहीं गिरूंगा ।

अब निम्नलिखित शब्द स्मरण कीजिये—

वदितुं	= बोलनेके लिये	पठितुं	= पढनेके लिये
द्रष्टुं	लिये	खादितुं	= खानेके लिये
गन्तुं	= जानेके लिये	आगन्तुं	= आनेके लिये
पक्तुं	= पकानेके लिये	धावितुं	= दौडनेके लिये
प्रापयितुं	= पहुंचानेके लिये	चलितुं	= चलनेके लिये
भवितुं	= होनेके लिये	पतितुं	= गिरनेके लिये
कर्तुं	= करनेके लिये	दातुं	= देनेके लिये
वक्तुं	= बोलनेके लिये	लिखितुं	= लिखनेके लिये
स्थातुं	= ठहरनेके लिये	भ्रामयितुं	= घुमानेके लिये
नेतुं	= ले जानेके लिये	उपवेष्टुं	= बैठनेके लिये

इन शब्दोंका उपयोग करके अब आप वाक्य बना सकते हैं—

१ अहं इदानीं तेन सह वदितुं इच्छामि। रामः तत्र गन्तुं इच्छति। ३ त्वं धनं दातुं न इच्छसि किम्? ४ स इदानीं पत्रं लेखितुं तत्र गतः। ५ त्वं तत्र फलं प्रापयितुं किं न गच्छसि? ६ अहं कन्दुकं भ्रामयितुं गतः। ७ अहं इदानीं अत्र उपवेष्टुं इच्छामि। ८ सः अद्य वक्तुं तत्र गमिष्यति। ९ अहं अद्य सायं धावितुं इच्छामि। १० स पुरुषः शोभनं अपि फलं खादितुं किं न इच्छति? ११ स साधुः अस्ति। १२ अतः न इच्छति। १३ अहं ईशं शरणं गन्तुं इच्छामि। १४ त्वं सर्वेश्वरं शरणं गच्छ।

१ मैं अब उसके साथ बोलना चाहता हूं। २ राम वहां जानेकी इच्छा करता है। ३ क्या तू धन देनेकी इच्छा नहीं करता? ४ वह पत्र लिखनेके लिये वहां गया। ५ तू वहां फल पहुंचानेके लिये नहीं जाता? ६ मैं गेंद घुमानेके लिये गया था। ७ मैं अब यहां बैठना चाहता हूं। ८ वह आज पकानेके लिये वहां जावेगा। ९ मैं आज शामको दौडना चाहता हूं। १० वह मनुष्य उत्तम फल खानेकी भी इच्छा क्यों नहीं करता? ११ वह साधु है। १२ इसलिये इच्छा नहीं करता। १३ मैं ईश्वरकी शरण जानेकी इच्छा करता हूं। १४ तू सबके ईश्वरकी शरण जा।

इस पाठमें आपको कुछ श्लोक बताये जाते हैं—

सत्यस्य वचनं श्रेयः सत्यादपि हितं वदेत्।
यद्भूतहितमत्यन्तमेतत्सत्यं मतं मम॥

(महाभारत शांति० ३२९।१३)

पदानि— सत्यस्य। वचनं। श्रेयः। सत्यात्। अपि। हितं। वदेत्। यत्। भूत+हितं। अत्यन्तं। एतत्। सत्यं। मतं। मम॥

अन्वयः— सत्यस्य वचनं श्रेयः। सत्यात् अपि हितं वदेत्। यत् अत्यन्तं भूतहितं एतत् सत्यं, (इति) मम मतम्॥

अर्थ— सत्यका भाषण (श्रेयः) कल्याण करनेवाला है। सत्यसे भी (हितं) हितकारक भाषण (वदेत्) बोलना चाहिये। जो अत्यन्त (भूत-हितं) प्राणीमात्रका हितकारी वचन, (एतत्) वह सत्य (है, ऐसा) मेरा मत है॥

यह श्लोक आपको बिना प्रयत्न समझमें आ गया होगा। कुछ शब्दोंकी कमी आपके पास इस समय है, वह यदि दूर होगी, तो ऐसे श्लोक आप सुगमतासे समझ सकते हैं।

सत्यस्य एव भाषणं श्रेयः। असत्यस्य वचनं कदापि श्रेयः न भवति। सत्यात् अपि हितं एव वक्तव्यं इति सः वदति। सत्यात् हितं एव वक्तव्यं इति मम मतम्। कस्य वचनं श्रेयः भवति? सत्यस्य एव। किं सत्यं? यत् अत्यंतं भूतहितकारकं तत् एव सत्यं। सर्वदा सत्यं एव वक्तव्यम्।

पाठ १६

संधि किये हुए वाक्य।

अहं तत्र न पश्यामि। तत्राहं न पश्यामि। न तत्र पश्याम्यहम्। स तत्र न गच्छति। त्वमत्र किं पश्यसि? त्वं किं पश्यस्यत्र? किमत्र त्वं पश्यसि? अहं तत्र गच्छामि। तत्राऽहं गच्छामि। गच्छाम्यहं तत्र। यत्र स गच्छति तत्राहं गच्छामि। यत्र स गच्छत्यहं तत्र गच्छामि। यत्र स गच्छति गच्छाम्यहं तत्र। यत्र स गच्छति गच्छामि तत्राऽहम्। यत्राहं पश्यामि तत्र त्वं किं न पश्यसि? यत्र पश्याम्यहं तत्र त्वं किं न पश्यसि? यत्र स पश्यति तत्राहं पश्यामि। यत्र स पश्यति तत्र पश्याम्यहम्। यत्र स पश्यत्यहं तत्र पश्यामि।

नहि, नाहं तत्र गच्छामि। नहि, न तत्राहं गच्छामि। नहि, न तत्र गच्छाम्यहम्। नह्यहं तत्र गच्छामि।

अहं तव गृहं सायं आगमिष्यामि। त्वं मम गृहं सायं सत्वरं आगच्छ। स अद्य तस्य नगरं गमिष्यति, फलं भक्षयिष्यति। यथा स पुस्तकं पश्यति तथा पठति। नहि नहि, सः पुस्तकं पश्यति परंतु नैव पठति। स इदानीं पुस्तकं पश्यति परंतु किं न पठति?

त्वं तत्र दिवा किं न गमिष्यसि ? रामचंद्रः रात्रौ दीपस्य प्रकाशेन पुस्तकं पठिष्यति । त्वं यदि अन्नं पक्ष्यसि तर्हि अहं खादिष्यामि । तस्मिन् वने इदानीं सलिलं शोभनं भविष्यति । तस्मिन् गृहे श्वेतं वस्त्रं नास्ति । कस्मिन् गृहे रक्तं पत्रं अस्ति, वद ।

पाठ १७

यदि पाठकोंके पूर्वपाठ ठीक हो चुके हैं, तो इस पाठके वाक्य उनको बिना परिश्रम ज्ञात हो सकते हैं । इसमें पूर्वपाठोंके ही वाक्य सन्धि बनाकर दिये हैं—

तस्य गृहमत्र नास्ति । स इदानीं कुत्रास्ति ? तस्य नगरमधुना गच्छ । तेन तुभ्यं किं दत्तम् ? केन तस्मै फलं दत्तम् ? तस्मान्नगरादत्रागच्छ । तस्येश्वरस्य वाचकः प्रणवोऽस्ति ।

तस्मिन्नगरे तव गृहं कस्मिन्स्थानेऽस्ति ? रामचन्द्रस्य गृहस्य समीपे मम गृहमस्ति । सूर्यस्य प्रकाशे स तिष्ठति । सूर्यस्य किरणे पुस्तकं किं पठसि ? तेन मह्यं पुस्तकं दत्तम् । तदहमिदानीं चंद्रस्य प्रकाशे न पठामि । त्वं दीपस्य प्रकाशे पुस्तकं पठसि किम् ? नहि नहि, अहं दीपस्य प्रकाशे पुस्तकं न पठामि । अहं ह्यो रामचंद्रस्य गृहं गतः । तत्रेन्द्रदत्तः किं पश्यति ? स फलं किं न खादति ? सोमेन दत्तं फलं स न खादति । रामस्य शोभनं पुस्तकं कुत्रास्ति ? तन्नगरं गच्छ । स त्वां पश्यति । अहमत्र त्वां पश्यामि । कथं स तत्र गच्छति ? स तत्र नास्ति ।

हे रामचन्द्र ! त्वं फलं खाद । हे मनुष्य ! पुस्तकं पठ । त्वं तत्र गच्छ । इदानीं सत्वरं धाव । सत्यं वद । पत्रं लिख । फलं तत्र नय ।

ब्रूहि, स इदानीं कुत्र गतः ? वद, त्वमधुना किं पठसि ? चक्रं भ्रामयेदानीम् । अधुना धाव । फलं शीघ्रं खाद । रामस्य शोभनं

पुस्तकं कृष्णस्य गृहं नय। तव रक्तं वस्त्रं कः पश्यति ? मम पीतं वस्त्रं शीघ्रं तत्र नय। अत्रैवोपविश। इदानीमहमत्रैव तिष्ठामि, त्वं शीघ्रमत्रागच्छ। तं तस्य गृहं प्रापय। मम पत्रं तत्र नय। तस्मादेकं पत्रं देहि। तं देशं गच्छ। अधुना ब्रूहि, त्वया किमुक्तम्। स कदापि युक्तं न वदति। अहं सदा युक्तं सत्यमेव वदामि। गृहस्य समीपं स लिखति। स इदानीं वने वृक्षस्य समीपं तिष्ठति। फलं देहि। पुस्तकं नय। पत्रं लिख।

यः शूरः पुरुष इदानीं मम नगरेऽस्ति, स एव तत्राद्य गच्छति। यं त्वं इदानीं तत्र पश्यसि, स एव स भूपः। येन तुभ्यं धनं दत्तं, स एव वीरोऽस्ति। तस्मान्नगरादिदानीं यो मनुष्य आगतः स एव यज्ञदत्तशर्माऽस्ति। यस्य पुरुषस्य पुस्तकं त्वं पठसि, स एव मम गृहे इदानीमस्ति। यस्मिन्गृहे स नरोऽस्ति, तद् गृहं कुत्रास्ति ? तस्य भूपस्य किं नगरम् ?

यदा त्वं तत्र गमिष्यसि, तदाऽहं त्वां द्रक्ष्यामि। कदा त्वं भूपस्य नगरं गमिष्यसि ? यदा त्वं श्वस्तत्र गमिष्यसि, तदाऽहमपि तत्रैवागमिष्यामि। यदा त्वं फलं खादिष्यसि, तदाऽहमपि फलं खादिष्यामि। यदा रामोऽन्नं पक्ष्यति, तदा त्वमप्यन्नं खादिष्यसि। यदा स पुस्तकं पठिष्यति, तदाऽहमपि पठिष्यामि। यदि त्वं तत्र न गमिष्यसि, तर्ह्यहमन्नमपि न खादिष्यामि। अहं मम गृहमद्येदानीं गच्छामि, त्वं श्वः आगमिष्यसि। कः इदानीं तत्र गमिष्यति ? अहमद्याऽन्नं नैव पक्ष्यामि।

अहमिदानीं धाविष्यामि। त्वं न धाविष्यसि। किं स मम पत्रं तं नरं प्रापयिष्यति ? यदि स नगरं गमिष्यति, तर्हि तव पत्रं प्रापयिष्यति। तत्कथं, भविष्यति ? तदेवं भविष्यति। स इदानीं कूपे पतिष्यति। नहि नहि, स इदानीं तस्मिन्कूपे नैव पतिष्यति। पश्य तं, कथं स धावति। त्वं कुत्र पश्यसि ?

स मध्याह्ने कुत्र गच्छति ? यत्र रामो गच्छति, तत्रैव स

गच्छति । त्वं रात्रौ कुत्र गमिष्यसि ? अहं तव गृहं गमिष्यामि । स सायं नैव गमिष्यति, तदा त्वं किं करिष्यसि ?

अहं तव गृहं सायमागमिष्यामि । त्वं मम गृहं सायं सत्वरमागच्छ। सोऽद्य तस्य नगरं गमिष्यति, फलं भक्षयिष्यति । यथा स पुस्तकं पश्यति, तथा पठति । नहि नहि, स पुस्तकं पश्यति, परन्तु नैव पठति। स इदानीं पुस्तकं पश्यति, परन्तु किं न पठति ? त्वं तत्र दिवा किं न गमिष्यसि ? रामचन्द्रो रात्रौ दीपस्य प्रकाशेन पुस्तकं पठिष्यति । त्वं यद्यन्नं पक्ष्यसि तर्ह्यहं खादिष्यामि । तस्मिन्वने इदानीं सलिलं शोभनं भविष्यति। तस्मिन्गृहे श्वेतं वस्त्रं नास्ति । कस्मिन्गृहे रक्तं वस्त्रमस्ति ? वद ।

पाठ १८

संस्कृत-वाचन-पाठः ।

शीघ्रं ब्रूहि । तव पुस्तकं नवीनमस्ति, परन्तु मम पुराणमस्ति । यदा धनाढ्यः पुरुषो गमिष्यति, तदाऽहमपि गमिष्यामि ।

त्वं कर्म करिष्यसि किम् ? नहि, अहमद्य नैव करिष्यामि। स कर्म कदा करिष्यति ? यदा त्वं करिष्यसि, तदा स करिष्यति। स मह्यं फलं दास्यति। त्वं मह्यं पुस्तकं नैव दास्यसि किम् ? त्वमिदानीं पुस्तकं तत्र नय, अहं तत्रेदानीं नैव गमिष्यामि । अहं श्वो गमिष्यामि । तर्ह्यद्य को गमिष्यति । प्रायो भूमित्रोऽद्य सायं तत्र गमिष्यति । त्वं पत्रं कदा लेखिष्यसि ? अहं पत्रमधुनैव लिखामि। यदा त्वं पक्ष्यसि, तदा स कुत्र भविष्यति ? यदाऽहमन्नं पक्ष्यामि, तदा स स्वगृह एव भविष्यति। अहं कदापि नैव पतिष्यामि ।

अहमिदानीं तेन सह वदितुमिच्छामि। रामस्तत्र गन्तुमिच्छति। त्वं धनं दातुं नेच्छसि किम् ? स इदानीं पत्रं लेखितुं तत्र गतः। त्वं तत्र फलं प्रापयितुं किं न गच्छसि ? अहं कन्दुकं भ्रामयितुं गतः। अहमिदानीमत्रोपवेष्टुमिच्छामि। सोऽद्य पक्तुं तत्र गमि-

ष्यति। अहमद्य सायं धावितुमिच्छामि। स पुरुषः शोभनमपि फलं खादितुं किं नेच्छति ? स साधुरस्ति। अतो नेच्छति। अहमीशं शरणं गन्तुमिच्छामि। सर्वेश्वरं शरणं गच्छ।

यदि सोऽद्यात्रागमिष्यति, तर्हि त्वं तत्र न गच्छ। नोचेच्छ्वः प्रातरेव गच्छ। किं त्वं पुस्तकं पठिष्यसि ? अथवा स पठिष्यति ? स सदा प्रभूतं वदति। त्वं वद। नोचेदहं वदिष्यामि। सत्यमप्ययुक्तं न वद। यदि सोऽद्येदानीं फलं न खादति, तर्हि त्वमिदानीमेव खाद। त्वं श्वः कुत्र गमिष्यसि ? यदि सोऽद्य नागमिष्यति, तर्ह्यहं तस्य गृहं श्वः सायं गमिष्यामि। कस्तत्रेदानीमेवं वदति ? तत्र रामभद्रोऽस्ति, स एवं वदति।

नहि नहि, तत्र रामचन्द्रो नास्ति। तर्हि कः सः ? स हरिश्चन्द्रोऽस्ति। स को हरिश्चन्द्रः ? स नागपुरदेशीयो विष्णुमित्रस्य पुत्रो हरिश्चन्द्र इदानीमेव नागपुरादत्रागतः। स शोभनः पुरुषोऽस्ति। स नागपुरं कदा पुनर्गमिष्यति। स परश्वः सायं नागपुरं प्रति गमिष्यति। अथवा श्व एव गमिष्यति। स केन सह आगतः ? स देवदत्तेन सहागतः। देवदत्तोऽपि तेन सह गमिष्यति किम् ? नहि, देवदत्तोऽत्रैव स्थास्यति। स एव गमिष्यति। त्वमिदानीं किं करिष्यसि ? अहमिदानीं न किमपि करोमि।

रामो गच्छति। रामं शरणं गच्छ। रामेण धनं दत्तं। रामाय छत्रं देहि। रामात् श्रेष्ठः कोऽपि नास्ति। रामस्य राज्यं। रामे चित्तं स्थिरं कर्तव्यं। हे राम ! मां तारय।

पाठ १९

संस्कृत-वाचन-पाठः।

अहं वदामि। विष्णुमित्रेण सहाहं वदामि। अहं विष्णुशर्मणा साकं वदामि। त्वं हरिश्चन्द्रेण साकं किं वदसि ? स त्वया सह किं वदति ? त्वं तं किं वदसि ? रामेण सह गोविंदः कदा वदि-

ष्यति ? स किं वदति ? स कुत्र वदति ? देवदत्तो वदति । वदति विश्वामित्रः । रघुनाथः पठति । गदाधरः खादति । खादति रघुनाथः । हे देवदत्त ! त्वं किं खादसि ? हरिश्चन्द्र ! त्वं फलं खादसि किम् ? अहं फलं खादामि । अहं किमपि न खादामि । स किमपि खादति किम् ? माधवो न खादति । किमिदानीं फलम् ? त्वमिदानीं न खादसि किम् ? अत्राहं पठामि । यत्राहं पठामि, तत्र स पठति । यत्र स पठति, तत्राहं पठामि । यत्राहं पठामि, तत्र त्वं पठ । अधुना त्वं पठ । अहं सूर्यं पश्यामि । त्वामहं पश्यामि । रामचन्द्रः त्वां पश्यति । कः त्वां पश्यति ? त्वं कं पश्यसि ? त्वां कः पश्यति ? पश्यति कः त्वाम् ? त्वं गदाधरं पश्यसि किम् ?

त्वं तत्र किं पश्यसि ? अधुना स त्वां पश्यति । इदानीं त्वं पश्यसि । त्वं कुत्र गच्छसि ? त्वं काशीं गच्छसि किम् ? कः काशीं गच्छति ? अहं वेणुग्रामं गच्छामि । अहं नगरं गच्छामि । रामचन्द्रो नगरं गच्छति । रघुनाथः पात्रं पश्यति । त्वं पात्रं पश्यसि । पश्यति रघुनाथो जलम् । जलं अहं पश्यामि । त्वं जलं पश्यसि किम् ? रघुनाथो जलं पश्यति किम् ? हरिश्चन्द्रो गच्छति । देवदत्त ! त्वं गच्छसि । मित्र ! अहं गच्छामि, त्वमपि गच्छ । मैत्रः तत्र पठति । मित्र ! त्वं तत्र पठसि किम् ? अहं तत्र पठामि । तत्राहं खादामि ।

तत्र त्वं खादसि । रामचन्द्रः तत्र फलं खादति । हरिश्चन्द्रः तत्र पश्यति । त्वं तत्र पश्यसि । अहं तत्र पश्यामि । रघुनाथः तत्र गच्छति । त्वं तत्र गच्छसि । तत्र त्वं गच्छसि । गच्छसि त्वं तत्र । तत्र रघुनाथो गच्छति । गच्छति रघुनाथस्तत्र । अहं तत्र गच्छामि । तत्र गच्छाम्यहम् । तत्राहं गच्छामि । खादाम्यहं तत्र । तत्राहं खादामि । खादामि तत्राहम् । खादसि त्वं तत्र । तत्र त्वं खादसि । खादति रघुनाथस्तत्र । रघुनाथस्तत्र खादति । गदाधरः पठति । पठति गदाधरो ग्रन्थम् । पठति ग्रन्थं गदाधरः । हे कृष्ण ! तत्र त्वं पठसि । पठसि किं त्वं तत्र ? रघुनाथस्तत्र पठति । अहं तत्र पठामि । पठाम्यहं तत्र । तत्राहं पठामि ? रघुनाथः कुत्र

पठति ? कुत्र पठति रघुनाथः ? पठति रघुनाथः कुत्र ? त्वं कुत्र पठसि ? कुत्र त्वं पठसि ? पठसि त्वं कुत्र ? अहं कुत्र पठामि ? कुत्राहं पठामि ? पठाम्यहं कुत्र ? अहं कुत्र खादामि ? कुत्राहं खादामि ? खादाम्यहं कुत्र ? त्वं कुत्र खादसि ? कुत्र त्वं खादसि ? खादसि त्वं कुत्र ? रघुनाथः कुत्र खादति ? खादति रघुनाथः कुत्र ? कुत्र रघुनाथः खादति ?

रामचन्द्रः कुत्र पश्यति ? पश्यति कुत्र रामचन्द्रः ? कुत्र रामचन्द्रः पश्यति ? त्वं कुत्र पश्यसि ? कुत्र त्वं पश्यसि ? पश्यसि त्वं कुत्र ? अहं कुत्र पश्यामि ? कुत्राहं पश्यामि ? पश्याम्यहं कुत्र ? हरिश्चन्द्रः कुत्र गच्छति ? कुत्र हरिश्चन्द्रो गच्छति ? गच्छति कुत्र हरिश्चन्द्रः ? त्वं कुत्र गच्छसि ? कुत्र गच्छसि त्वम् ? गच्छसि त्वं कुत्र ? गदाधरो गच्छति कुत्र ? अहं कुत्र गच्छामि ? गच्छाम्यहं कुत्र ? कुत्राहं गच्छामि ? अत्र रामचन्द्रः पठति। पठत्यत्र रामचन्द्रः। रामचन्द्रोऽत्र पठति। त्वमत्र पठसि। पठस्यत्र त्वम्। अत्र त्वं पठसि। अहमत्र पठामि। पठाम्यहमत्र। अत्राहं पठामि। यत्र हरिश्चन्द्रः पठति। पठति यत्र हरिश्चन्द्रः। हरिश्चन्द्रो यत्र पठति। यत्र त्वं पठसि।

पाठ २०

संस्कृत-वाचन पाठः।

यदा स न पश्यति, तदा त्वं पश्यसि। यदा त्वं पश्यसि, तदाहं न पश्यामि। यदाहं पश्यामि, तदा स न पश्यति। तदा रामचन्द्रः गच्छति। रघुनाथस्तदा नैव गच्छति। तदा त्वं नैव गच्छसि। अहं यदा नैव गच्छामि, तदा त्वं गच्छसि। स यदा नैव गच्छति, तदा त्वं गच्छसि। त्वं यदा नैव गच्छसि, तदा स गच्छति। रघुनाथः कदा गच्छति ? स इदानीं न गच्छति। रामचन्द्रः कदा खादति ? इदानीं स नैव खादति। किं इदानीं

स न खादति ? न स इदानीं खादति । किं स तत्र गच्छति ? नहि, स तत्र नैव गच्छति । त्वं तदा पठसि किम् ? नाहं तदा पठामि । तदा त्वं किं न पठसि ? रघुनाथः कदा पठति ? अहं कदा पठामि ? त्वं कदा पठसि ? यदा रामः पठति, तदा कृष्णो न पठति । कृष्णो यदा पठति, तदा रामो न पठति ।

यदा हरिश्चन्द्रः खादति, तदा रामो गच्छति । यः खादति, तं हरिश्चन्द्रः पश्यति । सूर्यं हरिश्चन्द्रः पश्यति । त्वं सूर्यं पश्यसि किम् ? रामः सूर्यं न पश्यति । अहं सूर्यं पश्यामि ! त्वं सूर्यं न पश्यसि । अहं सूर्यं न पश्यामि । रामस्य जनकः सूर्यं पश्यति । वायुः गच्छति । सोमः गच्छति । वायुर्न गच्छति । सोमो न गच्छति । हरिश्चन्द्रस्य जनकः कदा सोमं पश्यति ? कृष्णस्य जनकः सोमं न पश्यति किम् ? सर्ममित्रस्य जनकः सोमं न पश्यति किम् ? सर्वमित्र आगच्छति किम् ? किं त्वमागच्छसि ? अहमागच्छामि, सोमं पश्यामि च । हरिश्चन्द्रः किमपि न खादति । रामः किमपि न पश्यति । कृष्णः किमपि न पठति । खादति न किमपि रामः । कृष्णः किमपि खादति । न त्वं किमपि खादसि । न खादाम्यहं किमपि । अद्याहं गच्छामि । त्वमद्य गच्छसि किम् । सोऽद्य गच्छति ।

अद्य रामचंद्रो नगरं गच्छति । हरिश्चन्द्रोऽद्य नगरं गच्छति । रघुनाथः कृष्णस्य श्वेतं वस्त्रं पश्यति । गोपालो नगरमागच्छति । यज्ञमित्रो वनं गच्छति । विष्णुमित्रः पुस्तकं पठति । सूर्यो गच्छति । वायुरागच्छति । सोमो यदा आगच्छति, तदा त्वं मा खाद । स पुरुष इदानीं पश्यति । त्वं मा पश्य । तृणस्य वर्णो हरितः भवति । रामस्य हस्तः ह्रस्वोऽस्ति । कृष्णस्य हस्तो दीर्घः अस्ति । चन्द्रमित्रस्य गलः शोभनः अस्ति । तव ओष्ठो रक्तोऽस्ति । रामस्य ओष्ठो यथा रक्तोऽस्ति, न तथा कृष्णस्य । भूपो वदति ।

भूपः नगरं अधुना गच्छति । भूपः सायं पात्रेण जलं पिबति ।

देवदत्तः पादाभ्यां गच्छति। मैत्रः पादाभ्यां मध्याह्ने गच्छति। चैत्रः पादाभ्यां सत्वरं गच्छति ग्रामम्। भूमित्रो दन्तैः खादति फलम्। कृष्णो मनुष्यो द्रव्यं नैव दास्यति। मनुष्यः पत्रे जले पश्यति। सः मनुष्यः पात्रे जलं पश्यति। त्वं पश्यसि किम्? अहं पश्यामि। सः वने जलं पश्यति। देवदत्तो वनं द्रष्टुं गतः। त्वमत्रागच्छ। वनं द्रष्टुं गच्छ। चैत्र! त्वं पत्रं लिख।

देवदत्तः ह्यः श्रीनगरादागतः। विष्णुमित्रः श्वो गमिष्यति राजपुरम्। हे नर! त्वं गमिष्यसि किम्? हे देव! त्वं उपवेष्टुं इच्छसि किम्? किं देवो गमिष्यति? पुरुषः किं खादिष्यति? फलं खादिष्यति। दुग्धस्य वर्णः श्वेतोऽस्ति। उद्यानस्य वर्णः हरितः अस्ति। तोयस्य वर्णः शुभ्रः अस्ति। तस्य पुष्पस्य वर्णः कृष्णः अस्ति। नीरं शुभ्रं अस्ति। किं त्वमिदानीं न पठसि? अहं सदा तत्र पश्यामि। भूमित्रो यत्र पश्यति, तत्र चैत्रो गच्छति। भूपः कं पुरुषं पश्यति? अधुनाऽहं भूपं पश्यामि। त्वं कदा तत्र वदसि? यदा रघुनाथस्तत्र गच्छति, तदा त्वमत्रागच्छ। कृष्णो भूपोऽस्ति। तदानीं रघुनाथो रामचन्द्रं वदति। तदानीं रघुनाथो रामचन्द्रं पश्यति। कृष्णोऽधुना कुत्राऽस्ति? रामोऽद्य कुत्राऽस्ति? यत्र पादः पतति, तत्र कोऽपि नास्ति। यत्र गोविंदः पश्यति, तत्र त्वं न भवसि। यत्र त्वं पश्यसि, तत्र मुकुंदो नास्ति।

यत्राहं पश्यामि, तत्र त्वं न भवसि। यदा रामो आगच्छति, तदा विष्णुर्गृहं गच्छति। स किं किमपि न वदति? विष्णुरिदानीं किमपि न पठति। यदा गोविंदः पठति, तथा मुकुंदो गच्छति, तथा हरिः किं न गच्छति? अहं पठामि। अहमद्य पठामि। अहमद्य न पठामि। अहमद्यात्र वदामि। त्वमद्यात्र किं न वदसि? सोऽद्यात्र किं न वदति? सोऽद्य तत्र खादति। किं त्वमिदानीं तत्र पश्यसि? नहि, अहं अद्य अत्र पश्यामि। अधुना त्वं खादसि

किम् ? मुकुंदः कुत्रास्ति ? रामस्तत्र नास्ति। त्वमद्य तत्र किं न पठसि ? कमलस्य कः वर्णः ? कमलस्य शुभ्रो वर्णः। दुग्धस्य कः वर्णः ? श्वेतो वर्णः दुग्धस्य। तिमिरस्य कः वर्णः ? तिमिरस्य कृष्णो वर्णः। अहं नैव वदामि। सोऽद्य कुत्र गच्छति ? त्वं मम गृहे अद्य आगच्छसि किम् ?

पाठ २२

संस्कृत-वाचन-पाठः ।

मैत्रस्य भूषणं कुत्रास्ति ? त्वं पत्रं किं न लिखसि ? यत्र बुद्धो गच्छति, तत्र त्वं किं न गच्छसि ? गृहस्य द्वारं अत्रास्ति। राम-चन्द्रस्य वस्त्रं कुत्रास्ति ? सलिले कमलं किं नास्ति ? कृष्णस्य भूषणं कुत्रास्ति ? देवदत्तस्य पुस्तकं तत्र नास्ति। भूपस्य नगरं अत्रास्ति। स नगरादागतः। खादति फलं सः। त्वं फलं किं न खादसि ?

अहं इदानीं वनं न गच्छामि। सदा तत्र गच्छति विश्वनाथः। स इदानीं जलस्य समीपे गच्छति। तस्य पुस्तकं पुराणं अस्ति। तस्य नगरं विशालं अस्ति। कृष्णस्य हस्तो बलिष्ठोऽस्ति। मुकुं-दस्य वस्त्रं नवीनं अस्ति। रामो विज्ञो भवति। वाचालो हरिरि-दानीं वदति। श्वेतं दुग्धं अर्जुनेन पीतम्। रघुनाथः कृष्णोऽस्ति। वनं हरितं अस्ति। सः मनुष्यः अन्धोऽस्ति। त्वं धीरोऽसि। तस्य गृहस्य द्वारं ह्रस्वं अस्ति। त्वां सः जलं प्रापयितुमिच्छति। किं त्वं वनं गन्तुं इच्छसि ? किं मुकुंदो भूषणं द्रष्टुं इच्छति ? रघुनाथो वीरोऽस्ति। किं कर्तुं इच्छसि त्वम् ? सोऽत्रागन्तुं नेच्छति। स अत्र खादितुं इच्छति। किं त्वं अत्र खादितुं नेच्छसि ? स पुस्तकं नेतुं इच्छति। गोविंदः पुस्तकं पठितुं नेच्छति। त्वं किं

इच्छसि ? तव वस्त्रं रक्तं अस्ति किम् ? तव वर्णः कृष्णोऽस्ति किम् ?

रामचन्द्रस्य नवीनं पुस्तकं शोभनं अस्ति। मुकुंदस्य पुराणं पुस्तकं शोभनं नास्ति। रामस्य नवीनं गृहं कुत्रास्ति ? विष्णस्य नरस्य शोभनं पुस्तकं अत्रास्ति। त्वं शोभनं वनमिदानीं गच्छसि किम् ? नहि, इदानीं अहं तव विशालं गृहं आगच्छामि। स नरः भूपस्य शोभनात् गृहात् इदानीं आगच्छति। सः कृपणः पुरुषः इदानीं कुत्रास्ति ? कृष्णः रामं प्रति वदति। रामेण सह विष्णुमित्रः वदति। रघुनाथेन साकं हरिः नगरं गच्छति। भासेन पुस्तकं कृतम्। तेन तत् शोभनं कृतम्। भूमित्रो तस्य भूपस्य नगरं गतः।

मम सकाशात् स यदि पुस्तकं नेष्यति, तर्ह्यहं दास्यामि। तव सकाशात् यद्यहं वस्त्रं नेष्यामि, तर्हि त्वं दास्यसि किम् ? मुकुंदो गमिष्यति किं सत्वरं ? त्वं सत्वरं मह्यं पुस्तकं देहि। सत्वरं स पत्रं लेखिष्यति किम् ? स तुभ्यं पुस्तकं दास्यति किम् ? रामं पात्रं पश्यति किम् ? मया तस्मै सलिलं दत्तम्। त्वया तस्मै पात्रं दत्तं।किम् ? तेन मह्यं फलं दत्तम्।

भूपस्य नगरं को गतः ? मुकुंदः अथवा रामः ? त्वया तस्मै किमपि उक्तं किम् ? देवदत्तो गृहादागतः। अहं नगरं गतः। स उद्यानादागतः। वाचाली मुकुंदो वनादागतः। अद्याहं दुग्धायागतः। अद्य त्वं चन्दनाय गतः किम् ? त्वं इदानीं अत्रोपविश। त्वं अद्य अत्रैव तिष्ठ। त्वं अद्य पत्रं लिख। त्वं श्वः प्रातः फलं खादिष्यसि किम् ?

रामो रक्ताय वस्त्रायागतः। विश्वनाथो नीरायोद्यानं गतः। रघुनाथः पुष्पायोद्यानं गतः। स नगरादागन्तुं इच्छति। अहं त्वया सहागन्तुं इच्छामि। स मया साकं पठितुं इच्छति। अहं तेन सह धावितुं इच्छामि। रामः कृष्णेन साकं वक्तुं इच्छति। कृष्णः

पात्रं कर्तुं इच्छति। अहं भूषणं दातुं इच्छामि। मया सह पुरुषो वदति। त्वया सह स नरः वनं पश्यति।

यत्र स खादति, तत्राहं न गच्छामि। अहं अत्र खादामि। त्वं कुत्र खादसि? यत्र स पठति तत्राहं पठामि। कः पठति? किं पठति? स किं पश्यति? रघुनाथ इदानीं न पठति। त्वं अधुना किं खादसि? अधुना किं न खादसि? अहं दिवा खादामि। स रात्रौ खादति। त्वं द्रुतं खादसि। त्वं फलं खाद अथवा मा खाद। जलात् कमलं नय। तोयात् फलं तत्र नय। सलिलात्कमलं तत्राहं नेष्यामि। त्वं तत्र सलिलात्कमलं नेष्यसि किम्? स तस्मात्तोयादागच्छति। स तस्मिन् सलिले कमलं पश्यति। स तस्मिन्पात्रे पुष्पं पश्यति। स वने पुष्पं द्रक्ष्यति। त्वं गृहे पुष्पं द्रक्ष्यसि किम्?

त्वं पुस्तकं द्रुतं पठ। यदि त्वं पुस्तकं पठसि, तर्ह्यहमागच्छामि। स सत्यं वदति। भूपो ह्य आगतः। त्वं मया सह वद, नोचेदहं गमिष्यामि। त्वं लिख, नोचेदहं लेखिष्यामि। त्वमत्रैवोपविश नोचेदहं गमिष्यामि। त्वं आगच्छसि चेत् तर्हि अहं अत्र तिष्ठामि। त्वं तत्र तिष्ठसि चेत् अहं आगमिष्यामि।

त्वमागच्छ नोचेदहं गमिष्यामि। त्वं अन्नं कुरु, अहं खादितुं इच्छामि। खादितुं आगच्छामि। त्वं करं भ्रामय। रघुनाथः कृष्णाय पात्रं दास्यति। शोभनं पात्रं दुग्धाय दास्यति। स दुग्धाय शोभनं पात्रं नेष्यति। त्वं अत्रैवोपविश, तुभ्यमहं वस्त्रं दास्यामि। त्वमत्रैव तिष्ठ, तुभ्यमहं दुग्धं दास्यामि। त्वमत्र स्थातुं किं नेच्छसि? अहं त्वया साकं वदितुमिच्छामि। त्वं मया सह वदितुं नेच्छसि किम्? स त्वया सह वक्तुमिच्छति। त्वं तेन साकं वक्तुं किं न इच्छसि?

अहं तुभ्यं चंदनं दास्यामि। त्वं मह्यं वस्त्रं दास्यसि किम्? रघुनाथो मुकुन्दस्य गृहे उपवेष्टुं किं नेच्छति? त्वमेव तस्य गेहे उपविश। त्वं पुष्पं द्रष्टुं इच्छसि किम्? यत्र त्वं गन्तुं इच्छसि,

तत्र गच्छ। त्वं कुत्र गन्तुं इच्छसि ? अहं तत्रागच्छामि, यत्र त्वं गन्तुं इच्छसि। यत्र त्वं खादितुं गच्छसि, तत्राहं नागच्छामि। यत्र त्वं पठसि, तत्राहमागच्छामि। अहं यत्र पठामि, तत्र किं न पठसि ? अहं यदा खादामि, तदा त्वं किं नागच्छसि ? सायमहमत्र खादामि। प्रातरहं फलं खादामि। यदाहं पश्यामि, तदा त्वं किं न पश्यसि ?

पाठ २३

संस्कृत-वाचन-पाठः।

अहं लिखामि तदा त्वं किं वदसि ? यदाहं वदामि तदा त्वं किं लिखसि ? यत्र रघुनाथः पत्रं लिखति, तत्र कृष्णो गच्छति। यदाहं खादामि, तदा त्वं पठ। यत्र त्वं गच्छसि, तत्र गच्छाम्य-हम्। रघुनाथः पुराणं वस्त्रं दास्यति। विश्वामित्रो भूषणमिच्छति। तत्र त्वं पुष्पं किं न पश्यसि ? सायं त्वं पुष्पं पश्यसि। त्वं सदा पुष्पमेव पश्यसि किम् ? स यदा गच्छति, अहं तदा गच्छामि। अहं यत्र पश्यामि, तत्र स न गच्छति किम् ? तदाहं किं न खादामि ? यदा त्वं खादसि, तदा विश्वामित्रः पठति किम् ?

विश्वामित्रो गच्छति अथवा न गच्छति। अहं पठामि अथवा न पठामि। त्वं खादसि अथवा न खादसि। अहं प्रातरत्र आग-च्छामि। यदि स खादिष्यति, तर्हि अहं वदामि। अहं मम गृहे यदा पठामि, तदा न स आगच्छति। यदा विश्वामित्रस्तत्र पश्यति, तदाहं तत्र न गच्छामि। अहं सलिलं द्रक्ष्यामि। अहं कमलं न पश्यामि। अहं कमलं नेतुं आगतः। विश्वामित्रो गच्छति। भूमित्रो न वदति। कृष्णो न गच्छति। तदा कृष्णो न पश्यति। अद्य तत्र रामो न गमिष्यति। रामो निरन्तरं तत्र गच्छति। रामो मुकुंदेन सह यदा आगमिष्यति, तदाहमप्यागमिष्यामि। त्वमपि

तदा तत्र गच्छ । स सर्वभूतानां ईश्वरोऽस्ति । स भूतानां हृद्देशे तिष्ठति । सर्वभूतानि भ्रामयन् तिष्ठति । यन्त्रारूढानि भ्रामयन् तिष्ठति । मायया यन्त्रारूढानि भूतानि भ्रामयन् तिष्ठति ।

हे भारत ! त्वं शरणं गच्छ । त्वं तं शरणं गच्छ । तं त्वं एव शरणं गच्छ । त्वं तं सर्वभावेन शरणं गच्छ । त्वं शान्तिं प्राप्स्यसि । त्वं स्थानं प्राप्स्यसि । त्वं शाश्वतं स्थानं प्राप्स्यसि । सत्यस्य वचनं श्रेयः अस्ति । श्रेयः सत्यस्य वचनं अस्ति । सत्यादपि हितं वदेत् ।

हितं वदेत् । तत् भूतहितं अस्ति । यत् अत्यन्तं भूतहितं अस्ति, तत् मम सत्यं मतम् । सः मरणात् भीतः अस्ति । त्वं मरणात् भीतः न असि । अहं मरणात् भीतः न अस्मि । तस्य यशः दूषितं अस्ति । तव यशः दूषितं नास्ति ।

देवदत्तो वृद्धो भवति । तस्य शिरः पलितं अस्ति । तथापि स न वृद्धः । यस्मात् शिरः पलितं अस्ति, तस्मात् वृद्धो न भवति । तस्मात्सः न वृद्धः । विष्णुमित्रः अधीयानोऽस्ति । अतः स स्थविरः । स युवा अपि स्थविरः । यः अधीयानः तं तरुणं अपि स्थविरं विदुर्देवाः ।

नलोपाख्यानम् ।

वीरसेनसुतो बली रूपवानश्वकोविद इष्टैर्गुणैरुपपन्नो नलो नाम राजाऽसीत् । यथा देवपतिः सर्वेषां देवानां मूर्ध्नि तिष्ठति, तथैषो नलः मनुजेन्द्राणां मूर्ध्नि अतिष्ठत् । आदित्य इव तेजसा सर्वेषामुपर्युपर्यतिष्ठत् । निषधेषु ब्रह्मण्यो वेदविच्छूरोऽक्षप्रियः सत्यवादी महानक्षौहिणीपतिर्महीपतिः राजा नल आसीत् । नरनारीणामीप्सित उदारः संयतेन्द्रियः रक्षिता धन्विनां श्रेष्ठः साक्षात्मनुरिव स्वयं आसीत् । तथैव भीमपराक्रमो शूरः सर्वगुणैर्युक्तः प्रजाकामश्चाप्रजः स भीमः विदर्भेषु राजा आसीत् ।

पदच्छेद

वीरसेन-सुतः बली रूपवान् अश्व-कोविदः इष्टैः गुणैः उपपन्नः नलः नाम राजा आसीत्। यथा देवपतिः सर्वेषां देवानां मूर्ध्नि तिष्ठति, तथा एषः नलः मनुजेन्द्राणां मूर्ध्नि अतिष्ठत्। आदित्यः इव तेजसा सर्वेषां उपरि उपरि अतिष्ठत्। निषधेषु ब्रह्मण्यः वेद-वित् शूरः अक्षप्रियः सत्यवादी महान् अक्षौहिणीपतिः महीपतिः राजा नलः आसीत्। नरनारीणां ईप्सितः उदारः संयतेन्द्रियः रक्षिता धन्विनां श्रेष्ठः साक्षात् मनुः इव स्वयं आसीत्। तथा एव भीमपराक्रमः भीमः शूरः सर्वगुणैः युक्तः प्रजाकामः च अ-प्रजः सः भीमः विदर्भेषु राजा आसीत्।

अर्थ— वीरसेन राजाका लडका बलिष्ठ, सुरूप, अश्वविद्या जाननेवाला, इष्ट गुणोंसे युक्त, नल नामका राजा था। जिस प्रकार देवोंका राजा सब देवोंके सिरपर बैठता है (देवोंमें प्रधानस्थानपर बैठता है) उसी प्रकार यह नल राजा मानवी राजाओंके मस्तकपर बैठा था। सूर्यके सदृश तेजसे सबके ऊपर ऊपर ही रहता था। निषध देशमें ब्राह्मणोंका हितकर्ता, वेद जानने-वाला, शूर, अक्षविद्या जाननेवाला, सत्यवादी, बडा, अक्षौहिणी सैन्योंका पालक, पृथ्वीका पालक यह राजा नल था। नरनारियोंको प्रिय, उदार, संयमी, रक्षक, धनुष्यधारी वीरोंमें श्रेष्ठ, साक्षात् मनुके समान ही वह स्वयं था। उसी प्रकार भयंकर, पराक्रमी, शूर, सब गुणोंसे युक्त, प्रजाका प्रिय किन्तु सन्तानरहित ऐसा वह भीम नामका राजा विदर्भमें था।

समाप्त

मुद्रक और प्रकाशक– व. श्री. सातवळेकर, भारत मुद्रणालय, पारडी [जि. सूरत]

२

ॐ

संस्कृत-पाठ-माला ।

[संस्कृत भाषाका अध्ययन करनेका सुगम उपाय]

द्वितीय भाग ।

लेखक

महामहोपाध्याय पं. श्रीपाद दामोदर सातवळेकर

अध्यक्ष- स्वाध्याय-मण्डल, साहित्य-वाचस्पति, गीतालंकार

स्वाध्याय-मण्डल पारडी, (जि. सूरत)

मूल्य आठ आने

अंक २

ॐ

संस्कृत-पाठ-माला

[संस्कृत-भाषाका अध्ययन करनेका सुगम उपाय]

द्वितीय भाग।

लेखक

पं. श्रीपाद दामोदर सातवलेकर

अध्यक्ष- स्वाध्याय-मंडल, साहित्यवाचस्पति, गीतालंकार

एकादश वार

संवत् २०१२, शके १८७७, सन् १९५५

आपकी उन्नति

आपकी उन्नति संस्कृत भाषामें कितनी हो रही है और अति अल्प कालमें आपको संस्कृत वाक्य बनाना भी कितनी सुगमतासे आ गया है, यह आपने प्रथम भागमें देख ही लिया है।

अब यह द्वितीय भाग आपके सम्मुख प्रस्तुत किया जाता है और पूर्ण आशा है कि इससे भी आपको अत्यन्त लाभ होगा और आपकी प्रगति संस्कृतमें अति अल्प प्रयत्नसे ही हो जायगी।

लेखक
पं. श्रीपाद दामोदर सातवलेकर

प्रकाशक और मुद्रक :
वसंत श्रीपाद सातवळेकर, बी. ए.
स्वाध्याय मण्डल, भारत-मुद्रणालय, आनंदाश्रम, पारडी [जि. सूरत]

ॐ

संस्कृत-पाठ-माला

द्वितीय भागः ।

पाठ १

निम्नलिखित शब्द ध्यानमें रखिये—

पिबति – (वह) पीता है।	पास्यति –(वह) पीयेगा।
पिबसि – (तू) पीता है।	पास्यसि –(तू) पीयेगा।
पिबामि – (मैं) पीता हूं।	पास्यामि –(मैं) पीऊंगा।
भक्षयति – (वह) भक्षण करता है।	भक्षयिष्यति-(वह) भक्षण करेगा।
भक्षयसि – (तू) भक्षण करता है।	भक्षयिष्यसि-(तू) भक्षण करेगा।
भक्षयामि – (मैं) भक्षण करता हूं।	भक्षयिष्यामि-(मैं) भक्षण करूंगा।

अब इनसे बननेवाले वाक्य देखिये—

संस्कृत-वाक्यानि ।

१ अहं जलं पिबामि। २ त्वं जलं किं न पिबसि ? ३ सः इदानीं दुग्धं नैव पिबति। ४ यः दुग्धं न पिबति। ५ सः फलं न भक्षयिष्यति। ६ सः तत्र अन्नं भक्षयति। ७ यदि त्वं दुग्धं न पास्यसि। ८ तर्हि अहं जलं पास्यामि।

१ मैं जल पीता हूं। २ तू जल क्यों नहीं पीता ? ३ वह अब दूध नहीं पीता। ४ जो दूध नहीं पीता। ५ वह फल नहीं खायेगा। ६ वह वहां

अन्न खाता है । ७ यदि तू दूध नहीं पीयेगा । ८ तो मैं जल पीऊंगा ।

अब आप निम्नलिखित वाक्योंके भाषावाक्य बनाइये—

संस्कृत-वाक्यानि ।

सः श्वः अन्नं कुत्र भक्षयिष्यति ? तव गृहे सः उदकं पास्यति वा न वा ? कथं सः तस्य पात्रे दुग्धं पास्यति ? मम पात्रं तस्य पात्रात् अधिकं शोभनं अस्ति । तव वस्त्रं मम वस्त्रात् अधिकं शोभनं नास्ति । अहं तव नगरं नैव गमिष्यामि । सः इदानीं गृहे एव तिष्ठति, तं तत्र नय । त्वं गोदुग्धं किं न पिबसि ? अहं गोदुग्धं एव पिबामि । सदा एव अहं गोदुग्धं पिबामि, पास्यामि च । त्वं अपि तथा कुरु । तस्य वृक्षस्य फलं स तत्र नयाति । त्वं अत्र पत्रं लिख । अहं इदानीं एव गृहं गमिष्यामि । विश्वामित्रः कुत्र गतः ? स इदानीं कुत्र अस्ति ? कस्मिन् गृहे स इदानीं अस्ति ? स इदानीं उद्याने अस्ति, पुष्पं फलं च आनयति । त्वं अत्र आगच्छ, उपविश, पुस्तकं च पठ ।

निम्नलिखित शब्द अब स्मरण कीजिये—

शब्द ।

वानरः	— बन्दर	लेखः	— लेख
बिडालः	— बिल्ली	दण्डः	— सोटा
मार्जारः	— बिल्ली	ब्राह्मणः	— ब्राह्मण
आतपः	— सूर्यकिरण, धूप	कुमारः	— लडका
मंत्रः	— मंत्र	अपराधः	— गुनाह
वेदः	— वेद	बालः	— लडका

अब इनका वाक्योंमें उपयोग कीजिये—

संस्कृत-वाक्यानि ।

१ तत्र पश्य, वानरः दुग्धं पिबति । २ तत्र वानरः नास्ति, स बिडालः अस्ति, यः दुग्धं पिबति । ३ तस्मिन् आतपे त्वं किं न गच्छसि ? ४ तस्मिन् पात्रे त्वं किं करोषि ? ५ सः कस्य शोभनः कुमारः ? ६ सः हरिश्चन्द्रस्य शोभनः बालः ।

भाषा-वाक्य ।

१ वहां देख, बन्दर दूध पीता है । २ वहां बन्दर नहीं है, वह बिल्ली है, जो दूध पीती है । ३ उस धूपमें तू क्यों नहीं जाता ? ४ उस पात्रमें तू क्या करता है ? ५ वह किसका सुन्दर लडका है ? ६ वह हरिश्चन्द्रका सुन्दर लडका है ।

अब निम्नलिखित वाक्य आप पढते ही समझ सकते हैं—

संस्कृत-वाचन-पाठः ।

तव पुस्तकं अहं तत्र नयामि । स मम फलं अत्र आनयति । गोपालः गोदुग्धं कुत्र नयति ? भीमसेनः इदानीं यत्र अस्ति, तत्र त्वं अधुना मा गच्छ । यत्र मम बिडालः अस्ति, तत्र त्वं इदानीं एव गोदुग्धं नय । सुवर्णस्य आभूषणं कः करोति ? मया सुवर्णस्य आभूषणं कदापि न कृतम् । मम गृहे एकः पुरुषः अस्ति ।

संधि किये हुए वाक्य ।

तव पुस्तकमहं तत्र नयामि । सः मम फलमत्रानयति । गोपालो गोदुग्धं कुत्र नयति ? भीमसेनः इदानीं यत्रास्ति, तत्र त्वमधुना न गच्छ । यत्र मम बिडालोऽस्ति तत्र त्वामिदानीमेव गोदुग्धं नय । सुवर्णस्याभूषणं कः करोति ? तव पात्रमत्राऽऽनय ।

पाठ २

न भीतो मरणादस्मि केवलं दूषितं यशः
विशुद्धस्य हि मे मृत्युः पुत्रजन्मसमः किल ॥

(मृच्छकटिक नाटक १०।२७)

पदानि— न । भीतः । मरणात् । अस्मि । केवलं । दूषितं । यशः । विशुद्धस्य । हि । मे । मृत्युः । पुत्र+जन्म+समः । किल ।

अन्वयः- (अहं) मरणात् भीतः न अस्मि । केवलं यशः दूषितं । हि विशुद्धस्य मे मृत्युः पुत्रजन्मसमः किल ।

अर्थ- (मैं) मृत्युसे नहीं डरता हूं, केवल यश कलंकित होनेसे डरता हूं । क्योंकि विशुद्ध मृत्यु मुझे पुत्रजन्मके समान है ।

पिताचार्यः सुहृन्माता भार्या पुत्रः पुरोहितः ।
नादण्ड्यो नाम राज्ञोऽस्ति यः स्वधर्मे न तिष्ठति ॥

मनुस्मृति ८।३३५

पदानि- पिता । आचार्यः । सुहृत् । माता । भार्या । पुत्रः । पुरोहितः । न । अ+दण्ड्यः । नाम । राज्ञः । अस्ति । यः । स्व+धर्मे । न । तिष्ठति ।

अन्वयः- पिता, आचार्यः, सुहृत्, माता, भार्या, पुत्रः, पुरोहितः यः स्वधर्मे न तिष्ठति, (सः) राज्ञः अदण्ड्यः नाम न अस्ति ।

अर्थ- पिता, गुरु, मित्र, आचार्य, सुहृत्, माता, भार्या, पुत्र, पुरोहित (इनमेंसे कोई भी) जो स्वधर्मका पालन नहीं करते वे राजासे अदण्डनीय नहीं है । (अर्थात् अधर्माचरण करनेवालोंको राजा अवश्य दण्ड दे) ।

न तेन वृद्धो भवति येनास्य पलितं शिरः ।
यो वै युवाऽप्यधीयानस्तं देवाः स्थविरं विदुः ॥

मनुस्मृति २।१५६

पदानि- न । तेन । वृद्धः । भवति । येन । अस्य । पलितं । शिरः । यः । वै । युवा । अपि । अधीयानः । तं । देवाः । स्थविरं । विदुः ।

अन्वयः- येन अस्य पलितं शिरः, तेन वृद्धः न भवति । यः वै युवा अपि अधीयानः, तं देवाः स्थविरं विदुः ।

अर्थ- जिसका शिर (बाल) श्वेत हो गया है उसको वृद्ध नहीं कहते, जो युवा होनेपर भी अध्ययनशील (बुद्धिमान) है उसे देव वृद्ध कहते हैं ।

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
काम क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥

भगवद्गीता १६।२१

पदानि- त्रि+विधं । नरकस्य । इदं । द्वारं । नाशनं । आत्मनः । कामः । क्रोधः । तथा । लोभः । तस्मात् । एतत् । त्रयं । त्यजेत् ।

अन्वयः- आत्मनः नाशनं नरकस्य एतत् त्रिविधं द्वारं । कामः, क्रोधः, लोभः । तस्मात् एतत् त्रयं त्यजेत् ।

अर्थ- स्वयंको नाश करनेवाले नरकके ये तीन द्वार हैं । इसलिये इन तीन (काम, क्रोध, लोभ) को त्याग देना चाहिये ।

पाठक इन श्लोकोंको बारंबार पढें और हो सके तो मुखस्त कर लें । अब निम्नलिखित वाक्य पढिये—

कः तत्र इदानीं गच्छति ? सः मनुष्यः इदानीं किं पठति ? यदा स अन्नं खादति तदा त्वं किं करोषि ? यथा बालकः धावति तथा त्वं अपि धावसि किम् ? कदा त्वं अद्य मम गृहं आगमिष्यसि ? तत्र एव त्वं गच्छ यत्र सः पुरुषः अस्ति । तस्य कूपस्य एव जलं अत्र आनय । यदा त्वं गच्छसि तदा सः आगच्छति । सः सुवर्णस्य आभूषणं शोभनं एव करोति । तव पात्रं अत्र आनय । कुत्र अस्ति तस्य पात्रम् ? कः तत्र अस्ति यः एवं करोति ? हे पुरुष ! त्वं किं इदानीं करोषि ? स इदानीं जलं पिबति । यदि त्वं अन्नं न खादसि तर्हि दुग्धं पिब । न युक्तं इदानीं दुग्धं पातुं, केवलं उष्णं जलं एव पिबामि ।

पाठ ३

निम्नलिखित शब्द ध्यानमें रखिये-

वा	अपि - भी
अथवा - अथवा	नोचेत् - नहीं तो
किंवा - अथवा	हि - क्योंकि
प्रभूतं - बहुत	चेत् - यदि
व्यर्थं - व्यर्थ	न्यूनं - थोडा

इन शब्दोंका उपयोग करके वाक्य बनाइये-

१ किं त्वं पुस्तकं पठिष्यसि अथवा स पठिष्यति ? २ यदि सः अद्य अत्र आगमिष्यति तर्हि त्वं तत्र न गच्छ नोचेत् श्वः प्रातः एव गच्छ। ३ सः सदा प्रभूतं वदति। ४ त्वं वद, नोचेत् अहं वदिष्यामि। ५ सत्यं अपि अयुक्तं न वद।

इन वाक्योंका हिन्दी वाक्य देखिये—

१ क्या तुम पुस्तक पढोगे अथवा वह पढेगा ? २ यदि वह आज यहां आयगा तो तुम वहां मत जा, नहीं तो कल सवेरे जा। ३ वह हमेशा अधिक बोलता है। ४ तुम बोलो नहीं तो मैं बोलूंगा। ५ सत्य किन्तु अयुक्त मत बोल।

अब आपको निम्नलिखित वाक्य जल्दी समझमें आजायेंगे—

यदि स अद्य इदानीं फलं न खादति तर्हि त्वं इदानीं एव खाद। त्वं श्वः कुत्र गमिष्यसि ? यदि सः अद्य न आगमिष्यति, तर्हि अहं तस्य गृहं श्वः सायं गमिष्यामि। कः तत्र इदानीं एवं वदति ? तत्र रामचंद्रः अस्ति सः एवं वदति। नहि नहि, तत्र रामचन्द्रः नास्ति। तर्हि कः सः ? सः हरिश्चन्द्रः अस्ति। सः कः हरिश्चंद्रः ? स नागपुरदेशीयः विष्णुमित्रस्य पुत्रः हरिश्चन्द्रः

इदानीमेव नागपुरात् अत्र आगतः । स शोभनः पुरुषः अस्ति । स नागपुरं कदा पुनः गमिष्यति ? स परश्वः सायं नागपुरं प्रति गमिष्यति अथवा श्वः एव गमिष्यति । स केन सह आगतः ? स देवदत्तेन सह आगतः । देवदत्तः अपि तेन सह गमिष्यति किं ? नहि, देवदत्तः अत्र एव स्थास्यति । स एव गमिष्यति । त्वं इदानीं किं करिष्यसि ? अहं इदानीं न किमपि करोमि ।

निम्नलिखित शब्द ध्यानमें रखिये—

नगरं	– शहर	चंदनं	– चंदन
उद्यानं	– बगीचा	वस्त्रं	– वस्त्र
तोयं	– पानी	काष्ठं	– लकडी
नीरं	– पानी	पात्रं	– पात्र, बर्तन
उदकं	– पानी	अन्नं	– अन्न
नखं	– नख	दुग्धं	– दूध
पुष्पं	– फूल	पीतं	– पीया हुआ

इन शब्दोंका उपयोग करके वाक्य बनाइये—

श्रीरामचंद्रस्य नगरं अयोध्यानामकं अस्ति । श्रीकृष्णस्य नगरं द्वारकानामकं अस्ति । त्वया दुग्धं किं न पीतम् ? मया दुग्धं न पीतम् । तत्र दुग्धं नास्ति । तत्र नीरं अस्ति । मम वस्त्रं तेन इदानीं नीतम् । तत्र त्वं उपविश । अहं इदानीं मध्याह्नसमये सूर्यस्य किरणे सूर्यस्य प्रकाशे वा उपविशामि । तत्र नखं कथं न रक्तं अस्ति ? कथं पीतं एव दृश्यते ? तस्मिन् कूपे उदकं नास्ति । तस्मिन् जले कमलस्य पुष्पं न भवति ।

निम्नलिखित हिन्दी वाक्योंका संस्कृत वाक्य बनाइये—

मैं अब घर जाता हूं । दूध कहां है ? वह कहां गया है ? मैं अभी घरसे आया । वह धूपमें क्यों नहीं बैठता ? उसका घर कहां है ? इसका बगीचा कहां

है ? बलराम कहां गया ? तुम वहां क्यों नहीं जाते ?

निम्नलिखित संस्कृत वाक्योंका हिन्दी वाक्य बनाइये—

अहं इदानीं गृहात् अत्र आगतः ? फलं कुत्र अस्ति ? त्वया जलं किं न आनीतं ? स इदानीं जलं न आनेष्यति किम् ? स किं पश्यति ? स तत्र तव पत्रं नेष्यति । अहं एव मम पुस्तकं तव गृहं प्रति प्रापयिष्यामि ।

पाठ ४

निम्नलिखित वाक्य पढिये—

तव गृहं कुत्र अस्ति ? स कथं न आगच्छति । यदि स इदानीं न आगतः तर्हि श्वः प्रातःकाले आगमिष्यति । तस्मिन् कूपे प्रभूतं जलं अस्ति । तत् त्वं पश्यसि किम् ? तत्र इदानीं स न भवति ।

शब्द ।

जानामि	– (मैं) जानता हूं ।	ज्ञातं	– जान लिया ।
जानासि	– (तू) जानता है ।	ज्ञातुं	– जाननेके लिये ।
जानाति	– (वह) जानता है ।	आज्ञातुं	– आज्ञा करनेके लिये ।
पातुं	– पीनेके लिये ।	पानं	– पीना ।
इति	– ऐसा ।	कति	– कितने ।

संस्कृत–वाक्यानि ।

१ त्वं जानासि किं कः अहं अस्मि ? २ अहं न जानामि त्वं कः असि । ३ अहं विष्णुमित्रस्य पुत्रः कृष्णशर्मा अस्मि । ४ त्वं पुस्तकं इदानीं कुत्र नयसि ? ५ स पुरुषः पठितुं इच्छति । ६ मया ज्ञातं तव

हस्ते किं अस्ति इति। ७ हे मनुष्य ! तव नाम किं अस्ति ? ८ मम नाम यज्ञसेनः इति।

भाषा-वाक्य।

१ क्या तू जानता है कि मैं कौन हूँ ? २ मैं नहीं जानता तू कौन है। ३ मैं विष्णुमित्रका पुत्र कृष्णशर्मा हूं। ४ तू पुस्तक अब कहां ले जाता है? ५ वह पुरुष पढ़ना चाहता है। ६ मैंने जान लिया कि तेरे हाथमें क्या है। ७ हे मनुष्य ! तेरा नाम क्या है ? ८ मेरा नाम यज्ञसेन है।

अब निम्नलिखित शब्द कण्ठस्थ कीजिये—

मोदकः	:	ओदनः	= चावल
कंदुकः	= गेंद	भक्तः	= भात
आनंदः	= आनंद	आमोदः	= सुगंध
मणिकारः	= जौहरी	धृतः	= धारण किया हुआ
सुवर्णकारः	= सुनार	आघ्रातः	= सूंघा हुआ
लोहकारः	= लुहार	भुक्तः	= भोजन किया हुआ
वस्त्रकारः	= जुलाहा	अर्थः	= पैसा, धन

संस्कृत-वाक्यानि।

१ सः बालः आनंदेन मोदकं खादति। २ पश्य कथं सः खादति। ३ हे सुवर्णकार ! मम बालकाय एकं भूषणं देहि। ४ वस्त्रकारः तस्मै पुरुषाय वस्त्रं करोति। ५ कः पुरुषः अर्थस्य दासः ? ६ कः नरः ईशस्य भक्तः ? ७ अहं अर्थस्य दासः न अस्मि, परंतु ईश्वरस्य भक्तः अस्मि।

भाषा-वाक्य।

१ वह बालक आनंदसे लड्डू खाता है। २ देख, वह कैसे खाता है ? ३ हे सुनार ! मेरे बालकके लिये एक भूषण दे। ४ जुलाहा उस मनुष्यके

किये वस्त्र बनाता है। ५ कौन मनुष्य धनका दास है? ६ कौन मनुष्य ईश्वरका भक्त है? ७ मैं धनका दास नहीं हूं, परंतु ईश्वरका भक्त हूं।

अब निम्नलिखित वाक्य पढिये—

संस्कृत वाचन-पाठः।

तस्मै पुरुषाय मोदकं देहि। यदि सः मनुष्यः इदानीं एव खादितुं न इच्छति, तर्हि तस्मै न देहि। कः इदानीं मोदकं खादितुं इच्छति? अहं मोदकं न खादितुं इच्छामि, परन्तु फलं भक्षयितुं इच्छामि। यथा त्वं इच्छसि तथा कुरु। यदि दुग्धं पातुं इच्छसि, तर्हि गोदुग्धं एव पिब। यदि जलं पातुं इच्छसि तर्हि, मम कूपस्य एव जलं पिब।

यदा सः मनुष्यः कूपस्य समीपं गच्छति, तदा त्वमपि तेन सह तत्र गच्छ। स तत्र कूपस्य समीपं गच्छति, परंतु जलं न आनयति।

हे नर! त्वं इदानीं वेदस्य पुस्तकं अत्र आनय। कं अपि मंत्रं पठ। त्वं वेदस्य मंत्रं जानासि किम्? वेदस्य मन्त्रः त्वया कदा पठितः? केन सह पठितः? कस्य पुत्रः त्वं असि? कुत्र इदानीं पठसि? किं पठसि? सः उत्तमः मनुष्यः अस्ति। स इदानीं उद्यानं प्रति गतः। मम गृहस्य समीपे एव उद्यानं अस्ति। तत्र एव सः गतः। पुष्पं आनयितुं सः इच्छति। तत्र वृक्षे शोभनं पुष्पं भवति। कथं सः पुष्पं आनयति? तत्र वृक्षे शोभनं एकं अपि पुष्पं नास्ति।

सत्यस्य वचनं श्रेयः। धर्मस्य वचनं श्रेयः अस्ति न वा? धर्मस्य वचनात् धर्मस्य आचरणं एव श्रेयः। सदा हितं वचनं एव वदेत्। एतत् मम सत्यं युक्तं च मतं अस्ति। यत् अत्यन्तं भूतहितं तत् एव सत्यं इति सः वदति। सत्य एव धर्मः। धर्मः एव सत्यम्।

अहं मरणात् भीतः नास्मि, मम यशः न दूषितं भवति। सत्येन मम यशः शोभनं भवति।

तव पिता कुत्र अस्ति? मम पिता अत्र नास्ति। किं करोमि? कुत्र गच्छामि? कुत्र गमनं इदानीं श्रेयः अस्ति? वद, शीघ्रं वद।

यदा रामः अन्नं पक्ष्यति तदा त्वं अन्नं खाद। यथा वानरः वृक्षं आरोहति तथा त्वं अपि करोषि किम्? यः पुरुषः अद्य तत्र गच्छति सः अद्य एव अत्र कथं भविष्यति? कदा त्वं तेन सह तत्र गमिष्यसि? अहं त्वया सह अद्य तत्र नैव गमिष्यामि। स कुत्र भोजनं करोति?

संधि किये हुए वाक्य।

यदि स मनुष्य इदानीमेव खादितुं नेच्छति, तर्हि तस्मै न देहि। कः इदानीं मोदकं खादितुमिच्छति? यथा त्वमिच्छसि तथा कुरु। सत्यमेव धर्मः। अहं मरणाद्भीतो नास्मि, मम यशो न दूषितं भवति। तव पिता कुत्राऽस्ति? मम पिताऽत्र नास्ति। कुत्र गमनमिदानीं श्रेयोऽस्ति?

पाठ ५

शब्द।

तडागः	- तालाव	आरोहति	- (वह) चढता है।
वृक्षः	- वृक्ष	आरोहसि	- (तू) चढता है
अश्वः	- घोडा	आरोहामि	- (मैं) चढता हूं
वृषभः	- बैल	आरोढुं	- चढनेके लिये
वत्सः	- बछडा	आरूढः	- चढा हुआ
देशः	- देश	गन्धः	- सुगंध

संस्कृत-वाक्यानि ।

१ तस्य तडागस्य समीपे एकः वृक्षः अस्ति । २ तस्य तडागस्य जले शोभनं रक्तं कमलं अस्ति । ३ तत् रक्तं कमलं अधुना अत्र आनय । ४ स भूपः इदानीं अश्वं आरोहति । ५ तस्य सेवकः उष्ट्रं आरोहति । ६ तस्य देशस्य अयं राजा धार्मिकः अस्ति ।

भाषा-वाक्य ।

१ उस तालावके समीप एक वृक्ष है । २ उस तालावके जलमें सुन्दर लाल कमल है । ३ वह लाल कमल तू इस समय यहां ला । ४ वह राजा अब घोडेपर चढता है । ५ उसका सेवक ऊंटपर चढता है । ६ उस देशका यह राजा धार्मिक है ।

अब इन संस्कृत वाक्योंके भाषावाक्य बनाइए—

संस्कृत-वाचन-पाठः ।

तव अश्वः कुत्र अस्ति ? मम अश्वः तस्य वृक्षस्य समीपे एव अस्ति । कस्य वृक्षस्य समीपम् ? तत्र उद्याने यः वृक्षः अस्ति, तस्य समीपं मम अश्वः इदानीं अस्ति । तत्र अनेन मार्गेण गच्छ, पश्य च तं अश्वं तत्र । तव अश्वस्य कः वर्णः अस्ति ? मम अश्वस्य श्वेतः वर्णः अस्ति । तर्हि श्वेतवर्णः अश्वः तस्मिन् उद्याने इदानीं नास्ति एव । कुत्र गतः केन वा नीतः न जानामि ।

भाषा-वाक्य ।

बछडा कहां है ? बछडा अब यहां है । फूलकी सुगन्ध कैसी है ? फूलकी सुगन्ध उत्तम है । तू घोडेपर चढना चाहता है ? नहीं, मैं ऊंटपर चढना चाहता हूं । इस देशमें तू आ । मैं वहां जाता हूं । अभी तू यहां पुस्तक लेकर आ । इस वृक्षका फल खा । यहां बैठ और ईश्वरकी शरण जा । मेरा देश अच्छा है । किसका देश सुन्दर है ? तेरी पुस्तक सुन्दर नहीं है ।

शब्द ।

पंडितः	– पंडित	शूद्रः	– शूद्र
ब्राह्मणः	– ब्राह्मण	निषादः	– निषाद
क्षत्रियः	– क्षत्रिय	धर्मः	– धर्म
वैश्यः	– वैश्य	उपदेशकः	– उपदेशक
उपदेशः	– उपदेश	प्रवचनं	– प्रवचन
श्रवणः	– श्रवण, सुनना	भाषणं	– भाषण
व्याख्यानं	– व्याख्यान	कथनं	– कहना

संस्कृत-वाक्यानि ।

१ कः सः पंडितः ? २ यः तत्र व्याख्यानं करोति । ३ तस्य उपदेशस्य श्रवणाय त्वं आगच्छसि किम् ? ४ तस्य धर्मप्रवचनं उत्तमम् । ५ किं तस्य भाषणं त्वया श्रुतम् ? ६ तस्मिन् नगरे यथा ब्राह्मणः तथा क्षत्रियः अपि अस्ति । ७ परन्तु तत्र निषादः नास्ति । ८ तत्र धर्मस्य प्रवचनं कः करोति ? ९ पण्डितः विष्णुमित्रः करोति ।

भाषा–वाक्य ।

१ कौन वह पंडित है ? २ जो वहां व्याख्यान देता है ? ३ उसके उपदेशको सुननेके लिये क्या तू जाता है ? ४ उसका धर्मप्रवचन उत्तम है । ५ क्या उसका भाषण तूने सुना है ? ६ उस शहरमें जैसा ब्राह्मण वैसा क्षत्रिय भी है । परन्तु वहां निषाद नहीं है । वहां धर्मका प्रवचन कौन करता है ? ९ पंडित विष्णुमित्र करता है ।

संस्कृत-वाचन-पाठः ।

मम बिडालः कुत्र अस्ति ? यत्र तव मोदकः अस्ति । तव मोदकस्य शोभनः गन्धः आगच्छति । अत एव तत्र तव मार्जारः गतः । त्वं मार्जारेण सह उद्यानं गच्छ । मार्जारः दुग्धं पिबति,

अतः इदानीं उद्यानं आगन्तुं न इच्छति, तर्हि तं सायंकाले तत्र नय।

त्वया तस्य वृक्षस्य पुष्पं न आनीतं किम्? नहि मया न आनीतम्। इदानीं सः पुष्पं अत्र आनयति।

मम अश्वः रामचन्द्रेण नीतः। स रामचंद्रः कदा अत्र आगमिष्यति? तस्मात् नगरात् कदा स आगमिष्यति? सः अश्वं आरोहति किम्? यथा त्वं अश्वं आरोहसि, तथा एव सः अपि अश्वं आरोहति।

निषादः वने भवति। शूद्रः नगरे भवति। तथा ब्राह्मणः कुत्र भवति? त्वं धर्मं जानासि किम्? निषादः धर्मं न जानाति। पण्डितः धर्मस्य वचनं जानाति एव।

तव मार्जारः इदानीं एव तेन नीतः। स पुरुषः तव अश्वं आरोहति किम्? स केन मार्गेण तत् नगरं गच्छति? यदा रामः नगरं गतः तदा त्वया किं कृतम्? त्वया तस्य बिडालः किं न आनीतः। कः वने भवति? कः च गृहे भवति? किं करोषि? यथा पण्डितः वदति तथा त्वं वदसि किम्? अहं पण्डितः अस्मि।

संधि किये हुए वाक्य।

मम बिडालः कुत्राऽस्ति? यत्र तव मोदकोऽस्ति। तव मोदकस्य शोभनो गन्ध आगच्छति। अत एव तत्रैव मार्जारो गतः। त्वं मार्जारेण सहोद्यानं गच्छ।

पाठ ६

अब इस पाठमें आप कुछ श्लोक पढिये—

दुःखादुद्विजते सर्वः सर्वस्य सुखमीप्सितम्॥

(महाभारत शांति. १३९।६१)

पदानि— दुःखात्। उद्विजते। सर्वः। सर्वस्य। सुखं। ईप्सितम्।

अन्वयः— सर्वः दुःखात् उद्विजते । सर्वस्य सुखं ईप्सितम् ।

अर्थ— सब दुःखसे दुःखी होते हैं, सबको सुख ही इष्ट है ।

यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।
तृष्णाक्षयसुखस्यैते कलां नाऽर्हन्ति षोडशीम् ॥

(महाभारत शांति. १७४।४८)

पदानि— यत् । च । काम+सुखं । लोके । यत् । च । दिव्यं । महत् । सुखम् । तृष्णा+क्षय+सुखस्य । एते । कलां । न । अर्हन्ति । षोडशीम् ।

अन्वयः— लोके यत् काम+सुखं, यत् च दिव्यं महत् सुखं, एते तृष्णा+क्षय+सुखस्य षोडशीं कलां न अर्हन्ति ।

अर्थ— लोकमें जो कामका सुख है और जो बडा दिव्य सुख है, वे (तृष्णा=क्षय-सुखस्य) इच्छाके नाशके सुखके (षोडशीं) सोलहवें (कलां) भागकी भी (न अर्हन्ति) योग्यता नहीं रखते ।

प्रायेण श्रीमतां लोके भोक्तुं शक्तिर्न विद्यते ।
काष्ठान्यपि हि जीर्यन्ति दरिद्राणां च सर्वशः ।

(महाभारत उद्योग. ३४।५१)

पदानि— प्रायेण । श्रीमतां । लोके । भोक्तुं । शक्तिः । न । विद्यते । काष्ठानि । अपि । हि । जीर्यन्ति । दरिद्राणां । च । सर्वशः ॥

अन्वयः— लोके प्रायेण श्रीमतां भोक्तुं शक्तिः न विद्यते । दरिद्राणां च सर्वशः काष्ठानि अपि हि जीर्यन्ति ।

अर्थ— जगत्में (प्रायेण) बहुधा श्रीमानोंमें (भोक्तुं) भोग भोगनेकी शक्ति नहीं (विद्यते) होती है । परन्तु दरिद्रोंको सब (काष्ठानि) लकडियां भी (जीर्यन्ति) हजम हो जाती हैं ।

अर्थात् धनी मनुष्य उत्तम अन्नको भी पचा नहीं सकता; परंतु दरिद्री मनुष्यको, लकडियां भी खानेपर हजम हो जाती हैं ।

सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।
एतद्विद्यात्समासेन लक्षणं सुखदुःखयोः ॥

(मनुस्मृति ४।१६०)

पदानि— सर्वं । पर+वशं । दुःखं । सर्वं । आत्मवशं । सुखं । एतत् । विद्यात् । समासेन । लक्षणं । सुखदुःखयोः ॥

अन्वयः— पर+वशं सर्वं दुःखं । आत्म+वशं सर्वं सुखं । समासेन सुख+दुःखयोः एतत् लक्षणं विद्यात् ॥

अर्थ— (पर+वशं) दूसरेके अधीन होना सब दुःख है और अपने अधीन रहना सब सुख है । (समासेन) सारांशसे सुख और दुःखका (एतत्) यह लक्षण (विद्यात्) जान लें । पराधीनता दुःख और स्वाधीनता सुख है ।

सुखं वा यदि वा दुःखं प्रियं वा यदि वाऽप्रियम् ।
प्राप्तं प्राप्तमुपासीत हृदयेनाऽपराजितः ॥

(म० भारत शांति० २५।२६)

पदानि— सुखं । वा । यदि । वा । दुःखं । प्रियं । वा । यदि । वा । अप्रियं । प्राप्तं । प्राप्तं । उपासीत । हृदयेन । अपराजितः ।

अन्वयः— सुखं वा यदि वा दुःखं, प्रियं वा यदि वा अप्रियं प्राप्तं प्राप्तं हृदयेन अपराजितः उपासीत ।

अर्थ— सुख किंवा दुःख, प्रिय किंवा अप्रिय जो प्राप्त होवे, उसको हृदयसे पराजित न होते हुए (उपासीत) स्वीकार करे ।

सुख दुःख, प्रिय अप्रिय जो भी कुछ प्राप्त हो, उसको स्वीकार करता जाय, परन्तु कभी हृदय उत्साहहीन न बनावे ।

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ॥

(मनुस्मृति २।१२)

पदानि— वेदः । स्मृतिः । सत्+आचारः । स्वस्य । च । प्रियं । आत्मनः । एतत् । चतुर्विधं । प्राहुः । साक्षात् । धर्मस्य । लक्षणम् ।

अन्वयः— वेदः, स्मृतिः, सदाचारः, स्वस्य आत्मनः प्रियं च, एतत् चतुर्विधं धर्मस्य साक्षात् लक्षणं प्राहुः ।

अर्थ— श्रुति, स्मृति, सत्पुरुषोंका आचार तथा अपने आत्माका प्रियाचरण यह (चतुर्-विधं) चार प्रकारका धर्मका (साक्षात्) प्रत्यक्ष लक्षण है, ऐसा (आहुः) कहते हैं ।

पाठक इन श्लोकोंको बार बार पढें, इतनी बार पढें कि अन्तमें श्लोक पढते ही उसका अर्थ ध्यानमें आ जावे । इस रीतिसे पाठक पढते जावेंगे, तो एक वर्षमें रामायण, महाभारत समझने योग्य संस्कृत उनको आ सकता है ।

संधि किये हुए वाक्य ।

तडागस्य समीपे एको वृक्षोऽस्ति । जले शोभनं रक्तं कमलमस्ति । तद्रक्तं कमलं त्वमधुनात्रानय । स भूप इदानीमश्वमारोहति । तस्य सेवक उष्ट्रमारोहति । तस्य देशस्यायं राजा धार्मिकोऽस्ति ।

तवाश्वः कुत्रास्ति ? ममाश्वस्तस्य वृक्षस्य समीपमेवास्ति । अत्रोद्याने यो वृक्षोऽस्ति तस्य समीपं ममाश्व इदानीमास्ति । तत्रानेन मार्गेण गच्छ, पश्य च तमश्वं तत्र । तवाश्वस्य को वर्णोऽस्ति ? ममाऽश्वस्य श्वेतो वर्णोऽस्ति । तर्हि श्वेतवर्णोऽश्वस्तस्मिन्नुद्याने इदानीं नास्त्येव । कुत्र गतो वा केन नीतो वा न जानामि ।

कः स पण्डितः ? यस्तत्र व्याख्यानं करोति ? तस्योपदेशस्य श्रवणाय त्वमागच्छसि किम् ? तस्य धर्मप्रवचनमुत्तमम् । तस्मिन्नगरे यथा ब्राह्मणस्तथा क्षत्रियोऽप्यस्ति । स रामचंद्रः कदात्रागमिष्यति ?

पाठ ७

इस पाठमें निम्नलिखित शब्द स्मरण कीजिये—

शब्द ।

पितृव्यः	– चचा	पालकः	– पालनेवाला
पुत्रः	– पुत्र	मातुलः	– मामा
जनकः	– पिता	मातामहः	– माताका पिता
पितामहः	– पिताका पिता, दादा।	याजकः	– यज्ञ करनेवाला
		संयोगः	– संयोग
प्रपितामहः	– दादाका पिता	वसति	– वसता है
मूषकः	– चूहा	वत्स्यति	– रहेगा

इन शब्दोंका उपयोग करके अब वाक्य बनाइये—

संस्कृत-वाक्यानि ।

१ तव पितृव्यः कुत्र अस्ति इदानीम् ? २ मम पितृव्यः इदानीं उद्यानं गतः । ३ तस्य मातुलः कदा अत्र आगमिष्यति ? ४ तव पुत्रः मम गृहं गत्वा पितामहस्य गृहं गमिष्यति । ५ तस्य जनकः इदानीं अत्र एव अस्ति । ६ तव मातुलः तस्य जनकः अस्ति । ७ तव जनकः तस्य पितृव्यः भवति । ८ स याजकः तत्र यज्ञं करोति ।

१ तेरा चचा कहां है अब ? २ मेरा चचा अब बागमें गया है । ३ उसका मामा कब यहां आवेगा ? ४ तेरा पुत्र मेरे घर जाकर दादाके घर जायगा । ५ उसका पिता अब यहां ही है । ६ तेरा मामा उसका पिता है । ७ तेरा पिता उसका चचा होता है । ८ वह याजक वहां यज्ञ करता है ।

संस्कृत-वाचन-पाठः ।

स तत्र दुग्धं पिबति । तव पितामहः अद्य किं करोति ? मम पितामहः इदानीं दुग्धं न पिबति । याजकः यज्ञं करोति । अहं जलं पास्यामि । तव मातामहः इदानीं जलं नैव पास्यति । सः अन्नं भक्षयति । अहं अन्नं भक्षयामि, जलं च पिबामि । यत्र मार्जारः अस्ति तत्र मूषकः अपि अस्ति । त्वं कदापि दण्डं न पश्यसि । अहं इदानीं तव दण्डं न पश्यामि । कुमारः बहु धावति । स ब्राह्मणः कुत्र अस्ति ? यज्ञस्य समीपे स इदानीं गतः । तस्य कः अपराधः ? तेन किं कृतम् ? वानरः वृक्षस्य उपरि वसति । वेदे यत् ज्ञानं अस्ति, तत् किं त्वं जानासि ? अहं तत् जानामि त्वया ज्ञातं चेत् कथय । जलस्य पानं कर्तुं इच्छसि किम् ? तडागस्य समीपे एकः वृक्षः अस्ति, तं पश्य ।

अब निम्नलिखित शब्द कण्ठस्थ कीजिये—

आश्रमः	– आश्रम	देहः	– शरीर
नागः	– साँप	तापः	– गर्मी, धूप
याचकः	– माँगनेवाला	दुर्गः	– किला
वायसः	– कौवा	कोपः	– क्रोध
शुकः	– तोता	रागः	– प्रीति
वृष्टिः	– बर्षात	इप्सितम्	– इच्छा किया हुआ

संस्कृत वाक्यानि ।

१ कण्वस्य आश्रमः कुत्र अस्ति ? २ आचार्यस्य कण्वस्य आश्रमः तस्मिन् वने अस्ति । ३ तस्मिन् वृक्षे वायसः अस्ति, परन्तु शुकः नास्ति । ४ सूर्यस्य तापः अद्य बहु भवति । ५ तस्य शोभनः देहः अस्ति । ६ तस्य नृपस्य एषः दुर्गः अस्ति । ७ तस्य आश्रमे एकः शिष्यः पठति ।

१ कण्वका आश्रम कहां है ? २ आचार्य कण्वका आश्रम उस वनमें है ।

में आगच्छति ? भूपः इदानीं स्नानाय गतः। त्वं अधुना दुग्ध-पानाय आगच्छसि किम् ? तस्य करे मम पुस्तकं अस्ति। देव-दत्तस्य पुस्तकं शीघ्रं पठ। तस्मात् पुस्तकात् एकं पत्रं आनय। सः नगरात् नगरं सदा किमर्थं गच्छति ? यत्र जलं नास्ति, तत्र मा गच्छ। स धीरः पुरुषः इदानीं अत्र नास्ति। मम श्वेतः अश्वः अत्र आगच्छति। तव कृष्णः अश्वः कुत्र गतः ? वृक्षस्य कोमलं पत्रं पश्य। तत् कथं मनोहरं अस्ति।

निम्नलिखित क्रियाएं अब स्मरण कीजिये—

धारयति	—(वह) धारण करता है	क्रीडति	—(वह) खेलता है
धारयसि	—(तू) धारण करता है	क्रीडसि	—(तू) खेलता है
धारयामि	—(मैं) धारण करता हूं	क्रीडामि	—(मैं) खेलता हूं
धारयिष्यति	—(वह) धारण करेगा	क्रीडिष्यति	—(वह) खेलेगा
भ्रामयति	—(वह) घुमाता है	भ्रामयिष्यति	—(वह) घुमावेगा
भ्रामयसि	—(तू) घुमाता है	उत्तिष्ठति	—(वह) उठता है
भ्रामयामि	—(मैं) घुमाता हूं		

संस्कृत-वाक्यानि।

१ ईश्वरः बलेन सर्वं जगत् धारयति। २ त्वं हस्तेन किं धारयसि ? ३ अहं सर्वं धारयामि। ४ देवः सर्वं जगत् भ्रामयति। ५ त्वं इदानीं किं न क्रीडसि ? ६ तस्य पुत्रः श्वः क्रीडिष्यति किम् ? ७ स चक्रं नैव भ्रामयिष्यति। ८ स पुरुषः कुत्र इदानीं धावति ?

भाषा—वाक्य।

१ ईश्वर बलसे सब जगतका धारण करता है। २ तू हाथसे क्या धारण करता है ? ३ मैं सबका धारण करता हूं। ४ देव सारे जगत्को घुमाता है। ५ तू अब क्यों नहीं खेलता है ? ६ उसका पुत्र कल खेलेगा क्या ? ७ वह चक्र नहीं घुमावेगा। ८ वह पुरुष अब कहां दौड़ता है ?

पाठ ९

संस्कृत-वाक्यानि ।

१ त्वं किं न क्रीडिष्यसि ? २ अहं अद्य एव क्रीडिष्यामि । ३ कुंभकारः चक्रं दंडेन इदानीं भ्रामयिष्यति । ४ त्वं भारं धारयिष्यसि किम् ? ५ त्वं अद्य सायं कुत्र क्रीडिष्यसि ?

भाषा-वाक्य ।

१ तू क्यों नहीं खेलेगा ? २ मैं आज ही खेलूंगा । ३ कुम्हार चक्रको दंडसे अब घुमावेगा । ४ तूं भार धारण करेगा क्या ? ५ तू आज शामको कहां खेलेगा ?

अब इस पाठमें आपको कुछ संस्कृत श्लोकोंका परिचय करा देते हैं—

(१)

तत्त्वज्ञः सर्वभूतानां योगज्ञः सर्वकर्मणाम् ।
उपायज्ञो मनुष्याणां नरः पंडित उच्यते ॥

(महाभारत उद्योग० अ० ३३।३२)

पदानि- तत्त्व+ज्ञः । सर्व+भूतानां । योग+ज्ञः । सर्व+कर्मणां । उपाय+ज्ञः । मनुष्याणां । नरः । पंडितः । उच्यते ॥

अन्वयः - सर्व-भूतानां तत्त्व-ज्ञः, सर्व-कर्मणां योग-ज्ञः, मनुष्याणां उपाय-ज्ञः, पंडित उच्यते ॥

अर्थ- सब भूतोंके तत्त्वको (ज्ञः) जाननेवाला, सब कर्मोंके (योग-ज्ञः) प्रयोगको जाननेवाला, मनुष्योंमें जो (उपाय-ज्ञः) उपाय जाननेवाला (नरः) मनुष्य है, [उसीको] पंडित (उच्यते) कहा जाता है ।

(२)

स्वमर्थं यः परित्यज्य परार्थमनुतिष्ठति ।
मिथ्या चरति मित्रार्थे यश्च मूढः स उच्यते ॥

(महाभारत उद्योग० अ० ३३।३६)

पदानि-स्वं। अर्थं। यः। परि+त्यज्य। पर+अर्थं। अनु+तिष्ठति। मिथ्या। चरति। मित्र+अर्थे। यः। च। मूढः। सः। उच्यते॥

अन्वयः- यः स्वं अर्थं परित्यज्य, परार्थं अनुतिष्ठति, यः च मित्रार्थे मिथ्या चरति, सः मूढः उच्यते॥

अर्थ— जो (स्वयं) अपने (अर्थं) अभीष्ट कार्यको (परि-त्यज्य) छोडकर (पर-अर्थं) शत्रुके कार्यका (अनुतिष्ठति) अनुष्ठान करता है और जो (मित्र-अर्थे) मित्रके कार्यमें (मिथ्या) झूठा (चरति) चलता है, वह मूढ (उच्यते) कहा जाता है॥

(३)

अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च।
कर्म चाऽऽरभते दुष्टं तमाहुर्मूढचेतसम्॥

(महाभारत उद्योग० अ० ३३।३८)

पदानि— अ+मित्रं। कुरुते। मित्रं। मित्रं। द्वेष्टि। हिनस्ति। च। कर्म। च। आरभते। दुष्टं। तं। आहुः। मूढ-चेतसम्॥

अन्वयः— अमित्रं मित्रं कुरुते, मित्रं द्वेष्टि, हिनस्ति च। दुष्टं कर्म आरभते। तं मूढ-चेतसं आहुः॥

अर्थ— जो (अ-मित्रं) शत्रुको मित्र (कुरुते) करता है, मित्रसे (द्वेष्टि) द्वेष करता है और (हिनस्ति) उसका घात करता है तथा (दुष्टं) दोषयुक्त कर्म (आरभते) आरंभ करता है, उसको (मूढ+चेतसं) मूढ बुद्धिवाला (आहुः) कहते हैं।

(४)

एकः क्षमावतां दोषो द्वितीयो नोपपद्यते।
यदेनं क्षमया युक्तमशक्तं मन्यते जनः॥

(महाभारत उद्योग० अ० ३३।५२)

पदानि— एकः। क्षमा+वतां। दोषः। द्वितीयः। न। उपपद्यते। यत्। एनं। क्षमया। युक्तं। अ+शक्तं। मन्यते। जनः॥

अन्वयः- क्षमावतां एकः दोषः, द्वितीयः न उपपद्यते। यत् क्षमया युक्तं एनं जनः अशक्तं मन्यते॥

अर्थ— (क्षमा-वतां) क्षमा धारण करनेवालोंका एक ही दोष है, दूसरा नहीं (उपपद्यते) होता है। (यत्) क्योंकि (क्षमया) क्षमासे युक्त (एनं) इस पुरुषको (जनः) लोग अशक्त (मन्यते) मानते हैं॥

(५)

सोऽस्य दोषो न मंतव्यः क्षमा हि परमं बलम् ।
क्षमा गुणो ह्यशक्तानां शक्तानां भूषणं क्षमा ॥

(म० भा० उद्योग० ३३।५४)

पदानि- सः । अस्य । दोषः । न । मंतव्यः । क्षमा । हि । परमं । बलं । क्षमा । गुणः । हि । अ+शक्तानां । शक्तानां । भूषणं । क्षमा ॥

अन्वयः- अस्य सः दोषः न मन्तव्यः, हि क्षमा परमं बलम् । हि अशक्तानां गुणः क्षमा, शक्तानां क्षमा भूषणम् ॥

अर्थ— (अस्य) इसका वह दोष नहीं (मन्तव्यः) मानना चाहिये, (हि) क्योंकि क्षमा (परमं) श्रेष्ठ बल (है) । क्योंकि क्षमा अशक्तोंका गुण [और] (शक्तानां) बलिष्ठोंका भूषण है ।

इस प्रकार आप कई सुगम श्लोक पढकर समझ सकते हैं । श्लोकोंके पद कैसे बने और पदोंसे अन्वय कैसा हुआ, इसकी ओर ध्यान रखते जाइये, तो अर्थ समझना सुगम होगा । शब्द आपको आते होंगे तो अर्थ आपके ध्यानमें आ जायगा । श्लोकके पद और पदोंका अन्वय करना ही विशेष कठिन है । परन्तु यह आपके लिये थोडी देरीके पश्चात् ही सुगम हो जायगा ।

संधि किये हुए वाक्य ।

ईश्वरो बलेन सर्वं जगद्धारयति । त्वं हस्तेन किं धारयस्यहं सर्वं धारयामि । देवः सर्वं जगद् भ्रामयति । त्वमिदानीं किं न क्रीडसि ? स पुरुषः कुत्रेदानीं धावति ? अहमद्यैव क्रीडिष्यामि । कुंभकारश्चक्रं दण्डेनेदानीं भ्रामयिष्यति । त्वमद्य सायं कुत्र क्रीडिष्यसि ? वायुराकाशे भवति । सोमोऽन्तरिक्षे भवति । सोम इदानीं कुत्रास्ति ? स मनुष्य इदानीमत्र किमर्थं नागच्छति ?

*

पाठ १०

अब निम्नलिखित वाक्य पढिये। यदि पिछला पाठ आपको ठीक हुआ है, तो आपको ये वाक्य पढते ही समझमें आवेंगे।

सः पुरुषः पण्डितः अस्ति। सः तत्त्वज्ञः योगज्ञः उपायज्ञः च अस्ति। यः स्वं अर्थं न जानाति, सः कदापि पंडितः न भवति। यः मित्रस्य अर्थे मिथ्या वदति, सः नरः शोभनः न भवति। यः मूढः जनः अस्ति, सः पण्डितः कथं भवति? पण्डितः प्रातःकाले शीतेन जलेन स्नानं करोति। मूढः मध्याह्ने अपि स्नानं न करोति। यः आमित्रं मनुष्यं मित्रं करोति, सः चतुरः। यः मित्रं अमित्रं करोति, सः मूढः। यः पुरुषः स्वमित्रं द्वेष्टि, सः मूढः। सः कदापि स्वमित्रं न द्वेष्टि, न तं हिनस्ति। मूढः मनुष्यः मित्रं हिनस्ति। सः दुष्टं कर्म अधुना आरभते। तस्य एकः एव दोषः अस्ति, न मम। तव कः दोषः? मम न कः अपि दोषः। सः तस्य एव दोषः, तत्र मम कः अपि दोषः नास्ति। तस्य एक एव दोषः, न द्वितीयः। तस्य एकं एव पुस्तकं अत्र अस्ति। मम एकं एव वस्त्रं तत्र अस्ति। तव एकं एव आभूषणं मम गृहे अस्ति। सः बलिष्ठं अपि पुरुषं अशक्तं मन्यते। सः जनः अशक्तं अपि पुरुषं बलिष्ठं मन्यते। अस्य सः दोषः त्वया न मंतव्यः। तस्य सः दोषं नास्ति किम्? अशक्तस्य गुणः क्षमा एव अस्ति। वीरस्य भूषणं क्षमा भवति। तस्य परमं बलं क्षमा एव अस्ति। यदा त्वं तत्र गमिष्यसि, तदा तं पश्य। कः तस्य गुणः अस्ति? इदानीं सः कुत्र अस्ति? सः अत्र न अस्ति किम्। तस्य ज्ञानं एव बलं अस्ति। तस्य पुस्तकं कुत्र अस्ति? यत्र तस्य वस्त्रं अस्ति, तत्र एव पुस्तकं अस्ति। त्वं तस्य वृक्षस्य शोभनं फलं खादसि किम्? अहं वृक्षस्य

शोभनं फलं खादामि । सः मूढः मनुष्यः तत्र किं करोति ? पश्य, अस्य वृक्षस्य शोभनं पत्रम् । अद्य सूर्यस्य शोभनः प्रकाशः अस्ति । त्वं पंडितः असि किम् ? त्वं इदानीं एव कुत्र गच्छसि ? सः प्रातर् एव कुत्र धावति ? तव पुत्रः इदानीं एव किमर्थं धावति ? यथा त्वं धावसि तथा सः अपि धावति। यथा विष्णुमित्रः वदति, तथा गणेशः अपि वदति । गणेशस्य गृहं कुत्र अस्ति ? कानपूरनगरे पंडितस्य गणेशस्य गृहं अस्ति । कथं पण्डितः गणेशदत्तः वदति ? यत्र पण्डितः गणेशदत्तः गच्छति, तत्र एव पण्डितः गोपालः अपि गच्छति । सः इदानीं हरिद्वारं प्रति गतः । त्वं कुत्र इदानीं एव गच्छसि ? यत्र फलं भवति, तत्र अन्नं जलं च भवति । यत्र जलं न भवति, तत्र अन्नं भवति किम् ? यत्र जलं नास्ति, तत्र अन्नं न एव भवति । तस्मिन् कूपे जलं नास्ति किम् ? तस्मिन् कूपे इदानीं प्रभूतं जलं अस्ति । तस्य गृहे धनं नास्ति, परन्तु अन्नं अस्ति । तव गृहे अन्नं नास्ति, परन्तु धनं अस्ति । मम गृहे अन्नं अस्ति, तथा धनं च अपि अस्ति । तस्य पुत्रः इदानीं एव मम पुस्तकं पठति । तव पुत्रः इदानीं किं न पठति ? त्वं मूढः न असि । सः मूढः नास्ति । अहं न मूढः अस्मि, परन्तु अहं पण्डितः अस्मि । विष्णुमित्रः इदानीं अत्र पत्रं लिखति । देवदत्तः कदापि पत्रं न लिखति । यज्ञसेनः वने किं करोति ? त्वं नगरे किं करोषि ? वद इदानीं एव । कथं स शीघ्रं एव युक्तं वदति ? तथा त्वं न शीघ्रं शोभनं च वदसि । यथा त्वं वदसि तथा अहं अपि वदामि । रामचंद्रः सदा एव सत्यं वदति । भूमित्रः कदापि मिथ्या न वदति । स सर्वदा एव मिथ्या न वदति । स अद्य वृक्षात् फलं न आनयति । यथा रामचंद्रः अन्नं पचति तथा त्वं अपि पचसि किम् ? यदा देवापिः वनं गतः तदा कः अन्यः वनं गतः ? तत्र वानरः फलं खादति ।

इस ढंगसे आप अनेक वाक्य बना सकते हैं और बोल तथा लिख सकते हैं। इस रीतिसे वाक्य बनाने योग्य आपका अभ्यास अब हुआ है।

पाठ ११

निम्नलिखित शब्द अब स्मरण कीजिये—

उद्यमः = उद्योग	ओष्ठः = होंठ
पुरुषार्थः = पुरुषार्थ	प्रवाहः = प्रवाह
द्विरेफः = भ्रमर	तरंगः = लहर, तरंग
चातकः = चातकपक्षी	कपोलः = गाल
वर्णः = रंग, वर्ण	स्नेहः = मित्रता
स्तेनः = चोर	व्याधः = शिकारी
ब्राह्मणः = ब्राह्मण	आतपः = धूप, सूर्यप्रकाश

संस्कृत-वाक्यानि ।

१ हे मनुष्य ! त्वं सदा उद्यमं कुरु। २ स वीरः पुरुषः सदा पुरुषार्थं करोति। ३ द्विरेफः तस्मिन् पुष्पे इदानीं अस्ति। ४ पश्य, कथं स तस्मात् पुष्पात् अत्र आगच्छति। ५ व्याधः वने व्याघ्रं पश्यति। ६ मेघं दृष्ट्वा चातकः शब्दं करोति। ७ स अन्नं पचति।

भाषा-वाक्य ।

१ हे मनुष्य ! तू सदा उद्योग कर। २ वह वीर पुरुष सदा पुरुषार्थ करता है। ३ भ्रमर उस फूलमें अब है। ४ देख वह उस फूलसे यहाँ कैसे आता है। ५ शिकारी वनमें शेरको देखता है। ६ मेघको देखकर चातक शब्द करता है। ७ वह अन्न पकाता है।

संस्कृत-वाचन-पाठः ।

तस्मै ब्राह्मणाय प्रभूतं जलं देहि । यदा रामभद्रः नगरं गच्छति, तदा त्वं अपि तत्र गच्छ । नो चेत् अहं तत्रैव आगमिष्यामि । त्वं अत्र आगच्छ अथवा अहं तत्र गच्छामि । त्वं इदानीं एव नगरात् चन्दनं अत्र आनय । सः तस्य गृहात् गोदुग्धं तत्र नयति । तव कपोलः शोभनः अस्ति । न तथा तस्य । अत्र जलस्य शोभनः प्रवाहः अस्ति । त्वं पश्यसि किम् ? पश्य सः व्याघ्रः तत्र वने कथं धावति । किमर्थं स एवं तत्र धावति ? सूर्यस्य आतपे त्वं किं न गच्छसि ? तस्य मनुष्यस्य कृष्णः वर्णः अस्ति । यः पुरुषार्थं करोति, स एव धनं प्राप्नोति । तव मित्र ब्राह्मणः इदानीं कुत्र अस्ति ? यदा स गृहं गच्छति तदा एव स उद्यमं करोति । तस्य वस्त्रं त्वया कुत्र रक्षितम् ? तस्य वस्त्रं मया अत्र रक्षितं, तथा च तस्य चक्रं अपि अत्रैव रक्षितम् ।

शब्द ।

दीपः	= दीप, दीया	ज्वलति	= (वह) जलता है
शिष्यः	= शिष्य	खनति	= (वह) खोदता है
बुधः	= ज्ञानी	आरोहति	= (वह) चढता है
अलंकारः	= आभूषण	जानाति	= (वह) जानता है
दासः	= दास, नौकर	पालयति	= (वह) पालन करता है

संस्कृत–वाक्यानि ।

१ तत्र दीपः ज्वलति । २ वानरः वृक्षं आरोहति । ३ वीरः अश्वं आरोहति । ४ दासः गर्दभं आरोहति । ५ शिष्यः अत्र खनति । ६ हे नर ! कथय, तत्र दीपः ज्वलति न वा ? ७ इदानीं कः वृक्षं आरोहति ? ८ त्वं तत् जानासि किं, यत् त्वं पठसि ?

९ बुधः सर्वं जानाति । १० यत्र गृहं अस्ति, तत्र उद्यानं अपि भवति किम् ?

भाषा--वाक्य ।

१ वहां दीप जलता है । २ बन्दर वृक्षपर चढता है । ३ वीर घोडेपर चढता है । ४ दास गधेपर चढता है । ५ शिष्य यहां खोदता है । ६ हे मनुष्य ! कह, वहां दीप जलता है वा नहीं ? ७ अब कौन वृक्षपर चढता है ? ८ तू जानता है क्या, जो तू पढता है ? ९ ज्ञानी सब जानता है । १० जहां घर होता है, क्या वहां बाग होता है ?

संस्कृत-वाचन-पाठः ।

स यज्ञदत्तः अयोध्यानगरं गच्छति । इदानीं स तत्र किमर्थं गच्छति ? स तत्र किमर्थं गच्छति इति अहं न जानामि । त्वं जानासि किम् ? स उद्यानात् पुष्पं आनयति । इदानीं मध्याह्न-समयः जातः । तर्हि भोजनं कुरु । यदा सायंकालः भविष्यति तदा सायंसंध्यां कुरु । अहं तत्र गमिष्यामि, परन्तु भोजनं नैव भक्षयिष्यामि ।

संधि किये हुए वाक्य ।

स यज्ञदत्तोऽयोध्यानगरं गच्छति । स तत्र किमर्थं गच्छती-त्यहं न जानामि । स उद्यानात्पुष्पमानयति । इदानीं मध्याह्नसमयो जातः । यथा मनुष्यो गृहेऽन्नं भक्षयति, तथैव वानरो वृक्षस्य फलं वने खादति । यदा यदा त्वमत्रागच्छसि तदा तदाहं पुस्तकं पठामि । वनस्य रक्षको वनपोऽस्ति । द्वारस्य रक्षको द्वारपो भवति । तथैव गृहस्य पालको गृहपो भवति ।

पाठ १२

संस्कृत-वाक्यानि ।

यथा मनुष्यः गृहे अन्नं भक्षयति, तथा एव वानरः वृक्षस्य फलं वने खादति । यदा यदा त्वं अत्र आगच्छसि, तदा तदा अहं पुस्तकं पठामि । ब्राह्मणाय फलं देहि । क्षत्रियाय शस्त्रं देहि । वैश्याय धनं देहि । शूद्राय अन्नं देहि । वनस्य रक्षकः वनपः अस्ति । द्वारस्य रक्षकः द्वारपः भवति । तथा एव गृहस्य पालकः गृहपः भवति । क्षेत्रस्य पालकः क्षेत्रपः भवति, तथैव रथस्य रक्षकः रथपः भवति । मम दासं अत्र आनय । स इदानीं तत्र भूमिं खनति । किमर्थं स तत्र खनति? अन्नलाभाय खनति ।

अब इस पाठमें कुछ श्लोक दिये जाते हैं ।

शमीको नाम राजेन्द्र वर्तते विषये तव ।
ऋषिः परमधर्मात्मा दान्तः शान्तो महातपाः ॥

(महाभारत आदि. ४२।१७

पदानि- शमीकः । नाम । राजेंद्र । वर्तते । विषये । तव । ऋषिः । परम-धर्मात्मा । दान्तः । शांतः । महातपाः ॥

अन्वयः— हे राजेन्द्र ! शमीकः नाम परम-धर्मात्मा दान्तः शांतः महातपाः ऋषिः तव विषये वर्तते ।

अर्थ- हे (राजा+इन्द्र) राजाओंमें श्रेष्ठ ! शमीक नामक बडा धर्मात्मा (दान्तः) इंद्रियदमन करनेवाला, शांत, बडा तपस्वी ऋषि तेरे (विषये) राज्यमें (वर्तते) रहता है ।

तस्य त्वया नरव्याघ्र सर्पः प्राणैर्वियोजितः ।
अवसक्तो धनुष्कोटया स्कन्धे मौनान्वितस्य च ।

(महाभारत आदि० ४२।१८)

पदानि- तस्य । त्वया । नरव्याघ्र । सर्पः । प्राणैः । वियोजितः । अवसक्तः । धनुष्कोटया । स्कन्धे । मौनान्वितस्य । च ।

अन्वयः- हे नरव्याघ्र ! त्वया मौनान्वितस्य तस्य स्कन्धे प्राणैः वियोजितः सर्पः धनुष्कोट्या अवसक्तः ।

अर्थ- हे (नर-व्याघ्र) मनुष्योंमें श्रेष्ठ ! तूने (मौन+अन्वितस्य) मौनव्रत धारण किये हुए उस ऋषिके (स्कन्धे) कन्धेपर प्राणोंसे (वि-योजितः) वियुक्त अर्थात् मृत सर्पको (धनुष्-कोट्या) धनुष्यकी कोटिसे (अवसक्तः) लपेट दिया ।

क्षान्तवांस्तव तत्कर्म पुत्रस्तस्य न चक्षमे ।
तेन शप्तोऽसि राजेन्द्र पितुरज्ञातमद्य वै ॥

(महाभारत आदि० ४२।१९)

पदानि- क्षान्तवान् । तव । तत् । कर्म । पुत्रः । तस्य । न । चक्षमे । तेन । शप्तः । असि । राजेन्द्र । पितुः । अज्ञातं । अद्य । वै ।

अन्वयः- हे राजेन्द्र ! (सः) तव तत् कर्म क्षान्तवान् । तस्य पुत्रः न चक्षमे । तेन अद्य पितुः अज्ञातं वै शप्तः असि ।

अर्थ— हे (राजा+इन्द्र) राजाओंमें श्रेष्ठ ! उसने तेरा वह कर्म (क्षान्तवान्) सहन किया । परन्तु उसके पुत्रने (न चक्षमे) नहीं क्षमा की । उसने आज पिताके (अ-ज्ञातं) न जानते हुए ही (शप्तः असि) तुझे शाप दिया है ॥

तत्र रक्षां कुरुष्वेति पुनः पुनरथाब्रवीत् ।
तदन्यथा न शक्यं च कर्तुं केनचिदप्युत ॥

पदानि- तत्र । रक्षां । कुरुष्व । इति । पुनः । पुनः । अथ । अब्रवीत् । तत् । अन्यथा । न । शक्यं । च । कर्तुं । केन । चित् । अपि । उत ॥

अन्वयः- तत्र रक्षां कुरुष्व इति पुनः पुनः अथ अब्रवीत् उत केन चित् अपि च तत् अन्यथा कर्तुं न शक्यम् ॥

अर्थ— (तत्र) उस विषयमें रक्षा (कुरुष्व) कर (इति) ऐसा (पुनः पुनः) बार बार (अथ) और वह (अब्रवीत्) कहने लगा। परन्तु किसीसे भी वह (अन्यथा) दूसरी प्रकार (कर्तुं) करना शक्य नहीं।

नहि शक्नोति तं यन्तुं पुत्रं कोपसमन्वितम्।
ततोऽहं प्रेषितस्तेन तव राजन्हितार्थिना॥

(महाभारत आदि० ४२।२२)

पदानि- न। हि। शक्नोति। तं। यन्तुं। पुत्रं। कोप-समन्वितं। ततः। अहं। प्रेषितः। तेन। तव। राजन्। हितार्थिना॥

अन्वयः- हे राजन्! हि कोपसमन्वितं तं पुत्रं यन्तुं न शक्नोति। ततः तव हितार्थिना तेन अहं प्रेषितः।

अर्थ- हे राजन्! क्योंकि (कोप+समन्वितं) क्रोधसे युक्त उस पुत्रको (यन्तुं) शांत करनेके लिये वह (न शक्नोति) समर्थ नहीं है, इसलिये तेरे (हित-अर्थिना) हितकी इच्छा करनेवाले उस ऋषिने मुझे (प्रेषितः) भेजा है।

पाठ १३

पूर्व श्लोकोंकी सरल संस्कृत यह है—

हे राजेन्द्र! शमीकः नाम परमधर्मात्मा शान्तः दान्तः महातपाः एकः ऋषिः तव विषये वर्तते। त्वया तस्य मौनव्रतस्य स्कंधे प्राणैः वियुक्तः सर्पः धनुष्कोट्या अवसक्तः। स ऋषिः तव तत् कर्म क्षान्तवान्। परन्तु तस्य पुत्रः न चक्षमे। हे राजन्! तेन ऋषिपुत्रेण अद्य पितुः अज्ञातं एव त्वं शप्तः आसि। इदानीं तत्र त्वं स्वरक्षां कुरुष्व इति पुनः पुनः त्वां स ऋषिः अब्रवीत्। तत् केन अपि अन्यथा कर्तुं न शक्यं इति च अपि अब्रवीत्।

यदि यह सरल संस्कृत पाठक समझ सकते हैं तो उनकी प्रगति निःसंदेह उतनी हो चुकी है, कि जितनी इतने पाठोंसे होनी चाहिये।

संधि किये हुए वाक्य।

हे राजेन्द्र! शमीको नाम परमधर्मात्मा शान्तो दान्तो महातपा एक ऋषिस्तव विषये वर्तते। त्वया तस्य मौनव्रतस्य स्कन्धे प्राणैर्वियुक्तः सर्पो धनुष्कोट्याऽवसक्तः। स ऋषिस्तव तत्कर्म क्षान्तवान्। परन्तु तस्य पुत्रो न चक्षमे। राजंस्तेनर्षिपुत्रेणाद्य पितुरज्ञातमेव त्वं शप्तोऽसि। इदानीं त्वं स्वरक्षां कुरुष्वेति पुनः पुनस्त्वां स ऋषिरब्रवीत्। तत्केनाऽप्यन्यथा कर्तुं न शक्यमिति चाप्यब्रवीत्।

निम्नलिखित क्रियाओंको स्मरण कीजिये।

शब्द।

दीपयति	= प्रकाश करता है।	वपति	= बोता है।
ध्यायति	= ध्यान करता है।	राजति	= प्रकाशता है।
वाञ्छति	= इच्छा करता है।	रटति	= रटता है।
वसति	= रहता है।	रणति	= शब्द करता है।
वहति	= उठाकर ले जाता है।	भणति	= बोलता है।

संस्कृत–वाक्यानि।

१ देवदत्तः दीपं दीपयति। २ रात्रौ अहं अपि दीपं प्रकाशयामि। ३ परन्तु सः रात्रौ अपि गृहे दीपं न प्रकाशयति, न च अग्निं दीपयति। ४ अहं सायं प्रातर् ईश्वरं ध्यायामि।

भाषा–वाक्य।

१ देवदत्त दीया जलाता है। २ रात्रिमें मैं भी दीपको प्रकाशित करता हूं। ३ परन्तु वह रात्रीमें भी घरमें न दीया प्रकाशित करता है, और न अग्निको जलाता है। ४ मैं सायंकाल और प्रातःकाल ईश्वरका ध्यान करता हूं।

निम्नलिखित भविष्य कालकी क्रियाएं अब देखिये—

दीपयिष्यति	= प्रकाशित करेगा।	वप्स्यति	= बोवेगा।
ध्यास्यति	= ध्यान करेगा।	राजिष्यति	= प्रकाशित होगा।
वाञ्छिष्यति	= इच्छा करेगा।	रटिष्यति	= रटेगा।
वत्स्यति	= रहेगा।	रणिष्यति	= बोलेगा।
वक्ष्यति	= उठाकर ले जायगा।	भणिष्यति	= बोलेगा।
		करिष्यति	= करेगा।

पाठक पहिले वर्तमानकालके रूप और ये भविष्यकालके रूप परस्पर तुलना करके देख लें। और इसकी विशेषताका स्मरण रखें। इनके तीनों रूप "ति, सि, मि" लगकर पूर्ववत् ही होते हैं। जैसा-

रटति = वह रटता है।	भणिष्यति = वह बोलेगा।
रटसि = तू रटता है।	भणिष्यसि = तू बोलेगा।
रटामि = मैं रटता हूं।	भणिष्यामि = मैं बोलूंगा।

अब इनके वाक्य देखिये—

१ सः पुरुषः भारं वहति। २ यथा स भारं वहति तथा अहं न वहामि। ३ त्वं इदानीं किं भणसि? ४ स शब्दान् रटति। ५ त्वं किं पठसि? ६ अहं संस्कृतपाठमालां पठामि। ७ दीपं दीपय, तं अत्र आनय च। ८ कृषीवलः बीजं वपति। ९ अहं अपि तथैव बीजं वप्स्यामि। १० यथा त्वं बीजं वपसि तथा स न वपति। ११ रामेश्वरः गृहे वसति। १२ मुनिः वने वसति। १३ यदा अहं तत्र गमिष्यामि तदा त्वं अपि तत्र एव आगमिष्यसि किं? अथवा त्वं अन्यत्र गमिष्यसि?

भाषा-वाक्य।

१ वह मनुष्य बोझ उठाता है। २ जैसा वह बोझ उठाता है वैसा मैं नहीं उठाता हूं। ३ तू अब क्या बोलता है? ४ वह शब्दोंको रटता है।

५ तू क्या पढता है ? ६ मै संस्कृत-पाठमाला पढता हूं । ७ दीप जला और उसे वहां रख । ८ किसान बीज बोता है । ९ मैं भी वैसा ही बीज बोऊंगा । १० जैसा तू बीज बोता है वैसा वह नहीं बोता । ११ रामेश्वर घरमें रहता है । १२ मुनि वनमें रहता है । १३ जब मैं वहां जाऊंगा तब तुम भी वहां जाओगे क्या ? अथवा तुम दूसरे जगह जाओगे ?

पाठ १४

हे मित्र ! त्वं किं वाञ्छसि ? अहं पठितुं इच्छामि । किं अत्रैव पठितुं इच्छसि अथवा काशीक्षेत्रे पठिष्यसि ? अहं व्याकरणशास्त्रं अत्र पठिष्यामि, तथा च न्यायशास्त्रं काशीनगरं गत्वा तत्र कस्य अपि बुधस्य समीपे स्थित्वा पठिष्यामि । यथा राजा स्वनगरे वसति तथैव गृहस्थः स्वगृहे वसति । त्वं स्वगृहे किं न वससि ? अहं स्वगृहे वत्स्यामि । स किं भणति ? यत् स इदानीं भणति, तत् अहं न जानामि । त्वं जानासि किं ? अहं अपि न जानामि । कः इदानीं ईश्वरं ध्यायति ? अहं एकाग्रेण मनसा ईश्वरं ध्यायामि । तदा त्वं किं करोषि ? अहं अपि तथैव ब्राह्मणं ध्यायामि । यदि त्वं परमेश्वरं ध्यास्यसि, तर्हि शोभनं भविष्यति । स किमपि नैव वाञ्छिष्यति । यदा स तत्र गमिष्यति, तदा क्षेत्रे बीजं वप्स्यति । यदि न गमिष्यति, तर्हि कथं बीजं वप्स्यति ?

शब्द ।

संगमः	= संयोग	विहगः	= पक्षी
संगः	= मिलाप	विहंगमः	= पक्षी
योधः	= वीर	खगः	= पक्षी
कासारः	= तालाब	भृत्यः	= नौकर
संमानः	= मान	सेवकः	= नौकर

संस्कृत-वाक्यानि ।

१ योधः अद्य युद्धं प्रति गमिष्यति । २ तस्य भृत्यः इदानीं किं भणति ? ३ पश्य, खगः कथं आकाशे गच्छति ? ४ कासारे जलं वर्तते । ५ जले सेवकः पतति । ६ ब्राह्मणः संमानं न इच्छति । ७ क्षत्रियः संमानं वाञ्छति । ८ वैश्यः वाणिज्येन धनं इच्छति । ९ तव भृत्यः कर्मकुशलः अस्ति ।

भाषा-वाक्य ।

१ वीर आज युद्धके प्रति जायगा । २ उसका नौकर अब क्या बोलता है ? ३ देख, पक्षी कैसा आकाशमें जाता है । ४ तालावमें जल है । ५ जलमें नौकर गिरता है । ६ ब्राह्मण संमान नहीं चाहता है । ७ क्षत्रिय संमान चाहता है । ८ वैश्य वाणिज्यसे धन चाहता है । ९ तेरा नौकर कर्ममें कुशल है ।

निम्नलिखित वाक्य अब पढिये । पढते ही आपकी समझमें आ जावेंगे—

संस्कृत-वाचन-पाठः ।

स योधः इदानीं किं करोति ? स वीरः पुरुषः इदानीं युद्धाय गन्तुं इच्छति । तस्य शस्त्रं त्वया कुत्र रक्षितं अस्ति ? मया तस्य शस्त्रं न कुत्रापि रक्षितम् । यज्ञदत्तस्य पुस्तकं तव भृत्येन कुत्र नीतम् ? अहं न जानामि तत् । तव भृत्यं अत्र आनय । मम भृत्यः जलार्थं कूपं प्रति गतः । स इदानीं एव अत्र आगमिष्यति । यः शास्त्रं जानाति, स एव पण्डितः । यः शास्त्रं न जानाति, स पंडितः कथं भवति ? यदि त्वं गन्तुं इच्छसि, तर्हि अधुना एव गच्छ । स राजा सेवकैः सह अत्र एव इदानीं आगच्छति । अहं आकाशे खगं पश्यामि । यः जनः जले स्नानं करोति, स कः अस्ति ? यः मनुष्यः तस्मिन् जले इदानीं स्नानं करोति, सः महापण्डितः भट्टभास्करः अस्ति ॥

अब निम्नलिखित शब्द स्मरण कीजिये—

गुणः	= गुण, रस्सी	समागमः	= संगति
कामः	= इच्छा	पर्वतः	= पहाड़
विनयः	= विनय	मनोरथः	= मनकी इच्छा
लोभः	= लोभ	ज्वरः	= ज्वर, बुखार
धूमः	= धूवां	उपायः	= उपाय, इलाज

संस्कृत-वाक्यानि ।

१ स गुणेन बद्धः । २ तव कः कामः अस्ति इदानीम् ? ३ यत्र यत्र धूमः तत्र तत्र वह्निः अस्ति । ४ स पर्वतः तत्र अस्ति । ५ तस्मिन् पर्वते शोभनं वनं अस्ति । ६ प्रतिदिनं अहं तत्र गच्छामि, ईश्वरं ध्यायामि च । ७ यत्र कामः अस्ति तत्र लोभः अपि भवति । ८ ईश्वरस्य ध्यानं एव तत्र उपायः । ९ त्वं ईश्वरस्य ध्यानं कुरु ।

भाषा-वाक्य ।

१ वह रस्सीसे बंधा हुआ है । २ तेरी कौनसी इच्छा है अब ? ३ जहां जहां धूआं है, वहां वहां अग्नि है । ४ वह पहाड़ वहां है । ५ उस पर्वतपर उत्तम वन है । ६ प्रतिदिन मैं वहां जाता हूं, और ईश्वरका ध्यान करता हूं । ७ जहां काम होता है, वहां लोभ भी होता है । ८ ईश्वरका ध्यान ही वहां उपाय है । ९ तूं ईश्वरका ध्यान कर ।

शब्द ।

उक्तं	= कहा हुआ	स्थितं	= ठहरा हुआ
पठितं	= पढा हुआ	प्राप्तं	= प्राप्त किया हुआ
दृष्टं	= देखा हुआ	कृतं	= किया हुआ
खादितं	= खाया हुआ	नीतं	= लिया हुआ
गतं	= गया हुआ	दंडितं	= दंड किया हुआ

आगत = आया हुआ	धावितं = दौड़ा हुआ
भूतं = हुआ हुआ	दत्तं = दिया हुआ
पतितं = गिरा हुआ	भ्रामितं = घुमाया हुआ
लिखितं = लिखा हुआ	उपविष्टं = बैठा हुआ
पक्वं = पकाया हुआ	नष्टं = नष्ट हुआ हुआ

संस्कृत-वाक्यानि ।

१ त्वया किं उक्तम्? २ मया पुस्तकं पठितम् । ३ तेन पुष्पं दृष्टम् । ४ मया कर्म न कृतम् । ५ तव पत्रं मया अद्य एव प्राप्तम् । ६ तव वस्त्रं मया न नीतम् । ७ यथा त्वया लिखितं तथा एव मया पठितम् ।

भाषा-वाक्य ।

१ तूने क्या कहा? २ मैंने पुस्तक पढ़ी । ३ उसने फूल देखा । ४ मैंने कर्म नहीं किया । ५ तेरा पत्र मैंने आज ही प्राप्त किया । ६ तेरा वस्त्र मैंने नहीं लिया । ७ जैसा तूने लिखा, वैसा मैंने पढ़ा ।

संधि किये हुए वाक्य ।

तव कः कामोऽस्तीदानीम्? यत्र यत्र धूमस्तत्र तत्र वह्निरस्ति । स पर्वतस्तत्रास्ति । यत्र कामोऽस्ति तत्र लोभोऽपि भवति । ईश्वरस्य ध्यानमेव तत्रोपायः । त्वया किमुक्तम्? तव पत्रं मयाद्यैव प्राप्तम् ।

संस्कृत-वाक्यानि ।

१ त्वया पाठः पठितः । २ तेन पुस्तकं पठितम् । ३ मया अष्टाध्यायी पठिता ।

भाषा-वाक्य ।

१ तूने पाठ पढ़ा है । २ उसने पुस्तक पढ़ी है । ३ मैंने अष्टाध्यायी पढ़ी है ।

यहां "पठित" यह शब्द तीनों लिंगोंमें शब्दोंके साथ इस प्रकार बदलता है। इसी रीतिसे शब्दोंके लिंगोंके अनुसार उनके रूप बदलकर निम्नलिखित वाक्य बनते हैं—

संस्कृत-वाक्यानि।

१ तेन मंत्रः उक्तः। २ त्वया कविता उक्ता। ३ मया काव्यं उक्तम्। ४ त्वया मोदकः खादितः। ५ मया करपट्टिका खादिता।

भाषा-वाक्य।

१ उसने मंत्र कहा। २ तूने कविता कही। ३ मैंने काव्य कहा। ४ तूने लड्डू खाया। ५ मैंने फुलका खाया।

पाठ १५

संस्कृत-वाक्यानि।

१ तेन अन्नं खादितम्। २ रामः तत्र गतः। ३ सीता अत्र आगता। ४ जलं तत्र गतम्। ५ मया धनं प्राप्तम्। ६ त्वया अश्वः प्राप्तः। ७ तेन मुद्रिका प्राप्ता। ८ मया जलं तत्र न नीतम्। ९ त्वया सेवकः किं न नीतः? १० तेन तत्र गौः नीता। ११ स पुरुषः कर्दमे पतितः। १२ सा स्त्री जले पतिता। १३ मम पत्रं कूपे पतितम्। १४ रामचन्द्रेण पत्रं लिखितम्। १५ नलेन पत्रिका लिखिता। १६ मया लेखः लिखितः। १७ त्वया धनं न दत्तम्। १८ तेन भूमिः दत्ता। १९ मया ग्रन्थः दत्तः। २० तव पातकं नष्टम्। २१ मम स्मृतिः न नष्टा। २२ तस्य ग्रंथः नष्टः किम्?

भाषा-वाक्य।

१ उसने अन्न खाया। २ राम वहां गया। ३ सीता यहां आगई। ४ जल वहां गया। ५ मैंने धन प्राप्त किया। ६ तूने घोडा प्राप्त किया। ७ उसने

अगुठी प्राप्त की। ८ मैंने जल ग्रहण नहीं किया। ९ तूने सेवक क्यों नहीं लिया? १० उसने वहां गाय की है। ११ वह पुरुष कीचडमें गिरा। १२ वह स्त्री जलमें गिर गई। १३ मेरा पुत्र कुंएमें गिर गया। १४ रामचंद्रने पत्र लिखा। १५ नलने पत्र लिखा। १६ मैंने लेख लिखा। १७ तूने धन नहीं दिया। १८ उसने भूमि दी। १९ मैंने ग्रन्थ दिया। २० तेरा पाप नष्ट हुआ। २१ मेरी स्मरणशक्ति नष्ट नहीं हुई। २२ उसका ग्रंथ नष्ट हो गया क्या?

इसी प्रकार अन्यान्य शब्दोंका प्रयोग करके वाक्य बना सकते हैं।

शब्द।

पीत	= पीया हुआ	भुक्त	= भोजन किया हुआ
भक्षित	= खाया हुआ	श्रुत	= सुना हुआ
ज्ञात	= जाना हुआ	कथित	= कहा हुआ
आज्ञात	= आज्ञा किया हुआ	आरूढ	= चढा हुआ
धृत	= धारण किया हुआ	व्याख्यात	= व्याख्यान दिया हुआ
आघ्रात	= सूंघा हुआ	रक्षित	= रखा हुआ
पालित	= पाला हुआ		

संस्कृत--वाक्यानि।

१ किं त्वया जलं पीतम्? २ मया अन्नं भक्षितं जलं च पीतम्। ३ यत् त्वया उक्तं तत् सर्वं मया ज्ञातम्। ४ किं त्वया भुक्तं अन्नम्? ५ तेन एषः विषयः व्याख्यातः। ६ तेन भोजनपात्रं कुत्र रक्षितम्?

भाषा—वाक्य।

१ क्या तूने जल पीया? २ मैंने अन्न खाया और जल पीया। ३ जो तूने कहा वह सब मैंने जान लिया। ४ क्या तूने अन्न खाया? ५ उसने इस विषयका व्याख्यान किया। ६ उसने भोजनका पात्र कहां रखा?

संस्कृत-वाचन-पाठः ।

तव पात्रं जले पतितम् । यदा तत् जले पतितं तदा एव मया दृष्टम् । यदि त्वया अन्नं न भक्षितं, तर्हि अत्र आगच्छ, अहं तुभ्यं अन्नं दास्यामि । तेन यदि चक्रं न भ्रामितं, तर्हि यन्त्रं कथं भ्रमति? यदि तेन जलं न दत्तं, तर्हि त्वया कथं प्राप्तम्? त्वं तत्र उपविष्टः असि, तथैव सः अपि उपविष्टः अस्ति । नृपेण स कथं दण्डितः? तेन किं कृतम्? यत् त्वया श्रुतं तत् एव इदानीं वद । तेन ईश्वरेण सर्वं जगत् बलेन कृतं अस्ति । यत् मया इदानीं व्याख्यातं तत् त्वया ज्ञातं किम्? वीरस्य शस्त्रं मया अत्रैव रक्षितं, परंतु तत् इदानीं अत्र नास्ति, केन नीतं इति अहं न जानामि । यः यथा कर्म करोति, सः तथा एव फलं प्राप्नोति ।

पाठ १६

संधि किये हुए वाक्य ।

यदि त्वयान्नं न भक्षितं तर्ह्यत्रागच्छ, अहं तुभ्यमन्नं दास्यामि । त्वं तत्रोपविष्टोऽसि तथैव सोऽप्युपविष्टोऽस्ति । नृपेण स कथं दण्डितः? तेन किं कृतम्? यत्त्वया श्रुतं तदेवेदानीं वद । तेनेश्वरेण सर्वं जगद्बलेन कृतमस्ति । यन्मयेदानीं व्याख्यातं तत्त्वया ज्ञातं किम्? वीरस्य शस्त्रं मयात्रैव रक्षितः परंतु तदिदानीमत्र नास्ति, केन नीतमित्यहं न जानामि ।

निम्नलिखित शब्द स्मरण कीजिये—

शब्द ।

पादः	= पांव	दिवसः	= दिन
प्रयत्नः	= प्रयत्न	विप्रः	= ज्ञानी, ब्राह्मण

स्वर्गः	= स्वर्ग	अस्ताचलः	= सूर्यास्त होनेका पर्वत
अपवर्गः	= स्वर्ग		
समाजः	= समाज	मृगः	= हरिण
अर्थः	= धन	पान्थः	= प्रवासी

संस्कृत–वाक्यानि ।

१ तेन कुमारेण इदानीं किं उक्तम् ? २ तस्मिन् समाजे एकः पण्डितः अस्ति । ३ तस्मिन् मम कः अपराधः ? ४ पुरुषः अर्थस्य दासः । ५ पान्थः मार्गेण गच्छति । ६ अस्ताचलं सूर्यः गच्छति ।

भाषा–वाक्य ।

१ उस लडकेने अब क्या कहा ? २ उस समाजमें एक पण्डित है । ३ उसमें मेरा क्या अपराध है ? ४ मनुष्य धनका दास है । ५ प्रवासी मार्गसे जाता है । ६ अस्तपर्वतके प्रति सूर्य जाता है ।

शब्द ।

दैत्यः	= राक्षस	सर्पः	= सांप
पाठः	= पाठ	स्वरः	= स्वर, अवाज
आचार्यः	= आचार्य	वासः	= निवास
लेखः	= लेख	वेदः	= वेद
दण्डः	= दण्ड, लाठी	चोरः	= चोर
पुत्रः	= पुत्र, लडका	वृक्षः	= वृक्ष, पेड

संस्कृत–वाचन–पाठः ।

मृगः वने भ्रमति । नरः ग्रामे भ्रमति । बिडालः गृहे भ्रमति । विप्रः स्वर्गं गन्तुं इच्छति । पण्डितः इदानीं एव ग्रामं गतः । यथा त्वया प्रयत्नः कृतः तथा एव तस्य फलं त्वया लब्धम् । अद्य शोभनः दिवसः अस्ति । वाचालः पुरुषः बहु वदति । मुनिः अल्पं वदति । स धनाढ्यः पुरुषः धनं ददाति । तस्य विशालं गृहं तस्मिन् नगरे वर्तते । कोमलं पुष्पं त्वया आनीतं अस्ति । ईश्वरः

सर्वभूतानां हृद्देशे तिष्ठति। सर्वं जगत् स एव भ्रामयति। तं शरणं गच्छामि। तस्य प्रसादात् त्वं परां शान्तिं प्राप्स्यसि। अहं मरणात् भीतः न अस्मि। सत्यस्य वचनं एव सदा श्रेयः भवति। यः सदा असत्यं वदति स एव पतति। त्वं कदा अपि असत्यं मा वद।

संस्कृत-वाक्यानि।

१ तेन लेखः लिखितः किम्? २ यः लेखः तेन लिखितः तं त्वं पठ। ३ तव पुत्रः इदानीं किं पठति? ४ त्वं हस्ते दण्डं धारय। ५ तस्मिन् मार्गे सर्पः स्थितः। ६ त्वया वेदस्य पुस्तकं कुत्र रक्षितम्? ७ तव कुत्र वासः भवति? ८ चोरः केन मार्गेण गतः?

भाषा-वाक्य।

१ उसने लेख लिखा क्या? २ जो लेख उसने लिखा है उसको तू पढ। ३ तेरा पुत्र अब क्या पढता है? ४ तू हाथमें दण्ड धारण कर। ५ उस मार्गमें सांप है। ६ तूने वेदकी पुस्तक कहां रखी है? ७ तेरा कहां निवास है? ८ चोर किस मार्गसे गया?

पाठ १७

संस्कृत-वाचन-पाठः।

हे आचार्य! अहं न्यायशास्त्रं पठितुं इच्छामि। हे शिष्य! किं त्वया व्याकरणशास्त्रं पठितम्? यदि नहि पठितं, तर्हि प्रथमं व्याकरणशास्त्रं एव पठ। पश्चात् न्यायशास्त्रं पठिष्यसि।

तस्य महान् शब्दः अस्ति। तं पृच्छ, कुत्र गच्छसि इति। स वदति, अहं प्रभासनगरं अधुना गच्छामि इति। तस्मात् नगरात् स कदा पुनः आगमिष्यति?

तव पुत्रेण मम दण्डः कुत्र नीतः ? स मम पुत्रः तव दण्डेन सह तत्र धावति । तं पश्य, स कथं धावति इति । यदा स धावति तदा त्वां पश्यति ।

मम वस्त्रं कुत्र अस्ति ? तत् सर्वं चोरेण नीतम् । पात्रं अपि नास्ति । तत् अपि तेन एव नीतम् । स चोरः केन मार्गेण गतः इति त्वं जानासि किम् ।

संधि किये हुए वाक्य।

तेन लेखो लिखितः किम् ? यो लेखस्तेन लिखितस्तं त्वं पठ । तव पुत्र इदानीं किं पठति ? तव कुत्र वासो भवति ? हे आचार्य ! अहं न्यायशास्त्रं पठितुमिच्छामि । हे शिष्य ! किं त्वया व्याकरण-शास्त्रं पठितम् ? यदि नहि पठितं, तर्हि प्रथमं व्याकरणशास्त्रमेव पठ, पश्चान्न्यायशास्त्रं पठिष्यसि। तस्य महाञ्छन्दोऽस्ति । तं पृच्छ, कुत्र गच्छसीति । स वदत्यहं प्रभासनगरमधुना गच्छामीति । तस्मान्नगरात्स कदा पुनरागमिष्यति ?

कुत्र नीतस्तव पुत्रेण मम दण्डः ? स मम पुत्रस्तव दण्डेन सह तत्र धावतीति । पश्य तं स कथं धावति ?

मम वस्त्रं कुत्राऽस्ति ? तत्सर्वं चोरेण नीतम् । पात्रमपि नास्ति । तदपि तेनैव नीतम् । स चोरः केन मार्गेण गत इति त्वं जानासि किम् ।

इस पाठमें निम्नलिखित श्लोक आप पढिये—

नमः शिवाय शान्ताय निश्चलाय यशस्विने ।
जगद्बीजाय श्रेष्ठाय तस्मै वीर्यात्मने नमः ॥ १ ॥

पदानि— नमः । शिवाय । शान्ताय। निश्चलाय । यशस्विने । जगत्+बीजाय । श्रेष्ठाय । तस्मै । वीर्य+आत्मने । नमः ॥

अर्थ – (शिवाय) कल्याणमय, (शान्ताय) शांत, निश्चल,

(यशस्विने) यशस्वी, (श्रेष्ठाय) श्रेष्ठ, (वीर्य+आत्मने) वीर्यमय आत्मारूप (तस्मै) उस (जगत्+बीजाय) जगत्के बीजभूत ईश्वरके लिये नमस्कार है ।

सर्वेऽपि सुखिनः सन्तु सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु न कश्चिद् दुःखमाप्नुयात् ॥

पदानि- सर्वे । अपि । सुखिनः । सन्तु । सर्वे । सन्तु । निरामयाः । सर्वे । भद्राणि । पश्यन्तु । न । कः । चित् । दुःखं । आप्नुयात् ॥

अन्वयः- सर्वे अपि सुखिनः सन्तु । सर्वे निरामयाः सन्तु । सर्वे भद्राणि पश्यन्तु । कःचित् दुःखं न आप्नुयात् ॥

अर्थ — (सर्वे) सब (अपि) ही (सुखिनः) सुखी (सन्तु) हों । सब (निरामयाः) रोगरहित हों । सब (भद्राणि) कल्याणोंको (पश्यन्तु) देखें और (कः चित्) कोई भी दुःखको (न आप्नुयात्) प्राप्त न होवे ।

न तपस्तप इत्याहुर्ब्रह्मचर्यं तपोत्तमम् ।
ऊर्ध्वरेता भवेद्यस्तु स देवो न तु मानुषः ।

पदानि- न । तपः । तपः । इति । आहुः । ब्रह्म-चर्यं । तप+उत्तमम् । ऊर्ध्व+रेताः । भवेत् । यः । तु । सः । देवः । न । तु । मानुषः ॥

अन्वयः- तपः तपः इति न आहुः । ब्रह्मचर्यं तपोत्तमम् । यः तु ऊर्ध्वरेताः भवेत, सः देवः, न तु मानुषः ॥

अर्थ- तपको तप ऐसा नहीं कहते । ब्रह्मचर्य ही (तप+उत्तमं) उत्तम तप है । जो (तु) निश्चयसे ऊर्ध्वरेता होता है, वह देव है, वह मनुष्य नहीं है ;

आजन्ममरणाद्यस्तु ब्रह्मचारी भवेदिह ।
न तस्य किञ्चिदप्राप्यं इति विद्धि नराधिप ॥

(महाभारत अनु० ६५।१५)

पदानि- आ+जन्म+मरणात् । यः । तु । ब्रह्मचारी । भवेत् । इह । न । तस्य । किंचित् । अप्राप्यं । इति । विद्धि । नराधिप ।

अन्वयः- हे नराधिप ! यः तु आजन्ममरणात् ब्रह्मचारी इह भवेत् । तस्य किञ्चित् अप्राप्यं न इति विद्धि ॥

अर्थ- हे (नर+अधिप) मनुष्योंके प्रभु ! जो (तु) निःसंदेह जन्मसे मरणपर्यन्त ब्रह्मचारी (इह) इस जगतमें (भवेत्) होवे, (तस्य) उसके लिए (किंचित्) कुछ भी (अप्राप्यं) प्राप्त होने अयोग्य नहीं, ऐसा (विद्धि) तू जान ।

पञ्चविंशतिपर्यन्तं ब्रह्मचर्यं समाचरेत् ।
गुणवाञ्छक्तिसंपन्नः शतायुस्तु भविष्यति ॥

पदानि- पंचविंशतिपर्यन्तं । ब्रह्मचर्यं । समाचरेत् । गुणवान् । शक्तिसंपन्नः । शतायुः । तु । भविष्यति ॥

अर्थ— (पंच+विंशति+पर्यन्तं) पचीस वर्षतक ब्रह्मचर्य (समाचरेत्) जो आचरण करेगा, वह गुणवान्, शक्तिसंपन्न और शतायु (तु) निःसंदेह (भविष्यति) होगा ।

पाठ १८

कायेन मनसा वाचा सर्वावस्थासु सर्वदा ।
सर्वत्र मैथुनत्यागो ब्रह्मचर्यं विधीयते ॥

पदानि- कायेन । मनसा । वाचा । सर्व+अवस्थासु । सर्वदा । सर्वत्र । मैथुन-त्यागः । ब्रह्मचर्यं । विधीयते ॥

अर्थ- (कायेन) शरीरसे, (मनसा) मनसे, (वाचा) वाणीसे, (सर्व+अवस्थासु) सब अवस्थाओंमें सर्वदा और सर्वत्र मैथुनका त्याग करना ब्रह्मचर्य (विधीयते) कहा जाता है।

यदीच्छसि वशीकर्तुं जगदेकेन कर्मणा।
सुदुर्वृत्तेन्द्रियग्रामं बलाच्छीघ्रं निवारय॥

पदानि- यदि। इच्छसि। वशीकर्तुं। जगत्। एकेन। कर्मणा। सु+दुर्+वृत्त+इंद्रिय+ग्रामं। बलात्। शीघ्रं। निवारय॥

अन्वयः— यदि एकेन कर्मणा जगत् वशीकर्तुं इच्छसि, सुदुर्वृत्त+इंद्रिय+ग्रामं शीघ्रं बलात् निवारय॥

अर्थ— यदि एक कर्मसे सब जगत वशमें करनेकी इच्छा तू करता है, तो दुष्ट आचरण करनेवाले इंद्रियोंके समुदायको शीघ्र ही बलके साथ (निवारय) निवारण कर।

इन श्लोकोंको वारंवार पढके देखिये कि आपकी योग्यता कितनी हुई है और संस्कृतमें कैसी प्रगति आप कर रहे हैं।

संधि किये हुए वाक्य।

तव पात्रं जले पतितम्। यदा तज्जले पतितं तदैव मया दृष्टम्। यदि त्वयान्नं न भक्षितं तर्ह्यत्रागच्छाहं तुभ्यमन्नं दास्यामि। तेन यदि चक्रं न भ्रामितं, तर्हि यन्त्रं कथं भ्रमति? यदि तेन जलं न दत्तं, तर्हि त्वया कथं प्राप्तम्? त्वं यथा तत्रोपविष्टोऽसि तथैव सोऽप्युपविष्टोऽस्ति, नृपेण स कथं दण्डितः? किं तेन कृतम्? यत्त्वया श्रुतं तदेवेदानीं वद। तेनेश्वरेण सर्वं जगद्बलेन धृतमस्ति। यन्मयेदानीं व्याख्यातं तत्त्वया ज्ञातं किम्? वीरस्य शस्त्रं मयात्रैव रक्षितं, परन्तु तदिदानीमत्र नास्ति, केन नीतमित्यहं न जानामि। यो यथा करोति स तथैव फलं प्राप्नोति।

संस्कृत--वाचन--पाठः ।

(१)

हे राजेन्द्र ! शमीको नाम परमधर्मात्मा शान्तो दान्तो महातपा एक ऋषिस्तव विषये वर्तते । त्वया मौनव्रतस्य तस्य स्कंधे प्राणैर्वियुक्तः सर्पो धनुष्कोट्याऽवसक्तः । स ऋषिस्तव तत्कर्म क्षान्तवान् । परन्तु तस्य पुत्रो न चक्षमे । हे राजन् ! तेनर्षिपुत्रेणाद्य पितुरज्ञातमेव त्वं शप्तोऽसि । इदानीं तत्र त्वं स्वरक्षां कुरुष्वेति पुनःपुनस्त्वां स ऋषिरब्रवीत् । तत्केनाप्यन्यथाकर्तुं न शक्यमिति चापि सोऽब्रवीत् ।

(२)

स पुरुषो भारं वहति । यथा स भारं वहति तथाऽहं न वहामि । त्वमिदानीं किं भणसि । स शब्दान् रटति । दीपं दीपय, तमआनय च । कृषीवलो बीजं वपति । अहमपि तथैव बीजं वप्स्यामि । यथा त्वं बीजं वपसि तथा स न वपति । रामेश्वरो गृहे वसति । मुनिर्वने वसति ।

(३)

हे मित्र, त्वं किं वाञ्छसि ? अहं पठितुमिच्छामि । किमत्रैव पठितुमिच्छसि ? अथवा काशीक्षेत्रे पठिष्यसि ? अहं व्याकरणशास्त्रमत्र पठिष्यामि, तथा च न्यायशास्त्रं काशीनगरं गत्वा, तत्र कस्यापि बुधस्य समीपे स्थित्वा पठिष्यामि । यथा राजा स्वनगरे वसति, तथैव गृहस्थः स्वगृहे वसति । त्वं स्वगृहे किं न वससि ? अहं स्वगृहे वत्स्यामि । स किं भणति ? वत्स इदानीं भणति, तदहं न जानामि । त्वं जानासि किम् ? अहमपि न जानामि । क इदानीमीश्वरं ध्यायति ? अहमेकाग्रेण मनसेश्वरं ध्यायामि । यदि त्वं परमेश्वरं ध्यास्यसि, तर्हि शोभनं भविष्यति । स

किमपि नैव वाञ्छिष्यति । यदा स तत्र गमिष्यति तदा क्षेत्रे बीजं वप्स्यति ।

(४)

योधोऽद्य युद्धं प्रति गमिष्यति । तस्य भृत्य इदानीं किं भणति ? पश्य, खगः कथमाकाशे गच्छति । कासारे जलं वर्तते । जले सेवकः पतति । ब्राह्मणः संमानं नेच्छति । क्षत्रियः संमानं वाञ्छति । वैश्यो वाणिज्येन धनमिच्छति । तव भृत्यः कर्मकुशलोऽस्ति ।

पाठ १९

संस्कृत–वाचन–पाठः ।

स योध इदानीं किं करोति । स वीरः पुरुष इदानीं युद्धाय गन्तुमिच्छति । तस्य शस्त्रं त्वया कुत्र रक्षितमस्ति ? मया तस्य शस्त्रं न कुत्रापि रक्षितम् । यज्ञदत्तस्य पुस्तकं तव भृत्येन कुत्र नीतम् ? अहं न जानामि तत् । तव भृत्यमत्रानय । मम भृत्यो जलार्थं कूपं प्रति गतः । स इदानीमेवात्रागमिष्यति । यः शास्त्रं जानाति स एव पण्डितः । यः शास्त्रं न जानाति स पण्डितः कथं भवति ? यदि त्वं तत्र गन्तुमिच्छसि तर्ह्यधुनैव गच्छ । स राजा सेवकैः सहात्रैवेदानीमागच्छति । अहमाकाशे तं खगं पश्यामि, यो जनो जले स्नानं करोति स कोऽस्ति ? यो मनुष्यस्तस्मिञ्जले इदानीं स्नानं करोति, स महापण्डितो भट्टभास्करोऽस्ति ।

स गुणेन बद्धः । तव कः कामोऽस्तीदानीम् ? यत्र यत्र धूमस्तत्र तत्र वह्निरस्ति । स पर्वतस्तत्राऽस्ति । तस्मिन्पर्वते शोभनं वनमस्ति । प्रतिदिनमहं तत्र गच्छामीश्वरं ध्यायामि च । यत्र कामोऽस्ति तत्र लोभोऽपि भवति । ईश्वरस्य ध्यानमेव तत्रोपायः ।

त्वया किमुक्तम् ? मया पुस्तकं पठितम्। तेन पुष्पं दृष्टम्। मया कर्म न कृतम्। तव पत्रं मयाद्यैव प्राप्तम् तव वस्त्रं मया नीतम्। यथा त्वया लिखितं तथैव मया पठितम्।

त्वया पाठः पठितः। तेन पुस्तकं पठितम्। मयाऽष्टाध्यायी पठिता। तेन मंत्रः उक्तः। त्वया कवितोक्ता। मया काव्यमुक्तम्। त्वया मोदकः खादितः। मया करपट्टिका खादिता। तेनान्नं खादितम्। रामस्तत्र गतः। सीतात्रागता। जलं तत्र गतम्। मया धनं प्राप्तम्। त्वयाऽश्वः प्राप्तः। तेन मुद्रिका प्राप्ता। मया जलं तत्र न नीतम्। त्वया सेवकः किं न नीतः? तेन तत्र गौर्नीता। स पुरुषः कर्दमे पतितः। सा स्त्री जले पतिता। मम पत्रं कूपे पतितम्। रामचन्द्रेण पत्रं लिखितम्। नलेन पत्रिका लिखिता। मया लेखो लिखितः। त्वया धनं दत्तम्। तेन भूमिर्दत्ता। मया ग्रंथो दत्तः। तव पातकं नष्टम्। मम स्मृतिर्न नष्टा। तस्य ग्रंथो नष्टः किम्?

किं त्वया जलं पीतम्? मयान्नं भक्षितं जलं च पीतम्। यत्त्वयोक्तं तत्सर्वं मया ज्ञातम्। किं त्वया भुक्तमन्नम्? तेनैष विषयो व्याख्यातः। तेन भोजनपात्रं कुत्र रक्षितम्?

किं त्वया पाठो न पठितः? त्वया पुस्तकं न पठितं किम्? त्वया अष्टाध्यायी नैव पठिता। मया मन्त्रः पठित एव। केन कविता नैवोक्ता। त्वया काव्यमुक्तं किम्? खादितोऽपि मया मोदकः। त्वया करपट्टिका खादिता किम्? मयान्नं खादितमेव। रामस्तत्र गतः किम्?

सीतात्र नैवागता। जलं तत्र गतं नैव। मया धनं प्राप्तम्। अश्वस्त्वया प्राप्तः किम्? मया मुद्रिका प्राप्ता। मया जलं तत्रैव नीतम्।

परमधर्मात्मा शमीको नाम मुनिः तव राज्ये तपः तपति। त्वया मौनावलम्बिनः व्रतस्थस्य तस्य मुनेः कण्ठे धकः मृतः

सर्पो धनुष्कोट्याऽवसक्तः । स शान्तो दान्तो मुनिः तत्तव दुष्टकृत्यं क्षान्तवान् । परन्तु तस्य मुनेः पुत्रः तत्तव कर्म न चक्षमे । हे राजन् ! शमीकस्य तेन पुत्रेण त्वं शप्तोऽसि । अतः इदानीं तत्र त्वं स्वरक्षां कुरुष इति पुनः पुनः स ऋषिः त्वां अब्रवीत् ।

पाठ २०

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १ ॥

पदानि- इदं । तु । ते । गुह्य-तमं । प्रवक्ष्यामि । अनसूयवे । ज्ञानं । विज्ञान-सहितं । यत् । ज्ञात्वा । मोक्ष्यसे । अशुभात् ।

अन्वयः- यत् ज्ञात्वा (त्वं) अशुभात् मोक्ष्यसे, (तत्) तु इदं गुह्यतमं विज्ञानसहितं ज्ञानं अनसूयवे ते प्रवक्ष्यामि ॥

अर्थ- जो जानकर (तुम) अशुभसे मुक्ति पाओगे (वह) यह अत्यन्त गुह्य और विज्ञानसहित तथा मत्सररहित उत्तम ज्ञान तुमको मैं कहनेवाला हूँ ।

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥ २ ॥

पदानि- राज-विद्या । राज-गुह्यं । पवित्रं । इदं । उत्तमं । प्रत्यक्ष-अवगमं । धर्म्यं । सुसुखं । कर्तुं । अव्ययम् ।

अन्वयः- इदं (ज्ञानं) राजविद्या, राजगुह्यं, उत्तमं, पवित्रं, अव्ययं, प्रत्यक्षावगमं, कर्तुं सुसुखं, धर्म्यं च (अस्ति) ।

अर्थ- यह ज्ञान अर्थात् सब विद्यामें मुख्य, सब गुह्योंमें गुह्य, उत्तम, पवित्र, अविनाशी, प्रत्यक्ष अनुभवमें आनेवाला, करनेमें सुलभ और धार्मिक स्वरूपका ऐसा है ।

अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥ ३ ॥

पदानि- अश्रद्दधानाः । पुरुषाः । धर्मस्य । अस्य । परंतप । अप्राप्य । मां । निवर्तन्ते । मृत्यु-संसार-वर्त्मनि ।

अन्वयः- हे परंतप ! अस्य धर्मस्य अश्रद्दधानाः पुरुषाः मां अप्राप्य मृत्युसंसारवर्त्मनि निवर्तन्ते ।

अर्थ- हे श्रेष्ठ तप करनेवाले अर्जुन ! इस धर्मपर श्रद्धा न रखनेवाले लोग मुझको (ईश्वरको) नहीं प्राप्त होते हैं । मृत्युमय संसारके मार्गोंपर वारंवार भटकते रहते हैं ।

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥ ४ ॥

पदानि- मया । ततं । इदं । सर्वं । जगत् । अव्यक्तमूर्तिना । मत्स्थानि । सर्व-भूतानि । न । च । अहं । तेषु । अवस्थितः ।

अन्वयः- अव्यक्तमूर्तिना मया इदं सर्वं जगत् ततम् । सर्वं भूतानि मत्स्थानि (सन्ति) अहं च तेषु न अवस्थितः ।

अर्थ- अव्यक्त मूर्ति धारण करनेवाले मेरेसे (ईश्वरसे) यह संपूर्ण संसार विस्तृत अथवा व्याप्त किया गया है । सब प्राणी मेरेमें हैं किन्तु हम उसमें नहीं हैं ।

गुह्यतमं – अत्यन्तं गुह्यं गुह्यतमं ।

अनसूयुः – न असूयुः अनसूयुः ।

विज्ञानसहितं – विशेष ज्ञानं विज्ञानं । विज्ञानेन सहितं विज्ञान सहितम् ।

अशुभं – न शुभं अशुभम् ।

अव्ययः – न व्ययः अव्ययः ।

अव्यक्तमूर्तिः – अव्यक्ता मूर्तिः यस्य सः अव्यक्तमूर्तिः ।

सर्वभूतानि – सर्वाणि भूतानि ।

३

ॐ

संस्कृत-पाठ-माला ।

[संस्कृत भाषाका अध्ययन करनेका सुगम उपाय]

तृतीय भाग

लेखक

पं. श्रीपाद दामोदर सातवलेकर

अध्यक्ष- स्वाध्याय-मण्डल, साहित्य-वाचस्पति, गीतालंकार

स्वाध्याय मण्डल, पारडी (जि. सूरत)

मूल्य ५० नये पैसे

अंक ३

ॐ

संस्कृत-पाठ-माला।

[संस्कृत भाषाका अध्ययन करनेका सुगम उपाय]

तृतीय भाग।

लेखक

पं. श्रीपाद दामोदर सातवलेकर

अध्यक्ष- स्वाध्याय-मण्डल, साहित्य-वाचस्पति, गीतालंकार

नवम आवृत्ति

संवत् २०१५, शक १८८०, सन १९५८

मूल्य ५० नये पैसे

सूचना

पाठको ! यह तृतीय भाग आपको दिया जाता है । पूर्ववत ही इसका अध्ययन आप कीजिये । बीच बीचमें ऐसे पाठ रखे हैं कि जो 'केवल संस्कृत' के ही हैं । वे पाठ यदि आपकी समझमें आ गये, तो आप यह समझ सकते हैं कि, उस पाठतकका भाग आपको अवगत हो चुका है । परन्तु यदि वे पाठ समझमें नहीं आये, तो आपको पूर्वके पाठ पुनः देखने चाहिये ।

इस युक्तिसे आप अपनी परीक्षा भी कर सकते हैं और शीघ्र आगे भी बढ सकते हैं ।

लेखक
श्रीपाद दामोदर सातवलेकर

प्रकाशक और मुद्रक :
व. श्री. सातवलेकर, बी. ए.
भारत-मुद्रणालय, स्वाध्याय-मण्डल,
पोस्ट- 'स्वाध्याय-मण्डल (पारडी)' पारडी [जि० सूरत]

ओं

संस्कृत-पाठ-माला।

तृतीय भाग।

पाठ १

अकारान्त पुल्लिंग शब्दोंके रूप निम्न प्रकार बनते हैं—

१ प्रथमा	कुमारः	=	लड़का
संबोधन	हे कुमार !	=	हे लड़के !
२ द्वितीया	कुमारम्	=	लड़केको
३ तृतीया	कुमारेण	=	लड़केने
४ चतुर्थी	कुमाराय	=	लड़केके लिये
५ पंचमी	कुमारात्	=	लड़केसे
६ षष्ठी	कुमारस्य	=	लड़केका
७ सप्तमी	कुमारे	=	लड़केमें

इसी प्रकार निम्नलिखित अकारान्त शब्दोंके रूप होते हैं—

पुत्रः = लड़का।
प्राणः = प्राण
राक्षसः = राक्षस
यक्षः = यक्ष
अश्वः = घोड़ा।
कंदुकः = गेंद
सिंहः = सींह, बबर
देशः = देश, प्रांत
खण्डः = टुकड़ा।
पंकः = कीचड़
दुर्गः = गढ़
द्वारपालः = द्वारका रक्षक
वृषभः = बैल
मेषः = मेंढा, भेड़।
मंचकः = मेज, पलंग, टेबल
विष्टरः = आसन, कुर्सी
भागः = हिस्सा।
धर्मः = धर्म

संस्कृत--वाक्यानि ।

१ तव पुत्रः कुत्र गतः ? २ मम पुत्रः अद्य मातुलस्य गृहं गतः । ३ स कदा आगमिष्यति ? ४ स श्वः आगमिष्यति । ५ तस्मिन् पंके वृषभः पतितः । ६ तं विष्टरं अत्र आनय । ७ मम मंचकः अत्र नास्ति । ८ धर्मस्य तत्त्वं त्वं जानासि किम् ? ९ अस्मिन् देशे राक्षसः नास्ति । १० तव द्वारपालः तत्र अस्ति किम् ? ११ त्वं यज्ञस्य अनुष्ठानं किं न करोषि ? १२ अस्य गृहस्य एष भागः अस्ति । १३ तस्य पुत्रः ग्रामं गतः । १४ मम पुत्रं पश्य । १५ पुत्रेण फलं न आनीतम् । १६ पुत्राय पुस्तकं देहि । १७ पुत्रात् दूरं न गच्छ । १८ पुत्रस्य वस्त्रं नय । १९ पुत्रे सर्वं सुखं भवति । २० स धर्मेण राज्यं रक्षति । २१ तस्य भागं त्वं किं न इच्छसि ? २२ विष्टरे पुस्तकं रक्षितम् । २३ मञ्चकस्य समीप एव विष्टरः अस्ति । २४ दुर्गः कुत्र अस्ति ? २५ कः दुर्गः ? २६ कृष्णदुर्गः इति यः अस्ति । २७ कृष्णदुर्गः विजयदुर्गस्य समीप एव अस्ति ।

भाषा--वाक्य ।

१ तेरा लडका कहां गया ? २ मेरा लडका आज मामाके घर गया । ३ वह कब आवेगा ? ४ वह कल आवेगा । ५ उस कीचडमें बैल गिर गया है । ६ उस कुर्सीको यहां ला । ७ मेरा मेज यहां नहीं है । ८ धर्मका तत्त्व तू जानता है क्या ? ९ इस देशमें राक्षस नहीं है । १० तेरा द्वारपाल वहां है क्या ? ११ तू यज्ञका अनुष्ठान क्यों नहीं करता ? १२ इस घरका यह भाग है । १३ उसका लडका ग्राम चला गया । १४ मेरे पुत्रको देख । १५ पुत्रने फल नहीं ला रखा । १६ पुत्रको पुस्तक दो । १७ पुत्रसे दूर मत जा । १८ पुत्रका वस्त्र ले जा । १९ पुत्रमें सब सुख होता है । २० वह धर्मसे राज्यकी रक्षा करता है । २१ उसके हिस्सेको तू क्यों नहीं चाहता ? २२ कुर्सीपर पुस्तक रखा है । २३ मेजके पास ही कुर्सी है । २४ गढ कहां है ? २५ कौनसा गढ ? २६ कृष्णदुर्ग जो है । २७ कृष्णदुर्ग विजयदुर्गके पास ही है ।

संस्कृत--वाक्यानि ।

सर्वं बलं प्राणे एव भवति । प्राणः एव बलं अस्ति । रावणः नाम एकः राक्षसः अस्ति । लंकानगरे तस्य राज्यं अस्ति । सिंहः यथा वने भवति तथा अश्वः ग्रामे भवति । मंचके पुस्तकं नास्ति। गृहे मंचकः अपि नास्ति । अश्वं वीरः आरोहति । वीरः अश्वं आरोहति किम् ? वृषभं कः आरोहति ? महादेवः वृषभं आरोहति । अस्य दुर्गस्य कः द्वारपालः अस्ति ? कंदुकः त्वया कुत्र रक्षितः ? यथा मेषः धावति तथा एव वृषभः अपि धावति । यत्र पंकः अस्ति, तत्र न गच्छ । यथा पिता कुमारं पश्यति । तथा कुमारः जनकं पश्यति । चोरेण मम अश्वः नीतः। द्वारपालस्य शस्त्रं तीक्ष्णं अस्ति । दुर्गे सैनिकः भवति । गृहे गृहस्य रक्षकः अस्ति ।

संधि किये हुए वाक्य ।

तव पुत्रः कुत्र गतः ? कुत्र गतस्तव पुत्रः ? कुत्र तव पुत्रो गतः ? मम पुत्रोऽद्य मातुलस्य गृहं गतः । मातुलस्य गृहमद्य गतो मम पुत्रः । मम पुत्रो गतोऽद्य मातुलस्य गृहम् । मम मंचकोऽत्र नास्ति । नास्त्यत्र मम मंचकः । तव द्वारपालस्तत्रास्ति किम् ? किं तत्रा- स्ति तव द्वारपालः ? अस्ति किं तव द्वारपालस्तत्र ? रावणो नामैको राक्षसोऽस्ति । राक्षसोऽस्त्येको रावणो नाम । एको राक्षसो रावणो नामास्ति । अश्वमारोहति वीरः । आरोहत्यश्वं वीरः । वीर आरोहत्यश्वम् । कुमारो जनकं पश्यति । जनकं कुमारः पश्यति ।

पाठ २

संस्कृत--वाक्यानि।

१ तेन अन्नं खादितम्। २ रामः तत्र गतः। ३ सीता अत्र आगता। ४ जलं तत्र गतम्। ५ मया धनं प्राप्तम्। ६ त्वया अश्वः प्राप्तः। ७ तेन मुद्रिका प्राप्ता। ८ मया जलं तत्र न नीतम्। ९ त्वया सेवकः किं न नीतः? १० तेन तत्र गौः नीता। ११ स पुरुषः कर्दमे पतितः। १२ सा स्त्री जले पतिता। १३ मम पत्रं कूपे पतितम्। १४ रामचंद्रेण पत्रं लिखितम्। १५ तेन पत्रिका लिखिता। १६ मया लेखः लिखितः। १७ त्वया धनं न दत्तं। १८ तेन भूमिः दत्ता। १९ मया ग्रंथः दत्तः। २० तव पातकं नष्टम्। २१ मम स्मृतिः न नष्टा। २२ तस्य ग्रंथः नष्टः किम्?

भाषा--वाक्य।

१ उसने अन्न खाया। २ राम वहां गया। ३ सीता यहां आई। ४ पानी वहां गया। ५ मुझे धन प्राप्त हुआ। ६ तुझे घोडा मिला। ७ उसने अंगुठी प्राप्त किया। ८ मैं पानी वहां नहीं लाया। ९ तू नौकर क्यों नहीं लाया। १० उसने वहां गाय लाई। ११ वह पुरुष पंकमें गिरा। १२ वह स्त्री जलमें गिरी। १३ मेरा पत्र कुएंमें गिर गया। १४ रामचन्द्रने पत्र लिखा। १५ उसने पत्रिका लिखी। १६ मैं लेख लिखा। १७ तू धन नहीं दिया। १८ उसने भूमि दी। १९ मैं ग्रंथ दिया। २० तुम्हारा पाप नष्ट हुआ। २१ मेरी स्मरणशक्ति नष्ट नहीं हुई। २२ उसका ग्रंथ नष्ट हुआ क्या?

इस प्रकार पहलेके शब्दोंका उपयोग करके वाक्य बनाइये। अब आप बहुतसे वाक्य बना सकते हैं। और कुछ शब्द देखिये—

शब्द ।

पीत	= पीया हुआ	आज्ञात	= आज्ञा किया हुआ
भक्षित	= खाया हुआ	धृत	= धारण किया हुआ
ज्ञात	= जाना हुआ	आघ्रात	= सूंघा हुआ
भुक्त	= खाया हुआ	आरूढ	= चढा हुआ
श्रुत	= सुना हुआ	व्याख्यात	= व्याख्यान दिया हुआ
कथित	= कहा हुआ	रक्षित	= रखा हुआ

संस्कृत--वाक्यानि ।

१ किं त्वया जलं पीतम्? २ मया अन्नं भक्षितं जलं च पीतम्। ३ यत् त्वया उक्तं तत् सर्वं मया ज्ञातम्। ४ किं त्वया भुक्तं अन्नम्? ५ तेन एष विषयः व्याख्यातः। ६ तेन भोजनपात्रं कुत्र रक्षितम्?

भाषा--वाक्य ।

१ क्या तुमने पानी पीया। २ मैंने अन्न खाया और पानी पीया। ३ जो तुमने कहा वह सब मैं समझा। ४ क्या तुमने अन्न खाया? ५ उसने यह विषय स्पष्ट किया। ६ उसने भोजनपात्र कहां रखा?

संस्कृत-वाचन-पाठः ।

तव पात्रं जले पतितम्। यदा तत् जले पतितं तदा एव मया दृष्टम्। यदि त्वया अन्नं न भक्षितं, तर्हि अत्र आगच्छ, अहं तुभ्यं अन्नं दास्यामि। तेन यदि चक्रं न भ्रामितं तर्हि यन्त्रं कथं भ्रमति? यदि तेन जलं न दत्तं तर्हि त्वया कथं प्राप्तम्। त्वं तत्र उपविष्टः असि तथैव सः अपि उपविष्टः अस्ति। नृपेण स कथं दण्डितः? तेन किं कृतम्? यत् त्वया श्रुतं तत् एव इदानीं वद। तेन ईश्वरेण सर्वं जगत् बलेन धृतमस्ति। यत् मया इदानीं व्याख्यातं तत् त्वया ज्ञातं किम्? वीरस्य शस्त्रं मया अत्रैव रक्षितं, परंतु तत् इदानीं अत्र नास्ति, केन नीतं इति अहं न जानामि। यः यथा कर्म करोति सः तथा एव फलं प्राप्नोति।

पाठ ३

अब ये शब्द ध्यानमें रखिये—

कुमारः = बालक	प्रयत्नः = प्रयत्न
पादः = पांव	दिवसः = दिन
अपराधः = अपराध	विप्रः = ब्राह्मण
स्वर्गः = स्वर्ग	अस्ताचलः = अस्ताचल नामका पर्वत
अपवर्गः = मोक्ष	मृगः = हरिण
समाजः = समाज	पान्थः = बटोही
अर्थः = पैसा, धन	

संस्कृत--वाक्यानि।

१ तेन कुमारेण इदानीं किं उक्तम्? २ तस्मिन् समाजे एकः पण्डितः अस्ति। ३ तस्मिन् मम कः अपराधः? ४ पुरुषः अर्थस्य दासः। ५ पान्थः मार्गेण गच्छति? ६ अस्ताचलं सूर्यः गच्छति।

भाषा–वाक्य।

१ उस बालकने अभी क्या कहा। २ उस समाजमें एक पंडित है। ३ उसमें मेरा क्या अपराध है? ४ पुरुष धनका दास है। ५ बटोही रास्तेसे जाता है। ६ सूर्य अस्ताचलको जाता है।

संस्कृत-वाचन-पाठः।

मृगः वने भ्रमति। नरः ग्रामे भ्रमति। बिडालः गृहे भ्रमति। विप्रः स्वर्गं गन्तुं इच्छति। पण्डितः इदानीं एव ग्रामं गतः। यथा त्वया प्रयत्नः कृतः तथा एव तस्य फलं त्वया लब्धम्। अद्य शोभनः दिवसः अस्ति। वाचालः पुरुषः बहु वदति। मुनिः अल्पं वदति। स धनाढ्यः पुरुषः धनं ददाति। तस्य विशालं गृहं तस्मिन् नगरे वर्तते। कोमलं पुष्पं त्वया आनीतं अस्ति। ईश्वरः सर्वभूतानां हृद्देशे तिष्ठति। सर्वं जगत् स एव भ्रामयति। तं शरणं गच्छामि।

तस्य प्रसादात् त्वं परां शान्तिं प्राप्स्यसि । अहं मरणात् भीतः न अस्मि । सत्यस्य वचनं एव सदा श्रेयः । कदा अपि असत्यस्य वचनं श्रेयः न भवति । यः सदा असत्यं वदति स एव पतति । त्वं कदा अपि असत्यं न वद ।

शब्द ।

दैत्यः	= राक्षस	आचार्यः	= आचार्य, गुरु
पाठः	= पाठ	चोरः	= चोर
लेखः	= लेख	सर्पः	= साप
दण्डः	= लाठी	स्वरः	= स्वर
पुत्रः	= पुत्र	वासः	= वासस्थान
वेदः	= वेद	वृक्षः	= वृक्ष

संस्कृत--वाक्यानि ।

१ तेन लेखः लिखितः किम् ? २ यः लेखः तेन लिखितः तं त्वं पठ । ३ तव पुत्रः इदानीं किं पठति ? ४ त्वं हस्ते दण्डं धारय । ५ तस्मिन् मार्गे सर्पः स्थितः । ६ त्वया वेदस्य पुस्तकं कुत्र रक्षितम् ? ७ तव कुत्र वासः भवति ? ८ चोरः केन मार्गेण गतः ?

भाषा--वाक्य ।

१ क्या उसने लेख लिखा ? २ जो लेख उसने लिखा उसे तू पढ । ३ तुम्हारा पुत्र अभी क्या पढता है ? ४ तू हाथमें दण्ड धारण कर । ५ उस मार्गमें सांप रहता है । ६ तुमने वेदका पुस्तक कहां रखा ? ७ तेरा वासस्थान कहां है । ८ चोर किस मार्गसे गया ?

संस्कृत-वाचन-पाठः ।

हे आचार्य ! अहं न्यायशास्त्रं पठितुं इच्छामि । हे शिष्य ! किं त्वया व्याकरणशास्त्रं पठितम् ? यदि नहि पठितं तर्हि प्रथमं व्याकरणशास्त्रं एव पठ । पश्चात् न्यायशास्त्रं पठिष्यसि ।

पाठ ४

संस्कृत-वाचन-पाठः ।

तस्य महान् शब्दः अस्ति । तं पृच्छ, कुत्र गच्छसि इति । स वदति, अहं प्रभासनगरं अधुना गच्छामि इति । तस्मात् नगरात् स कदा पुनः आगमिष्यति ? तव पुत्रेण मम दण्डः कुत्र नीतः ? स मम पुत्रः तव दण्डेन सह तत्र धावति, तं पश्य, स कथं धावति इति । यदा स धावति तदा त्वां पश्यति । मम वस्त्रं कुत्र अस्ति ? तत् सर्वं चोरेण नीतम् । पात्रं अपि नास्ति । तत् अपि तेन एव नीतम् । स चोरः केन मार्गेण गतः इति त्वं जानासि किम् ?

नमः शिवाय शान्ताय निश्चलाय यशस्विने ।
जगद्बीजाय श्रेष्ठाय तस्मै वीर्यात्मने नमः ॥

पदानि- नमः । शिवाय । शान्ताय । निश्चलाय । यशस्विने । जगत्+बीजाय । श्रेष्ठाय । तस्मै । वीर्य+आत्मने । नमः ॥

अन्वयः- शिवाय शान्ताय निश्चलाय यशस्विने नमः। जगद्बीजाय श्रेष्ठाय तस्मै वीर्यात्मने नमः ॥

अर्थ— कल्याणमय, शांत, निश्चल और यशस्वी (जो है, उसको) नमस्कार । जगत्‌का बीजरूप श्रेष्ठ (जो है) उस वीर्ययुक्तको नमस्कार है ॥

सर्वेऽपि सुखिनः सन्तु सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु न कश्चिद्दुःखमाप्नुयात् ॥

पदानि- सर्वे । अपि । सुखिनः । सन्तु । सर्वे । सन्तु । निरामयाः । सर्वे । भद्राणि । पश्यन्तु । न । कः । चित् । दुःखं । आप्नुयात् ॥

अन्वयः— सर्वे अपि सुखिनः सन्तु । सर्वे निरामयाः सन्तु । सर्वे भद्राणि पश्यन्तु । कःचित् दुःखं न आप्नुयात् ॥

अर्थ— सब सुखी होवें, सब निरोगी होवें, सब कल्याण ही देखें, किसीको दुःख प्राप्त न हो।

न तपस्तप इत्याहुर्ब्रह्मचर्यं तपोत्तमम्।
ऊर्ध्वरेता भवेद्यस्तु स देवो न तु मानुषः॥

पदानि— न। तपः। तपः। इति। आहुः। ब्रह्मचर्यम्। तप+उत्तमम्। ऊर्ध्व+रेताः। भवेत्। यः। तु। सः। देवः। न। तु। मानुषः॥

अन्वयः- तपः तपः इति न आहुः। ब्रह्मचर्यं तपोत्तमम्। यः तु ऊर्ध्वरेता भवेत्, सः देवः, न तु मानुषः॥

अर्थ— ऐसे उत्तम तपको तप नहीं कहते, तपमें ब्रह्मचर्य उत्तम है। जो सचमुच ऊर्ध्वरेता है, वह देव है, मनुष्य नहीं॥

आजन्ममरणाद्यस्तु ब्रह्मचारी भवेदिह।
न तस्य किञ्चिदप्राप्यं इति विद्धि नराधिप॥

[महाभारत अनु० ७५।३५]

पदानि- आ+जन्म+मरणात्। यः। तु। ब्रह्मचारी। भवेत्। इह। न। तस्य। किंचित्। अप्राप्यं। इति। विद्धि। नराधिपः॥

अन्वयः- हे नराधिप! यः तु आजन्ममरणात् ब्रह्मचारी इह भवेत् तस्य किंचित् अप्राप्यं न इति विद्धि॥

अर्थ— हे राजा! जो जन्मसे मरणपर्यन्त ब्रह्मचारी होगा उसे कुछ भी अप्राप्य नहीं है ऐसा समझो॥

पञ्चविंशतिपर्यन्तं ब्रह्मचर्यं समाचरेत्।
गुणवाञ्छक्तिसंपन्नः शतायुस्तु भविष्यति॥

पदानि- पंचविंशतिपर्यन्तं। ब्रह्मचर्यम्। समाचरेत्। गुणवान्। शक्तिसंपन्नः। शतायुः। तु। भविष्यति॥

अन्वयः- पञ्चविंशति पर्यन्तं ब्रह्मचर्यं समाचरेत्। गुणवाञ्छक्तिसंपन्नः शतायुः तु भविष्यति॥

अर्थ— जो मनुष्य पच्चीस वर्षपर्यंत ब्रह्मचर्यसे रहेगा वह गुणवान्, शक्तिसंपन्न और शतायु होगा।

कायेन मनसा वाचा सर्वावस्थासु सर्वदा।
सर्वत्र मैथुनत्यागो ब्रह्मचर्यं विधीयते॥

पदानि— कायेन। मनसा। वाचा। सर्व+अवस्थासु। सर्वदा। सर्वत्र। मैथुन+त्यागः। ब्रह्मचर्यम्। विधीयते॥

अन्वयः— कायेन मनसा वाचा सर्वावस्थासु सर्वदा। सर्वत्र मैथुन-त्यागो ब्रह्मचर्यं विधीयते॥

अर्थ— शरीर, मन, वाणीसे सब समय सर्वत्र सदा मैथुनका त्याग करना इसीको ब्रह्मचर्य कहा जाता है॥

मैथुन- स्त्री-पुरुषका संयोग।
मैथुनत्याग- स्त्री-पुरुषका संयोग न होना।

यदीच्छसि वशीकर्तुं जगदेकेन कर्मणा।
सुदुर्वृत्तेन्द्रियग्रामं बलाच्छीघ्रं निवारय॥

पदानि- यदि। इच्छसि। वशीकर्तुम्। जगत्। एकेन। कर्मणा। सुदुर्+वृत्त+इन्द्रिय+ग्रामम्। बलात्। शीघ्रं। निवारय॥

अन्वयः— यदि एकेन कर्मणा जगत् वशीकर्तुं इच्छसि। सुदुर्वृत्त-इन्द्रिय-ग्रामं। शीघ्रं। बलात्। निवारय॥

अर्थ— यदि एक ही कर्मसे जगत्को वश करना चाहते हो तो अपने दुराचारी इन्द्रिय समूहोंको शीघ्र और बलसे (दुराचारसे) निवृत्त करो॥

इस पाठमें निम्न लिखित श्लोक पढिये—

न कांक्षे विजयं कृष्ण न च राज्यं सुखानि च।
किं नो राज्येन गोविंद किं भोगैर्जीवितेन वा॥
(भ० गीता १।३२)

पदानि— न । कांक्षे । विजयं । कृष्ण । न । च । राज्यं । सुखानि । च । किं । नः । राज्येन । गोविंद । किं । भोगैः । जीवितेन । वा ॥

अन्वयः- हे कृष्ण ! विजयं न कांक्षे । राज्यं सुखानि च न (कांक्षे) । हे गोविंद ! राज्येन नः किं ? भोगैः किं ? जीवितेन वा किम् ?

अर्थ— हे कृष्ण ! मैं विजय नहीं (कांक्षे) चाहता । राज्य और सुख भी नहीं चाहता । हे गोविंद ! राज्यसे (नः) हमें क्या ? भोगोंसे क्या ? और जीवितसे भी क्या [मिलेगा] ?

संधि किये हुए वाक्य ।

१ अहं विजयं न कांक्षे । नाहं विजयं कांक्षे । विजयमहं न कांक्षे । न कांक्षे विजयमहम् । न कांक्षेऽहं विजयम् ।

२ अहं राज्यमपि नेच्छामि । नेच्छाम्यहं राज्यम् । राज्यं नाहमिच्छामि । नाहमिच्छामि राज्यम् । इच्छामि नाहं राज्यम् ।

पाठ ५

येषामर्थे कांक्षितं नो राज्यं भोगाः सुखानि च ।
त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ॥
(भ० गी० १।३३)

पदानि- येषां । अर्थे । कांक्षितं । नः । राज्यं । भोगाः । सुखानि । च । ते । इमे । अवस्थिताः । युद्धे । प्राणान् । त्यक्त्वा । धनानि । च ।

अन्वयः- येषां अर्थे राज्यं नः कांक्षितम्, येषां अर्थे भोगाः नः (कांक्षिताः) येषां च अर्थे सुखानि नः (कांक्षितानि), ते इमे प्राणान् धनानि च त्यक्त्वा युद्धे अवस्थिताः ॥

अर्थ— (येषां) जिनके (अर्थे) लिये राज्य (नः) हमने (कांक्षितं) चाहा था, जिनके लिये भोग हमने चाहे थे, तथा जिनके लिये सुख हमने चाहे थे, (ते) वे (इमे) ये प्राणों और धनोंको (त्यक्त्वा) छोडकर (युद्धे) युद्धमें (अवस्थिताः) उपस्थित हैं ॥

आचार्याः पितरः पुत्रास्तथैव च पितामहाः ।
मातुलाः श्वशुराः पौत्राः श्यालाः संबंधिनस्तथा ॥

(भ० गी० १।३४)

पदानि— आचार्याः । पितरः । पुत्राः । तथा । एव । च । पिता-महाः । मातुलाः । श्वशुराः । पौत्राः । श्यालाः । संबंधिनः । तथा ॥

अन्वयः— आचार्याः पितरः पुत्रास्तथैव च पितामहाः । मातुलाः श्वशुराः पौत्राः श्यालाः तथा संबंधिनः ॥

अर्थ— आचार्य, पितर, पुत्र तथा (पितामहाः) दादा, (मातुलाः) मामा, (श्वशुराः) ससुर, (पौत्राः) पोते, साले, तथा संबन्धी [लोग ये हैं ।]

एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन ॥
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ॥

(भ० गी० १।३५)

पदानि— एतान् । न । हन्तुं । इच्छामि । घ्नतः । अपि । मधु+सूदन । अपि । त्रैलोक्य+राज्यस्य । हेतोः । किं । नु । मही+कृते ॥

अन्वयः— हे मधुसूदन ! एतान् घ्नतः त्रैलोक्यराज्यस्य हेतोः अपि हन्तुं न इच्छामि । किं नु महीकृते ?

अर्थ— हे (मधु+सूदन) मधु दैत्यको मारनेवाले कृष्ण ! (एतान्) इनको (घ्नतः) हमारा घात करनेवाले हैं तो भी त्रैलोक्यके राज्यके (हेतोः) हेतुसे भी (हन्तुं) मारनेकी इच्छा नहीं करता हूं । फिर (महीकृते) पृथ्वीके राज्यके लिये क्या है ?

निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ।
पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥ (भ० गी० १।३६)

पदानि— निहत्य । धार्तराष्ट्रान् । नः । का । प्रीतिः । स्यात् । जनार्दन । पापं । एव । आश्रयेत् । अस्मान् । हत्वा । एतान् । आततायिनः ॥

अन्वयः— हे जनार्दन ! धार्तराष्ट्रान् निहत्य नः का प्रीतिः स्यात् ? एतान् आततायिनः हत्वा अस्मान् पापं एव आश्रयेत् ॥

अर्थ— हे (जनार्दन) कृष्ण ! (धार्तराष्ट्रान्) धृतराष्ट्रके पुत्रोंको (निहत्य) मारकर (नः) हमारा क्या (प्रीतिः) प्रिय (स्यात्) होगा ? (एतान्) इन (आततायिनः) दुष्टोंको (हत्वा) मारकर (अस्मान्) हमें पाप ही (आश्रयेत्) आश्रित होगा ॥

तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान्स्वबांधवान् ।
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥

(भ० गी० १।३७)

पदानि— तस्मात् । न । अर्हाः । वयं । हन्तुं । धार्तराष्ट्रान् । स्व+बांधवान् । स्व+जनं । हि । कथं । हत्वा । सुखिनः । स्याम । माधव ॥

अन्वयः— हे माधव ! तस्मात् स्वबांधवान् धार्तराष्ट्रान् हन्तुं वयं न अर्हाः । हि स्वजनं हत्वा कथं सुखिनः स्याम ?

अर्थ— हे (माधव) कृष्ण ! (तस्मात्) इसलिये (स्व+बांधवान्) अपने भाई (धार्तराष्ट्रान्) धृतराष्ट्रके पुत्रोंको (हन्तुं) मारनेके लिये (वयं) हम (न अर्हाः) योग्य नहीं हैं । (हि) क्योंकि (स्व+जनं) अपने ही मनुष्योंको (हत्वा) मारकर (कथं) कैसे हम (सुखिनः) सुखी (स्याम) होंगे ?

सूचना ।

पाठक यहां अनुभवसे देखें कि इन श्लोकोंका अर्थ कितने अंशमें उनके ध्यानमें आने लगा है । श्लोकके पद कैसे बनते हैं, पदोंके पश्चात् अन्वय किस रीतिसे होता है और अन्वय बनते ही कैसा अर्थ सुगम हो जाता है, इसका अनुभव पाठक देखें ।

पाठ ६

संस्कृत-वाचन-पाठः।

हे कृष्ण ! अहं विजयं न कांक्षे। हे गोविंद ! अहं राज्यं अपि न इच्छामि। हे देव ! अहं सुखं अपि न वांच्छामि। राज्येन, भोगेन, जिवितेन वा मम किं भवति ? हे मित्र ! त्वं राज्यं इच्छासि वा न इच्छासि ? त्वं सुखं अपि कथं न वांच्छासि ? सः जीवितं वांच्छति परन्तु सुखं न इच्छति। यः विजयं न कांक्षति सः राज्यं अपि न इच्छति। यः सुखं इच्छति सः राज्यं विजयं च वांच्छति। भोगात् सुखं भवति वा न भवति ? यस्य अर्थे राज्यं कांक्षितं सः कुत्र गतः ?

सः पुरुषः भोगं सुखं च त्यक्त्वा विजयं इच्छति। सः वीरः धनं त्यक्त्वा युद्धे अवस्थितः। राज्यस्य अर्थे अहं धनं प्राणं च इच्छामि। सः धनस्य अर्थे राज्यं प्राणं च वांच्छति। त्वं तु प्राणस्य अर्थे राज्यं धनं च इच्छासि। त्वं किं तस्मिन् युद्धे न अवस्थितः ? स वस्त्रं पुस्तकं च त्यक्त्वा तत्र गतः। तेन दुग्धं जलं च त्यक्त्वा अन्नं एव खादितम्। अहं मनुष्यं हन्तुं न इच्छामि। अहं कं अपि जन्तुं हन्तुं न इच्छामि। अहिंसा धर्मः एव मम धर्मः अस्ति। त्रैलोकयस्य राज्यस्य हेतोः अपि तं हन्तुं न इच्छामि। महीराज्यस्य कृते अपि हन्तुं न इच्छामि। तं निहत्य मम का प्रीतिः स्यात् ? कौरवान् निहत्य नः किं कल्याणं स्यात् ? पशुं निहत्य मनुष्यस्य किं कल्याणं स्यात् ? राष्ट्रं निहत्य नृपस्य का प्रीतिः स्यात् ? तं हत्वा पापं एव अस्मान् आश्रयेत्।

आततायिनः हत्वा नः पापं न आश्रयेत्। दुष्टं हत्वा पापं भवति वा न भवति ? स्वबान्धवान् हन्तुं वयं न अर्हाः। स्वमानवान् हन्तुं त्वं न अर्हः। मूर्खः स्वबान्धवान् एव हन्तुं यत्नं करोति। सः स्वजनं हत्वा कथं सुखी भवति ? दुर्जनः एव स्वजनं हत्वा सुखी भवति।

हितवचनं एव श्रेयः भवति । यत् अत्यन्तं भूतहितं तत् वचनं श्रेयः अस्ति । यः मरणात् भीतः नास्ति स एव वीरः । विशुद्धस्य मृत्युः शोभनः भवति । यः स्वधर्मे तिष्ठति स एव श्रेष्ठः पुरुषः । यस्य शिरः पलितं भवति स वृद्धः न भवति । तरुणस्य अपि शिरः पलितं भवति ।

यदा नृपः अत्र भवति तदा एव सुखं भवति । रामचन्द्रस्य शोभनं भूषणं अत्र नास्ति । शुभ्रं पुष्पं त्वया किं न आनीतम् ? यथा कृपणः धनं रक्षति तथा वीरः यशः रक्षति । सः पुरुषः मद्रासनगरात् कदा आगतः । यदा रथः तत्र गच्छति, तदा पुरुषः आगच्छति । सर्वभूतानां हृदयदेशे ईश्वरः तिष्ठति । सः ईश्वरः सर्वभूतानि भ्रामयति । सर्वभावेन तं एव ईश्वरं शरणं गच्छ । तस्य प्रसादात् उपासकः परमां शान्तिं प्राप्स्यति । ईश्वरस्य प्रसादात् उत्तमं शाश्वत सुखं भवति । अहं ईश्वरं सर्वभावेन शरणं गच्छामि ।

सूचना

पूर्व पाठोंमें जो श्लोक दिये हैं उनकी वाक्य-रचना समझमें आनेसे इस प्रकारके अनेकानेक वाक्य बनानेकी योग्यता प्राप्त हो सकती है । पाठक इसी प्रकार उपयोगी वाक्य प्रतिसमय बनाते जायेंगे, तो उनकी संस्कृत-भाषामें शीघ्र प्रगति हो जायगी । संस्कृत सीखनेका यही सुगम उपाय है ।

इस पुस्तकमें जो पठनका क्रम रखा है, वह अत्यंत सुगम है । इस क्रमके अनुसार जो पाठक पढेंगे उनको विना आयास संस्कृतका ज्ञान हो सकता है । अब सन्धि किये हुए वाक्य पढिये—

संधि किये हुए वाक्य ।

१ अहं सुखमपि न वांच्छामि । नाहं सुखमपि वांच्छामि । न वांच्छामि सुखमप्यहम् । सुखमहमपि न वांच्छामि ।

१ स जीवितं वांछति परन्तु सुखं नेच्छति। जीवितं स वांछति परन्तु नेच्छति सुखम्। स न सुखमिच्छति परन्तु जीवितं वांछति।

३ यः सुखमिच्छति स राज्यं विजयं च वांछति। सुखं य इच्छति स राज्यं विजयं च वांछति। स वांछति राज्यं विजयं च य इच्छति सुखम्।

४ स वीरो धनं त्यक्त्वा युद्धेऽवस्थितः। धनं त्यक्त्वा स वीरोऽवस्थितो युद्धे। अवस्थितः स वीरो युद्धे धनं त्यक्त्वा।

५ अहं मनुष्यं हन्तुं नेच्छामि। नेच्छाम्यहं मनुष्यं हन्तुम्। हन्तुं नेच्छाम्यहं मनुष्यम्।

६ अहं कमपि हन्तुं नेच्छामि। नेच्छाम्यहं कमपि हन्तुम्। कमप्यहं हन्तुं नेच्छामि। हन्तुं नेच्छाम्यहं कमपि।

पाठ ७

संस्कृत--वाक्यानि।

(१) भगवान् तपस्वी, स्वाध्यायशीलः वाल्मीकिः ऋषिः एकदा वनं विचचार। (२) समीपं एव स ऋषिः एकं क्रौञ्च-मिथुनं अपश्यत्। (३) तस्मात् एकं क्रौञ्चं पापः निषादः जघान। (४) क्रौञ्चं हतं दृष्ट्वा परमकारुणिकः ऋषिः अवदत्।

भाषा-वाक्य।

(१) भगवान् तपस्वी स्वाध्याय करनेवाला वाल्मीकि ऋषि (एकदा) एक समय वनमें (विचचार) भ्रमण करता रहा। (२) पास ही वह ऋषि एक क्रौंच पक्षीका (मिथुनं) जोडा (अपश्यत्) देखता रहा। (३) उस [जोडे] से एक क्रौंच पक्षीको पापी निषादने (जघान) मारा। (४) क्रौंच पक्षीको मारा हुआ (दृष्ट्वा) देखकर परम (कारुणिकः) ऋषि (अवदत्) बोले—

मा निषाद प्रतिष्ठां त्वमगमः शाश्वती समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥

पदानि — मा । निषाद । प्रतिष्ठां । त्वम् । अगमः । शाश्वतीः । समाः । यत् । क्रौञ्च । मिथुनात् । एकं । अवधीः । काममोहितम् ॥

अन्वयः— हे निषाद ! त्वं शाश्वतीः समाः प्रतिष्ठां मा अगमः । यत् क्रौंचमिथुनात् एकं काममोहितं अवधीः ॥

अर्थ— हे (निषाद) भाल ! तू (शाश्वतीः) बहुत (समाः) वर्ष (प्रतिष्ठां) जीवित रहनेकी अवस्थाको नहीं (अगमः) जाओगे अर्थात् बहुत वर्ष जीवित नहीं रहोगे । (यत्) क्योंकि—

क्रौंचपक्षीके जोडेमेंसे एक कामसे मोहित हुएको (अवधीः) तूने मारा है । चूँकि तुमने काममोहित क्रौंचपक्षीको मारा है इसलिये तू बहुत देरतक जीवित नहीं रहेगा ।

संस्कृत--वाक्यानि ।

(५) अयं श्लोकः समाक्षरैः तेन महर्षिणा गीतः । (६) सः ऋषिः अस्य श्लोकस्य पादं पादं पुनः पुनः अनुव्याहरत् । (७) इमं श्लोकं दृष्ट्वा मुनिः सन्तुष्टः । (८) ईदृशैः एव श्लोकैः सम्पूर्णं रामायणं काव्यं करवाणि, इति महर्षेः बुद्धिः जाता । (९) ऋषिः तथा एव रामचन्द्रस्य चरितं चकार । (१०) तत् एव रामायणं अस्ति । (११) सरयूनदीतीरे कोसलः नाम महान् जनपदः आसीत् । (१२) सः कोसलः जनपदः धनधान्यसंपन्नः मुदितः च आसीत् । (१३) तस्य कोसल-देशस्य महापुरी अयोध्या नगरी राजधानी आसीत् । (१४) तां अयोध्यां राजधानीं राष्ट्र-वर्धनः राजा दशरथः पालयामास । (१५) स राजा दशरथः दीर्घदर्शी महातेजाः जनप्रियः वशी सत्यप्रतिज्ञः च आसीत् । (१६) तस्य भूपस्य हिते रताः यशस्विनः अष्टौ अमात्याः बभूवुः ।

भाषा--वाक्य ।

(५) यह श्लोक सम अक्षरोंमें उस महर्षिने गाया । (६) वह ऋषि

इस श्लोकका एकएक पाद पुनः पुनः बोलने लगा। (७) इस श्लोकको देखकर मुनि संतुष्ट हुआ। (८) [ईदृशैः] ऐसे ही श्लोकोंसे संपूर्ण रामायण काव्य [करवाणि] करूंगा, ऐसी महर्षिकी बुद्धि [जाता] हो गई। (९) ऋषिने उसी प्रकार रामचन्द्रका चरित्र [चकार] बनाया, किया। (१०) वही रामायण है। (११) सरयू नदीके किनारे कोसल नामक बडा [जनपदः] देश [आसीत्] था। (१२) वह कोसल देश धन और धान्यसे सम्पन्न और [मुदितः] आनन्दित था। (१३) उस कोसलदेशकी बडी अयोध्या नगरी राजधानी थी। (१४) उस अयोध्या राजधानीका, राष्ट्र-बढानेवाला राजा दशरथ पालन करता था। (१५) वह राजा दशरथ दूरदर्शी, [महा] बडा तेजस्वी, लोकप्रिय, [वशी] संयमी और सत्यवचनी था। (१६) राजाके हितमें तत्पर यशस्वी आठ [अमात्याः] मंत्री [बभूवुः] थे।

सूचना

पाठक इस पाठके संस्कृत भागको बारबार पढें। इतनी बार पढें कि ये वाक्य स्मरणमें रहें। एकवार भाषाके अर्थके साथ पढेंगे तो पुनः अर्थ देखनेके विना ही संस्कृत भाग समझमें आ जायगा। अब सन्धि किये संस्कृत वाक्य पढिये—

संधि किये हुए वाक्य।

भगवान्तपस्वी स्वाध्यायशीलो वाल्मीकिर्ऋषिरेकदा वनं विचचार। समीपमेव स ऋषिरेकं क्रौंचमिथुनमपश्यत्। तस्मादेकं क्रौंचं पापो निषादो जघान। क्रौंचं हतं दृष्ट्वा परमकारुणिक ऋषिरवदत्—

"मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः। यत्क्रौंचमिथुनादेकमवधीः काममोहितम्।" अयं श्लोकस्समाक्षरैस्तेन महर्षिणा गीतः। स ऋषिरस्य श्लोकस्य पादं पादं पुनः पुनरनुव्याहरत्। इमं श्लोकं दृष्ट्वा स मुनिः संतुष्टः। ईदृशैरेव श्लोकैः संपूर्णं रामायणं काव्यं करवाणीति महर्षेर्बुद्धिर्जाता।

पाठ ८

संस्कृत--वाक्यानि ।

(१) तेषां पुरे वा राष्ट्रे वा एकः अपि असत्यवादी नरः न आसीत् । (२) न अपि दुष्टः पापी वा चौरः वा तत्र जनपदे आसीत् । (३) सर्वं राष्ट्रं प्रशान्तं आनंदपूर्णं च आसीत् । (४) तत्र सर्वः अपि जनः सुखपूर्णः मुदितः ईश्वरभक्तः च आसीत् ।

भाषा--वाक्य ।

(१) उनके नगरमें अथवा राष्ट्रमें एक भी असत्य भाषण करनेवाला मनुष्य नहीं था । (२) नहीं कोई दुष्ट, पापी अथवा चोर उस देशमें था । (३) सब राष्ट्र शांतियुक्त और आनन्दसे पूर्ण था । (४) वहां सभी लोग सुखी, [मुदितः] आनन्दित और ईश्वरभक्त थे ।

शब्द ।

अब इस पाठमें निम्नलिखित शब्द स्मरण कीजिये—

वत्सः	= बछडा, बालक	चरणः	= पांव
रसः	= रस	अर्भकः	= बालक
मूषकः	= चूहा	रथः	= रथ, गाडी
प्रसादः	= प्रसाद	पाकः	= पाक (अन्न)
नृपः	= राजा	पटः	= वस्त्र
लेखकः	= लेखक	उपदेशकः	= उपदेशक
रूप्यकः	= रुपया	आणकः	= आना

संस्कृत--वाक्यानि ।

१ हे नृप ! प्रसादं कुरु । २ उपदेशकः वत्साय रसं ददाति । ३ मूषकः अन्नं खादति । ४ तव पटः कुत्र अस्ति ? ५ मम रथः तेन नीतः । ६ अद्य लेखकः लेखनाय न आगतः । ७ त्वया पाकः कृतः न वा ?

भाषा–वाक्य ।

१ हे राजा ! प्रसाद कर । २ उपदेशक बछडेके लिये रस देता है । ३ चूहा अन्न खाता है । ४ तेरा वस्त्र कहां है ? ५ मेरा रथ उसने लिया । ६ आज लेखक लिखनेके लिये नहीं आया । ७ तूने पाक बनाया या नहीं ?

संस्कृत--वाचन--पाठः ।

वत्सं अत्र आनय । अर्भकं तत्र नय । स पुरुषः बालकं अत्र न रक्षति । कथं तेन पटः रक्षितः ? एकस्य आणकस्य अन्नं देहि । एकस्य रूप्यकस्य मोदकान् आनय । तव कार्यालये लेखकः किं करोति ? यदा लेखकः न आगच्छति तदा तत्र कः लिखति ? उपदेशकः धर्मस्य उपदेशं कर्तुं ग्रामात् ग्रामं नगरात् नगरं च भ्रमति । स रथेन गच्छति वा न वा ? यथा त्वं पटं करोषि तथा अहं अपि करोमि । नृपस्य नगरं पश्य, तत् अतिशोभनं अस्ति । त्वया धान्यं मूषकात् रक्षणीयम् । यत्र नृपः भवति तत्र सेवकः अपि भवति एव । अहं ईश्वरस्य प्रसादं इच्छामि, न किंचित् अपि अन्यत् इच्छामि । यत्र दीपः अस्ति तत्र गच्छ । पुस्तकं च पठ । इदानीं अत्र कः अपि दीपः नास्ति । पुस्तकं दीपस्य प्रकाशेन एव पठितुं शक्नोमि ।

संधि किये हुए वाक्य ।

वत्समत्रानय । आनय वत्समत्र । अत्र वत्समानय । स पुरुषो बालकमत्र न रक्षति । नात्र रक्षति स पुरुषो बालकम् । बालकं न रक्षत्यत्र स पुरुषः । यत्र नृपो भवति तत्र सेवको भवत्येव । भवत्येव तत्र सेवको यत्र भवति नृपः ।

निम्नलिखित शब्द स्मरण कीजिये—

आम्रः	= आम	आपणः	= बाजार, दुकान
सूदः	= अन्न पकानेवाला	ग्रामः	= गांव
अपूपः	= पूरी	देशः	= देश
ओदनः	= भात	निवासः	= निवास
मूर्खः	= मूढ	प्राज्ञः	= ज्ञानी

संस्कृत-वाक्यानि ।

१ अस्मिन् ग्रामे आपणः कुत्र अस्ति ? २ मम उद्याने एकः आम्र-वृक्षः अस्ति। ३ तस्य फलं अत्यन्तं स्वादु वर्तते । ४ यथा प्राज्ञः वदति, तथा मूर्खः न वदति । ५ मम सूदः ओदनं पचति । ६ त्वया अपूपः भक्षितः वा न ?

भाषा--वाक्य ।

१ इस ग्राममें बाजार कहां है ? २ मेरे बागमें एक आमका वृक्ष है। ३ उसका फल अत्यन्त स्वादु होता है । ४ जैसा ज्ञानी बोलता है, वैसा मूढ नहीं बोलता । ५ मेरा रसोइया भात पकाता है । ६ तूने पूरी खाई या नहीं ?

संस्कृत--वाचन--पाठः ।

यत् अन्नं स्वादु अस्ति, तदेव त्वं भक्षय । यत् अन्नं स्वादु नास्ति तत् कदाचित् अपि त्वं न भक्षय। इदानीं अन्नस्य भक्षणस्य समयः । अहं भोजनसमये ओदनं अपूपं च भक्षयामि जलं च पिबामि ।

यथा मूढः अन्नं भक्षयति तथा प्राज्ञः अपि भक्षयति। तव सेवकः मूर्खः एव अस्ति। सः एव जानाति किं अन्नं स्वादु किंवा अस्वादु ? यदा वीरः गच्छति तदा शस्त्रेण सह एव गच्छति। यथा योधः युद्धं करोति, तथा प्राज्ञः अपि करोति एव । परन्तु वीरस्य यथा शस्त्रयुद्धं भवति तथा प्राज्ञस्य शब्दयुद्धं भवति। तव कुत्र निवासः ? मम निवासः अत्र एव। यत्र सः अस्ति तत्र एव अहं अस्मि । प्राज्ञेन सह एव अहं गमिष्यामि।

संधि किये हुए वाक्य।

यदन्नं स्वाद्वस्ति तदेव त्वं भक्षय । अन्नं यत्स्वाद्वस्ति तदेव त्वं भक्षय । त्वं तदेवाद्यं भक्षय यत्स्वाद्वस्ति । भक्षय त्वमन्नं तदेव

यदस्ति स्वादु। त्वमेव तदन्नं भक्षय स्वादु यदस्ति। मम निवासोऽत्रैवास्ति। अत्रैवास्ति मम निवासः। निवासोऽस्त्यत्रैव मम। अस्त्यत्रैव मम निवासः। अस्ति ममात्रैव निवासः।

पाठ ९

संस्कृत–वाचन–पाठः।

जलं पिबति। अन्नं भक्षयामि। दुग्धं पास्यामि। तस्य वृक्षस्य फलं अत्र अहं आनयामि, तं फलं च भक्षयामि। मार्जारः दुग्धं पिबति। ब्राह्मणः वेदं पठति। क्षत्रियः युद्धं करोति। वैश्यः आपणे वाणिज्यं करोति। शूद्रः सेवकः भवति।

यथा त्वं जानासि तथा एव वद। कदापि असत्यं न वद। सत्यस्य वचनं श्रेयः। यत् अत्यन्तं भूतहितं तत् एव सत्यं इति मम मतम्। नरकस्य त्रिविधं द्वारं। कामः क्रोधः तथा लोभः, तस्मात् एतत् त्रयं त्यजेत्।

अस्मिन् ग्रामे तव गृहं अस्ति किम्? तव गृहे अश्वः अस्ति वा न? मम गृहे एक एव अश्वः अस्ति। तं अश्वं अहं प्रतिदिनं आरोहामि। तं न कः अपि अन्यः आरोहति।

परवशं सर्वं दुःखमेव। सर्वं सुखं यत् आत्मवशं भवति। एतत् सुखस्य लक्षणं त्वं विद्धि।

तव गृहे इदानीं तव पितामहः वर्तते वा न? तव माता कुत्र गता इदानीम्? अद्य एव मम भ्राता ग्रामात् आगतः। यत्र त्वं गतः तत्र एव मम भ्राता अपि गतः।

तस्मिन् युद्धे तस्य पार्थिवस्य पराभवः जातः। अस्मिन् ग्रंथे तत् एव लिखितं अस्ति। यथा वने सिंहः तथा नगरे नृपः भवति। इदानीं सैनिकः कुत्र गच्छति? युद्धाय गच्छति इति अहं जानामि।

यथा सुवर्णकारः सुवर्णस्य भूषणं करोति तथा त्वमपि कुरु। तस्य कपोतः कुत्र गतः? पश्य, इदानीं सः कपोतः तस्मात् देशात् आगच्छति।

त्वं किं न क्रीडसि ? अहं सायंकाले एव क्रीडामि न तु प्रातः-समये। यथा त्वं क्रीडसि तथा देवदत्तः न क्रीडितुं शक्नोति। एतत् स्थानं शोभनं अस्ति। अत्र एव अहं क्रीडामि। त्वं अत्र क्रीडसि। तर्हि अहं अत्र नैव क्रीडिष्यामि।

स चक्रं भ्रामयति। तत् त्वं पश्यसि किम्? यथा स चक्रं भ्रामयितुं शक्नोति तथा अहं न शक्नोमि।

क्षमावतां एक एव दोषः अस्ति न द्वितीयः। कः स दोषः ? एष दोषः, यत् जनः क्षमया युक्तं एनं अशक्तं मन्यते।

हे राजेन्द्र ! शमीकः नाम परमधर्मात्मा दान्तः शान्तः महा-तपाः एकः ऋषिः तव राज्ये तव नगरस्य समीपे एव वर्तते। हे राजन् ! मौनव्रतस्य तस्य स्कंधे एकः मृतः सर्पः त्वया धनुष्कोट्या अवसक्तः।

१ सः ऋषिः तव तत् कर्म क्षान्तवान्। परन्तु तस्य पुत्रः न चक्षमे। २ हे राजेन्द्र ! तेन क्रुद्धेन ऋषिपुत्रेण त्वं शप्तः असि। पितुः अज्ञातं एव शप्तः असि। ३ हे नृप ! तत्र रक्षां कुरु इति पुनः पुनः स ऋषिः त्वां अब्रवीत्। तं क्रुद्धं पुत्रं यन्तुं स ऋषिः शमीकः न शक्नोति। अतः तेन अहं प्रेषितः। ४ तत् यथा इच्छसि तथा कुरु। अहं गच्छामि। इदानीं अहं अत्र स्थातुं न शक्नोमि। शीघ्रं-मेव मया गन्तव्यम्। ५ पश्य तं पर्वतम्। तस्य नाम हिमाचलः। अस्य पर्वतस्य किं नाम ? अस्य पर्वतस्य नाम सह्यपर्वत इति। ६ कस्मात् नगरात् त्वं आगतः ? काशीनगरात् अहं आगतः। अद्य अहं वेदं पठितुं आगतः। इदानीं एव वेदं पठामि। तथा त्वमपि पठ। ७ हे मित्र ! यदा त्वं स्नानाय गङ्गां गमिष्यसि तदा अहमपि आगमिष्यामि। अहं गंगास्नानं प्रातःसमये एव कर्तुमि-च्छामि।

संधि किये हुए वाक्य।

१ स ऋषिस्तव तत्कर्म क्षान्तवान् । परन्तु तस्य पुत्रो न चक्षमे।

२ हे राजेन्द्र ! तेन क्रुद्धेनर्षिपुत्रेण त्वं शप्तोऽसि । पितुरज्ञातमेव शप्तोऽसि ।

३ हे नृप ! तत्र रक्षां कुर्विति पुनः पुनः स ऋषिः त्वामब्रवीत्। तं क्रुद्धं पुत्रं यन्तुं स ऋषिः शमीको न शक्नोति । अतस्तेनाहं प्रेषितः ।

४ तद्यथेच्छसि तथा कुरु । अहं गच्छामि इदानीमत्र स्थातुं न शक्नोमि । शीघ्रमेव मया गन्तव्यम् ।

५ पश्य तं पर्वतम् । तस्य नाम हिमाचलः । अस्य पर्वतस्य किं नाम ? अस्य पर्वतस्य नाम सह्यपर्वत इति ।

६ कस्मान्नगरात्त्वमागतः ? काशीनगरादहमागतः । अद्याहं वेदं पठितुमागतः । इदानीमेव वेदं पठामि । तथा त्वमपि पठ ।

७ हे मित्र ! यदा त्वं स्नानाय गङ्गां गमिष्यसि, तदाऽहमप्यागमिष्यामि । अहं गंगास्नानं प्रातःसमय एव कर्तुमिच्छामि ।

सूचना— पूर्व वाक्योंके अनुसंधानसे पाठक जान सकते हैं कि कौनसी सन्धि किस स्थानपर कैसे हुई है ।

पाठ १०

अब निम्नलिखित श्लोक देखिये—

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहिह्येनं ज्ञानविज्ञाननाशनम् ॥ (भ० गी० ३।४१)

पदानि— तस्मात् । त्वं । इन्द्रियाणि । आदौ । नियम्य । भरत+ऋषभ । पाप्मानं । प्रजहिहि । एनं । ज्ञान+विज्ञान+नाशनम् ।

अन्वयः— हे भरतर्षभ ! त्वं तस्मात् आदौ इंद्रियाणि नियम्य एनं ज्ञान-विज्ञाननाशनं पाप्मानं प्रजहिहि ॥

अर्थ— हे (भरत+ऋषभ) भरतश्रेष्ठ ! तू (तस्मात्) इसलिये (आदौ) प्रारंभमें इंद्रियोंका (नियम्य) संयम कर (एनं) इस ज्ञान और विज्ञानके नाशक (पाप्मानं) पापीका (प्रजहिहि) नाश कर ॥

वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रमम् ।
अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेत् ॥ (मनुस्मृति ३।२)

पदानि— वेदान् । अधीत्य । वेदौ । वा । अपि । यथाक्रमम् । अ-वि-प्लुत-ब्रह्मचर्यः । गृहस्थाश्रमं । आवसेत् ॥

अन्वयः— वेदान् वेदौ वा वेदं वा अपि यथाक्रमं अधीत्य अविप्लुत-ब्रह्मचर्यः गृहस्थाश्रमं आवसेत् ॥

अर्थ— (वेदान्) सब वेदोंका (वेदौ) दो वेदोंका (वा) अथवा (वेदं) एक वेदका (यथाक्रमं) क्रमके अनुसार (अधीत्य) अध्ययन कर (अ-विप्लुत-ब्रह्मचर्यः) ब्रह्मचर्यको न तोडनेवाला गृहस्थाश्रममें (आवसेत्) बसे ॥

निर्मलो निर्विकल्पोऽहं निश्चलोऽहं निरन्तरम् ।
निर्विकारो नित्यपूतो निर्मोहो निःस्पृहोऽस्म्यहम् ।

पदानि— निर्मलः । निर्विकल्पः । अहं । निश्चलः । अहं । निरन्तरम् । निर्विकारः । नित्यपूतः । निर्मोहः । निःस्पृहः । अस्मि । अहम् ॥

अन्वयः— अहं निर्मलः, अहं निर्विकल्पः, अहं निश्चलः, अहं निरंतरं निर्विकारः, अहं नित्यपूतः, अहं निर्मोहः, निःस्पृहः च अस्मि ॥

अर्थ— (अहं) मैं निर्मल, (निर्विकल्पः) विकल्प अर्थात् संदेह रहित, (निश्चलः) चंचलतारहित, निरंतर (निर्विकारः) विकाररहित, (नित्यपूतः) सदा पवित्र (निर्मोहः) मोहरहित और (निःस्पृहः) निरिच्छ (अस्मि) हूं ॥

बहुशः द्विवचनमें प्रथमा, संबोधन और द्वितीया विभक्तिको 'औ' प्रत्यय लगता है जैसा कि कुमारौ। तृतीया, चतुर्थी और पंचमीको 'भ्याम्' जैसा कि कुमाराभ्याम्। और षष्ठी, सप्तमीको 'ओस्' प्रत्यय लगता है जैसा कि रामयोः।

मातृवत्स्वसृवच्चैव नित्यं दुहितृवच्च ये।
परदारेषु वर्तन्ते ते नराः स्वर्गगामिनः॥

पदानि-- मातृवत्। स्वसृवत्। च। एव। नित्यं। दुहितृवत्। च। ये। परदारेषु। वर्तन्ते। ते। नराः। स्वर्ग-गामिनः॥

अन्वयः— ये नित्यं मातृवत् स्वसृवत् दुहितृवत् च परदारेषु वर्तन्ते, ते नराः स्वर्गगामिनः॥

अर्थ— (ये) जो (नित्यं) सदा (मातृवत्) माताके समान (स्वसृवत्) भगिनीके समान, और (दुहितृवत्) पुत्रीके समान (पर-दारेषु) परस्त्रीके विषयमें (वर्तन्ते) बर्ताव करते हैं (ते) वे नर (स्वर्गगामिनः) स्वर्गको जानेवाले हैं॥

भावार्थ— दूसरेकी स्त्री बडी उमरवाली हो तो उसको माता, समान आयुवाली हो तो उसे बहिन और छोटी आयुवाली हो तो उसे पुत्री मानकर बर्ताव करनेवाले लोग स्वर्गके भागी होते हैं॥

श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन्हि मानवः।
इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम्॥

पदानि— श्रुति+स्मृति+उदितं। धर्मम्। अनुतिष्ठन्। हि। मानवः। इह। कीर्तिम्। अवाप्नोति। प्रेत्य। च। अनुत्तमम्। सुखम्॥

अन्वयः— हि श्रुति-स्मृति-उदितं धर्मं मानवः अनुतिष्ठन् इह कीर्तिं अवाप्नोति, प्रेत्य च अनुत्तमं सुखम्॥

अर्थ—(हि) निःसंदेह श्रुति और स्मृतिसे (उदितं) प्रकाशित धर्मका (अनुतिष्ठन्) अनुष्ठान करनेवाला (मानवः) मनुष्य (इह) यहां कीर्ति

(अवाप्नोति) प्राप्त करता है और (प्रेत्य) मरनेके पश्चात् (अनू-उत्तमं) श्रेष्ठ सुख प्राप्त करता है ॥

न वै तेषां स्वदते पथ्यमुक्तं योगक्षेमं कल्पते नैव तेषाम् ।
भिन्नानां वै मनुजेन्द्र परायणं न विद्यते किंचिदन्यद्विनाशात् ॥
(म० भा० ३६।५७)

पदानि— न । वै । तेषां । स्वदते । पथ्यं । उक्तं । योगक्षेमं । कल्पते । न । एव । तेषाम् । भिन्नानां । वै । मनुजेन्द्र । परायणम् । न । विद्यते । किंचित् । अन्यत् । विनाशात् ॥

अन्वयः— पथ्यं उक्तं तेषां न वै स्वदते । तेषां योगक्षेमं नैव कल्पते । हे मनुजेन्द्र ! भिन्नानां परायणं विनाशात् अन्यत् किञ्चित् न विद्यते ॥

अर्थ— (पथ्यं) हितकारक (उक्तं) भाषण (तेषां न) उनको नहीं (स्वदते) स्वादु लगता । उनका योगक्षेम नहीं होता । हे (मनुज+इंद्र) मनुष्योंमें श्रेष्ठ ! (भिन्नानां) आपसमें झगडनेवालोंका (परायणं) परिणाम विनाशसे अन्य कुछ भी नहीं होता ॥

भावार्थ— आपसमें झगडनेवालोंको हितकारक भाषण अच्छा नहीं लगता, उसका योगक्षेम नहीं चलता इसलिये उसका नाश निश्चित होता है ॥

सूचना ।

इस रीतिसे श्लोकोंका अर्थ करनेसे आपकी संस्कृतमें प्रगति अतिशीघ्र होगी । इसलिये जितनी मेहनत आप संस्कृत श्लोकोंपर करेंगे उतना लाभ आपको निःसंदेह होगा ।

इस पाठका अध्ययन जब आप समाप्त करेंगे, उस समय आप इन श्लोकोंको ही दस पन्द्रह बार बडी आवाजमें अवश्य पढिये ।

पाठ ११

इकारान्त पुल्लिंग शब्दके रूप निम्नलिखित प्रकार होते हैं—

१	प्र०	गिरिः	= पर्वत
	सं० (हे)	गिरे !	= (हे) पर्वत !
२	द्वि०	गिरिं	= पर्वतको
३	तृ०	गिरिणा	= पर्वतने
४	च०	गिरये	= पर्वतके लिये
५	पं०	गिरेः	= पर्वतसे
६	ष०	गिरेः	= पर्वतका
७	स०	गिरौ	= पर्वतमें

इसी प्रकार निम्नलिखित इकारान्त पुल्लिंग शब्दोंके रूप होते हैं—

ऋषिः	= ऋषि	देवापिः	= देवापी नामक मनुष्य
मुनिः	= मुनि		
महर्षिः	= महान् ऋषि	बृहस्पतिः	= देवोंके गुरु
कपिः	= वानर	शस्त्रपाणिः	= शस्त्रधारी वीर
अब्धिः	= समुद्र	सेनापतिः	= सेनापति
आजिः	= युद्ध	इषुधिः	= बाणोंकी तूणीर
उमापतिः	= शंकर	तित्तिरिः	= तित्तरपक्षी
कृमिः	= कृमि	दुन्दुभिः	= ढोल
विधिः	= विधि, ब्रह्मा		

संस्कृत--वाक्यानि ।

१ ऋषिः आश्रमे तपः करोति । २ मुनिः मौनव्रतः भवति । ३ यथा ऋषिः धर्मं जानाति तथा एव मुनिः अपि जानाति एव । ४ कपिः कथं वृक्षं आरोहति ? ५ वृक्षस्य उपरि तं कपिं पश्य । ६ तेन कपिना वृक्षस्य फलं भक्षितम् । ७ कपये जलं अधुना देहि । ८ अब्धेः जलं स्नानाय हितकरं भवति । ९ आजौ वीरः युद्धं

करोति। १० हे उमापते ! मां रक्ष। ११ तस्मिञ्जले कृमिः अस्ति। १२ विधिना जगत् निर्मितम्। १३ इदानीं देवापिः अरण्ये ईश्वरस्य उपासनां करोति। १४ बृहस्पतिना किं कार्यं कृतम्? १५ शस्त्रपाणिना वीरेण शोभनं युद्धं कृतम्। १६ सेनापतेः सैनिकः अत्र धावति। १७ तस्य वीरस्य एषः इषुधिः। १८ तित्तिरिः आकाशे विचरति। १९ दुन्दुभिः महाशब्दं करोति। २० कस्य एष दुन्दुभिः अस्ति? २१ ऋषिः योगबलेन सर्वं जानाति। २२ मुनिः मौनव्रतेन तथैव ज्ञानी भवति। २३ कस्य एष महान् शब्दः? २४ तस्य राज्ञः दुन्दुभेः एष महान् शब्दः अस्ति।

भाषा-वाक्य।

१ ऋषि आश्रममें तप करता है। २ मुनि मौनव्रती होता है। ३ जैसा ऋषि धर्म जानता है वैसा ही मुनि भी जानता ही है ४ बंदर कैसा वृक्ष पर चढता है? ५ वृक्षके ऊपर उस बंदरको देख। ६ उस बंदरने वृक्षका फल खाया। ७ कपिके लिये जल अभी दे। ८ समुद्रका जल स्नानके लिये हितकारी होता है। ७ युद्धमें वीर युद्ध करता है। १० हे शंकर ! मेरी रक्षा कर। ११ उस जलमें कृमि है। १२ ब्रह्माने जगत्का निर्माण किया। १३ इस समय देवापि अरण्यमें ईश्वरकी उपासना करता है। १४ बृहस्पतिने क्या कार्य किया? १५ शस्त्रधर वीरने उत्तम युद्ध किया। १६ उस सेनापतिका सैनिक यहां दौडता है। १७ उस वीरका यह बाण है। १८ तित्तिरपक्षी आकाशमें चलता है। १९ ढोल बडा शब्द करता है। २० किसका यह ढोल है? २१ ऋषि योग-बलसे सब जानता है। २२ मुनि मौनव्रतसे वैसा ही ज्ञानी होता है। २३ किसका वह बडा शब्द? २४ उस राजाकी दुन्दुभिका यह बडा शब्द है।

वाचन--पाठः।

भगवान् तपस्वी स्वाध्यायशीलः वाल्मीकिः ऋषिः एकदा वनं विचचार। समीपं एव स ऋषिः एकं क्रौञ्चमिथुनं अपश्यत्।

तस्मात् एकं क्रौञ्चं पापः निषादः जघान। क्रौञ्चं हतं दृष्ट्वा परमकारुणिकः ऋषिः अवदत्—

"मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥"

अयं श्लोकः तेन महर्षिणा गीतः। स ऋषिः अस्य श्लोकस्य पादं पादं पुनः पुनः अनुव्याहरत्। इमं श्लोकं दृष्ट्वा मुनिः सन्तुष्टः। ईदृशैः श्लोकैः संपूर्णं रामायणं काव्यं करवाणि इति महर्षेः बुद्धिः जाता। वाल्मीकिः ऋषिः तथा एव रामचंद्रस्य चरितं चकार, तत् एव रामायणं अस्ति।

सरयूनदीतीरे कोसलः नाम महान् जनपदः आसीत्। स कोसलः जनपदः धनधान्यसंपन्नः मुदितश्च आसीत्। तस्य कोसलस्य देशस्य महापुरी अयोध्या नगरी राजधानी आसीत्। तां राष्ट्रवर्धनः राजा दशरथः पालयामास। स राजा दीर्घदर्शी महातेजाः जनप्रियः वशी सत्यप्रतिज्ञः च आसीत्। तस्य भूपस्य हितेरताः यशस्विनः अष्टौ अमात्याः बभूवुः। तस्मिन् राष्ट्रे एकः अपि असत्यवादी न आसीत्। नापि दुष्टः पापी वा चौरः वा तत्र कः अपि आसीत्। सर्वं राष्ट्रं प्रशान्तं आनन्दपूर्णं च आसीत्। तत्र सर्वः अपि जनः सुखपूर्णः मुदितः ईश्वरभक्तः च आसीत्।

[सूचना— पाठकोंको यदि इसके अर्थका संदेह हुआ तो पाठ ७ देखें।]

पाठ १२

इस पाठमें पुनः इकारान्त पुल्लिंग शब्द देते हैं—

आधिः	= दुःख	राशिः	= ढेर
उदधिः	= समुद्र	ग्रंथिः	= ग्रंथि, गांठ
अद्रिः	= पर्वत	क्रिमिः	= कीडा
वारिधिः	= समुद्र	ध्वनिः	= शब्द
रश्मिः	= किरण	बलिः	= कर
रविः	= सूर्य	मरीचिः	= किरण

संस्कृत--वाक्यानि ।

१ स पुरुषः आधिना पीडितः । २ इदानीं उदधिं स्नानाय गच्छ । ३ एष सूर्यस्य रश्मिः । ४ सूर्यस्य एकः रश्मिः सोमं दीपयति । ५ उदधेः जलं स्नानाय शोभनं अस्ति । ६ जनः भूपाय बलिं ददाति । ७ सूर्यस्य मरीचिः प्रकाशं करोति । ८ यथा अद्रौ एषः वृक्षः भवति, तथा वने अपि भवति एव । ९ आकाशात् पर्जन्यः पतति । १० तत् सर्वं जलं समुद्रं गच्छति । ११ तस्य एष ध्वनिः । १२ धान्यस्य राशिं पश्य । १३ स पुरुषः उदधेः जले स्नात्वा अत्र आगच्छति । १४ तस्मै जनाय रक्तं वस्त्रं देहि । १५ अस्य सूत्रस्य एष ग्रंथिः । १६ पर्जन्यस्य जलं अद्रौ पतति । १७ तत् नदीमार्गेण समुद्रं गच्छति । १८ रवेः प्रकाशः आरोग्यं ददाति ।

भाषा--वाक्य ।

१ वह पुरुष दुःखसे पीडित है । २ अब समुद्रके प्रति स्थानके लिये जा । ३ यह सूर्यका किरण है । ४ सूर्यका एक किरण चंद्रको प्रकाशित करता है । ५ समुद्रका जल स्नानके लिये उत्तम है । ६ प्रजाजन राजाको कर देता है । ७ सूर्यका किरण प्रकाश देता है । ८ जैसे पर्वतमें यह वृक्ष होता है वैसे वनमें भी होता ही है । ९ आकाशसे वृष्टि गिरती है । १० वह सब जल समुद्रको जाता है । ११ उसका यह शब्द है । १२ धान्यका ढेर देख । १३ वह मनुष्य समुद्रके जलमें स्नान करके यहां आता है । १४ उस मनुष्यको लाल वस्त्र दे । १५ इस सूत्रकी यह गांठ है । १६ पर्जन्यका जल पर्वतपर गिरता है । १७ वह नदीके मार्गसे समुद्रको जाता है । १८ सूर्यका प्रकाश आरोग्य देता है ।

संधि किये हुए वाक्य ।

१ स पुरुष आधिना पीडितः । इदानीमुदधिं स्नानाय गच्छ । गच्छेदानीमुदधिं स्नानाय । गच्छोदधिमिदानीं स्नानाय ।

२ एष सूर्यस्य रश्मिः। रश्मिरेष सूर्यस्य। सूर्यस्यैष रश्मिः। रश्मिः सूर्यस्यैषः।

३ सूर्यस्यैको रश्मिः सोमं दीपयति। सूर्यस्य दीपयत्येको रश्मिः सोमम्। सोमं सूर्यस्यैको रश्मिर्दीपयति।

शब्द।

गभस्तिः	= किरण	नाभिः	= नाभि, मध्य
सारथिः	= सारथि	प्रजापतिः	= प्रजापालक, राजा
कुक्षिः	= पेट, गर्भाशय	नृपतिः	= राजा
श्रोणिः	= कमर, पुट्ठा	भूपतिः	= राजा
दुन्दुभिः	= ढोल	निधिः	= खजाना
नरपतिः	= राजा	निशापतिः	= चन्द्र
भूमिपतिः	= राजा	गृहपतिः	= गृहस्थ
नदीपतिः	= समुद्र	नगरपतिः	= नगरव्यवस्थापक
सिंधुपतिः	= समुद्र	राष्ट्रपतिः	= राजा
प्रेतपतिः	= यम	सेनापतिः	= सेनापति
खगपतिः	= गरुड	वाक्यपतिः	= वक्ता
दिनमणिः	= सूर्य	पशुपतिः	= शंकर
सभापतिः	= अध्यक्ष	शस्त्रपाणिः	= शस्त्रधारी
गदापाणिः	= गदाधारी	अश्वपतिः	= अश्वपालक

संस्कृत--वाक्यानि।

१ सारथिः रथं नयति। २ सारथिना रथः नीतः। ३ रथात् सारथिः पतति। ४ तस्य देशस्य भूपतिः अत्र आगतः। ५ नृपतेः निधिं कः जानाति? ६ न जानामि नृपतेः सारथिः कुत्र गतः। ७ यज्ञः भुवनस्य नाभिः। ८ दुन्दुभेः ध्वनिं त्वं शृणोषि किं? ९ कः दुन्दुभेः शब्दं करोति? १० सः पुरुषः नृपतेः निधिं रक्षति।

११ प्रजापतिः प्रजां रक्षति । १२ यः प्रजां रक्षति स एव प्रजापतिः भवति । १३ प्रजापतिः सैनिकं भ्रामयति । १४ भूपतेः प्रसादात् सः धनं इच्छति । १५ नृपतिः ईश्वरं शरणं गच्छति । १६ नगरात् नगरं साधुः भ्रमति । १७ तव गृहे इदानीं कः अस्ति ? १८ तस्य हस्तात् दुन्दुभिः पतितः । १९ यथा सैनिकः धावति तथा त्वं धाव ।

भाषा–वाक्य ।

१ सारथि रथ ले जाता है । २ सारथिने रथ चलाया । ३ रथसे सारथि गिरता है । ४ उस देशका राजा यहां आगया है । ५ राजाका खजाना कौन जानता है ? ६ मैं नहीं जानता हूं, राजाका सारथी कहां गया । ७ यज्ञ ही जगत्का नाभि (अर्थात् मध्य) है । ८ ढोलका शब्द तू सुनता है क्या ? ९ कौन ढोलका शब्द करता है । १० वह मनुष्य राजाके खजानेका रक्षण करता है । ११ प्रजापति प्रजाका रक्षण करता है । १२ जो प्रजाका रक्षण करता है वही प्रजापति होता है । १३ राजा सिपाहीको घुमाता है । १४ राजाकी कृपासे वह धन चाहता है । १५ राजा ईश्वरको शरण जाता है । १६ (एक) शहरसे (दूसरे) शहरको साधु घूमाता है । १७ तेरे घर अब कौन है ? १८ उसके हाथसे ढोल गिर गया । १९ जैसा सिपाही दौडता है वैसा तू दौड ।

संधि किये हुए वाक्य ।

१ सारथी रथं नयति । रथं सारथिर्नयति । सारथिना रथो नीतः । नीतो रथः सारथिना । सारथिना नीतो रथः ।

२ तस्य देशस्य भूपतिरत्रागतः । अत्रागतो भूपतिस्तस्य देशस्य । आगतोऽत्र भूपतिर्देशस्य तस्य ।

३ नृपतेर्निधिं को जानाति ? जानाति को निधिं नृपतेः ?

पाठ १३

इस पाठमें निम्नलिखित श्लोक देखिये—

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ (भ० गी० २।२)

पदानि— कुतः । त्वा । कश्मलं । इदं । विषमे । सम्+उप-स्थितं । अन्+आर्य+जुष्टं । अ+स्वर्ग्यं । अकीर्तिकरं । अर्जुन ॥

अन्वयः— हे अर्जुन ! विषमे अनार्यजुष्टं अस्वर्ग्यं अकीर्तिकरं इदं कश्मलं त्वा कुतः समुपस्थितम् ?

अर्थ— हे अर्जुन ! (वि+समे) इस कठिन प्रसंगमें (अन्+आर्य+जुष्टं) आर्य जिसका सेवन नहीं करते, (अ+स्वर्ग्यं) जो स्वर्गको देनेवाला नहीं है, और (अ+कीर्ति+करं) जो कीर्तिको बिगाडनेवाला है ऐसा (इदं) यह (कश्मलं) मोह (त्वा) तेरे पास (कुतः) कहांसे (सं+उपस्थितं) आगया ?

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ॥ (भ० गी० २।३)

पदानि— क्लैब्यं । मा । स्म । गमः । पार्थ । न । एतत् । त्वयि । उपपद्यते । क्षुद्रं । हृदय+दौर्बल्यं । त्यक्त्वा । उत्तिष्ठ । परंतप ॥

अन्वयः— हे पार्थ ! क्लैब्यं मा गमः स्म । एतत् त्वयि न उपपद्यते । परंतप ! क्षुद्रं हृदयदौर्बल्यं त्यक्त्वा उत्तिष्ठ ॥

अर्थ— हे (पार्थ) अर्जुन ! (क्लैब्यं) क्लीबत्व अर्थात् दुर्बलताके पास (मा) मत (गमः) जा । (एतत्) यह (त्वयि) तुझमें (न उपपद्यते) ठीक नहीं जँचता । हे (परंतप) शत्रुको ताप देनेवाले अर्जुन ! इस क्षुद्र हृदयकी दुर्बलताको (त्यक्त्वा) छोडकर (उत्तिष्ठ) उठ ॥

देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥ (भ० गी० २।१३)

पदानि- देहिनः । अस्मिन् । यथा । देहे । कौमारं । यौवनं । जरा । तथा । देह+अन्तर+प्राप्तिः । धीरः । तत्र । न । मुह्यति ॥

अन्वयः— यथा अस्मिन् देहे देहिनः कौमारं यौवनं जरा तथा देहान्तर-प्राप्तिः । तत्र धीरः न मुह्यति ॥

अर्थ— (यथा) जिस प्रकार (अस्मिन्) इस देहमें (देहिनः) देहधारी मनुष्यको (कौमारं) कुमार अवस्था, यौवन अवस्था और (जरा) वृद्ध अवस्था [प्राप्त होती] तथा (देह+अन्तर+प्राप्तिः) दूसरे देहकी प्राप्ति होती है, इसलिये (तत्र) उसमें (धीरः) धैर्यशाली पुरुष (न मुह्यति) शोक नहीं करता ॥

अविनाशी तु तद्विद्धि येन सर्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥ (भ० गी० २।१७)

पदानि— अ+विनाशि । तु । तत् । विद्धि । येन । सर्वं । इदं । ततं । वि-नाशं । अ+व्ययस्य । अस्य । न । कः । चित् । कर्तुम् । अर्हति ॥

अन्वयः— येन इदं सर्वं ततं, तत् तु अविनाशि विद्धि । अस्य अव्ययस्य विनाशं कश्चित् कर्तुं न अर्हति ॥

अर्थ— जिसने (इदं) यह सब (ततं) फैलाया है (तत्) वह (तु) निश्चयसे अविनाशी (है ऐसा) (विद्धि) जान । इस (अव्ययस्य) अविनाशीका विनाश (कः चित् अपि) कोई भी कर नहीं (अर्हति) सकता ॥

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ॥
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥
(भ० गी० २।२२)

पदानि— वासांसि । जीर्णानि । यथा । विहाय । नवानि । गृह्णाति । नरः । अपराणि । तथा । शरीराणि । विहाय । जीर्णानि । अन्यानि । संयाति । नवानि । देही ॥

अन्वयः— यथा जीर्णानि वासांसि विहाय नरः अपराणि नवानि गृह्णाति । तथा देही जीर्णानि शरीराणि विहाय अन्यानि नवानि संयाति ॥

अर्थ— जिस प्रकार जीर्ण (वासांसि) वस्त्रोंको (विहाय) फेंककर (नरः) मनुष्य (अपराणि) दूसरे (नवानि) नये (गृह्णाति) लेता है

उसी प्रकार (देही) शरीर धारण करनेवाला जीर्ण शरीर फेंककर अन्य नये (संयाति) प्राप्त करता है ॥

इतने श्लोक जिस समय आप पढ चुकेंगे उसके पश्चात् आप केवल श्लोकोंको ही कई वार पढिये और देखिये कि विना अन्वयादि पढे उक्त श्लोक आपके समझमें आते हैं या नहीं।

तथा स्वयं दूसरेकी सहायताके विना ही आप श्लोकोंके पद तथा अन्वय बनाइये और कोई अशुद्धि तो नहीं होती इसकी परीक्षा देखिये।

यदि आप स्वयं पद और अन्वय बनायेंगे तो आपकी प्रगति बहुत हो चुकी है ऐसा निश्चयसे सिद्ध होगा।

संधि किये हुए वाक्य।

येनेदं सर्वं ततं, तत्त्वविनाशि विद्धि। अस्याव्ययस्य विनाशं कश्चिदपि कर्तुं नार्हति। यथा जीर्णानि वासांसि विहाय, नरोऽपराणि नवानि गृह्णाति, तथा देही जीर्णानि शरीराणि विहायाऽन्यानि नवानि संयाति।

समासाः।

१ अनार्यजुष्टं = न आर्यः अनार्यः। अनार्यैः जुष्टं अनार्यजुष्टम्।
२ अकीर्तिकरं = कीर्तिं करोतीति कीर्तिकरं। न कीर्तिकरं अकीर्तिकरम्।
३ विषमं = न विद्यते समं यत्र तत् विषमम्।
४ हृदयदौर्बल्यं = हृदयस्य दौर्बल्यं हृदयदौर्बल्यम्।
५ परंतपः = परं श्रेष्ठं तपः यस्य सः परंतपः।
६ देहान्तरप्राप्तिः = अन्यः देहः देहान्तरम्। देहान्तरस्य प्राप्तिः देहान्तरप्राप्तिः।
७ अविनाशी = विशेषेण नाशः विनाशः। न विद्यते विनाशः यस्य तत् अविनाशि।
८ अव्ययं = न विद्यते व्ययः यस्य तत् अव्ययम्।

पाठ १४

यदि पिछले पाठ आपके ठीक हो चुके हैं, तो निम्नलिखित वाक्य आप विना आयास समझ सकते हैं—

संस्कृत-वाचन-पाठः ।

हे पार्थ! त्वं क्लैब्यं मा गमः स्म। एतत् त्वयि न उपपद्यते। क्षुद्रं हृदयदौर्बल्यं त्यक्त्वा उत्तिष्ठ। हे मनुष्य! क्षुद्रं कुविचारं त्यक्त्वा शीघ्रं सुविचारं कुरु। हे मनुष्यश्रेष्ठ! अस्वर्ग्यं अकीर्तिकरं कर्म त्यक्त्वा स्वर्ग्यं कीर्तिकरं कर्म एव कुरु। हे अर्जुन! त्वं आर्यजुष्टं कर्म न करोषि, अपि तु अनार्यजुष्टं कर्म एव करोषि। एतत् अकीर्तिकरं अस्ति। अस्मिन् विषमे समये कश्मलं त्वा कुतः उपस्थितम्? अस्मिन् समये स्वहितस्य घातकं कर्म कथं करोषि? तेन तव अकीर्तिः एव भविष्यति। हे मनुष्य! त्वं दौर्बल्यं न गच्छ। एतत् न योग्यम्। अतः शीघ्रं दौर्बल्यं त्यक्त्वा शोभनाय प्रयत्नाय उत्तिष्ठ। मनुष्यः देहे कौमारं यौवनं जरां च प्राप्नोति। तथा तस्य देहान्तरप्राप्तिः अपि भवति एव। अतः तत्र धीरः न मुह्यति।

यथा दिने प्रातःकालः मध्याह्नकालः सायंसमयः च भवति, तथा एव शरीरे कौमारसमयः यौवनसमयः जरासमयः च भवति। एष शरीरस्य धर्मः एव अस्ति। तत्र सुखं किं दुःखं वा किम्? येन इदं सर्वं जगत् कृतं तत् अविनाशि ब्रह्म अस्ति। येन इदं सर्वं जगत् रचितं स ईश्वरः एव अस्ति। तस्य कदापि नाशः न भवति, अतः तस्य नाम "अव्ययः" इति भवति।

येन सर्वं पुस्तकं रचितं, सः भट्टभास्करः अत्र आगतः, तस्य लेखस्य कः अपि विद्वान् खंडनं कर्तुं समर्थः न भवति।

यथा मनुष्यः जीर्णानि वासांसि त्यक्त्वा नवानि वासांसि गृह्णाति, तथा एव जीवः जीर्णानि शरीराणि विहाय नवानि

अपराणि शरीराणि गृह्णाति। एवं मनुष्यस्य पुनर्जन्म भवति। मनुष्यः जीर्णं गृहं त्यक्त्वा नवीनं गृहं प्राप्नोति तथा एव पुरुषः जीर्णं वस्त्रं विहाय नवीनं वस्त्रं प्राप्नोति।

यथा पुत्रः जीर्णं पुस्तकं विहाय नवीनं पुस्तकं पठति तथा त्वं अपि पुराणं शास्त्रं त्यक्त्वा नवीनं एव गृहाण। तथा तेन एव युद्धं कुरु। हे भरतश्रेष्ठ! त्वं प्रथमं इन्द्रियाणि नियम्य पापं विचारं प्रजहि। एष पापः विचारः ज्ञानस्य नाशकः विज्ञानस्य अपि विनाशकः अस्ति। वेदान् अधीत्य मनुष्यः गृहस्थाश्रमं आवसेत्। वेदस्य अध्ययनं न कृत्वा गृहस्थाश्रमं न आवसेत्। स्नानं कृत्वा एव भोजनं कर्तव्यम्। के नराः स्वर्गं गच्छन्ति? ये मनुष्याः परस्त्री-विषये मातृवत् स्वसृवत् पुत्रीवत् च वर्तन्ते एते मानवाः स्वर्गगामिनः भवन्ति। यः मनुष्यः धर्मं रक्षति तं धर्मः रक्षति एव। स एव मनुष्यः इह कीर्तिं अवाप्नोति प्रेत्य च उत्तमं सुखं प्राप्नोति। ये मनुष्याः भिन्नाः वर्तन्ते तेषां पथ्यं उक्तं न स्वदते। तेषां योगक्षेमं नैव कल्पते। विनाशात् अन्यत् भिन्नानां मनुष्याणां परायणं किञ्चित् अपि न विद्यते।

समासाः।

१ कुविचारः = कुत्सितः विचारः कुविचारः।
२ सुविचारः = सुष्ठु शोभनः विचारः सुविचारः।
३ अस्वर्ग्यं = स्वर्गाय योग्यं स्वर्ग्यं। न स्वर्ग्यं अस्वर्ग्यम्।
४ स्वहितं = स्वस्य हितम् स्वहितम्।
५ दौर्बल्यं = दुर्बलस्य भावः दौर्बल्यम्।
६ यौवनसमयः = यौवनस्य समयः यौवनसमयः।
७ जरासमयः = जरायाः समयः जरासमयः।
८ भरतश्रेष्ठः = भरतानां श्रेष्ठः भरतश्रेष्ठः।
९ विनाशकः = विशेषेण नाशकः विनाशकः।
१० स्वर्गगामिनः = स्वर्गं गच्छन्ति ते स्वर्गगामिनः।

पाठ १५

तस्मिन् एव आश्रमे देवापिः तपः करोति। सः इदानीं मौनव्रतः अस्ति। अतः किञ्चित् अपि न वदति। कोसलस्य देशस्य कः नृपतिः अस्ति? कोसलदेशस्य भूपतिः दशरथः अस्ति। तस्य कः पुत्रः? तस्य रामचंद्रः इति एकः पुत्रः अस्ति। तस्य अन्यः कः पुत्रः? तस्य दशरथनृपस्य अन्यः पुत्रः लक्ष्मणः इति अस्ति। किं तस्य अन्यः कः अपि पुत्रः अस्ति? तस्य दशरथनृपस्य अन्यः पुत्रः भरतः इति अस्ति। शत्रुघ्नः अपि तस्य एव पुत्रः अस्ति।

तस्य राष्ट्रे कोसले देशे सर्वः जनः सुखयुक्तः अस्ति। यः धार्मिकः राजा अस्ति, यस्य राष्ट्रे जनः सुखयुक्तः भवति एव। अतः धर्मः एव सुखदायकः अस्ति।

सूचना।

यदि आप यह पाठ नहीं समझ सकेंगे तो पिछले पाठ आपको पुनः देखने चाहिये। परन्तु यदि आप यह पाठ पूर्णतासे समझ गये हैं, तो आप आगे बढ सकते हैं। यह एक प्रकारकी परीक्षा ही है। पीछले पाठ ठीक होनेपर इस पाठमें आपको कोई कठिनता प्रतीत नहीं होगी।

संधि किये हुए वाक्य।

हे भरतश्रेष्ठ! त्वं प्रथममिन्द्रियाणि नियम्य पापं विचारं प्रजहि। एष पापो विचारो ज्ञानस्य नाशको विज्ञानस्याऽपि विनाशकोऽस्ति। वेदानधीत्य मनुष्यो गृहस्थाश्रममावसेत्।

उकारान्त पुल्लिंग शब्दके रूप निम्न प्रकार बनते हैं—

१ भानुः	= सूर्य	४ भानवे	= सूर्यके लिये
(हे) भानो!	= (हे) सूर्य!	५ भानोः	= सूर्यसे
२ भानुं	= सूर्यको	६ भानोः	= सूर्यका
३ भानुना	= सूर्यने	७ भानौ	= सूर्यमें

इस रीतिसे उकारान्त पुल्लिंग शब्दके रूप होते हैं। उकारान्त पुल्लिंग शब्द ये हैं—

गुरुः = अध्यापक	हनुः = ठोडी
मृत्युः = मरण	साधुः = साधु
जन्तुः = प्राणी	भिक्षुः = भिक्षु, भीख मांगनेवाला
क्रतुः = यज्ञ, कर्म	पशुः = पशु
अक्रतुः= यज्ञ न करनेवाला	तन्तुः = धागा
विष्णुः = व्यापक ईश्वर	चरुः = अन्न, पके चावल
बाहुः = बाहु	ऋतुः = ऋतु

संस्कृत--वाक्यानि।

१ मित्र! त्वं कुत्र गच्छसि ? २ अहं इदानीं गुरोः गृहं गच्छामि। ३ तव गुरुः किं अध्यापयति ? ४ मम गुरुः मां व्याकरणं अध्यापयति। ५ इदं फलं कुत्र नयसि ? ६ इदं फलं गुरवे दास्यामि। ७ सर्वः जन्तुः मृत्युं प्राप्नोति एव। ८ भिक्षुः गृहात् गृहं भिक्षार्थं भ्रमति। ९ उपदेशकः ग्रामात् ग्रामं उपदेशार्थं भ्रमति। १० एषः वसन्त-ऋतुः अस्ति। ११ अस्मिन् वसन्ते ऋतौ पुष्पं फलं च भवति। १२ त्वं कं क्रतुं कर्तुं इच्छसि ? १३ अहं राजसूयं कर्तुं इच्छामि। १४ व्यापकः ईश्वरः विष्णुः इति उच्यते। १५ साधुः विष्णुं एव ध्यायति। १६ तन्तुना वस्त्रं भवति। १७ तन्तोः अन्यत् किं भवति ? १८ तन्तोः रज्जुः भवति। १९ अक्रतुः मनुष्यः साधुः न भवति। २० अग्निना अहं चरुं पचामि। २१ क्रतोः फलं किं भवति ? २२ क्षत्रियस्य बाहुः बलयुक्तः भवति। २३ विद्याविहीनः मनुष्यः द्विपाद् पशुः एव भवति। २४ विद्यासम्पन्नः मनुष्यः एव मनुष्यः भवति। २५ चरुं कस्मै दास्यसि ? २६ अहं चरुं तस्मै

दास्यामि । २७ कार्पासस्य एषः तन्तुः अस्ति । २८ कः अपि जन्तुः क्षणं अपि अकर्मकृत् न तिष्ठति । २९ अकृतोः मनुष्यस्य जीवनं अपि व्यर्थम् । ३० यथा मनुष्ये जीवः अस्ति, ३१ तथा पशौ अपि जीवः अस्ति । ३२ गुरुः पूज्यः भवति । ३३ गुरुणा सह अहं गच्छामि । ३४ साधुः अपि भिक्षुः भवति ।

भाषा-वाक्य ।

१ हे मित्र ! तू कहां जाता है ? २ मैं अब गुरुके घर जाता हूं । ३ तेरा गुरु क्या पढाता है ? ४ मेरा गुरु मुझे व्याकरण पढाता है । ५ यह फल तू कहां ले जाता है ? ६ यह फल गुरुको दूंगा । ७ सब प्राणी मरणको प्राप्त होता ही है । ८ भिक्षु एक घरसे दूसरे घर भिक्षाके लिये घूमता है । ९ उपदेशक एक ग्रामसे दूसरे ग्रामको उपदेशके लिये घूमता है । १० यह वसंत ऋतु है । ११ इस वसंत ऋतुमें फूल और फल होता है । १२ तू कौनसा यज्ञ करना चाहता है ? १३ मैं राजसूय यज्ञ करना चाहता हूं । १४ व्यापक ईश्वरको विष्णु ऐसा कहते हैं । १५ साधु विष्णुका ही ध्यान करता है । १६ धागेसे वस्त्र होता है । १७ धागेसे दूसरा क्या होता है ? १८ धागेसे डोर बनता है । १९ कर्म न करनेवाला मनुष्य साधु नहीं होता है । २० अग्निसे मैं अन्न पकाता हूं । २१ यज्ञका फल क्या होता है ? २२ क्षत्रियका बाहु बलवान् होता है । २३ विद्यारहित मनुष्य दो पांववाला पशु ही होता है । २४ विद्यासम्पन्न मनुष्य ही मनुष्य होता है । २५ अन्न तू किसको देगा ? २६ मैं अन्न उसको दूंगा । २७ कपासका यह धागा है । २८ कोई भी प्राणी क्षणभर भी कर्म न करते हुए नहीं ठहरता । २९ कर्म न करनेवाले मनुष्यका जीवन भी व्यर्थ है । ३० जैसा मनुष्यमें जीव है, ३१ वैसा पशुमें भी जीव है । ३२ गुरु पूज्य होता है । ३३ गुरुके साथ मैं जाता हूं । ३४ साधु ही भिक्षु होता है ।

संधि किये हुए वाक्य ।

१ अक्रतुर्मनुष्यः साधुर्न भवति । न साधुर्भवत्यक्रतुर्मनुष्यः । न भवति साधुरक्रतुर्मनुष्यः ।

२ अग्निनाऽहं चरुं पचामि । पचाम्यहं चरुमग्निना । चरुमहमग्निना पचामि । अहमग्निना चरुं पचामि ।

३ क्रतोः फलं किं भवति ? क्रतोर्भवति किं फलम् ?

४ क्षत्रियस्य बाहुर्बलयुक्तो भवति । बलयुक्तो बाहुर्भवति क्षत्रियस्य । बाहुर्भवति बलयुक्तः क्षत्रियस्य ।

५ विद्यासंपन्नो मनुष्य एव मनुष्यो भवति । विद्यासंपन्न एव मनुष्यो मनुष्यो भवति ।

६ कार्पासस्यैष तन्तुरस्ति । एष तन्तुः कार्पासस्यास्ति । एष कार्पासस्य तन्तुरस्ति ।

७ कोऽपि जन्तुः क्षणमप्यकर्मकृन्न तिष्ठति । न तिष्ठति कोऽपि जन्तुरकर्मकृत् क्षणमपि । क्षणमप्यकर्मकृन्न कोऽपि जन्तुस्तिष्ठति ।

८ अक्रतोर्मनुष्यस्य जीवनमपि व्यर्थम् । व्यर्थं जीवनमप्यक्रतोर्मनुष्यस्य ।

समासाः ।

१ मौनव्रतः	= मौनं व्रतं यस्य सः मौनव्रतः ।
२ शत्रुघ्नः	= शत्रुं हन्ति इति शत्रुघ्नः ।
३ सुखयुक्तः	= सुखेन युक्तः सुखयुक्तः ।
४ सुखदायकः	= सुखं ददाति इति सुखदायकः ।
५ विद्याविहीनः	= विद्यया विहीनः विद्याविहीनः ।
६ द्विपादः	= द्वौ पादौ यस्य सः द्विपादः ।
७ विद्यासंपन्नः	= विद्यया संपन्नः विद्यासंपन्नः ।
८ अकर्मकृत्	= कर्म करोति इति-कर्मकृत् । न कर्मकृत् अकर्मकृत् ।
९ अक्रतुः	= न विद्यते क्रतुः यस्य सः अक्रतुः ।

पाठ १६

उकारान्त पुल्लिंग शब्द इस पाठमें स्मरण कीजिये-

प्रभुः	= मालिक, ईश्वर	वायुः	= वायु, हवा
इक्षुः	= ईख	भानुः	= सूर्य
मेरुः	= मेरुपर्वत	बिंदुः	= बिंदु
सेतुः	= पुल, सेतु	इषुः	= बाण
सक्तुः	= सत्तु	स्तनयित्नुः	= मेघ

संस्कृत--वाक्यानि ।

१ गृहस्य प्रभुः गृहस्थः। २ राष्ट्रस्य प्रभुः नृपतिः । ३ विश्वस्य प्रभुः विष्णुः अस्ति। ४ सः सक्तुं तितउना पुनाति।५ वस्त्रेण घृतं सः पुनाति। ६ सत्येन मनः शुध्यति। ७ अहं सक्तुं खादामि। ८ इक्षोः मधुरः रसः भवति।९ भानोः प्रकाशः प्रखरः भवति। १० रामेण इषुणा रावणः हतः। ११ स्तनयित्नुः आकाशे गर्जति। १२ जन्तोः शरीरे वायुः एव प्राणः भवति। १३ चातकः जलबिन्दुं इच्छति। १४ सक्तुः बलप्रदः अस्ति। १५ यदा सक्तुः इक्षोः रसेन सह भक्षितः भवति, तदा एव सः बलप्रदः भवति। १६ आकाशात् वृष्टिः बिन्दुरूपेण भवति। १७ तत्र शोभनः सेतुः अस्ति।

भाषा--वाक्य ।

१ घरका स्वामी गृहस्थ है। २ राष्ट्रका ईश राजा है। ३ विश्वका प्रभु विष्णु है। ४ वह सत्तुको छाननीसे शुद्ध करता है। ५ कपडेसे घी वह शुद्ध करता है। ६ सत्यसे मन शुद्ध होता है। ७ मैं सत्तु खाता हूं। ८ ईखका मीठा रस होता है। ९ सूर्यका प्रकाश प्रखर होता है। १० रामने बाणसे रावणको मारा। ११ मेघ आकाशमें गरजता है। १२ प्राणीके शरीरमें वायु

ही प्राण होता है। १३ चातक पक्षी जलबिन्दु चाहता है। १४ सत्तु बल देनेवाला है। १५ जब सत्तु ईखके रसके साथ खाया जाता है, तब वह बल देनेवाला होता है। १६ आकाशसे वृष्टि बिंदुरूपसे होती है। १७ वहां उत्तम पुल है।

संधि किये हुए वाक्य।

१ गृहस्य प्रभुर्गृहस्थोऽस्ति। अस्ति गृहस्थो गृहस्य प्रभुः। प्रभुर्गृहस्यास्ति गृहस्थः।

२ राष्ट्रस्य प्रभुर्नृपतिरेवास्ति। नृपतिरेव प्रभु राष्ट्रस्यास्ति। राष्ट्रस्य नृपतिरेव प्रभुरस्ति।

३ विश्वस्य प्रभुर्विष्णुरस्ति। विष्णुरस्ति प्रभुर्विश्वस्य। प्रभुर्विश्वस्य विष्णुरस्ति।

४ रामेणेषुणा रावणो हतः। हतो रावणो रामेणेषुणा। इषुणा रावणो रामेण हतः।

उकारान्त विशेषण।

अब उकारान्त विशेषण दिये जाते हैं। इनके रूप पूर्वोक्त प्रकार ही होते हैं, जब ये शब्द उकारान्त पुल्लिंग शब्दोंका गुण बताते हैं—

भीरु	= डरपोक	वर्धिष्णु	= बढनेवाला।
श्रद्धालु	= श्रद्धा रखनेवाला	सहिष्णु	= सहन करनेवाला
निद्रालु	= सोनेवाला	भूष्णु	= होनेवाला
पटु	= कुशल	प्रभविष्णु	= बलवान्, मुख्य

संस्कृत--वाक्यानि।

१ भीरुः मनुष्यः यशस्वी न भवति। २ भीरुणा पुरुषेण किं कर्तव्यम्? ३ पटुः जनः एव सर्वं कर्म करोति। ४ वर्धिष्णुः नृपः साम्राज्यं प्राप्नोति। ५ प्रभविष्णुना नृपतिना राज्यं संवर्धितम्। ६ भीरुणा भूपतिना सर्वं राज्यं त्यक्तम्। ७ धर्मस्य तत्त्वं तस्य गुरुः एव जानाति। ८ विष्टरं अत्र आनय। ९ शूरः नृपः विजयं

एव कांक्षति। १० भीरुः नृपः पलायनं करोति। ११ यस्य अर्थे युद्धं कृतं स एव भीरुः। १२ सः नृपतिः राज्यं धनं प्राणं च त्यक्त्वा युद्धे अवस्थितः। १३ आचार्यं गुरुं वा निहत्य पातकं भवति। १४ स्वबान्धवं हन्तुं त्वं न योग्यः। १५ पापेन निषादेन मृगः हतः। १६ स तुभ्यं वस्त्रं दातुं इच्छति। १७ अहं तस्मै धनं दातुं इच्छामि। १८ त्वं चक्रं भ्रामयितुं इच्छसि किम्? १९ यदि न इच्छसि तर्हि किं कर्तुं इच्छसि?

भाषा--वाक्य।

१ डरपोक मनुष्य यशस्वी नहीं होता। २ भीरु पुरुषने क्या करना? ३ कुशल मनुष्य ही सब कर्म करता है। ४ बढनेवाला राजा साम्राज्य प्राप्त करता है। ५ बलवान् राजाने राज्य बढाया। ६ भीरु राजाने सब राज्य छोडा। ७ धर्मका तत्व उसका गुरु ही जानता है। ८ कुर्सी यहां ला। ९ शूर राजा विजय ही चाहता है। १० डरपोक राजा पलायन करता है। ११ जिसके लिये युद्ध किया वही डरपोक है। १२ वह राजा राज्य, धन और प्राण छोडकर युद्धमें उपस्थित है। १३ आचार्य वा गुरुका हनन करके पाप होता है। १४ अपने भाईको मारनेके लिये तू योग्य नहीं है। १५ पापी निषादने मृगका हनन किया। १६ वह तुमको वस्त्र देनेकी इच्छा करता है। १७ मैं उसको धन देनेकी इच्छा करता हूँ। १८ क्या तू चक्र घूमानेकी इच्छा करता है? १९ यदि नहीं इच्छा करता है तो क्या करनेकी इच्छा करता है?

संधि किये हुए वाक्य।

१ भीरुर्मनुष्यो यशस्वी न भवति। न भवति यशस्वी भीरुर्मनुष्यः। यशस्वी न भवति भीरुर्मनुष्यः।

२ पटुर्जन एव सर्वं कर्म करोति। करोति सर्वं कर्म पटुर्मनुष्यः। सर्वं कर्म पटुरेव मनुष्यः करोति।

३ भीरुर्नृपः पलायनं करोति। करोति पलायनं भीरुर्नृपः। पलायनं करोति भीरुर्नृपः।

समासाः ।

१	गृहस्थः	= गृहे तिष्ठति इति गृहस्थः ।
२	जलबिंदुः	= जलस्य बिन्दुः जलबिन्दुः ।
३	बलप्रदः	= बलं प्रददाति इति बलप्रदः ।
४	यशस्वी	= यशः अस्य अस्ति इति यशस्वी ।
५	नृपतिः	= नृणां पतिः नृपतिः ।
६	भूपतिः	= भूम्याः पतिः भूपतिः ।
७	नृपः	= नॄन् पाति इति नृपः ।
८	स्वबान्धवः	= स्वस्य बांधवः स्वबांधवः ।

पाठ १७

अब इस पाठमें निम्नलिखित श्लोक पढिये—

स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ।

(भ० गी० २।३१)

पदानि— स्व+धर्मं । अपि । च । अवेक्ष्य । न । वि+कंपितुं । अर्हसि । धर्म्यात् । हि । युद्धात् । श्रेयः । अन्यत् । क्षत्रियस्य । न । विद्यते ॥

अन्वयः— अपि च स्वधर्मं अवेक्ष्य विकंपितुं न अर्हसि । हि क्षत्रियस्य धर्म्यात् युद्धात् अन्यत् श्रेयः न विद्यते ॥

अर्थ— और अपने धर्मको (अवेक्ष्य) देखकर (वि+कंपितुं) कांपनेके लिये (न अर्हसि) तू योग्य नहीं है । (हि) क्योंकि क्षत्रियके लिये धर्मयुद्धसे भिन्न (श्रेयः) कल्याणकारी और कुछ भी (न विद्यते) नहीं है ॥

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥

(भ. गी. २।३२)

पदानि— यदृच्छया । च । उपपन्नं । स्वर्ग+द्वारं । अपावृतं । सुखिनः । क्षत्रियाः । पार्थ । लभन्ते । युद्धं । ईदृशम् ॥

अन्वयः— हे पार्थ ! यदृच्छया उपपन्नं च अपावृतं स्वर्गद्वारम् ईदृशं युद्धम् सुखिनः क्षत्रियाः लभन्ते ॥

अर्थ— हे (पार्थ) पृथाके पुत्र अर्जुन ! (यदृच्छया) विना प्रयत्न (उपपन्नं) प्राप्त और (अपावृतं) खुला हुआ स्वर्गका द्वार (ईदृशं) ऐसा युद्ध (सुखिनः) आनंदित क्षत्रियोंको मिला करता है ॥

अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥

(भ. गी. ४।३३)

पदानि— अथ । चेत् । त्वं । इमं । धर्म्यं । संग्रामं । न । करिष्यसि । ततः । स्वधर्मं । कीर्तिं । च । हित्वा । पापं । अवाप्स्यसि ॥

अन्वयः- अथ चेत् त्वमिमं धर्म्यं संग्रामं न करिष्यसि । ततः स्वधर्मं च कीर्तिं हित्वा पापमवाप्स्यसि ॥

अर्थ— (अथ चेत्) और यदि तू इस धर्मरूप (संग्रामं) युद्धको नहीं करेगा (ततः) तो स्वधर्म और कीर्तिका (हित्वा) त्याग करके पाप ही (अवाप्स्यसि) बटोरेगा ।

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् ।
संभावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥ (भ. गी. २।३४)

पदानि— अ+कीर्तिं । च । अपि । भूतानि । कथयिष्यन्ति । ते । अव्ययाम् । संभावितस्य । च । अकीर्तिः । मरणात् । अतिरिच्यते ॥

अन्वयः— भूतानि ते अव्ययां अकीर्तिं च अपि कथयिष्यन्ति । संभावितस्य च अकीर्तिः मरणात् अतिरिच्यते ॥

अर्थ— (भूतानि) मनुष्य तेरी (अव्ययां) अक्षय अकीर्ति ही (कथयिष्यन्ति) कहते रहेंगे। और संभावित पुरुषके लिये दुष्कीर्ति मरणसे भी बढकर होती है ॥

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः ।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥

(भ. गी. २।३५)

पदानि— भयात्। रणात्। उपरतं। मंस्यन्ते। त्वां। महारथाः। येषां। च। त्वं। बहुमतः। भूत्वा। यास्यसि। लाघवम् ॥

अन्वयः— महारथाः त्वां भयात् रणात् उपरतं मंस्यन्ते। त्वं येषां बहुमतः भूत्वा लाघवं यास्यसि ॥

अर्थ— महारथी तुझे भयके कारण (रणात्) युद्धसे भागा हुआ (मंस्यन्ते) मानेंगे। और (येषां) जिन्हें तू इस समय (बहुमतः) बहुमान्य है, उनके ही मनमें तू (लाघवं यास्यसि) छोटा बन जायगा।

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ॥
तस्मादुत्तिष्ठ कौंतेय युद्धाय कृतनिश्चयः ॥ (भ. गी. २।३७)

पदानि— हतः। वा। प्राप्स्यसि। स्वर्गं। जित्वा। वा। भोक्ष्यसे। महीम्। तस्मात्। उत्तिष्ठ। कौंतेय। युद्धाय। कृत+निश्चयः ॥

अन्वयः– हतः वा स्वर्गं प्राप्स्यसि, जित्वा वा महीं भोक्ष्यसे। हे कौंतेय! तस्मात् युद्धाय कृतनिश्चयः उत्तिष्ठ ॥

अर्थ— (हतः) मर गया तो स्वर्गको (प्राप्स्यसि) प्राप्त होगा और (जित्वा) जीत गया तो पृथ्वी (भोक्ष्यसे) भोगेगा। हे (कौंतेय) अर्जुन ! इसलिये युद्धका निश्चय करके (उत्तिष्ठ) उठ ॥

इस समयतक जितने श्लोक आगये हैं, उतने कमसे कम दस बार पढिये। अथवा उतनी बार पढिये कि जितनी बार पढनेसे पढते ही अर्थ ध्यानमें आ जायगा। यदि आप श्लोक शनैः शनैः पढेंगे, तो सुगमतासे आपके ध्यानमें अर्थ आ जायगा। तथा प्रत्येक श्लोकके पद, अन्वय और अर्थ स्वयं करनेका भी साथ साथ अभ्यास कीजिये।

संधि किये हुए वाक्य।

१ महारथास्त्वां भयाद्रणादुपरतं मंस्यन्ते। मंस्यन्ते त्वां रणाद्भयादुपरतं महारथाः। रणाद्भयादुपरतं मंस्यन्ते त्वां महारथाः।

२ त्वं येषां बहुमतो भूत्वा लाघवं यास्यसि। येषां त्वं बहुमतो भूत्वा लाघवं यास्यसि।

३ हतो वा स्वर्गं प्राप्स्यसि। जित्वा वा महीं भोक्ष्यसे। कौन्तेय! तस्माद्युद्धाय कृतनिश्चय उत्तिष्ठ।

समासाः।

१ स्वधर्मः	= स्वस्य धर्मः स्वधर्मः।
२ स्वर्गद्वारं	= स्वर्गस्य द्वारं स्वर्गद्वारम्।
३ अकीर्तिः	= न कीर्तिः अकीर्तिः।
४ कृतनिश्चयः	= कृतः निश्चयः येन स कृतनिश्चयः।
५ महारथः	= महान् रथः यस्य सः महारथः।

पाठ १८

संस्कृत-वाचन-पाठः।

अहं वदामि। त्वं किं न वदसि? स सर्वदा वदति। स तत्र किं न गच्छति? कदा त्वं तत्र गमिष्यसि? यदा त्वं वदसि तदा स किं न वदति। रामचन्द्रः किं न पठति? यदा गोविंदः आगच्छति तदा एव गोपालः गच्छति।

स आगच्छति किं? त्वं सदा किं खादसि? त्वं अधुना किं न वदसि? स किं पुस्तकं पठति? त्वं देवदत्तेन सह आगमिष्यसि किं? यत्र पुस्तकं अस्ति तत्र पत्रं नास्ति। यथा अहं पठामि तथा त्वं किं न पठसि? यदा अहं आगमिष्यामि तदा त्वं कुत्र गमिष्यसि?

तस्य फलस्य रक्तः वर्णः अस्ति । मम वस्त्रस्य पीतः वर्णः । तस्य कमलस्य पीतः वर्णः अस्ति । वृक्षस्य पत्रस्य कः वर्णः अस्ति ? तस्य पत्रस्य श्वेतः वर्णः अस्ति । तत् पत्रं अत्र आनय । पुष्पं तत्र नय ।

रामचन्द्रस्य गृहं कुत्र अस्ति ? यत्र रामचन्द्रस्य गृहं अस्ति, तत्र एव मम गृहं अस्ति । त्वं भूपस्य शोभनं नगरं पश्यसि किं ? तस्य पुरुषस्य शोभनं वस्त्रं पश्य । स मया सह तत्र न आगच्छति । त्वं मया सह तत्र आगमिष्यसि किम् ?

अहं सत्वरं आगमिष्यामि परन्तु सः सत्वरं न आगमिष्यति । त्वं इदानीं पुस्तकं पठ । अहं पत्रं लिखामि । मया तस्मै धनं न दत्तम् । त्वया तस्मै जलं अपि न दत्तम् । तस्य फलं कुत्र पतितम् ? यत्र स गतः तत्र एव तस्य फलं पुस्तकं च पतितम् । तत्र गच्छ तत् फलं पश्य ।

यथा त्वं लिखसि तथा स न लिखति । यथा त्वं वदसि तथा अहं अपि न वदामि । स वीरः पुरुषः कुत्र गतः ? यदा स तत्र भविष्यति तदा त्वं कुत्र भविष्यसि ? यदि अधुना त्वं अन्नं खादसि तर्हि अत्र एव त्वं जलं अपि पिब । तेन परां शान्तिं प्राप्स्यसि ।

यत्र तव पुत्रः अस्ति तं देशं त्वं अधुना एव गच्छ । स कदा वृक्षस्य समीपं गमिष्यति ? तुभ्यं नारायणेन किं पुस्तकं दत्तम् ? त्वया तत् कुत्र रक्षितं अस्ति ? अहं सायंकाले कुत्र अपि नैव गमिष्यामि । यथा अश्वः धावति तथा गर्दभः न धावति । यत् भविष्यति तत् एव भविष्यति । तथा यत् न भविष्यति तत् नैव भविष्यति ।

वृक्षः तत्र पतति । तत्र मूषकः धान्यं खादति । तस्मिन् गृहे श्वेतं वस्त्रं इदानीं नास्ति । यदा त्वं तत् श्वेतं वस्त्रं तत्र नेष्यसि तदा एव अहं तत्रैव आगमिष्यामि । यदि त्वं तत्र न भविष्यसि तर्हि कः तत्र भविष्यति ?

समासाः ।

१ गोपालः = गोः पालः गोपालः ।
२ देवदत्तः = देवैः दत्तः देवदत्तः ।
३ भूपः = भुवं पाति इति भूपः ।

पाठ १९

संस्कृत-वाचन-पाठः ।

१ तव पुत्र इदानीं कुत्र गतः ? तं त्वमधुना पश्यसि किम् ? केन स इदानीं नीतः ? कुत्र नीतः ? त्वं जानासि किम् ?

२ कदा स आगमिष्यति ? केन सह स आगमिष्यति ? कस्मात् स्थानात् केन सह कदा स पुनरागमिष्यति ?

३ कथं तस्मिन्पङ्के स वृषभः पतितः ? स वृषभस्तस्मिन्पङ्के केन वा पातितः ? कथं स तत्र गतः ?

४ मम मञ्चकोऽत्र नास्ति । केन स अद्यैव नीतः ? किमर्थं मम मंचकस्तेन नीतः ?

५ अस्य गृहस्यैष भागो ममैवास्ति । ममैवास्त्यस्य गृहस्यैष भागः । अस्य गृहस्यान्यो भागः कस्यास्ति ?

६ पुत्रेण फलं नानीतम् । किमर्थं तेन पुत्रेण फलं नानीतम् ? अद्य न तेन पुत्रेण फलमानीतम् ।

७ तस्य मंचकस्य समीपमेव विष्टरोऽस्ति । केन रक्षितो विष्टरस्तस्य मंचकस्य समीपम् । मया तस्य मंचकस्य समीपमेव विष्टरो रक्षितः ।

८ कृष्णदुर्गो विजयदुर्गस्य समीपमेवास्ति । अहं विजयदुर्गस्य मार्गं जानामि । कृष्णदुर्गस्य मार्गं न जानामि । त्वं जानासि किम् ?

९ लङ्कानगरे रावणः राज्यं करोति । तेन रावणेन किं कृतम् ? रामेण किमर्थं तस्य वधः कृतः ?

१० रामेण बाणेन रावणस्य वधः कृतः। रावणो राक्षसोऽस्ति। राक्षसो दुष्टो भवति। दुष्टः पुरुषः पीडको भवति।

११ यथा व्याघ्रो वने भवति तथा अश्वो ग्रामे भवति। तथा गृहे बिडालोऽपि भवति।

१२ हस्ते भूषणं भवति। मुखेऽन्नं भवति। वृक्षे फलं भवति। दीपे प्रकाशो भवति। सूर्ये प्रभा भवति। समुद्रे जलं भवति।

१३ साहसे श्रीर्भवति। ब्राह्मणे विद्या भवति। क्षत्रिये शौर्यं भवति।

१४ तव द्वारपालेन मम पुस्तकं न नीतम्। तत् पुस्तकं तस्य द्वारपालेनाद्य नीतम्। कदा नीतम्? इदानीमेव नीतम्।

१५ वीर आरोहत्यश्वम्। क्षत्रियो गजमारोहति। स पुरुषो गजं नारोहति, नापि स अश्वमारोहति।

१६ वैद्यो वत्साय ददाति रसम्। बालको रसं न पिबति। त्वमिदानीं तत्र गच्छ यत्र स बालकोऽस्ति।

१७ मूषकोऽन्नं खादति। न मूषकोऽन्नं खादति, परन्तु बिडालो मोदकं भक्षयति। अद्य तस्मिन् गृहे मूषको नास्ति, परन्तु तत्र बिडालोऽस्ति।

१८ येनान्नं खादितं स नैष बिडालः। स कोऽपि अन्योऽस्ति। येन बिडालेन मूषको भक्षितः स इदानीं कुत्र गतः?

१९ इदानीं लेखको लेखनाय किं नागच्छति? यदा स आगच्छति तदा त्वं कुत्र गच्छसि? लेखक आगच्छति परन्तु लेखनं न करोति।

२० त्वया अद्योत्तमः पाकः कृतः। नहि नहि, स पाको मया न कृतः, परन्तु मम मित्रेण हरिदत्तेन कृतः।

२१ गोवत्सः किमर्थं धावति? तमत्रानय। यथा स अत्रैव तिष्ठति तथा कुरु। येन मार्गेण स अत्रागच्छति, तेनैव मार्गेण तमानयात्र।

२२ स पुरुषो बालकं न रक्षति। स उत्तमः पुरुषः शोभनं बालकमपि न रक्षति। किमर्थं स एवं करोति? कुत्र स गच्छति? किमर्थं स तत्र न गच्छति?

२३ यदा वीरो युद्धं प्रति गच्छति तदा शस्त्रास्त्रेण सह गच्छति; तथा त्वमपि गच्छ। स्वधर्मस्य रक्षणार्थं युद्धं कुरु। मनुष्येण रक्षितो धर्मो मनुष्यमेव रक्षति।

२४ मम अत्रैव निवासोऽस्ति, अस्मिन् स्थाने तिष्ठामि, अस्मिन् स्थाने पठामि, अस्मिन् स्थाने भोजनं करोमि, तस्मिन् स्थाने स्नानं करोमि।

२५ यथा त्वं जानासि तथा वद। कदापि असत्यं न वद। सत्यस्यैव वचनं श्रेयस्करं भवति, यदत्यन्तं भूतहितं तदेव सत्यमिति शास्त्रस्य सिद्धान्तोऽस्ति।

२६ यद्यत् परवशं तत्तत्सर्वं दुःखमेव भवति। यद्यत्स्ववशं तत्तत्सर्वं सुखकरं भवति। एतदेव सुखदुःखलक्षणमस्ति।

२७ यन्त्रकारः कुत्र चक्रं भ्रामयति? यत्र विश्वामित्रोऽस्ति तत्र स चक्रं भ्रामयति। यदा स चक्रं भ्रामयति तदा सोऽन्यः पुरुषस्तत्र किं करोति?

२८ कस्मान्नगरात्स पुरुषोऽत्रागतः? यदि स काशी नगरादेवागतस्तर्हि तेन सह भाषणं कर्तुमिच्छामि।

२९ यदा त्वं नदीतीरं स्नानाय गमिष्यसि तदा वस्त्रं पात्रं च तत्र नय।

पाठ २०

इस पाठमें निम्नलिखित श्लोक पढिये--

वरं वृणीष्व भद्रं ते यादृशं पुत्रमीप्सितम्।
तथोक्तः प्राञ्जली राजा पुत्रं वव्रे गुणान्वितम्॥

(महाभारत द्रोणपर्व ५५।२२)

पदानि— वरं। वृणीष्व। भद्रं। ते। यादृशं। पुत्रं। ईप्सितं। तथा+उक्तः। प्र+अञ्जलिः। राजा। पुत्रं। वव्रे। गुण+अन्वितम्॥

अन्वयः— वरं। वृणीष्व। ते भद्रं। यादृशं पुत्रं ईप्सितं। तथोक्तः राजा प्राञ्जलिः गुणान्वितं पुत्रं वव्रे॥

अर्थ— (वरं) वर (वृणीष्व) मांग । (ते) तेरा (भद्रं) कल्याण हो। (यादृशं) जैसा (पुत्रं) पुत्र (ईप्सितं) इष्ट है वैसा वर मांग। (तथोक्तः) वैसा कहा गया राजा (प्राञ्जलिः) हाथ जोडकर (गुणान्वितं) गुणयुक्त पुत्रको (वव्रे) मांगने लगा ॥

भावार्थ— तुम्हें जैसा पुत्र चाहिये वैसा वर मांग, तेरा कल्याण हो, ऐसा कहा जानेपर राजाने अपने लिये जैसा चाहिये वैसा गुणी पुत्र मांग लिया ॥

यशस्विनं कीर्तिमन्तं तेजस्विनमरिन्दमम् ।
यस्य मूत्रं पुरीषं च क्लेदः स्वेदश्च काञ्चनम् ॥ २ ॥

पदानि— यशस्विनं । कीर्तिमन्तं । तेजस्विनं । अरिन्दमं । यस्य । मूत्रं । पुरीषं । च । क्लेदः । स्वेदः । च । काञ्चनम् ।

अन्वयः– यशस्विनं कीर्तिमन्तं तेजस्विनं अरिन्दमम् । यस्य मूत्रं पुरीषं च क्लेदः स्वेदः च काञ्चनम् ॥

अर्थ— (उसने ऐसा पुत्र मांगा कि जो) यशस्वी, कीर्तिमान् ,तेजस्वी और (अरिं-दमं) शत्रुको दबानेवाला हो । तथा (यस्य) जिसका (मूत्रं) मूत्र और (पुरीषं) विष्ठा तथा जिसका (क्लेदः) मल और (स्वेदः) पसीना ये सब (सुवर्ण) ही हो ॥

भावार्थ— उसने ऐसा पुत्र मांगा कि जिसका मल, मूत्र, विष्ठा और पसीना अर्थात् जिसके शरीरके सब मल सुवर्ण ही होता था । तथा जो यशस्वी, कीर्तिमान्, तेजस्वी और शत्रुको जीतनेवाला था ।

संधि किये हुए वाक्य ।

१ यथा जनकः कुमारं पश्यति, तथा कुमारो जनकं पश्यति किम् ? इदानीं कुमारो जनकं पश्यति । पश्य तम्, स तं कथं पश्यति ।

२ यथा त्वं धावसि, तथाऽहमपि धावामि । यथा स धावति, तथा त्वं न धावसि । यथाऽहं धावामि, तथा त्वं धावसि ।

.4286

मुद्रक और प्रकाशक– व. श्री. सातवळेकर, भारत मुद्रणालय, पारडी (जि. सूरत)

४

ॐ

संस्कृत-पाठ-माला।

[संस्कृत भाषाका अध्ययन करनेका सुगम उपाय]

चतुर्थ भाग।

लेखक

पं. श्रीपाद दामोदर सातवलेकर

अध्यक्ष- स्वाध्याय-मण्डल, साहित्य-वाचस्पति, गीतालंकार

स्वाध्याय मंडल, पारडी (जि. सूरत)

मूल्य ५० नये पैसे

४

ॐ

संस्कृत-पाठ-माला।

[संस्कृत-भाषाका अध्ययन करनेका सुगम उपाय]

चतुर्थ भाग।

लेखक

पं. श्रीपाद दामोदर सातवलेकर

अध्यक्ष- स्वाध्याय-मण्डल, साहित्य-वाचस्पति, गीतालंकार

दशम आवृत्ति

संवत् २०१५, शक १८८०, सन १९५९

मूल्य ५० नये पैसे

मृदु व्यञ्जन– ग घ ङ। ज झ ञ। ड ढ ण। द ध न। ब भ म।
य र ल व। ह।

उष्म वर्ण– श ष स ह।

वर्णोंके ये साधारण संकेत पाठक ध्यानमें रखें। इनका उपयोग संधि करनेके समय बहुत होता है।

दो वर्ण एक दूसरेके साथ मिलनेका नाम संधि है। जैसा—

किम् अस्ति = किमस्ति
तत् अस्ति = तदस्ति
न अस्ति = नास्ति

साधारण पाठक भी इन संधियोंको थोडेसे विचारसे जान सकते हैं। थोडेसे संधि ऐसे हैं कि जो समझमें आनेके लिये कठिन होते हैं, परंतु उसके उदाहरण नीचे दिये जाते हैं।

तत् + शास्त्रं = तच्छास्त्रं
तत् + लयः = तल्लयः।
तत् + हननं = तद्धननं।

सवर्ण दीर्घ संधि।

(१) नियम पहिला।

अ, इ, उ, ऋ इनके सम्मुख क्रमशः ये ही वर्ण आ जाँय तो दोनोंके स्थानपर इनका ही दीर्घ वर्ण हो जाता है। जैसा–

अकारके सवर्ण—संधि।

अ + आ = आ	आ + अ = आ
आ + आ = आ	अ + आ = आ

इ और उ के सवर्ण-संधि

इ + इ = ई	ई + ई = ई
उ + उ = ऊ	ऊ + ऊ = ऊ

अब इनके उदाहरण देखिये—

न + अपि - नापि	नास्ति + इति - नास्तीति
रमा + अपि - रमापि	नदी + ईशः - नदीशः
तथा + आसीत् - तथासीत	भानु + उदयः - भानूदयः
न + आसीत् - नासीत	तनू + उद्भव - तनूद्भवः

ये स्वरोंके संधि स्थान स्थानपर आते हैं। इस पुस्तकमें आगे वाक्य ही दिये जायेंगे, जिसमें संधि हुए हैं। जितने श्लोक दिये हैं, उनमेंसे प्रत्येक श्लोकमें कई संधि पाठक देख सकते हैं।

(२) नियम दूसरा।

इ, उ, ऋ, लृ के सम्मुख विजातीय स्वर आनेसे इनके स्थानपर क्रमशः य्, व्, र्, ल् हो जाते हैं।

इस नियमके उदाहरण ये हैं—

इ + अ = य	इ + आ = या
उ + अ = व	उ + आ = वा
ऋ + अ = र	ऋ + आ = रा

अब इनके संधि शब्दोंमें देखिये—

इति + आदि = इत्यादि	आदि + अन्तः = आद्यन्तः
नास्ति + अतः = नास्त्यतः	कैकयी + आत्मजः = कैकेय्यात्मजः
भानु + अस्तः = भान्वस्तः	पितृ + आज्ञा = पित्राज्ञा
नदी + आत्मा = नद्यात्मा	अति + आशा = अत्याशा
मनु + आदि = मन्वादि	

पाठक इन संधियोंको स्मरणमें रखें और जहां जहां दो स्वर सम्मुख आ जायँ, वहां वहां उनका संधि करनेका यत्न करें।

तथा जहां जहां संधि हुए हों, वहां वहां उन संधियोंको खोलनेका यत्न करें।

इस प्रकार अभ्यास करनेसे संधिनियमोंके साथ पाठकोंका परिचय निःसंदेह हो जायगा।

संस्कृत--वाक्यानि ।

१. स तत्र नास्त्यतः त्वं तत्र न गच्छ ।
२. कैकेय्यात्मजेन किं कृतम् ?
३. रामेण पित्राज्ञा पालिता ।

पाठ २

संस्कृत–वाक्यानि ।

१ प्रभावशालिनः महात्मनः धर्मज्ञस्य राज्ञः दशरथस्य वंशकरः सुतः नासीत् । २ पुत्रार्थं चिन्तयतः तस्य दशरथस्य " पुत्रकामेष्टिनाम्ना यज्ञेन यजामि " इति बुद्धिः सञ्जाता । ३ मन्त्रिवरं सुमन्त्रं आहूय राजा इदं अब्रवीत् । ४ सपुरोहितान् गुरून् शीघ्रं अत्र आनय । ५ आनीतान् तान् पूजयित्वा धर्मात्मा राजा इदं वचनं अब्रवीत् । ६ सुतार्थं तप्यमानस्य मम सुखं नास्ति, तदर्थं पुत्रकामेष्टिनामकः यज्ञः कर्तव्यः इति मे मतिः सञ्जाता । ७ तत् वचनं श्रुत्वा वसिष्ठप्रमुखाः सर्वे अपि द्विजाः ऋष्यशृंगं पुरस्कृत्य तं यज्ञं समारभन् । ८ तस्य यज्ञस्य अन्ते राजा दशरथः ऋष्यशृंगं अब्रवीत् । ९ ' कुलस्य वर्धनाय पुत्रकामेष्टिं कर्तुं अर्हसि । ' १० स तथा इति उक्त्वा अथर्ववेदमंत्रैः पुत्रीयां इष्टिं अकरोत् । ११ तस्मात् यज्ञात् सन्तानोत्पत्तिकरः पायसः राज्ञा प्राप्तः । १२ प्रीतः राजा पायसं गृहीत्वा अन्तःपुरं प्रविश्य कौसल्यां अब्रवीत् । १३ पुत्रीयं पायसं गृहाणेष्व इति ।

१४ पायसस्य अर्धभागं कौसल्यायै, चतुर्थभागं सुमित्रायै, अवशिष्टं कैकेय्यै, पुत्रार्थं प्रददौ । १५ ततः ताः राजस्त्रियः गर्भान्

प्रतिपेदिरे । १६ अनन्तरं चैत्रे मासे नवम्यां तिथौ कौसल्या रामं पुत्रं अजनयत् । १७ कैकेयी भरतं, सुमित्रा लक्ष्मणं-शत्रुघ्नं च अजनयत्। १८ एषां पुत्राणां जन्मसमये अयोध्यायां महान् उत्सवः आसीत् । १९ लक्ष्मणः रामचन्द्रस्य प्रियकरः, तथा शत्रुघ्नः भरतस्य अनुगामी अभवत् । २० यदा सर्वे पुत्राः शुभगुणैः समुदिताः सर्वज्ञाः दीर्घदर्शिनः यशस्विनः अभवन्, तदा तान् दृष्ट्वा तेषां पिता दशरथः हृष्टः आसीत् ।

भाषा-वाक्य ।

१ प्रभावशाली महात्मा धर्म जाननेवाले राजा दशरथको वंश बढानेवाला पुत्र नहीं था । २ पुत्रके लिये चिन्ता करनेवाले उस दशरथको ' पुत्रकामेष्टि नामक यज्ञ करूं, ' ऐसी बुद्धि हुई । ३ मंत्रियोंमें श्रेष्ठ सुमन्त्र प्रधानको बुलाकर राजा यह बोला । ४ ' पुरोहितोंके साथ गुरुओंको शीघ्र यहां ला । ' ५ आये हुए उनकी पूजा कर, धर्मात्मा राजा यह भाषण बोला । ६ ' पुत्रके लिये तडपनेवाले मुझे सुख नहीं, इसलिये पुत्रकामेष्टि यज्ञ करना चाहिये, ऐसी मेरी बुद्धि हो गई है । ' ७ यह भाषण सुनकर वसिष्ठादि सब द्विजोंने ऋष्यशृंगको आगे करके उस यज्ञका आरंभ किया । ८ उस यज्ञके अंतमें राजा दशरथ ऋष्यशृंगसे बोला । ९ ' कुलके वर्धनके लिये पुत्रकामेष्टि करनेके लिये तू योग्य है ' । १० वह (तथा) ठीक है, ऐसा कहकर अथर्ववेद-मंत्रोंसे पुत्र देनेवाली इष्टिको करने लगा । ११ उस यज्ञसे संतति करनेवाला पायस राजाने प्राप्त किया । १२ आनंदित राजा पायस लेकर अन्तःपुरमें प्रवेश कर कौसल्यासे बोला । १३ 'पुत्र देनेवाला पायस लो।'

१४ पायसका आधा भाग कौसल्याको, चौथा भाग सुमित्राको और शेष कैकेयीको पुत्रके लिये दिया । १५ उससे वे राजस्त्रियां गर्भोंको प्राप्त हो गईं । १६ पश्चात् चैत्रमासमें नवमी तिथिके दिन कौसल्याने राम पुत्रको जन्म दिया । १७ कैकेयीने भरत और सुमित्राने लक्ष्मण और शत्रुघ्नको जन्म दिया । १८ इन पुत्रोंके जन्मके समय अयोध्यामें बडा उत्सव था ।

१९ लक्ष्मण रामचन्द्रका प्रिय तथा शत्रुघ्न भरतका अनुगामी हुआ। २० जब पुत्र शुभगुणोंसे युक्त, सर्वज्ञ, दीर्घदर्शी और यशस्वी हो गये, तब उनको देखकर उनका पिता दशरथ (हृष्टः) संतुष्ट हुआ।

सूचना

इस पाठमें रामायणकी कथा संक्षेपसे दी है। पाठसमाप्तिके पश्चात् केवल संस्कृत-वाक्य ही दस वीस बार पाठक पढें। वारंवार पढनेसे ये वाक्य पाठकोंके ध्यानमें रहेंगे।

तत्पश्चात् अपने स्मरणसे ही ये वाक्य बोलनेका यत्न कीजिये अथवा किसीसे संस्कृतमें ही कहिये। यदि पाठक ऐसा अभ्यास करेंगे, तो उनको संस्कृतका बोध अतिशीघ्र हो जायगा। रामायणकी कथाका प्रारंभ तृतीय भागसे ही हुआ है, वह पाठ भी इसके साथ ही फिर पढिये।

पाठ ३

ततोऽगच्छन्महाबाहुरेकोऽमात्यान्विसृज्य तान्।
नापश्यच्चाश्रमे तस्मिंस्तमृषिं संशितव्रतम् ॥ १ ॥

(महाभारत आदि० अ० ७१)

पदानि- ततः। अगच्छत्। महा-बाहुः। एकः। अमात्यान्। विसृज्य। तान्। न। अपश्यत्। च। आश्रमे। तस्मिन्। तं। ऋषिं। संशित-व्रतम्॥

अन्वयः- ततः तान् अमात्यान् विसृज्य, एकः महाबाहुः अगच्छत्। तस्मिन् आश्रमे संशितव्रतं तं ऋषिं न अपश्यत्॥

अर्थ- पश्चात् उन मंत्रियोंको छोड, अकेला (महाबाहुः) बडे बाहुवाला (दुष्यन्त) गया। उस आश्रममें संयतव्रतवाले उस ऋषिको उसने नहीं देखा।

सोऽपश्यमानस्तमृषिं शून्यं दृष्ट्वा तथाऽऽश्रमम्।
उवाच क इहेत्युच्चैर्वनं सन्नादयन्निव ॥ २ ॥

पदानि- सः। अपश्यमानः। तं। ऋषिं। शून्यं। दृष्ट्वा। तथा। आश्रमम्। उवाच। कः। इह। इति। उच्चैः। वनं। संनादयन्। इव॥

अन्वयः- सः तं ऋषिं अपश्यमानः तथा आश्रमं शून्यं दृष्ट्वा 'कः इह' इति उच्चैः वनं संनादयन् इव, उवाच ॥

अर्थ- वह उस ऋषिको न देखता हुआ, तथा आश्रमको (शून्यं) सूना पाकर, 'कौन यहां है ?' ऐसा ऊंचे स्वरसे, वनको प्रतिध्वनित करता हुआ, बोला।

श्रुत्वाऽथ तस्य तं शब्दं कन्या श्रीरिव रूपिणी।
निश्चक्रामाश्रमात्तस्मात्तापसीवेषधारिणी ॥ ३ ॥

पदानि- श्रुत्वा। अथ। तस्य। तं। शब्दं। कन्या। श्रीः। इव। रूपिणी। निश्चक्राम। आश्रमात्। तस्मात्। तापसीवेष-धारिणी ॥

अन्वयः- अथ तस्य तं शब्दं श्रुत्वा, श्रीः इव रूपिणी तापसी-वेष-धारिणी कन्या तस्मात् आश्रमात् निश्चक्राम ॥

अर्थ- अब उसका वह शब्द सुनकर लक्ष्मी जैसी सुंदर रूपवाली, तापसीका वेष धारण करनेवाली कन्या उस आश्रमसे निकल आयी।

सा तं दृष्ट्वैव राजानं दुष्यन्तमसितेक्षणा।
स्वागतं त इति क्षिप्रमुवाच प्रतिपूज्य च ॥ ४ ॥

पदानि- सा। तं। दृष्ट्वा+एव। राजानं। दुष्यन्तं। असित+ईक्षणा। स्वागतं। ते। इति। क्षिप्रं। उवाच। प्रतिपूज्य। च ॥

अन्वयः- सा असित-ईक्षणा तं राजानं दुष्यन्तं दृष्ट्वा एव 'स्वागतं ते' इति क्षिप्रं प्रतिपूज्य च उवाच ॥

अर्थ- वह (असित-ईक्षणा) काले नेत्रवाली कुमारिका उस राजा दुष्यन्तको देखकर ही 'तेरा स्वागत है' ऐसा शीघ्र (प्रतिपूज्य) आदर करके बोली।

आसनेनार्चयित्वा च पाद्येनार्घ्येण चैव हि।
पप्रच्छानामयं राजन्कुशलं च नराधिपम् ॥ ५ ॥

पदानि- आसनेन। अर्चयित्वा। च। पाद्येन। अर्घ्येण। च। एव। हि। पप्रच्छ। अनामयं। राजन्। कुशलं। च। नर-अधिपम् ॥

अन्वयः- हे राजन् ! आसनेन पाद्येन अर्घ्येण च नराधिपं अर्चयित्वा अनामयं कुशलं च पप्रच्छ ॥

अर्थ- हे राजा ! आसन, पाद्य और अर्घ्यसे राजाको (अर्चयित्वा) पूजकर स्वास्थ्य और कुशल पूछा ।

यथावदर्चयित्वाऽथ पृष्ट्वा चानामयं तदा ।
उवाच स्मयमानेव किं कार्यं क्रियतामिति ॥ ६ ॥

पदानि- यथावत् । अर्चयित्वा । अथ । पृष्ट्वा । च । अनामयं । तदा । उवाच । स्मयमाना । इव । किं । कार्यं । क्रियतां । इति ॥

अन्वयः- अथ यथावत् अर्चयित्वा, तदा अनामयं पृष्ट्वा 'किं कार्यं क्रियतां' इति स्मयमाना इव उवाच ॥

अर्थ- अब (यथावत्) विधिपूर्वक पूजकर, तब (अनामयं) कुशल पूछकर, 'क्या कार्य करना ?' ऐसा हास्यमुखसे पूछा ।

तामब्रवीत्ततो राजा कन्यां मधुरभाषिणीम् ।
दृष्ट्वा चैवानवद्याङ्गीं यथावत्प्रतिपूजितः ॥ ७ ॥

पदानि- तां । अब्रवीत् । ततः । राजा । कन्यां । मधुरभाषिणीं । दृष्ट्वा । च । एव । अनवद्य-अङ्गीं । यथावत् । प्रति-पूजितः ॥

अन्वयः- ततः यथावत् प्रतिपूजितः राजा तां मधुरभाषिणीं अनवद्याङ्गीं कन्यां दृष्ट्वा एव अब्रवीत् ॥

अर्थ- पश्चात् यथायोग्य पूजा पाकर राजा उस मधुरभाषिणी अनिंदित अंगवाली कन्याको देखकर ही बोला ।

यह पाठ समाप्त करते ही पाठक केवल श्लोक ही श्लोक पुनः पुनः पढें । शनैः शनैः ऐसे स्वरसे पढें कि पढते ही उनके मनमें अर्थ आजाय और अर्थके विषयमें कोई संदेह न रहे ।

तथा श्लोकके पद कैसे बनते हैं, पदोंसे अन्वय किस रीतिसे होता है, यह सब ध्यानपूर्वक देखते रहें । इस अभ्याससे शीघ्र ही संस्कृतमें प्रगति होती है ।

पाठ ४

पूर्वपाठमें दिया हुआ रामायणका भाग संधि बनाकर यहां दिया जाता है। पढनेसे पाठकोंको स्वयं पता लग जायगा कि संधि कैसे होते हैं और उनको खोलकर पद कैसे बनाने चाहिये। देखिये—

रामायण कथा।

प्रभावशालिनो महात्मनो धर्मज्ञस्य राज्ञो दशरथस्य वंशकरः सुतो नासीत्। पुत्रार्थं चिन्तयतस्तस्य दशरथस्य पुत्रकामेष्टिनाम्ना यज्ञेन यजामीति बुद्धिस्सञ्जाता। मंत्रिवरं सुमंत्रमाहूय राजेदमब्रवीत्। सपुरोहितान्गुरूञ्छीघ्रमत्रानय। आनीतांस्तान् पूजयित्वा धर्मात्मा राजेदं वचनमब्रवीत्। सुतार्थं तप्यमानस्य मम सुखं नास्ति! तदर्थं पुत्रकामेष्टिनामको यज्ञः कर्तव्य इति मे मतिः सञ्जाता। तद्वचनं श्रुत्वा वासिष्ठप्रमुखाः सर्वेऽपि द्विजा ऋष्यशृङ्गं पुरस्कृत्य त यज्ञं समारभन्। तस्य यज्ञस्यान्ते राजा दशरथ ऋष्यशृङ्गमब्रवीत्। कुलस्य वर्धनाय पुत्रकामेष्टिं कर्तुमर्हसि। स तथेत्युक्त्वाऽथर्ववेदमंत्रैः पुत्रीयामिष्टिमकरोत्। तस्माद्यज्ञात्सन्तानोत्पत्तिकरः पायसो राज्ञा प्राप्तः। प्रीतो राजा पायसं गृहीत्वाऽन्तःपुरं प्रविश्य कौसल्यामब्रवीत्। पुत्रीयं पायसं गृहाणेति। पायसस्यार्धभागं कौसल्यायै, चतुर्थभागं सुमित्रायै, अवशिष्टं कैकेय्यै पुत्रार्थं प्रददौ। ततस्ता राजस्त्रियो गर्भान्प्रतिपेदिरे। अनन्तरं चैत्रे मासे नवम्यां तिथौ कौसल्या रामं पुत्रमजनयत्। कैकेयी भरतं, सुमित्रा लक्ष्मणं, शत्रुघ्नं चाजनयत्। एषां पुत्राणां जन्मसमये अयोध्यायां महानुत्सव आसीत्। लक्ष्मणो रामस्य प्रियकरस्तथा शत्रुघ्नो भरतस्यानुगाम्यभवत्। यदा सर्वे पुत्राः शुभगुणैः समुदिताः सर्वज्ञा दीर्घदर्शिनो यशस्विनोऽभवस्तदा तान्दृष्ट्वा तेषां पिता दशरथो हृष्टः आसीत्।

सूचना ।

पाठक यह सरल संस्कृत बारबार पढ़ें और समझनेका यत्न करें । किसी स्थानपर यदि ठीक समझमें न आया, तो समझनेका प्रयत्न करें । न समझनेपर पूर्व पाठमें यह वाक्य देखें । ऐसा प्रयत्न करनेसे संस्कृतके संधियोंके साथ पाठकोंका परिचय होगा । विना आयास संधि करने और संधि खोलनेका अभ्यास इसी प्रकार होता जायगा । संस्कृतमें संधियोंका सर्वत्र महत्व है । इसलिये संधिप्रकरणका अभ्यास सुगम रीतिसे करनेका यही उपाय है ।

अब श्लोकोंका सरल संस्कृत नीचे दिया जाता है । पूर्व पाठके श्लोकोंका सरल संस्कृत यह है । इसमें किसी स्थानपर यदि कोई कठिनता उत्पन्न हो गई तो पूर्व पाठमें देखनेसे वह दूर होगी ।

संस्कृत-पाठः ।

ततस्तानमात्यान्विसृज्यैको महाबाहुरगच्छत् । तस्मिन्नाश्रमे संशितव्रतं तमृषिं नापश्यत् । स तमृषिमपश्यमानस्तथाऽऽश्रमं शून्यं दृष्ट्वा 'क इह' इत्युच्चैर्वनं सन्नादयन्निवोवाच । अथ तस्य तं शब्दं श्रुत्वा श्रीरिव रूपिणी तापसी वेषधारिणी कन्या तस्मादाश्रमान्निश्चक्राम । साऽसितेक्षणा तं राजानं दुष्यन्तं दृष्ट्वैव 'स्वागतं ते' इति क्षिप्रं प्रतिपूज्य चोवाच—

हे राजन् ! आसनेन पाद्येनार्घ्येण चैव हि नराधिपमर्चयित्वाऽनामयं कुशलं च पप्रच्छ । अथ यथावदर्चयित्वा, तदाऽनामयं पृष्ट्वा च, 'किं कार्यं क्रियतां' इति स्मयमानेवोवाच ।

ततो यथावत्प्रतिपूजितो राजा तां मधुरभाषिणीमनवद्याङ्गीं कन्यां दृष्ट्वैवाब्रवीत् ।

सूचना ।

पूर्व पाठके श्लोकोंका सरल संस्कृत यह है । पाठक इसको पढ़ें और समझनेका यत्न करें । जहां समझनेमें कठिनता हो, वहां पूर्व श्लोकोंके अन्वयमें देखकर शंकाकी निवृत्ति करें ।

अब उक्त वाक्योंके ही शब्दोंका हेरफेर करके वाक्य बनाकर नीचे दिये जाते हैं। इन वाक्योंमें कुछ शब्द अधिक भी हैं, कुछ कम भी किये हैं और शब्दोंके स्थान भी बदल दिये हैं।

संस्कृत–पाठः ।

अनन्तरममात्यान्दूरतो विसृज्य दुष्यन्तो राजा कण्वस्याश्रममगच्छत् । परं तस्मिन्नाश्रमे स राजा कण्वं मुनिं नापश्यत् । तं मुनिमपश्यमानः स राजा 'क इहास्ति' इत्युच्चैर्वनं संनादयन्निवोवाच ।

तस्य शब्दं श्रुत्वा तापसी कन्या तस्मादाश्रमान्निश्चक्राम । सा कन्या तं राजानं ज्ञात्वा 'स्वागतं त' इति संपूज्य चोवाच । आसनेन पाद्येनार्घ्येण च तं नृपतिमर्चयित्वा कुशलं च पृष्ट्वा 'किं कार्यं कर्तव्यम्' इति स्मयमानोवाच । तथा पूजितो राजा मधुरभाषिणीं तां कन्यामिदमब्रवीत् ।

सूचना ।

पाठक पूर्ववत् इसको भी समझनेका यत्न करें। इसमें जो शब्दोंकी न्यूनाधिकता है, वह थोडेसे प्रयत्नसे पाठक समझ सकते हैं। इसी प्रकार यदि पाठक अपने मनसे वाक्य बनाते जायेंगे, तो उनको बडा ही लाभ हो सकता है।

अब संधिके नियम बताये जाते हैं।

(३) तृतीय नियम ।

ए ऐ ओ औ इन स्वरोंके सम्मुख अन्य स्वर आनेसे उनके स्थानपर क्रमशः अय्, आय्, अव्, आव् होते हैं। उदाहरण—

ए + अ = अय		ओ + अ = अव
ऐ + आ = आय		औ + आ = आव
हरे + ए = हरये		विष्णो + ए = विष्णवे
नै + अकः = नायकः		पौ + अकः = पावकः

(४) चतुर्थ नियम ।

अ वर्णके सम्मुख इ उ ये स्वर आनेसे दोनोंके मिलकर क्रमशः ए और ओ होते हैं —

भय + उत्पादक = भयोत्पादक
गंगा + उदकं = गंगोदकं
जल + ईशः = जलेशः
गंगा + ईशः = गंगेशः

पाठ ५

(५) पञ्चम नियम ।

पदान्तके अन्तिम ए अथवा ओ के परे अकार आनेसे उस अकारका लोप हो जाता है, अर्थात् यह अकार पूर्वाक्षरमें मिल जाता है ।

जहां जहां अकार इस प्रकार मिल जाता है, वहां ऽ यह चिह्न लिखते हैं । जैसे—

जले अन्तर्हितः = जलेऽन्तर्हितः ।
रामो अब्रवीत् = रामोऽब्रवीत् ।

(६) षष्ठ नियम ।

अकारके पश्चात्के विसर्गके सम्मुख पुनः अकार अथवा मृदु व्यञ्जन आनेसे उस विसर्गका ओ बनता है । और इसमें आगेका अकार मिल जाता है । जैसा—

रामः + अब्रवीत् = रामोऽब्रवीत् ।
जनः + अस्ति = जनोऽस्ति ।
मनुष्यः + गच्छति = मनुष्यो गच्छति ।
अश्वः + मृतः = अश्वो मृतः ।

(७) सप्तम नियम।

इ अथवा उ के पश्चात्के विसर्गके सम्मुख स्वर अथवा मृदु व्यञ्जन आनेसे विसर्गका रकार (रेफ) बनता है। जैसे—

हरिः + अस्ति = हरिरस्ति।
गुरुः + अब्रवीत् = गुरुरब्रवीत्।
भानुः + गच्छति = भानुर्गच्छति।
कविः + जानाति = कविर्जानाति।

मृदु व्यञ्जन न होनेसे विसर्गका रेफ नहीं होता, इसके भी उदाहरण देखिये—

हरिः करोति = हरिः करोति।
गुरु पुनाति = गुरुः पुनाति।

इसमें विसर्गके सम्मुख कठोर व्यञ्जन होनेसे विसर्ग जैसाका वैसा ही रह गया है।

(८) अष्टम नियम।

विसर्गके सम्मुख च अथवा छ आनेसे विसर्गका श् बनता है—

रामः + चलति = रामश्चलति।
जनः + छेद्यति = जनश्छेद्यति।

(९) नवम नियम।

विसर्गके सम्मुख त अथवा थ वर्ण आनेसे विसर्गका स् बनता है। जैसा—

माधवः + तथा = माधवस्तथा।
रामः + थूर्वति = रामस्थूर्वति।

(१०) दशम नियम।

विसर्गके सम्मुख ट अथवा ठ आनेसे विसर्गका ष् बनता है।

कृष्णः + टीकते = कृष्ण टीकते।

(११) एकादश नियम ।

विसर्गके सम्मुख श, ष, स, ये अक्षर आनेसे विसर्गके क्रमसे श्, ष्, स् बनते हैं अथवा विसर्ग ही कायम रहता है ।

रामः + शास्ति = रामश्शास्ति, रामः शास्ति ।
जनः + ष्ठीवति = जनष्ष्ठीवति, जनः ष्ठीवति ।
नरः + सहते = नरस्सहते ।

पाठक ये नियम अपने पाठोंमें देखें और किसी नियमके अनुकूल कौनसा संधि कहां हुआ है, यह जाननेका यत्न करें ।

यह कार्य बडा सुगम है । यदि पाठक ध्यानपूर्वक संधिके स्थानपर देखेंगे, और ध्यानसे सोचेंगे, तो इसमें कोई कठिनता उनको प्रतीत नहीं होगी ।

संधि किये हुए वाक्य ।

महाबाहुर्दुष्यन्तो राजा तदा तत्रागच्छत् । दुष्यन्तो नाम महाबाहू राजा तदाऽगच्छत्तत्र । महाबाहू राजा दुष्यन्तो नामागच्छत्तत्र तदा । अगच्छत्तदा तत्र दुष्यन्तो नाम महाबाहू राजा ।

तत्र स राजा संशितव्रतं कण्वं नाम महर्षिं तत्राश्रमे नापश्यत् । नापश्यत्तत्राश्रमे स राजा कण्वं नाम संशितव्रतं महर्षिम् ।

ततो राजा तां मधुरभाषिणीं कन्यामब्रवीत् । राजा ततस्तां मधुरभाषिणीं कन्यामब्रवीत् । राजा ततो मधुरभाषिणीं तां कन्यामब्रवीत् । ततो मधुरभाषिणीं तां कन्यां राजाऽब्रवीत् । अब्रवीद्राजा ततस्तां मधुरभाषिणीं कन्याम् । मधुरभाषिणीं तां कन्यां ततो राजाऽब्रवीत् ।

पाठ ६

रामायण-कथा ।

१ अथ राजा दशरथः तेषां पुत्राणां दारक्रियां चिन्तयामास । २ तदा तत्र महामुनिः विश्वामित्रः अभ्यागच्छत् । ३ हृष्टमनाः राजा तं मुनिं अभिपूजयन् उवाच । ४ ' महामुने ! त्वया अनुगृहीतः अस्मि । ५ यत् भवतां कार्यं अस्ति, तत् अशेषेण एव करिष्यामि । ६ भवान् हि दैवतं मम । ' ७ तदा आनंदितः विश्वामित्रः अभ्यभाषत । ८ ' अहं एकं क्रतुं कर्तुं इच्छामि, तस्य रक्षणार्थं ज्येष्ठं स्वपुत्रं रामं दातुं अर्हसि । ९ मम यज्ञस्य विघ्नकर्तारौ मारीचसुबाहू नाम राक्षसौ स्तः । १० तव पुत्रः हि दिव्येन स्वेन तेजसा राक्षसानां विनाशने समर्थः अस्ति । ११ यज्ञस्य रक्षणार्थं केवलं दशरात्रं एव कमललोचनं रामं दातुं अर्हसि । १२ अहं रामाय च बहुविधं श्रेयः दास्यामि । ' १३ एतत् मुनेः वचनं श्रुत्वा राजा निःसंज्ञः अभवत् । १४ ' मे रामः ऊनषोडशवर्षः, राक्षसानां न योग्यः । १५ राक्षसाः कूटयुद्धाः भवन्ति । १६ अहं तु रामेण वियुक्तः मुहूर्तं अपि जीवितुं न उत्सहे । १७ कालोपमौ मारीचसुबाहू ! १८ तन्न दास्यामि पुत्रकम् । ' १९ राज्ञः इदं वचनं श्रुत्वा क्रुद्धः विश्वामित्रः प्रत्युवाच । २० ' हे राजन् ! स्वकीयां प्रतिज्ञां हातुं इच्छसि, अयुक्तं एतत् रघुकुलस्य । २१ गच्छामि अहं विमुखः । ' २२ तदा ऋषिणा वसिष्ठेन अपि मन्त्रितः राजा दशरथः सलक्ष्मणं रामं कौशिकाय विश्वामित्राय ददौ । २३ तदा रामलक्ष्मणौ धनुष्पाणी विश्वामित्रं अनुजग्मतुः ।

भाषा-वाक्य ।

१ अब राजा दशरथ उन पुत्रोंकी (दारक्रिया) शादीके विषयमें सोचने लगा । २ तब वहां महामुनि विश्वामित्र आगया । ३ संतुष्ट राजा उस मुनिको

पूजा करके बोला। ४ 'हे महामुने! तेरे कारण मैं अनुगृहीत हुआ हूं। ५ जो आपका कार्य है वह पूर्णतासे ही करूंगा। ६ क्योंकि (भगवान्) आप मेरा दैवत हैं।' ७ उस समय आनंदित विश्वामित्र बोलने लगा। ८ 'मैं एक यज्ञ करना चाहता हूं, उसके रक्षणके लिये अपने ज्येष्ठ पुत्र रामको देनेके लिये योग्य है। ९ मेरे यज्ञके विघ्नकर्ता मारीच और सुबाहू नामक राक्षस हैं। १० तेरा पुत्र अपने दिव्य तेजसे राक्षसोंका नाश करनेमें समर्थ है। ११ यज्ञकी रक्षाके लिये केवल दस रात्रितक ही कमल-नेत्र रामको देनेके लिये तू योग्य है। १२ मैं रामके लिये अनेक प्रकारका कल्याण दूंगा।' १३ यह मुनिका वचन सुनकर राजा मूर्च्छित हुआ। १४ 'मेरा राम सोलह वर्षोंसे कम आयुवाला है, राक्षसोंके लिये योग्य नहीं है। १५ राक्षस कपटयुद्ध करनेवाले होते हैं। १६ मैं तो रामसे विरहित घडीभर भी जीवित रहनेके लिये उत्साहित नहीं हूं। १७ कालके समान मारीच और सुबाहू हैं। १८ इसलिये नहीं दूंगा पुत्रको।' १९ राजाका यह वचन सुनकर क्रोधित विश्वामित्र बोला। २० 'हे राजा! अपनी प्रतिज्ञाका त्याग करना चाहता है, यह रघुकुलके लिये योग्य नहीं है। २१ जाता हूं मैं विमुख होकर।' २२ तब ऋषि वसिष्ठकी मंत्रणासे राजा दशरथने लक्ष्मणसहित रामको कुशिकवंशज विश्वामित्रको दिया। २३ तब राम और लक्ष्मण हाथमें धनुष्य लेते हुए विश्वामित्रके पीछे चले।

रामायणका पहिला पाठ तृतीय पुस्तकमें है और इस पुस्तकमें दो पाठ हैं। सब मिलकर तीन पाठ आपने इस समयतक पढे हैं।

कृपया आजके दिन उक्त तीनों पाठ पुनः पढिये और ऐसा यत्न कीजिये कि संस्कृतमें ही सब कथा आप विना पुस्तक देखे कह सकें। यदि आप बहुतसी कथा विना देखे कह सकें, तो समझिये कि आपकी प्रगति बहुत हो चुकी है।

संधि किये हुए वाक्य।

प्रभावशालिनो महात्मनो धर्मज्ञस्य राज्ञो दशरथस्य वंशकरः सुतो नासीत्। पुत्रार्थं चिन्तयमानस्य तस्य दशरथस्य "पुत्र-

कामेष्टिनाम्ना यज्ञेन यजामीति" बुद्धिस्सञ्जाता। मन्त्रिवरं सुमन्त्र-माहूय राजेदमब्रवीत्। सपुरोहितान्गुरूञ्छीघ्रमत्रानय। आनीतां-स्तान्पूजयित्वा धर्मात्मा राजेदं वचनमब्रवीत्। सुतार्थं तप्यमान-स्य मम सुखं नास्ति, तदर्थं पुत्रकामेष्टिनामको यज्ञः कर्तव्य इति मे मतिः सञ्जाता।

पाठ ७

आगतोऽहं महाभागमृषिं कण्वमुपासितुम्।
क्व गतो भगवान्भद्रे तन्ममाचक्ष्व शोभने ॥ ८ ॥

(म० भारत आदि० ७१)

पदानि- आगतः। अहं। महाभागं। ऋषिं। कण्वं। उपासितुं। क्व। गतः। भगवान्। भद्रे। तत्। मम। आचक्ष्व। शोभने॥

अन्वयः- महाभागं कण्वं ऋषिं उपासितुं अहं आगतः। हे भद्रे शोभने! भगवान् क्व गतः? तत् मम आचक्ष्व॥

अर्थ- महाभाग्यवान् कण्व ऋषिको (उपासितुं) मिलनेके लिये मैं आ गया हूं। हे भद्रे शोभने! भगवान् कहां गये हैं? वह मुझे कहो।

शकुन्तलोवाच।

गतः पिता मे भगवान्फलान्याहर्तुमाश्रमात्।
मुहूर्तं संप्रतीक्षस्व द्रष्टास्येनमुपागतम् ॥ ९ ॥

पदानि- शकुन्तला। उवाच। गतः। पिता। मे। भगवान्। फलानि। आहर्तुं। आश्रमात्। मुहूर्तं। संप्रतीक्षस्व। द्रष्टा। असि। एनं। उपागतम्॥

अन्वयः- शकुंतला उवाच- मे भगवान् पिता फलानि आहर्तुं आश्रमात् गतः। मुहूर्तं संप्रतीक्षस्व। एनं उपागतं द्रष्टासि॥

अर्थ- मेरे भगवान् पिता फल बटोरनेको आश्रमसे निकले हैं। आप घडीभर ठहरिये। उनको लौटे हुए देखेंगे।

❀

वैशम्पायन उवाच ।

अपश्यमानस्तमृषिं तथा चोक्तस्तया च सः ।
तां दृष्ट्वा च वरारोहां श्रीमतीं चारुहासिनीम् ॥ १० ॥

पदानि– अपश्यमानः । तं । ऋषिं । तथा । च । उक्तः । तया । च । सः । तां । दृष्ट्वा । च । वरारोहां । श्रीमतीं । चारु-हासिनीम् ॥

अन्वयः– तं ऋषिं अपश्यमानः, तया च तथा उक्तः सः तां वरारोहां श्रीमतीं चारुहासिनीं दृष्ट्वा ॥

अर्थ– उस ऋषिको न देखकर, तथा उससे (उक्तः) सुनकर, वह उस (वरारोहां) सुन्दर, श्रीमती, सुंदर हंसनेवालीको देखकर [बोला] ।

विभ्राजमानां वपुषा तपसा च दमेन च ।
रूपयौवनसंपन्नामित्युवाच महीपतिः ॥ ११ ॥

पदानि– विभ्राजमानां । वपुषा । तपसा । च । दमेन । च । रूप-यौवन-संपन्नां । इति । उवाच । महीपतिः ॥

अन्वयः– वपुषा तपसा दमेन च विभ्राजमानां रूपयौवनसंपन्नां महीपतिः इति उवाच ॥

अर्थ– (वपुषा) शरीरसे, (तपसा) तपसे तथा संयमसे (वि) विशेष (भ्राजमानां) तेजस्वी और (रूप) सुरूपता तथा (यौवन) तारुण्यसे (संपन्नां) युक्त कुमारिकाको (महीपतिः) राजा यह बोला ।

का त्वं कस्यासि सुश्रोणि किमर्थं चागता वनम् ॥
एवं रूपगुणोपेता कुतस्त्वमसि शोभने ॥ १२ ॥

पदानि– का । त्वं । कस्य । असि । सुश्रोणि । किं-अर्थं । च । आगता । वनम् । एवं । रूप गुण-उपेता । कुतः । त्वं । असि । शोभने ॥

अन्वयः– हे सुश्रोणि ! त्वं का ? कस्य असि ? हे शोभने ! एवं रूप-गुणोपेता त्वं वनं किमर्थं कुतः आगता असि ?

अर्थ– हे उत्तम श्रोणीवाली ! तू कौन ? किसकी हो ? हे सुंदरी ! इस

प्रकार रूप और गुणोंसे युक्त होकर तू वनको किस कारण और कहांसे आ गई है ?

दर्शनादेव हि शुभे त्वया मेऽपहृतं मनः ।
इच्छामि त्वामहं ज्ञातुं तन्ममाचक्ष्व शोभने ॥ १२ ॥

पदानि- दर्शनात् । एव । हि । शुभे । त्वया । मे । अपहृतं । मनः । इच्छामि । त्वां । अहं । ज्ञातुं । तत् । मम । आचक्ष्व । शोभने ॥

अन्वयः- हे शुभे ! दर्शनात् एव हि मे मनः त्वया अपहृतं । हे शोभने ! अहं त्वां ज्ञातुं इच्छामि, तत् मम आचक्ष्व ॥

अर्थ- हे सुंदरी ! दर्शनसे ही मेरा मन तुमने हर लिया है । हे सुंदरी ! मैं तुझे जानना चाहता हूं, वह मुझे कहो ।

एवमुक्ता तु सा कन्या तेन राज्ञा तमाश्रमे ।
उवाच हसती वाक्यमिदं सुमधुराक्षरम् ॥ १३ ॥

पदानि- एवम् । उक्ता । तु । सा । कन्या । तेन । राज्ञा । तम् । आश्रमे । उवाच । हसती । वाक्यम् । इदम् । सु-मधुर-अक्षरम् ॥

अन्वयः- तेन राज्ञा तु सा कन्या आश्रमे एवं उक्ता, हसती इदं सु-मधुराक्षरं वाक्यं उवाच ॥

अर्थ- उस राजाने वह कन्या आश्रममें इस प्रकार कही जानेपर, हंसती हुई यह उत्तम मधुर अक्षरयुक्त वाक्य बोली ।

सूचना ।

पाठ समाप्त होते ही पाठक श्लोकोंको वारंवार पढें और केवल श्लोक पढते ही उनका अर्थ ध्यानमें आनेयोग्य अपना अभ्यास बढावें । यदि श्लोक शांतिसे पढे जायेंगे, तो उसी क्षण उनका अर्थ ध्यानमें आ सकता है ।

इतनी तैयारी होनेपर बिना पुस्तक श्लोकका भावार्थ अपनी संस्कृतमें कागजपर लिखना और अन्वयके साथ मिलाना। अर्थात् अपनी प्रगति कितनी हुई है यह समझमें आजायगा और क्रमिक संस्कृत वाक्य बनानेका अभ्यास बढेगा।

संधि किये हुए वाक्य।

मे भगवान् पिता कण्वः फलान्याहर्तुमाश्रमाद्गतः। कण्वो मे भगवान्पिता फलान्याहर्तुमाश्रमाद्गतः। आश्रमाद्गतो मे पिता भगवान्कण्वः फलान्याहर्तुम्।

तं राजानं सुमधुराक्षरमिदं वाक्यमुवाच। सुमधुराक्षरमिदं वाक्यं तं राजानमुवाच। उवाच तं राजानमिदं सुमधुराक्षरं वाक्यम्।

पाठ ८

पूर्व दो पाठोंमें आये हुए संस्कृत-वाक्योंका संधियुक्त सरल संस्कृत नीचे दिया है। पूर्ववत् इसका भी पाठक अच्छा अभ्यास करें।

रामायण कथा।

अथ राजा दशरथस्तेषां पुत्राणां दारक्रियां चिन्तयामास। तदा तत्र महामुनिर्विश्वामित्रोऽभ्यागच्छत्। हृष्टमना राजा तं मुनिमभिपूजयन्नुवाच। महामुने! त्वयाऽनुगृहीतोऽस्मि। यद्भवतां कार्यमस्ति तदशेषेणैव करिष्यामि। भवान्हि दैवतं मम।

तदाऽऽनन्दितो विश्वामित्रोऽभ्यभाषत। अहमेकं क्रतुं कर्तुमिच्छामि। तस्य रक्षणार्थं ज्येष्ठं स्वपुत्रं रामं दातुमर्हसि। मम यज्ञस्य विघ्नकर्तारौ मारीचसुबाहू नाम राक्षसौ स्तः। तव पुत्रो हि दिव्येन स्वेन तेजसा राक्षसानां विनाशने समर्थोऽस्ति। यज्ञस्य

रक्षणार्थं केवलं दशरात्रमेव कमललोचनं रामं दातुमर्हसि । अहं रामाय च बहुविधं श्रेयो दास्यामि । एतन्मुनेर्वचनं श्रुत्वा राजा निःसंज्ञोऽभवत् ।

मे राम ऊनषोडशवर्षो राक्षसानां न योग्यः । राक्षसाः कूट-युद्धा भवन्ति । अहं तु रामेण वियुक्तो मुहूर्तमपि जीवितुं नोत्सहे। कालोपमौ मारीचसुबाहू । तन्न दास्यामि पुत्रकम् ।

राज्ञ इदं वचनं श्रुत्वा क्रुद्धो विश्वामित्रः प्रत्युवाच । हे राजन् ! स्वकीयां प्रतिज्ञां हातुमिच्छसि ? अयुक्तमेतद्रघुकुलस्य । गच्छा-म्यहं विमुखः ।

तदर्षिणा वसिष्ठेनापि मन्त्रितो राजा दशरथो रामं सलक्ष्मणं कौशिकाय विश्वामित्राय ददौ । तदा रामलक्ष्मणौ धनुष्पाणी विश्वामित्रमनुजग्मतुः ॥

सूचना ।

पाठक इस पाठको वारंवार पढें और समझनेका यत्न करें । किसी स्थानका संधि समझमें न आया, तो पूर्व पाठके वाक्य देखकर अपनी कठि-नता दूर करें । जिनका पूर्वपाठ ठीक हुआ होगा उनके लिये इसमें कोई कठिनता नहीं होगी । अब पूर्व पाठके श्लोकोंका सरल संस्कृत यहां दिया जाता है । इसका भी पूर्ववत् ही अभ्यास पाठक करें ।

शकुन्तलाख्यानम् ।

महाभागं कण्वमृषिमुपासितुमहमागतः । हे भद्रे शोभने ! भगवान्क्व गतः ? तन्ममाचक्ष्व । शकुन्तलोवाच-मे भगवान्पिता फलान्याहर्तुमाश्रमाद्गतः । मुहूर्तं संप्रतीक्षस्व । एनमुपागतं द्रष्टासि ।

तमृषिमपश्यमानस्तया च तथोक्तः स तां वरारोहां श्रीमतीं चारुहासिनीं दृष्ट्वा वपुषा तपसा दमेन च विभ्राजमानां रूपयौ-वनसंपन्नां महामतिरित्युवाच ।

हे सुश्रोणि ! का त्वं ? कस्यासि ? हे शोभने एवं रूपगुणोपेता त्वं वनं किमर्थं कुत आगतासि ? हे शुभे ! दर्शनादेव हि मे मनस्त्वयाऽपहृतम् । हे शोभने ! अहं त्वां ज्ञातुमिच्छामि। तन्ममाचक्ष्व ।

तेन राज्ञा तु सा कन्याऽऽश्रम एवमुक्ता हसतीदं सुमधुराक्षरं वाक्यमुवाच ॥

सूचना ।

पूर्वोक्त श्लोकोंका सरल संस्कृत यह है । यदि पाठकोंका पूर्व पाठ ठीक हुआ है तो यह बिना परिश्रम समझमें आजायगा । संधिके कारण यदि किसी स्थानपर कोई कठिनता उत्पन्न हुई, तो वह पूर्व पाठ देखनेसे उसी समय निवृत्त हो सकती है ।

अब कुछ अन्य वाक्य दिये जाते हैं । उनको भी पूर्ववत् ही पढिये ।

संस्कृत–वाचन–पाठः ।

१ शिवाय शान्ताय निश्चलाय यशस्विने जगद्बीजाय श्रेष्ठाय तस्मै वीर्यात्मने परमेश्वराय नमः । २ सर्वे अपि सुखिनः सन्तु । सर्वे निरामयाः सन्तु । सर्वे भद्राणि पश्यन्तु । न कश्चिद् दुःखं आप्नुयात् । ३ सर्वदा सत्यं भाषणं एव श्रेयस्करं भवति । सः मनुष्यः सर्वदा सत्यं भाषणं एव वदति । ४ महामुनिः विश्वामित्रः दशरथं राजानं किं अवदत् ? विश्वामित्रः दशरथं प्रति किमर्थं आगतः ? ५ राज्ञा दशरथेन विश्वामित्रं प्रति किं उक्तम् ? तस्य दशरथस्य भाषणेन विश्वामित्रः संतुष्टः वा न ? ६ कः विश्वामित्रस्य यज्ञस्य विघ्नकर्ता आसीत् ? केन यज्ञस्य रक्षणं कृतम् ?

सूचना ।

पाठक इस पाठका अभ्यास करनेके पश्चात् यदि हो सके तो इनके संधि करनेका यत्न करें । यह कोई आवश्यकता नहीं है कि अवश्य ही संधि इस

समय ठीक होने चाहिये। परन्तु पाठक यत्न करके देखें। कोई अशुद्धि भी हुई तो हानि नहीं है।

सर्वे अपि= सर्वेऽपि। सः मनुष्यः= स मनुष्यः। सत्यं एव= सत्यमेव। महामुनिः विश्वामित्रः= महामुनिर्विश्वामित्रः। विश्वामित्रः दशरथं= विश्वामित्रो दशरथं। किं अवदत्= किमवदत्। संतुष्टः वा = संतुष्टो वा। कः विश्वामित्रः = को विश्वामित्रः। विघ्नकर्ता आसीत = विघ्नकर्तासीत।

संधि किये हुए वाक्य।

१ सर्वदा सत्य भाषणमेव श्रेयस्करं भवति। भवति सर्वदा सत्यमेव भाषणं श्रेयस्करम्। श्रेयस्करं भवति सर्वदा सत्यमेव भाषणम्। सत्यमेव भाषणं सर्वदा भवति श्रेयस्करम्।

२ महामुनिर्विश्वामित्रो दशरथं राजानं किमवदत्? किमवदन्महामुनिर्विश्वामित्रो राजानं दशरथम्?

पाठ ९

इस पाठमें और संधिनियम बताये जाते हैं-

(१२) द्वादश नियम।

क्, च्, ट्, त्, प् के सम्मुख स्वर अथवा मृदु व्यञ्जन आनेसे क्रमशः ग्, ज्, ड्, द्, ब् होते हैं। जैसा-

वाक्	+ गणः	= वाग्गणः।
अच्	+ अन्तः	= अजन्तः।
विश्ववाट्	+ उत्तरः	= विश्ववाडुत्तरः।
तत्	+ अस्ति	= तदस्ति।
अप्	+ जम्	= अब्जम्।

(१३) त्रयोदश नियम।

क, च, ट, त, प इन वर्गोंके सम्मुख ङ, ञ, ण, न, म, आनेसे पूर्व वर्णोंके भी क्रमशः ङ, ञ्, ण्, न्, म् ही होते हैं।

वाक्	+ मनः	= वाङ्मनः।
वाक्	+ नमनं	= वाङ्नमनं।
सम्राट्	+ मुखं	= सम्राण्मुखं।
तत्	+ नास्ति	= तन्नास्ति।
अप्	+ मयं	= अम्मयं।

(१४) चतुर्दश नियम।

त्, थ्, द्, ध्, न् के सम्मुख ल् आनेसे पूर्व वर्णका भी ल् हो जाता है, जैसा—

जगत्	+ लयः	= जगल्लयः।
अस्मद्	+ लाभः	= अस्मल्लाभः।
क्षुध्	+ लाभः	= क्षुल्लाभ।
जनान्	+ लभते	= जनाँल्लभते।

न अनुनासिक होनेसे लकारके पूर्व अनुनासिक हुआ है। नासिकासे उच्चार जिसका होता है, उसको अनुनासिक कहते हैं। ङ, ञ, ण, न, म ये अनुनासिक हैं।

(१५) पञ्चदश नियम।

रेफके सम्मुख रकार आनेसे पूर्व रकारका लोप होता है और उसके पूर्वका स्वर दीर्घ होता है। जैसा—

पुनः + रमते	=	पुनर् + रमते	=	पुना रमते।
हरिः + रथस्य	=	हरिर् + रथस्य	=	हरी रथस्य।

विसर्गका रेफ हुआ, उसका लोप हो गया और पूर्व स्वर दीर्घ हुआ।

(१६) षोडश नियम।

स-कार तथा त वर्गके सम्मुख श-कार तथा च-वर्ग आनेसे पूर्व वर्णके शकार तथा चवर्ग होते हैं—

चवर्ग— च, छ, ज, झ, ञ।

इसके उदाहरण ये हैं—

हरिः + शेते = हरिस् + शेते = हरिश्शेते ।

रामः + चलति = रामस् + चलति = रामश्चलति ।

सत् + चित् = सच्चित् ।

शार्ङ्गिन् + जय = शार्ङ्गिञ्जय ।

यहां वर्गकी संज्ञा पाठकोंके समझमें आनेके लिये नीचे वर्ग दिये जाते हैं—

क वर्ग - क ख ग घ ङ

च वर्ग - च छ ज झ ञ

ट वर्ग - ट ठ ड ढ ण

त वर्ग - त थ द ध न

प वर्ग - प फ ब भ म

इनमें प्रत्येक वर्गमें अन्तिम वर्ण अनुनासिक है । अनुनासिक = ङ, ञ, ण, न, म ।

(१७) सप्तदश नियम ।

स-कार और त-वर्गके सम्मुख ष-कार तथा ट-वर्ग आनेसे पूर्व वर्णके ष-कार और ट-वर्ग होते हैं ।

रामः + षष्ठः = रामस् + षष्ठः = रामष्षष्ठः ।

रामः + टीकते = रामस् + टीकते = रामष्टीकते ।

तत् + टीका = तट्टीका ।

पाठक इतने नियम ध्यानमें धरेंगे तो आवश्यक संधिविषयक ज्ञान उनको हो सकता है ।

इस समय यह कोई आवश्यक नहीं है कि सब संधि ठीक ही आजायँ । जैसी जैसी भाषामें उनकी प्रगति होती जायगी, वैसा संधियोंका ज्ञान स्वयं होता जायगा ।

यद्यपि यह प्रारंभमें कठिनसा प्रतीत होता है, तथापि अभ्याससे यह अत्यंत सुगम प्रतीत होगा । इसलिये पाठक प्रतिदिन थोडा थोडा अभ्यास करते जायँ, शेष बात स्वयं बनती जायगी ।

पाठ १०

संस्कृत-वाक्यानि ।

१ अर्धयोजनं गत्वा सरय्वाः तीरे विश्वामित्रः रामं अब्रवीत् । २ गृहाण सलिलम् । ददामि त्वां मन्त्रं विद्ये च बलां अतिबलां च । ३ रामः अपि जलं स्पृष्ट्वा प्रहृष्टवदनः तत् सर्वं प्रतिजग्राह । ४ विद्यायुक्तः रामः शरदि दिवाकर इव शुशुभे । ५ विश्वामित्रेण सह रामलक्ष्मणौ गंगासरय्वोः शुभे संगमे ऋषीणां पुण्यं आश्रमस्थानं ददृशाते । ६ मुनयः च शुभां नावं उपस्थाप्य विश्वामित्रं अब्रुवन् । ७ आरोहतु भवान् नावं राजकुमारपुरस्कृतः ।

८ मा अभूत् कालस्य विपर्ययः । ९ विश्वामित्रः रामलक्ष्मणाभ्यां सहितः नदीं ततार । १० रामः घोरं वनं दृष्ट्वा विश्वामित्रं पप्रच्छ । ११ अहो ! शोभनं वनं परं किं दारुणम् ? १२ विश्वामित्रः उवाच–हे क्षत्रियकुमार! अस्मिन् घोरे वने ताटिका नाम्नी राक्षसी वसति । १३ सा सुंदस्य राक्षसस्य भार्या । १४ अतिपराक्रमः मारीचः राक्षसः अस्याः पुत्रः । १५ सा इयं ताटिका अस्मिन् वने अस्ति । १६ इदानीं अस्याः वनं एव अस्माभिः गन्तव्यम् । १७ अतः मम आदेशात् बाहुबलं आश्रित्य इमां जहि ।

१८ 'कुरु इमं देशं निष्कण्टकम् । १९ नहि कः अपि इमं देशं साम्प्रतं आगन्तुं शक्तः । २० स्त्रीवधे त्वया घृणा न कार्या । २१ चातुर्वर्ण्यहितार्थाय देशस्य हिताय प्रजासंरक्षणाय च राजसूनुना एतत् कर्तव्यं एव ।' २२ एतत् विश्वामित्रवचनं श्रुत्वा, रामः धनुर्मध्ये मुष्टिं बध्वा शब्देन दिशः नादयन्, तीव्रं ज्याघोषं अकरोत् । २३ तत् शब्दं श्रुत्वा राक्षसी क्रोधेन मूर्च्छिता अभवत् । २४ यत्र ज्याघोषः जातः तत्र अभ्यद्रवत् च ।

भाषा—वाक्य ।

१ आधा योजन जाकर सरयू नदीके तटपर विश्वामित्र रामसे बोला। २ ' लो जल। देता हूं तुमको मन्त्र और बला तथा अतिबला नामक दो विद्या '। ३ रामने भी जलको स्पर्श करके आनन्दित बदनसे उस सबको लिया। ४ विद्यायुक्त राम शरहतुमें सूर्यके समान शोभने लगा। ५ विश्वामित्रके साथ राम और लक्ष्मण गंगा और सरयूके शुभ संगमपर ऋषियोंका पुण्य आश्रमस्थान देखते रहे। ६ मुनि भी शुभ नौकाको लाकर विश्वामित्रसे बोले। ७ ' चढें आप नौकापर राजकुमारोंको आगे करके। '

८ मत होवे समयका अतिक्रमण। ९ विश्वामित्र रामलक्ष्मणोंके साथ नदीके पार हुआ। १० रामने घोर वन देखकर विश्वामित्रसे पूछा। ११ ' अजी ! सुंदर वन है, परंतु क्यों भयानक है ? ' १२ विश्वामित्र बोला— ' हे क्षत्रियके पुत्र ! इस वनमें भयङ्कर ताटिका नामक राक्षसी रहती है। १३ वह सुन्द राक्षसकी पत्नी है। १४ अतिपराक्रमी मारीच राक्षस इसका पुत्र है। १५ वह यह राक्षसी इस वनमें है। १६ अब इसके वनमें ही हमें जाना है। १७ इसलिये मेरे आदेशसे बाहुबलका आश्रय कर और इसे मार। '

१८ ' कर इस देशको (निष्कण्टकं) शत्रुरहित। १९ नहीं कोई भी इस देशको इस समय आनेमें समर्थ है। २० स्त्रीका वध करनेमें तूने घृणा नहीं करनी। २१ चातुर्वर्ण्यके हितके लिये, देशके हितके लिये तथा प्रजाकी रक्षाके लिये राजपुत्रको यह करना ही चाहिये। ' २२ यह विश्वामित्रका भाषण सुनकर, रामने धनुष्यके मध्यमें मुट्ठी बांधकर, शब्दसे दिशाओंको नादित करके डोरीका बडा आवाज किया। २३ वह शब्द सुनके राक्षसी क्रोधसे मूर्च्छित हो गई। २४ जहां (ज्या) धनुष्यकी डोरीका (घोषः) शब्द हुआ वहां दौडकर आगई।

पाठक इस पाठको वारंवार पढें और इसमें आये संस्कृत वाक्य पुनः पुनः पढकर अच्छी प्रकार तैयार करें।

पाठक इस पाठके साथ साथ पूर्व पाठमें आये हुए रामायणके पाठ वारंवार जितना पढ सकें उतना पढें। पढनेके समय इतना ध्यान रखें कि वाक्योंमें विभिन्न शब्दोंपर जोर देकर पढें।

यदि पाठक इस तरह अभ्यास करेंगे तो उन्हें संस्कृत भाषाका ज्ञान शीघ्र होगा।

संधि किये हुए वाक्य।

१ सर्वे जना निरामयाः सन्तु। सन्तु सर्वे जना निरामयाः। निरामयाः सन्तु सर्वे जनाः।

२ सर्वे मानवाः सुखिनः सन्तु। सन्तु सर्वे मानवाः सुखिनः। सर्वे सुखिनो मानवाः सन्तु।

३ सर्वे भद्राणि पश्यन्तु। न कश्चिद्दुःखमाप्नुयात्। दुःखं कश्चिन्नाप्नुयात्सर्वे भद्राणि पश्यन्तु।

४ दर्शनादेव हि मे मनस्त्वयाऽपहृतम्। त्वयाऽपहृतं मे मनो दर्शनादेव। मे मनस्त्वयाऽपहृतं दर्शनादेव।

५ अहं त्वां ज्ञातुमिच्छामि। ज्ञातुमिच्छाम्यहं त्वाम्। त्वामहमिच्छामि ज्ञातुम्। इच्छाम्यहं त्वां ज्ञातुम्।

६ सर्वदा सत्यं भाषणमेव श्रेयस्करं भवति। भवति सर्वदा सत्यमेव भाषणं श्रेयस्करम्। श्रेयस्करं भवति सर्वदा सत्यमेव भाषणम्। सत्यमेव भाषणं सर्वदा भवति श्रेयस्करम्।

७ महामुनिर्विश्वामित्रो दशरथं राजानं किमवदत्। किमवदन्महामुनिर्विश्वामित्रो राजानं दशरथम्?

पाठ ११

शकुन्तलोवाच ।

कण्वस्याहं भगवतो दुष्यन्त दुहिता मता ।
तपस्विनो धृतिमतो धर्मज्ञस्य महात्मनः ॥ १५ ॥

पदानि- कण्वस्य । अहं । भगवतः । दुष्यन्त । दुहिता । मता । तपस्विनः । धृतिमतः । धर्मज्ञस्य । महात्मनः ॥

अन्वयः— हे दुष्यन्त ! महात्मनः धर्मज्ञस्य धृतिमतः तपस्विनः भगवतः कण्वस्य अहं दुहिता मता ॥

अर्थः— हे दुष्यन्त ! महात्मा, धर्मके जानकार, धैर्यवान् तपस्वी भगवान् कण्वकी मैं (दुहिता) पुत्री (मता) मानी हुई हूं ।

दुष्यन्त उवाच ।

ऊर्ध्वरेता महाभागे भगवाँल्लोकपूजितः ।
चलेद्धि वृत्ताद्धर्मोऽपि न चलेत्संशितव्रतः ॥ १६ ॥

पदानि— ऊर्ध्वरेताः । महाभागः । भगवान् । लोकपूजितः । चलेत् । हि । वृत्तात् । धर्मः । अपि । न । चलेत् । संशितव्रतः ॥

अन्वयः— हे महाभागे ! लोकपूजितः भगवान् ऊर्ध्वरेताः । धर्मः अपि वृत्तात् चलेत् हि संशितव्रतः न चलेत् ॥

अर्थ— हे महाभाग्यवती ! लोगोंमें सन्मान्य भगवान् ऊर्ध्वरेता है । धर्म भी (वृत्तात्) चरित्रसे चालित होगा [परन्तु] (संशितव्रतः) व्रत पालन करनेवाला (कण्व) नहीं चालित होगा ।

कथं त्वं तस्य दुहिता संभूता वरवर्णिनी ।
संशयो मे महानत्र तन्मे छेत्तुमिहार्हसि ॥ १७ ॥

पदानि— कथं । त्वं । तस्य । दुहिता । संभूता । वरवर्णिनी । संशयः । मे । महान् । अत्र । तत् । मे । छेत्तुम् । इह । अर्हसि ॥

अन्वयः— त्वं वरवर्णिनी तस्य दुहिता कथं संभूता ? मे अत्र महान् संशयः । इह मे तत् छेत्तुं अर्हसि ॥

अर्थ— तू सुन्दर रूपवाली उसकी पुत्री कैसी बनी ? मुझे यहां बडा संशय है । यहां मेरा वह (संशय) छेदन करनेके लिये तू योग्य हो ।

शकुन्तलोवाच ।

ऋषिः कश्चिदिहागम्य मम जन्माभ्यचोदयत् ।
तस्मै प्रोवाच भगवान्यथा तच्छृणु पार्थिव ॥ १८ ॥

पदानि— ऋषिः । कः । चित् । इह । आगम्य । मम । जन्म । अभ्यचोदयत् । तस्मै । प्र । उवाच । भगवान् । यथा । तत् । शृणु । पार्थिव ॥

अन्वयः— कश्चित् ऋषिः इह आगम्य मम जन्म अभ्यचोदयत् । हे पार्थिव तस्मै भगवान् यथा प्रोवाच तत् शृणु ॥

अर्थ— कोई एक ऋषि यहां आकर मेरे जन्मके विषयमें पूछने लगा । हे राजा ! उसके लिये भगवान् [ऋषि] ने जैसा कहा वह सुनो ॥

तप्यमानः किल पुरा विश्वामित्रो महत्तपः ।
सुभृशं तापयामास शक्रं सुरगणेश्वरम् ॥ २० ॥

पदानि— तप्यमानः । किल । पुरा । विश्वामित्रः । महत् । तपः । सुभृशं । तापयामास । शक्रं । सुरगणः ईश्वरम् ॥

अन्वयः— पुरा किल विश्वामित्रः तपः तप्यमानः सुरगणेश्वरं शक्रं सुभृशं तापयामास ॥

अर्थ— पूर्व समयमें निश्चयसे विश्वामित्र बडा तप तपता हुआ (सुर-गण-ईश्वरं) देवोंके गणोंके ईश (शक्रं) इन्द्रको विशेष ताप देने लगा ॥

अथापश्यद्वरारोहा तपसा दग्धकिल्बिषम् ।
विश्वामित्रं तप्यमानं मेनका भीरुराश्रमे ॥ ९ ॥

(म० भा० आ० ७२)

पदानि—अथ । अपश्यत् । वरारोहा । तपसा । दग्धकिल्बिषं । विश्वामित्रं । तप्यमानं । मेनका । भीरुः । आश्रमे ॥

अन्वयः— अथ वरारोहा भीरुः मेनका आश्रमे तपसा दग्धकिल्बिषं तप्यमानं विश्वामित्रं अपश्यत् ।

अर्थ- अनंतर सुंदरी (भीरुः) लज्जासे डरनेवाली मेनकाने आश्रममें तपसे जिसके पाप जले हैं ऐसे तपनेवाले विश्वामित्रको देखा ।

रममाणौ यथाकामं यथैकदिवसं तथा ।
जनयामास स मुनिर्मेनकायां शकुन्तलाम् ॥ ९ ॥

पदानि— रममाणौ । यथाकामं । यथा । एकदिवसं । तथा । जनयामास । सः । मुनिः । मेनकायां । शकुन्तलाम् ॥

अन्वयः— यथा एकदिवसं तथा यथाकामं रममाणौ । सः मुनिः मेनकायां शकुन्तलां जनयामास ॥

अर्थ— जैसा एक दिन होता है वैसा ही यथेच्छ [दोनों] रममाण हुए और उस मुनिने मेनकामें शकुन्तलाको जन्म दिया ।

भावार्थ—मेनका और विश्वामित्र बहुत काल ऐसे रममाण हुए और उनका समय ऐसा शीघ्र व्यतीत हुआ जैसा कि एक दिन व्यतीत होता है । (यह आशय श्लोकके प्रथम अर्थका है) ।

निर्जने तु वने यस्माच्छकुन्तैः परिपालिता ।
शकुन्तलेति नामास्याः कृतं चापि ततो मया ॥ १६ ॥

पदानि— निर्जने । तु । वने । यस्मात् । शकुन्तैः । परिपालिता । शकुन्तला । इति । नाम । अस्याः । कृतं । च । अपि । ततः । मया ॥

अन्वयः— यस्मात् निर्जने वने शकुन्तैः परिपालिता । ततः अस्याः नाम शकुन्तला इति च अपि मया कृतम् ॥

अर्थ— जिस कारण निर्जन वनमें शकुन्त पक्षियोंद्वारा इनका पालन हुआ (ततः) उस कारण इसका नाम शकुन्तला ऐसा मैंने किया ।

पाठ समाप्त करनेके पश्चात् पाठक केवल संस्कृत श्लोक ही कई बार पढ़ें और इनका आशय समझनेका यत्न करें।

संधि किये हुए वाक्य।

शकुन्तलोवाच।

हे दुष्यन्त! महात्मनो धर्मज्ञस्य धृतिमतस्तपस्विनो भगवतः कण्वस्याहं दुहिता मता।

दुष्यन्त उवाच- हे महाभागे! लोकपूजितो भगवानूर्ध्वरेताः। धर्मोऽपि वृत्ताच्चलेद्धि संशितव्रतो न चलेत्। त्वं वरवर्णिनी तस्य दुहिता कथं संभूता? मेऽत्र महान् संशयः, इह मे तच्छेत्तुमर्हसि।

पाठ १२

पूर्व दोनों पाठोंमें जो वाक्य दिये हैं, उनका सन्धि बनाकर सरल संस्कृत इस पाठमें दिया जाता है। पाठक इसका ठीक अभ्यास करें।

रामायण कथा।

अध्यर्धयोजनं गत्वा सरय्वास्तीरे विश्वामित्रो राममब्रवीत्। गृहाण सलिलम्। ददामि त्वां मन्त्रं विद्ये च बलामतिबलां च। रामोऽपि जलं स्पृष्ट्वा प्रहृष्टवदनस्तत्सर्वं प्रतिजग्राह। विद्यायुक्तो रामः शरदि दिवाकर इव शुशुभे। विश्वामित्रेण सह रामलक्ष्मणौ गंगासरय्वोः शुभे संगमे ऋषीणां पुण्यमाश्रमस्थानं ददृशाते। मुनयश्च शुभां नावमुपस्थाप्य विश्वामित्रमब्रुवन्। आरोहतु भवान्नावं राजकुमारपुरस्कृतः। माऽभूत्कालस्य विपर्ययः। विश्वामित्रो रामलक्ष्मणाभ्यां सहितो नदीं ततार।

रामो घोरं वनं दृष्ट्वा विश्वामित्रं पप्रच्छ, अहो! शोभनं वनं परं किं दारुणम्? विश्वामित्र उवाच- हे क्षत्रियकुमार! अस्मि-

न्वने घोरा ताटिका नाम्नी राक्षसी वसति। सा सुंदस्य राक्षसस्य भार्या। अतिपराक्रमो मारीचो राक्षसः अस्याः पुत्रः। सेयं ताटिकाऽस्मिन्वनेऽस्ति। इदानीमस्या वनमेवास्माभिर्गन्तव्यम्। अतो ममोपदेशाद्बाहुबलमाश्रित्येमां जहि। कुर्विमं देशं निष्कंटकम्। न हि कोऽपीमं देशं साम्प्रतमागन्तुं शक्तः। स्त्रीवधे त्वया घृणा न कार्या। चातुर्वर्ण्यहितार्थाय देशस्य हिताय प्रजासंरक्षणाय च राजसूनुनैतत्कर्तव्यमेव। एतद्विश्वामित्रवचनं श्रुत्वा रामो धनुर्मध्ये मुष्टिं बध्वा शब्देन दिशो नादयन्, तीव्रं ज्याघोषमकरोत्। तच्छब्दं श्रुत्वा राक्षसी क्रोधेन मूर्च्छिताऽभवत्। यत्र ज्याघोषो जातस्तत्राभ्यद्रवच्च।

इसमें जो संधि सुगमतासे पाठकोंको नहीं खुलेंगे, उनको पूर्व पाठमें देखकर समझनेका यत्न पाठक करें। इस प्रकार अभ्यास करनेसे पाठकोंको संधि बनाना तथा संधि खोलना सुगमताके साथ आ जायगा।

अब पूर्व पाठके श्लोकोंका सरल संस्कृत दिया जाता है। उसका भी पाठक पूर्ववत् अभ्यास करें—

संस्कृत-वाक्यानि।

हे दुष्यन्त! महात्मनो धर्मज्ञस्य धृतिमतस्तपस्विनो भगवतः कण्वस्याहं दुहिता मता।

दुष्यन्त उवाच- हे महाभागे! लोकपूजितो भगवानूर्ध्वरेताः कण्वः। धर्मोऽपि वृत्ताच्चलेद्धि, संशितव्रतः कण्वो न चलेत्। त्वं वरवर्णिनी तस्य दुहिता कथं संभूता? मेऽत्र महान्संशयः। इह मे तच्छेत्तुमर्हसि।

शकुन्तलोवाच- कश्चिदृषिरिहागम्य मम जन्माभ्यचोदयत्। हे पार्थिव दुष्यन्त! तस्मै भगवान्यथा प्रोवाच तच्छृणु।

पुरा किल विश्वामित्रो महत्तपस्तप्यमानः सुरगणेश्वरं शक्रं सुभृशं तापयामास। अथ वरारोहा भीरुर्मेनकाऽऽश्रमे तपसा

दग्धकिल्बिषं तप्यमानं विश्वामित्रमपश्यत् । यथैकदिवसं तथा यथाकामं रममाणौ । मुनिर्मेनकायां शकुन्तलां जनयामास । यस्मान्निर्जने वने शकुन्तैः परिपालिता ततः अस्या नाम शकुन्तलेति चापि मया कृतम् ।

इसमें यदि संधि खोलनेमें कुछ कठिनता पाठकोंको हुई तो पूर्व पाठके श्लोक देखकर उस कठिनताकी निवृत्ति कर सकते हैं ।

प्रश्नाः ।

१ सरय्याः तीरे विश्वामित्रः रामं किं अब्रवीत् ? २ ततः रामेण किं कृतम् ? रामेण का विद्या प्राप्ता ? ३ केन सा विद्या रामाय दत्ता ? ४ नदीतीरे कस्य आश्रम आसीत् ? ५ विश्वामित्रः कथं नदीं ततार ? ६ नदीपारं गत्वा रामेण किं दृष्टम् ? तत् वनं कथं आसीत् ? ७ विश्वामित्रेण किं कथितम् ? ८ तस्मिन् वने का राक्षसी आसीत् ? तस्याः नाम किम् ? ९ सा कस्य भार्या ? तस्याः कः पुत्रः ? १० राजपुत्रेण देशस्य हिताय किं कर्तव्यम् ? ११ रामेण किं कृतम् ?

पाठक इन प्रश्नोंका उत्तर संस्कृतमें ही देनेका यत्न करें । पूर्व पाठके तथा इस पाठके संस्कृत वाक्योंमें इनके उत्तर हैं । यदि आपने यह पाठ ठीक बना लिया है, तो आप उचित उत्तर दे सकेंगे ।

संधि किये हुए वाक्य ।

स भगवान् पिता कण्वः फलान्याहर्तुमाश्रमाद्गतः । कण्वो मे भगवान्पिता फलान्याहर्तुमाश्रमाद्गतः । आश्रमाद्गतो मे पिता भगवान्कण्वः फलान्याहर्तुम् ।

तं राजानं सुमधुराक्षरमिदं वाक्यमुवाच । सुमधुराक्षरमिदं वाक्यं तं राजानमुवाच । उवाच तं राजानमिदं सुमधुराक्षरं वाक्यम् ।

पाठ १३

इस पाठमें कुछ संधिके वाक्य खोलकर बताये जाते हैं। इनको देखकर संधि खोलनेका ज्ञान होगा। इसलिये इस दृष्टिसे इसका अभ्यास पाठक करें।

ततोऽगच्छन्महाबाहुः = ततः। अगच्छत्। महाबाहुः।
एकोऽमात्यान्विसृज्य तान् = एकः। अमात्यान्। विसृज्य। तान्।
नापश्यच्चाश्रमे तस्मिन् = न। अपश्यत्। च। आश्रमे। तस्मिन्।
तमृषिं संशितव्रतम् = तं। ऋषिं। संशितव्रतम्।
सोऽपश्यमानस्तमृषिम् = सः। अपश्यमानः। तं। ऋषिम्।
क इहेत्युच्चैर्वनं सन्नादयन्निव
= कः। इह। इति। उच्चैः। वनं। सन्नादयन्। इव।

ततः अगच्छत् = ततोऽगच्छत्।
अगच्छत् महाबाहुः = अगच्छन्महाबाहुः।
महाबाहुः एकः = महाबाहुरेकः।
एकः अमात्यान् = एकोऽमात्यान्।
न अपश्यत् = नापश्यत्।
अपश्यत् च = अपश्यच्च।
च आश्रमे = चाश्रमे।
सः अपश्यमानः = सोऽपश्यमानः।
पश्यमानः तं = पश्यमानस्तं।
कः इह = क इह।
इह इति = इहेति।
इति उच्चैः = इत्युच्चैः।
उच्चैः वनं = उच्चैर्वनं।
सन्नादयन् इव = सन्नादयन्निव।
ततः + अगच्छत् = ततोऽगच्छत्।
अगच्छत् + महाबाहुः = अगच्छन्महाबाहुः।

इस प्रकार पाठक संधियोंको खोलनेका यत्न करें। इस पुस्तकमें कई पाठोंमें सन्धि बनाकर संस्कृत वाक्य दिये हैं। उनको खोलनेका यत्न करनेसे पूर्वोक्त नियमोंका अनुभव हो सकता है। एक समय ये नियम ठीक प्रकार समझमें आ जायेंगे, तो फिर भूलते ही नहीं। अब और देखिये—

प्रभावशालिनः महात्मनः — प्रभावशालिनो महात्मनः।
महात्मनः राज्ञः — महात्मनो राज्ञः।
राज्ञः धर्मज्ञस्य — राज्ञो धर्मज्ञस्य।
सुतः न — सुतो न।
न आसीत् — नासीत्।
यजामि इति — यजामीति।
गुरून् शीघ्रं — गुरूञ्छीघ्रम्।
अत्र आनय — अत्रानय।
आनीतान् तान् — आनीताँस्तान्।
तत् अर्थं — तदर्थम्।
नामकः यज्ञः — नामको यज्ञः।
तत् वचनं — तद्वचनम्।
सर्वे अपि — सर्वेऽपि।
यज्ञस्य अन्ते — यज्ञस्यान्ते।
तथा इति — तथेति।
इति उक्त्वा — इत्युक्त्वा।
पायसः राज्ञा — पायसो राज्ञा।
प्रीतः राजा — प्रीतो राजा।
तस्मात् यज्ञात् — तस्माद्यज्ञात्।
गृहीत्वा अन्तःपुरं — गृहीत्वाऽन्तःपुरम्।
गृह्णीष्व इति — गृह्णीष्वेति
पायसस्य अर्धं — पायसस्यार्धम्।

सुमित्रायै अवशिष्टं = सुमित्राया अवशिष्टम् ।
ततः ताः = ततस्ताः ।
उत्सवः आसीत् = उत्सव आसीत् ।
लक्ष्मणः रामस्य = लक्ष्मणो रामस्य ।
भरतस्य अनुगामी = भरतस्यानुगामी ।
प्रियकरः तथा = प्रियकरस्तथा ।
अभवन् तदा = अभवँस्तदा ।

इसमें शब्दोंके संधि किस प्रकार बनते हैं यह बताया है। इनके संधि किन नियमोंके अनुसार बने हैं, यह भी पाठक देखें और विचार करें। ऐसा करनेसे संधिविषय पाठकोंको ठीक ज्ञात हो सकता है।

जो जो श्लोक दिये हैं, इनके अन्दर संधि अवश्य देखा करें और खोलना और बनाना भी समझ लें। थोडासा प्रयत्न करनेसे इस विषयमें पाठकोंकी प्रगति हो सकती है।

संधि किये हुए वाक्य।

१ तत्र तमृषिमपश्यमानस्तां शकुन्तलां स राजोवाच। स राजा तां शकुन्तलामुवाच तमृषिं तत्रापश्यमानः। ऋषिं तमपश्यमानस्तत्र तां शकुन्तलामुवाच स राजा।

२ तस्य यज्ञस्यान्ते राजा दशरथ ऋष्यशृङ्गमब्रवीत्। यज्ञस्य तस्यान्ते दशरथो राजाऽब्रवीदृष्यशृङ्गम्।

पाठ १४

रामायण कथा।

१ रामं रजोमेघेन सा ताटिका राक्षसी मुहूर्तं व्यामोहयत्। २ परन्तु पश्चात् तां ताटिकां रामः शरेण उरसि विव्याध। ३ तेन सा पपात ममार च। ४ ततः ताटिकावधेन तुष्टः मुनिवरः विश्वा-

मित्रः रामं उवाच। ५ 'हे राजपुत्र! सर्वथा परितुष्टः अस्मि ते अनेन शौर्येण। ६ अतः ते सर्वाणि अपि अस्त्राणि प्रीत्या प्रयच्छामि। ७ तैः अस्त्रैः समन्वितः युद्धे शत्रून् जेष्यसि। ८ इति उक्त्वा स विप्रः रामाय तानि सर्वाणि एव अस्त्राणि न्यवेदयत्। ९ ततः स विश्वामित्रः रामं लक्ष्मणं च प्रगृह्य स्वकीयं सिद्धाश्रमं प्राविशत्। १० तत्र मुहूर्तं विश्रान्तौ रामलक्ष्मणौ 'मुनिश्रेष्ठः यज्ञदीक्षां प्रविशतु' इति तं अनुबबन्धतुः। ११ तत् श्रुत्वा सर्वे अपि मुनयः रामलक्ष्मणौ प्रशशंसुः। १२ अद्य प्रभृति षड्रात्रं रक्षतां युवां इति च ऊचुः। १३ तौ अपि यत्तौ षड् अहोरात्रं तपोवनं अरक्षताम्। १४ षष्ठ्यां रात्रौ मायां कुर्वाणौ अभ्यधावताम्। १५ परमक्रुद्धः रामः मारीचस्य राक्षसस्य उरसि मानवं अस्त्रं चिक्षेप। १६ तेन अस्त्रेण मारीचः सागरे क्षिप्तः। १७ मारीचं सागरे क्षिप्तं दृष्ट्वा सुबाहोः उरसि आग्नेयं अस्त्रं चिक्षेप। १८ सः अपि सुबाहुः अस्त्रेण विद्धः भुवि प्रापतत्। १९ रामः अपि वायव्यास्त्रेण शेषान् राक्षसान् जघान। २० एवं निर्विघ्नतया समाप्ते यज्ञे विश्वामित्रः दिशः राक्षसहीनाः दृष्ट्वा रामं अब्रवीत्। २१ 'कृतार्थः अस्मि महाबाहो!' २२ मिथिलोपवने तु तत्र निर्जनं आश्रमपदं दृष्ट्वा राघवः पप्रच्छ 'कस्य अयं आश्रमः?' २३ विश्वामित्रः उवाच। २४ 'अत्र पुरा अहल्यासहितः गौतमः तपः आतिष्ठत्। २५ एष गौतमस्य महर्षेः रम्यः आश्रमः।'

भाषा-वाक्य।

१ रामको (रजः-मेघेन) धूलिके बादलसे उस ताटिका राक्षसीने (मुहूर्तं) थोडी देर (व्यमोहयत्) मोहित किया। २ परंतु पश्चात् उस ताटिकाको रामने बाणसे (उरसि) छातीमें (विव्याध) वेध किया। ३ उससे वह गिरी और मर गई। ४ पश्चात् ताटिकाके वधसे संतुष्ट बना हुआ मुनिश्रेष्ठ विश्वामित्र रामसे बोला। ५ 'हे राजपुत्र! सर्वथा संतुष्ट हुआ हूं तेरे इस

शौर्यसे । ६ इसलिये तुझे सभी अस्त्र प्रेमसे देता हूं । ७ उन अस्त्रोंसे युक्त होकर युद्धमें शत्रुओंको तू जीतेगा । ८ ऐसा कहकर उस ब्राह्मणने रामको वे सब अस्त्र निवेदन किये । ९ पश्चात् वह विश्वामित्र राम और लक्ष्मणको लेकर अपने सिद्धाश्रममें प्रविष्ट हुआ । १० वहां दो घडी विश्राम लेते हुए रामलक्ष्मण ' मुनिश्रेष्ठ यज्ञकी दीक्षामें प्रविष्ट होवे ' ऐसा उसे कहने लगे । ११ वह सुनके सभी मुनि रामलक्ष्मणोंकी प्रशंसा करने लगे । १२ ' आजसे आगे छः रात्री रक्षण कीजिये आप दोनों. ' ऐसा भी कहा गया । १३ (तौ) वे दोनों भी (यत्तौ) सिद्ध होकर छः अहोरात्र तपोवनकी रक्षा करते रहे । १४ छठी रात्रीमें (मायां) कपट करनेवाले दो राक्षसोंने धावा किया । १५ बडे क्रुद्ध रामने मारीच राक्षसकी छातीपर मानव अस्त्र (चिक्षेप) फेंका । १६ उस अस्त्रसे मारीच समुद्रमें फेंका गया । १७ मारीच समुद्रमें फेंका गया देखकर सुबाहुकी छातीमें आग्नेय अस्त्र फेंक दिया । १८ वह भी सुबाहु अस्त्रसे विद्ध होकर भूमिपर गिर गया । १९ रामने भी वायव्यास्त्रसे अवशिष्ट राक्षसोंको मारा । २० इस प्रकार निर्विघ्नतासे यज्ञ समाप्त होकर दिशाओंको राक्षसहीन देखकर विश्वामित्र रामसे बोला । २१ ' हे महाभुज राम ! मैं कृतार्थ हुआ हूं । ' २२ मिथिला नगरीके पासके उपवनमें (निर्जनं) जनहीन आश्रमस्थान देखकर रामने पूछा कि ' किसका यह आश्रम है ? ' २३ विश्वामित्रने उत्तर दिया। २४ ' यहां पूर्वकालमें अहल्याके सहित गौतम-मुनि तप करते रहे । २५ यह गौतम ऋषिका रम्य आश्रम है ।

पाठक इस पाठको बडे ध्यानसे पढें । प्रायः पढने ही यह पाठ समझमें आ जायगा । यदि पढते ही समझमें नहीं आया तो थोडी बार अधिक पढिये । अधिक बार पढनेसे ही सब कठिनाइयाँ स्वयं दूर हो जाती हैं ।

इस पाठके साथ पूर्व स्थलमें आये हुए रामायणके पाठ भी पाठक पढें, तो संस्कृतभाषामें सुगमतासे प्रवेश हो सकता है ।

नारद उवाच—

एक एवास्य दोषो हि गुणानाक्रम्य तिष्ठति ।
स च दोषः प्रयत्नेन न शक्यमतिवर्तितुम् ॥
(म० भा० वन० २९४)

पदानि- नारदः । उवाच । एकः । एव । अस्य । दोषः । हि । गुणान् । आक्रम्य । तिष्ठति । सः । च । दोषः । प्रयत्नेन । न । शक्यं । अतिवर्तितुम् ॥

अन्वयः-नारदः उवाच । अस्य एकः एव दोषः गुणान् आक्रम्य तिष्ठति । च सः दोषः प्रयत्नेन अतिवर्तितुं न शक्यम् ॥

संधि किया हुआ अन्वय- अस्यैक एव दोषो गुणानाक्रम्य तिष्ठति । स च दोषः प्रयत्नेनातिवर्तितुं न शक्यम् ।

अर्थ- नारद बोले- इसका एक ही दोष अनेक गुणोंको व्याप्त कर देता है और वह दोष प्रयत्नसे दूर करना शक्य नहीं है ।

पाठ १५

इस पाठमें महाभारतके कुछ श्लोक देते हैं और अन्वयके साथ अर्थ देते हैं । पाठक इनका अच्छी प्रकार अभ्यास करें—

दुर्योधन उवाच ।

आचार्यः पाण्डुपुत्रान्वै पुत्रवत्परिरक्षति ।
त्वमप्युपेक्षां कुरुषे तेषु नित्यं द्विजोत्तम ॥ ८२ ॥

(म० भा० द्रोण अ० १५९)

पदानि— आचार्यः । पाण्डु-पुत्रान् । वै । पुत्रवत् । परिरक्षति । त्वम् । अपि । उपेक्षाम् । कुरुष । तेषु । नित्यम् । द्विजोत्तम ।

अन्वय— हे द्विजोत्तम ! आचार्यः पाण्डुपुत्रान् वै पुत्रवत् परिरक्षति । त्वं अपि तेषु नित्यं उपेक्षां कुरुषे ॥

अर्थ- हे ब्राह्मण श्रेष्ठ ! आचार्य पण्डुके पुत्रोंका पुत्रवत् रक्षण करता है । और तूभी उनकी नित्य उपेक्षा करता है ॥

मम वा मन्दभाग्यत्वान्मन्दस्ते विक्रमो युधि।
धर्मराजप्रियार्थं वा द्रौपद्या वा न विद्म तत् ॥ ८७ ॥

पदानि- मम। वा। मन्दभाग्यत्वात्। मन्दः। ते। विक्रमः। युधि। धर्मराजप्रियार्थं। वा। द्रौपद्याः। वा। न। विद्म। तत ॥

अन्वयः- मम वा मन्दभाग्यत्वात् युधि ते विक्रमः मन्दः। धर्मराज-प्रियार्थे वा द्रौपद्याः वा प्रियार्थं, न तत् विद्म ॥

अर्थ- मेरे मन्दभाग्यके कारण युद्धमें तेरा पराक्रम कम दीखता है, अथवा धर्मराजके हितके लिये, अथवा द्रौपदीके हितके लिये, यह हम नहीं जानते।

धिगस्तु मम लुब्धस्य यत्कृते सर्वबान्धवाः।
सुखार्हाः परमं दुःखं प्राप्नुवन्त्यपराजिताः ॥ ८८ ॥

पदानि— धिक्। अस्तु। मम। लुब्धस्य। यत्कृते। सर्वबान्धवाः। सुखार्हाः। परमम्। दुःखम्। प्राप्नुवन्ति। अ-पराजिताः ॥

अन्वयः— मम लुब्धस्य धिक् अस्तु। यत्कृते सुखार्हाः अपराजिताः सर्वबान्धवाः परमं दुःखं प्राप्नुवन्ति ॥

अर्थ- मुझ लोभीके लिये धिक्कार है। जिसके लिये सुख भोगनेके योग्य और कभी पराजित न हुए सब बंधुबान्धव परम दुःखको पा रहे हैं।

को हि शस्त्रविदां मुख्यो महेश्वरसमो युधि।
शत्रुं न क्षपयेच्छक्तो यो न स्याद्गौतमीसुतः ॥ ८९ ॥

पदानि— कः। हि। शस्त्रविदाम्। मुख्यः। महेश्वरसमः। युधि। शत्रुम्। न। क्षपयेत्। शक्तः। यः। नः। स्यात्। गौतमीसुतः॥

अन्वयः- कः हि शस्त्रविदां मुख्यः युधि महेश्वरसमः शक्तः शत्रुं न क्षपयेत्। यः गौतमीसुतः न स्यात् ॥

अर्थ- कौन भला शस्त्रधारियोंमें मुख्य, युद्धमें महादेवके समान समर्थ, शत्रुका नाश न करेगा, जो गौतमी पुत्र न होगा।

अश्वत्थामन्प्रसीदस्व नाशयैतान्ममाहितान् ।
तवास्त्रगोचरं शक्ताः स्थातुं देवा न दानवाः ॥ १० ॥

पदानि— अश्वत्थामन् । प्रसीदस्व । नाशय । एतान् । मम । अहितान् । तव । अस्त्र-गोचरं । शक्ताः । स्थातुम् । देवाः । न । दानवाः ॥

अन्वय— हे अश्वत्थामन् ! प्रसीदस्व । एतान् मम अहितान् नाशय । देवाः दानवाः तव शस्त्रगोचरे स्थातुं न शक्ताः ॥

अर्थ— हे अश्वत्थामा ! प्रसन्न हो । इन मेरे शत्रुओंका नाश कर । देव अथवा दानव तेरे बाणोंके सम्मुख ठहर नहीं सकते ।

पञ्चालान्सोमकाँश्चैव जहि द्रौण सहानुगान् ।
वयं शेषान्हनिष्यामस्त्वयैव परिरक्षिताः ॥ ११ ॥

पदानि- पञ्चालान् । सोमकान् । च । एव । जहि । द्रौण । सहानुगान् । वयम् । शेषान् । हनिष्यामः । त्वया । एव । परिरक्षिताः ॥

अन्वयः— हे द्रौण ! सहानुगान् पञ्चालान् सोमकान् एव च जहि । त्वया परिरक्षिताः वयं शेषान् हनिष्यामः ॥

अर्थ- हे द्रोणपुत्र ! अनुयायियोंके समेत पञ्चाल और सोमकोंका नाश कर । तेरे द्वारा रक्षित होकर हम अन्योंका वध करेंगे ।

एते हि सोमका विप्र पञ्चालाश्च यशस्विनः ।
मम सैन्येषु संक्रुद्धा विचरन्ति दवाग्निवत् ॥ १२ ॥

पदानि— एते । हि । सोमकाः । विप्र । पञ्चालाः । च । यशस्विनः । मम । सैन्येषु । संक्रुद्धाः । विचारन्ति दवाग्निवत् ॥

अन्वयः- हे विप्र ! हि एते सोमकाः यशस्विनः पञ्चालाः च संक्रुद्धाः मम सैन्येषु दवाग्निवत् विचरन्ति ॥

अर्थ- हे ब्राह्मण ! क्योंकि ये सोमक और यशस्वी पञ्चाल क्रोधित होकर मेरे सैन्योंमें दावाग्निके समान भ्रमण करते हैं ।

तान्वारय महाबाहो कैकयांश्च नरोत्तम ।
पुरा कुर्वन्ति निःशेषं रक्ष्यमाणाः किरीटिना ॥ ९३ ॥

पदानि— तान् । वारय । महाबाहो । कैकयान् । च । नरोत्तम । पुरा । कुर्वन्ति । निःशेषं । रक्ष्यमाणाः किरीटिना ॥

अन्वयः- हे महाबाहो नरोत्तम ! किरीटिना रक्ष्यमाणाः निःशेषं कुर्वन्ति । पुरा तान् कैकयान् च वारय ॥

अर्थ— हे महाबाहो मनुष्य श्रेष्ठ ! (किरीटिना) अर्जुन द्वारा रक्षित होकर (मेरे सैन्यको) समाप्त करनेसे पहले ही उन कैकयोंका निवारण कर ।

संधि किये हुए वाक्य ।

हे द्विजोत्तम ! आचार्यः पाण्डुपुत्रान्वै पुत्रवत्परिरक्षति । त्वमपि तेषु नित्यमुपेक्षां कुरुषे । मम वा मन्दभाग्यत्वाद्युधि ते विक्रमो- मन्दः । धर्मराजप्रियार्थं वा द्रौपद्या वा प्रियार्थं न तद्वयं विद्मः । मम लुब्धस्य धिगस्तु ।

पाठ १६

अश्वत्थामँस्त्वरायुक्तो याहि शीघ्रमरिन्दम ।
आदौ वा यदि वा पश्चात्तवेदं कर्म मारिष ॥ ९४ ॥

पदानि— अश्वत्थामन् । त्वरायुक्तः । याहि । शीघ्रम् । अरिन्दम । । वा । यदि । वा । पश्चात् । तव । इदम् । कर्म । मारिष ॥

अन्वयः- हे अरिन्दम अश्वत्थामन् ! त्वरायुक्तः याहि हे मारिष ! आदौ वा यदि वा पश्चात् इदं तव कर्म ॥

अर्थ— हे शत्रुनाशक अश्वत्थामा ! त्वरासे युक्त होकर आगे बढ । हे श्रेष्ठ ! पहले अथवा पीछेसे यह तेरा कर्म है ।

त्वमुत्पन्नो महाबाहो पञ्चालानां वधं प्रति ।
करिष्यसि जगत्सर्वमपञ्चालं किलोद्यतः ॥ ९५ ॥

पदानि- त्वम् । उत्पन्नः । महाबाहो । पञ्चालानाम् । वधम् । प्राति । करिष्यसि । जगत् । सर्वम् । अपञ्चालम् । किल । उद्यतः ॥

अन्वयः- हे महाबाहो ! त्वं पञ्चालानां वधं प्रति उत्पन्नः । उद्यतः किल त्वं सर्वं जगत् अपञ्चालं करिष्यसि ॥

अर्थ- हे महाबाहो ! तू पंचालोंके वधके लिये उत्पन्न हुआ है । यदि तू उद्यत हुआ तो सब जगत्को पञ्चाल योद्धाओंसे रहित करेगा ।

एवं सिद्धाऽब्रुवन्वाचो भविष्यति च तत्तथा ।
तस्मात्त्वं पुरुषव्याघ्र पञ्चालाञ्जहि सानुगान् ॥ ९६ ॥

पदानि- एवम् । सिद्धाः । अब्रुवन् । वाचः । भविष्यति । च । तत् । तथा । तस्मात् । त्वम् । पुरुषव्याघ्र । पञ्चालान् । जहि । सानुगान् ॥

अन्वयः- एवं वाचः सिद्धाः अब्रुवन् । तत् च तथा भविष्यति । हे पुरुषव्याघ्र ! तस्मात् त्वं सानुगान् पञ्चालान् जहि ॥

अर्थ- इस प्रकारका भाषण सिद्ध लोगोंने किया था । वह वैसा ही होगा । हे पुरुषश्रेष्ठ ! इसलिये तू अनुयायियोंके सहित पञ्चालोंका नाश कर ॥

न तेऽस्त्रगोचरे शक्ताः स्थातुं देवाः सवासवाः ।
किमु पार्थाः सपञ्चालाः सत्यमेतद्ब्रवीमि ते ॥ ९७ ॥

पदानि- न । ते । अस्त्रगोचरे । शक्ताः । स्थातुम् । देवाः । सवासवाः । किम् । उ । पार्थाः । सपञ्चालाः । सत्यम् । एतत् । ब्रवीमि । ते ॥

अन्वयः- सवासवाः देवाः ते अस्त्रगोचरे स्थातुं न शक्ताः किमु सपञ्चालाः पार्थाः ? एतत्ते सत्यं ब्रवीमि ॥

अर्थ —इन्द्रसहित देव तेरे अस्त्रोंके सम्मुख ठहर नहीं सकते। फिर पाञ्चलोंके समेत पांडव कैसे ठहरेंगे ? यह तुझे सत्य कहता हूं।

न त्वां समर्थाः संग्रामे पाण्डवाः सह सोमकैः।
बलाद्योधयितुं वीर सत्यमेतद् ब्रवीमि ते ॥ ९८ ॥

पदानि— न। त्वाम्। समर्थाः संग्रामे। पाण्डवाः। सह। सोमकैः। बलात्। योधयितुम्। वीर। सत्यम्। एतत्। ब्रवीमि। ते ॥

अन्वयः— हे वीर सोमकैः सह पाण्डवाः संग्रामे त्वां बलात् योधयितुं न समर्थाः एतत् ते सत्यं ब्रवीमि ॥

अर्थ— हे वीर ! सोमकोंसे युक्त पाण्डव संग्राममें तेरे साथ बलसे युद्ध करनेके लिये समर्थ नहीं हैं। यह तुझे मैं सत्य कहता हूं।

गच्छ गच्छ महाबाहो न नः कालात्ययो भवेत्।
इयं हि द्रवते सेना पार्थसायकपीडिता ॥ ९९ ॥

पदानि —गच्छ। गच्छ। महाबाहो। न। नः। कालात्ययः। भवेत्। इयम्। हि। द्रवते। सेना। पार्थसायकपीडिता ॥

अन्वयः— हे महाबाहो ! गच्छ गच्छ। कालात्ययः नः न भवेत् पार्थसायकपीडिता हि इयं सेना द्रवते ॥

अर्थ— हे महाबाहो ! बढ, आगे बढ। हमारे लिये देरी न होवे। क्योंकि अर्जुनके बाणोंसे पीडित हुई यह सेना भाग रही है।

संधि किये हुए वाक्य।

यत्कृते सुखार्हा अपराजिताः सर्वबान्धवाः परमं दुःखं प्राप्नुवन्ति। को हि शस्त्रविदां मुख्यो युधि महेश्वरसमः शक्तः शत्रुं न क्षपयेद्यो गौतमीसुतः न स्यात्। हे अश्वत्थामन् ! प्रसीदस्व।

एतान्ममाहितान्नाशय । देवा दानवा वा तवास्त्रगोचरे स्थातुं न शक्ताः । हे द्रोण ! सहानुगान्पञ्चालान्सोमकाँश्चैव जहि । त्वया परिरक्षिता वयं शत्रून्हनिष्यामः । हे विप्र ! एते हि सोमका यशस्विनः पञ्चालाश्च संक्रुद्धा मम सैन्येषु दावाग्निवद्विचरन्ति । हे महाबाहो नरोत्तम ! किरीटिना रक्ष्यमाणास्ते मम सैन्यं निःशेषं करिष्यन्ति, तत्पूर्वं तान् केकयाँश्च वारय ।

हे अरिन्दम अश्वत्थामन् ! त्वरायुक्तो याहि । आदौ वा यदि वा पश्चादिदं तव कर्म ! हे महाबाहो ! त्वं पञ्चालानां वधं प्रत्युत्पन्नः । त्वमुद्यतः किल सर्वं जगदपञ्चालं करिष्यसि । एवं वाचः सिद्धाः अब्रुवन् । तच्च तथा भविष्यति । हे पुरुषव्याघ्र । तस्मात्त्वं सानुगान्पञ्चालान् जहि । स-वासवा देवास्तेऽस्त्रगोचरे स्थातुं न शक्ताः । किमु सपञ्चालाः पार्थाः ?

समाप्त

संस्कृत-पाठ-माला।

(चोवीस भाग)

[संस्कृत-भाषाका अध्ययन करनेका सुगम उपाय]

संस्कृत-पाठ-मालाके अध्ययनसे लाभ—

१- अपना काम-धन्धा करते हुए फुरसदके समय आप किसी दूसरेकी सहायताके विना इन पुस्तकोंको पढकर अपना संस्कृतका ज्ञान बढा सकते हैं।

२- प्रतिदिन एक घंटा पढनेसे एक वर्षके अन्दर आप रामायण-महाभारत समझनेकी योग्यता प्राप्त कर सकते हैं।

३- पाठशालामें जानेवाले विद्यार्थी भी इन पुस्तकोंसे बडा लाभ प्राप्त कर सकते हैं।

इस पद्धतिकी विशेषता यह है—

भाग १-३ इनमें संस्कृतके साथ साधारण परिचय करा दिया गया है।

भाग ४ इसमें संधिविचार बताया है।

भाग ५-६ इनमें संस्कृतके साथ विशेष परिचय कराया है।

भाग ७-१० इनमें पुल्लिंग, स्त्रीलिंग और नपुंसकलिंगी नामोंके रूप बनानेकी विधि बताई है।

भाग ११ इसमें " सर्वनाम " के रूप बनाये हैं।

भाग १२ इसमें समासोंका विचार किया है।

भाग १३-१८ इनमें क्रियापद-विचारकी पाठविधि बताई है।

भाग १९-२४ इनमें वेदके साथ परिचय कराया है।

प्रत्येक पुस्तकका	मूल्य ॥)	और डा. व्य. =)
२४ पुस्तकोंका	मूल्य १२)	और डा. व्य. १।)

मंत्री— स्वाध्याय मण्डल,

औंध- ' स्वाध्याय मण्डल (पारडी)', पारडी [जि. सूरत]

मुद्रक और प्रकाशक- व. श्री. सातवळेकर, भारत मुद्रणालय, पारडी [जि. सूरत]

५

ॐ

संस्कृत-पाठ-माला।

[संस्कृत भाषाका अध्ययन करनेका सुगम उपाय]

पञ्चम भाग।

लेखक

पं. श्रीपाद दामोदर सातवलेकर

अध्यक्ष- स्वाध्याय-मण्डल, साहित्य-वाचस्पति, गीतालंकार

स्वाध्याय मंडल, पारडी (जि. सूरत)

मूल्य ५० नये पैसे

५

ॐ

संस्कृत-पाठ-माला।

[संस्कृत-भाषाका अध्ययन करनेका सुगम उपाय]

पञ्चम भाग।

लेखक

पं. श्रीपाद दामोदर सातवलेकर

अध्यक्ष- स्वाध्याय-मण्डल, साहित्य-वाचस्पति, गीतालंकार

सप्तम आवृत्ति

संवत् २०१५, शक १८८०, सन १९५९

मूल्य ५० नये पैसे

14286

ध्यान दीजिये ।

इस पुस्तकमें पदच्छेदपूर्वक संस्कृतके पाठ प्रथम दिये हैं और पश्चात् उसीका संधिके साथ सरल संस्कृत दिया है ।

दोनोंकी तुलना करके पाठक यदि अभ्यास करेंगे, तो उनको अतिसुगमतासे संधि विषयका ज्ञान हो सकता है ।

इसमें जो संस्कृत वाक्य दिये हैं, उनका फुरसतके समय वारंवार पाठ करनेसे बहुत ही लाभ हो सकता है ।

इसमें जो श्लोक दिये हैं उनका भी पाठ अनेक बार करनेसे संस्कृत-भाषामें प्रवेश होनेमें सुगमता हो सकती है ।

लेखक
श्रीपाद दामोदर सातवलेकर

मुद्रक और प्रकाशक — वसंत श्रीपाद सातवलेकर, बी. ए.
भारत मुद्रणालय, स्वाध्याय मण्डल,
पोस्ट- 'स्वाध्याय मण्डल (पारडी)'
पारडी [जि. सूरत]

संस्कृत-पाठ-माला।

पञ्चम भाग।

पाठ १

संस्कृत—वाचन—पाठः।

हे अर्जुन! त्वं स्वधर्मं अवेक्ष्य विकंपितुं न अर्हसि। हे पार्थ! त्वं क्षत्रियः असि। तव क्षत्रियस्य धर्मः एव युद्धं कर्तव्यम्। अतः त्वं स्वधर्मं क्षात्रधर्मं च अवेक्ष्य एवं विकंपितुं न योग्यः।

क्षत्रियस्य श्रेयः धर्म्यात् युद्धात् अन्यत् किं अपि न वर्तते। यदा क्षत्रियः धर्म्यं युद्धं करोति तदा एव सः श्रेयः प्राप्नोति। यदि सः एव क्षत्रियः युद्धात् पलायनं करिष्यति, तर्हि सः श्रेयः नैव प्राप्स्यति।

युद्धं स्वर्गस्य द्वारं एव अस्ति। यः क्षत्रियः धर्म्यं युद्धं करोति, स तेन एव द्वारेण स्वर्गं गच्छति। यदि स युद्धे मृतः भवति तर्हि स स्वर्गं गच्छति, यदि न मृतः, विजयं प्राप्तः, तर्हि राज्यं प्राप्नोति।

अतः क्षत्रियः ईदृशं युद्धं सुखेन करोति। तेन स्वर्गं भूमिराज्यं वा प्राप्नोति। परंतु यः भीरुः पुरुषः युद्धं कर्तुं न समर्थः, सः न स्वर्गं प्राप्नोति। न अपि अत्र भूमिराज्यं प्राप्नोति।

❀

हे अर्जुन! यदि त्वं धर्म्यं युद्धं न करिष्यसि तर्हि स्वधर्मं हित्वा, कीर्तिं च हित्वा पापं एव अवाप्स्यसि। यदा क्षत्रियः धर्म्यं अपि युद्धं न एव करोति, तदा सः पापयुक्तः भवति।

प्रभविष्णुः क्षत्रियः सदा युद्धाय सिद्धः भवति। भो शिष्य! किं क्षत्रियः एव युद्धं करोति? न अन्यः कः अपि युद्धं करोति?

क्षत्रियः शस्त्रेण युद्धं करोति तथा ब्राह्मणः अपि शब्देन युद्धं करोति, तत् ब्राह्मणस्य युद्धं वाग्युद्धं इति उच्यते।

वैश्यः अपि वाणिज्ययुद्धं करोति। शूद्रः अपि स्वकर्तव्येन युद्धं करोति एव। सर्वः अपि जनः एवं युद्धं करोति। युद्धेन विना जीवनं अपि न भवति। यः युद्धं न करोति तस्य अकीर्तिः भवति।

संभावितस्य अकीर्तिः मरणात् अपि अतिरिच्यते। यदा क्षत्रियः भयात् रणात् उपरतः भवति, तदा तस्य सर्वत्र अकीर्तिः एव भवति।

यः क्षत्रियः धर्मेण राज्यं रक्षति, राज्यस्य रक्षणार्थं च धर्म्यं युद्धं करोति, स एव क्षत्रियः यशस्वी कीर्तियुक्तः च भवति। न अन्यः।

उदधेः जलं स्नानाय योग्यं भवति। उदधेः जलस्य स्नानेन शरीरस्य आरोग्यं भवति। तेन स्नानेन शरीरस्य रोगः अपि दूरं गच्छति।

एकः रथः भूमिमार्गेण गच्छति सः रथः इति उच्यते। अन्यः रथः जलमार्गेण गच्छति स जलरथः इति उच्यते। तृतीयः रथः आकाशमार्गेण गच्छति स विमानः इति उच्यते।

भूपतिः प्रजापालनेन यशः इच्छति। ब्राह्मणः ज्ञानवर्धनेन श्रेयः वाञ्छति। वैश्यः धनवर्धनेन ऐश्वर्यं कांक्षति। शूद्रः कर्मणा उत्कर्षं प्राप्नोति। सर्वः अपि जनः स्वकर्मणा एव यशस्वी भवति। न तु उद्योगं त्यक्त्वा सिद्धिं कः अपि प्राप्नोति।

ईश्वरः हृदयदेशे तिष्ठति । तं यदि त्वं शरणं गच्छसि तर्हि सः एव त्वां स्वर्गं नेष्यति ।

यथा दिनसमये भानोः प्रकाशः भवति तथा रात्रिसमये सोमस्य प्रकाशः भवति । सूर्यस्य उष्णः प्रकाशः तथा सोमस्य शीतः प्रकाशः अस्ति ।

स्वस्य धर्मः स्वधर्मः । स्वस्य यः धर्मः अस्ति सः एव तस्य स्वधर्मः भवति । ज्ञानार्जनं ब्राह्मणस्य स्वधर्मः । प्रजापालनं क्षत्रियस्य स्वधर्मः । वाणिज्यं गोपालनं च वैश्यस्य स्वधर्मः । शूद्रस्य अपि सेवाकर्म एव स्वधर्मः अस्ति ।

यः स्वधर्मं पालयति सः एव उत्कर्षं प्राप्नोति न अन्यः । तस्य एव सर्वत्र कीर्तिः भवति न अन्यस्य । सः एव उत्तमं यशः प्राप्नोति न अन्यः ।

संधि किये हुए वाक्य ।

हे अर्जुन ! त्वं स्वधर्ममवेक्ष्य विकंपितुं नार्हसि । हे पार्थ ! त्वं क्षत्रियोऽसि । तव क्षत्रियस्य धर्म एव युद्धं कर्तव्यम् । अतस्त्वं स्वधर्मं क्षात्रधर्मं चावेक्ष्यैवं कंपितुं न योग्यः ।

क्षत्रियस्य श्रेयो धर्म्याद्युद्धादन्यत्किमपि न वर्तते । यदा क्षत्रियो धर्म्यं युद्धं करोति तदैव स श्रेयः प्राप्नोति । यदि स एव क्षत्रियो युद्धात्पलायनं करिष्यति तर्हि स श्रेयो नैव प्राप्स्यति ।

युद्धं स्वर्गस्य द्वारमेवास्ति । यः क्षत्रियो धर्म्यं युद्धं करोति स तेनैव द्वारेण स्वर्गं गच्छति । यदि स युद्धे मृतो भवति तर्हि स स्वर्गं गच्छति, यदि न मृतो, विजयं प्राप्तस्तर्हि राज्यं प्राप्नोति ।

पाठ २

इस पाठमें आगे दिये हुए श्लोकोंका अध्ययन कीजिये—

एको दोषोऽस्ति नान्योऽस्य सोऽद्यप्रभृति सत्यवान्।
संवत्सरेण क्षीणायुर्देहन्यासं करिष्यति ॥ २३ ॥

महाभारत वन. २९४

पदानि— एकः। दोषः। अस्ति। न। अन्यः। अस्य। सः। अद्य-प्रभृति। सत्यवान्। संवत्सरेण। क्षीणायुः। देहन्यासं। करिष्यति ॥

अन्वयः— अस्य एकः एव दोषः अस्ति। न अन्यः। सः सत्यवान् अद्य-प्रभृति संवत्सरेण क्षीणायुः देहन्यासं करिष्यति ॥

अर्थ— इसका एक ही दोष है, दूसरा नहीं, वह सत्यवान् आजसे लेकर एक वर्ष पश्चात् क्षीण आयु होकर देहत्याग करेगा।

राजोवाच।

एहि सावित्रि गच्छस्व अन्यं वरय शोभने।
तस्य दोषो महानेको गुणानाक्रम्य च स्थितः ॥ २४ ॥

पदानि— एहि। सावित्रि। गच्छस्व। अन्यं। वरय। शोभने। तस्य। दोषः। महान्। एकः। गुणान्। आक्रम्य। च। स्थितः ॥

अन्वयः— हे सावित्रि! एहि। हे शोभने! गच्छस्व च अन्यं वरय। तस्य एकः महान् दोषः गुणान् आक्रम्य स्थितः ॥

अर्थ— हे सावित्री! इधर आओ। हे शोभने! जाओ और दूसरा वर पसंद करो। इसका एक महान् दोष गुणको व्याप्त करके स्थित है।

यथा मे भगवानाह नारदो देवसत्कृतः।
संवत्सरेण सोऽल्पायुर्देहन्यासं करिष्यति ॥ २५ ॥

पदानि— यथा। मे। भगवान्। आह। नारदः। देव-सत्कृतः। संवत्सरेण। सः। अल्पायुः। देहन्यासं। करिष्यति ॥

अन्वयः— यथा देव-सत्कृतः भगवान् नारदः मे आह । सः संवत्सरेण अल्पायुः देहन्यासं करिष्यति ॥

अर्थ— देवताओंसे सत्कारित भगवान नारदने मुझे कहा, कि वह एक वर्षके पश्चात् अल्पायु (होकर) देहत्याग करेगा ।

सावित्र्युवाच ।

सकृदंशो निपतति सकृत्कन्या प्रदीयते ।
सकृदाह ददानीति त्रीण्येतानि सकृत्सकृत् ॥ २६ ॥

पदानि— सावित्री उवाच । सकृत् । अंशः । निपतति । सकृत् । कन्या । प्रदीयते । सकृत् । आह । ददानि । इति । त्रीणि । एतानि । सकृत् । सकृत् ॥

अन्वयः— सावित्री उवाच- अंशः सकृत् निपतति । कन्या सकृत् प्रदीयते । ददानि इति सकृत् आह । इति एतानि त्रीणि सकृत् सकृत् (भवन्ति) ॥

अर्थ— सावित्री बोली (पैतृक धनका) भाग एक वार ही मिलता है, लडकी एक वार ही दी जाती है, देता हूँ, ऐसा एक वार ही कहा जाता है । ये तीनों एक समयमें एक ही बार होतीं है ।

दीर्घायुरथवाल्पायुः सगुणो निर्गुणोऽपि वा ।
सकृद् वृतो मया भर्ता न द्वितीयं वृणोम्यहम् ॥ २७ ॥

पदानि— दीर्घायुः । अथवा । अल्पायुः । सगुणः । निर्गुणः । अपि । वा । सकृत् । वृतः । मया । भर्ता । न । द्वितीयं । वृणोमि । अहम् ॥

अन्वयः— दीर्घायुः अथवा अल्पायुः, सगुणः अपि वा निर्गुणः, मया भर्ता सकृत् वृतः । अहं द्वितीयं न वृणोमि ॥

अर्थ— दीर्घायु हो अथवा अल्पायु, सद्‌गुणी हो अथवा गुणहीन हो, मैं एक वार पति पसंद कर ली है पुनः मैं पसंद नहीं करती ।

मनसा निश्चयं कृत्वा ततो वाचाऽभिधीयते ।
क्रियते कर्मणा पश्चात्प्रमाणं मे मनस्ततः ॥ १८ ॥

पदानि— मनसा । निश्चयं । कृत्वा । ततः । वाचा । अभिधीयते । क्रियते । कर्मणा । पश्चात् । प्रमाणं । मे । मनः । ततः ॥

अन्वयः— मनसा निश्चयं कृत्वा, ततः वाचा अभिधीयते । पश्चात् कर्मणा क्रियते । ततः मे मनः प्रमाणम् ॥

अर्थ— मनमें निश्चय करनेके बाद (वह) वाणी द्वारा कहा जाता है, बादमें कर्म किये जाते हैं । इसलिये मेरा मन (मुझको) प्रमाण है (अर्थात् मैंने जो की है वही मुझे पसंद है) ।

नारद उवाच ।

स्थिरा बुद्धिर्नरश्रेष्ठ सावित्र्या दुहितुस्तव ।
नैषा वारयितुं शक्या धर्मादस्मात्कथंचन ॥ १९ ॥

पदानि— नारदः । उवाच । स्थिरा । बुद्धिः । नरश्रेष्ठ । सावित्र्याः । दुहितुः । तव । न । एषा । वारयितुं । शक्या । धर्मात् । अस्मात् । कथंचन ॥

अन्वयः— नारदः उवाच– हे नरश्रेष्ठ ! तव दुहितुः सावित्र्याः बुद्धिः स्थिरा । अस्मात् धर्मात् एषा वारयितुं कथंचन न शक्या ॥

अर्थ— नारद बोले– हे राजन् ! तुम्हारी लडकी सावित्रीकी बुद्धि स्थिर है । इसलिये इसके धर्मसे इसे निवारण करना शक्य नहीं है ।

नान्यस्मिन्पुरुषे संति ये सत्यवति वै गुणाः ।
प्रदानमेव तस्मान्मे रोचते दुहितुस्तव ॥ ३० ॥

पदानि— न । अन्यस्मिन् । पुरुषे । सन्ति । ये । सत्यवति । वै । गुणाः । प्रदानं । एव । तस्मात् । मे । रोचते । दुहितुः । तव ॥

अन्वयः— ये सत्यवति गुणाः सन्ति ते अन्यस्मिन् पुरुषे न वै । तस्मात् तव दुहितुः प्रदानं एव मे रोचते ॥

अर्थ— जो सत्यवानमें गुण है वह दूसरे पुरुषमें नहीं ही है। इसलिये तेरी लडकी जो कर रही है वह मुझे पसंद है।

राजोवाच।

अविचाल्यमेतदुक्तं तथ्यं च भवता वचः।
करिष्याम्येतदेवं च गुरुर्हि भगवान्मम॥ ३१॥

पदानि— राजा। उवाच। अविचाल्यं। एतत्। उक्तं। तथ्यं। च। भवता। वचः। करिष्यामि। एतत्। एवं। च। गुरुः। हि। भगवान्। मम॥

अन्वयः— राजा उवाच। भवता एतत् वचः अविचाल्यं तथ्यं च उक्तम्। एतत् एवं च करिष्यामि। हि भगवान् मम गुरुः॥

अर्थ— राजा बोला- आपका यह वचन निश्चय ही सत्य है। ऐसा ही मैं करूंगा क्योंकि आप मेरे गुरु हैं।

नारद उवाच।

अविघ्नमस्तु सावित्र्याः प्रदाने दुहितुस्तव।
साधयिष्याम्यहं तावत्सर्वेषां भद्रमस्तु वः॥ ३१॥

पदानि— नारदः। उवाच। अविघ्नं। अस्तु। सावित्र्याः। प्रदाने। दुहितुः। तव। साधयिष्यामि। अहं। तावत्। सर्वेषां। भद्रं। अस्तु। वः॥

अन्वयः— नारदः उवाच- तव दुहितुः सावित्र्याः प्रदाने अविघ्नं अस्तु। वः सर्वेषां भद्रं अस्तु। अहं तावत् साधयिष्यामि॥

अर्थ— नारद बोला- तुम्हारी लडकी सावित्रीका विवाह निर्विघ्न हो जाय और तुम सबका कल्याण होवे। मैं अब जाता हूँ।

मार्कंडेय उवाच।

एवमुक्त्वा समुत्पत्य नारदस्त्रिदिवं गतः।
राजाऽपि दुहितुः सज्जं वैवाहिकमकारयत्॥ ३३॥

म. भा. वन. अ. २९४

पदानि— मार्कंडेय। उवाच। एवं। उक्त्वा। समुत्पत्य। नारदः। त्रिदिवं। गतः। राजा। अपि। दुहितुः। सज्जं। वैवाहिकं। अकारयत्॥

अन्वयः— मार्कंडेय उवाच– नारदः एवं उक्त्वा, समुत्पत्य, त्रिदिवं गतः। राजा अपि दुहितुः वैवाहिकं सज्जं अकारयत्।

अर्थ— मार्कंडेय बोला– नारद ऐसा कहनेके बाद उठकर स्वर्गको गया। और राजाने भी अपनी लडकीकी शादीकी तैयारी की।

सूचना

पाठक ये श्लोक पहलेके अनुसार पढें और उत्तम अभ्यास करें।

पाठ ३

इस पाठमें निम्नलिखित श्लोक पढिये—

> यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
> स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥ भ. गीता. ३।२१

पदानि— यत्। यत्। आचरति। श्रेष्ठः। तत्। तत्। एव। इतरः। जनः। सः। यत्। प्रमाणं। कुरुते। लोकः। तत्। अनुवर्तते॥

अन्वयः— श्रेष्ठः यत् यत् आचरति, तत् तत् इतरः जनः। सः यत् प्रमाणं कुरुते, लोकः तत् अनुवर्तते॥

अर्थ— श्रेष्ठ मनुष्य जैसा जैसा आचरण करता है वैसा वैसा इतर मनुष्य [करता है,] वह जो जो प्रमाण (कुरुते) करता अर्थात् मानता है, लोक वैसा ही अनुकरण करते हैं।

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः ॥ भ. गीता ६।५

पदानि— उद्धरेत् । आत्मना । आत्मानं । न । आत्मानं । अवसादयेत् । आत्मा । एव । हि । आत्मनः । बंधुः । आत्मा । एव । रिपुः । आत्मनः ॥

अन्वयः— आत्मना आत्मानं उद्धरेत् । आत्मानं न अवसादयेत् । आत्मा एव हि आत्मनः बंधुः आत्मा एव आत्मनः रिपुः ॥

अर्थ— (आत्मना) आप (आत्मानं) अपना उद्धार करें । अपनेको न गिरावे । क्योंकि आप ही अपना बंधु और आप ही अपना (रिपुः) शत्रु हैं ।

असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥ भ. गीता ६।५

पदानि— अ+संशयं । महा+बाहो । मनः । दुर्निग्रहं । चलम् । अभ्यासेन । तु । कौन्तेय । वैराग्येण । च । गृह्यते ॥

अन्वयः— हे महाबाहो ! मनः असंशयं दुर्निग्रहं चलम् । हे कौन्तेय ! अभ्यासेन वैराग्येण च गृह्यते ॥

अर्थ— हे (महाबाहो) बडे बाहुवाले वीर ! मन निःसंदेह (दुः+निग्रहं) निग्रह करनेके लिये कठिन और (चलं) चंचल है । हे (कौन्तेय) कुंतीके पुत्र ! इसका (अभ्यासेन) प्रयत्न और वैराग्यसे (गृह्यते) निग्रह किया जाता है ।

कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान्समाहर्तुमिह प्रवृत्तः ।
ऋतेऽपि त्वां न भविष्यन्ति सर्वे येऽवस्थिताः प्रत्यनीकेषु वीराः ॥
भ. गीता ११।३२

पदानि— कालः । अस्मि । लोक+क्षय+कृत् । प्र+वृद्धः । लोकान् । * सं-आहर्तुं । इह । प्रवृत्तः । ऋते । अपि । त्वां । न । भविष्यन्ति । सर्वे । ये । अवस्थिताः । प्रत्यनीकेषु । वीराः ॥

अन्वयः— लोकक्षयकृत् प्रवृद्धः कालः अस्मि । इह लोकान् समाहर्तुं प्रवृत्तः । त्वां ऋते अपि सर्वे न भविष्यन्ति । ये वीराः प्रत्यनीकेषु अवस्थिताः ॥

अर्थ— मैं लोगोंका क्षय करनेवाला (प्रवृत्तः) बढा हुआ (अस्मि) हूं । (इह) यहां लोकोंका (समाहर्तुं) संहार करनेके लिये प्रवृत्त [हुआ हूं !] (त्वां ऋते) तेरे विना भी ये सब नहीं रहेंगे, (ये) जो वीर (प्रत्यनीकेषु) शत्रुओंकी सेनाओंमें (अवस्थिताः) खडे रहे हैं ।

तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुंक्ष्व राज्यं समृद्धम् ।
मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ॥ ३३ ॥

भ. गीता ११।३३

पदानि— तस्मात् । त्वं । उत्तिष्ठ । यशः । लभस्व । जित्वा । शत्रून् । भुंक्ष्व । राज्यं । समृद्धं । मया । एव । एते । निहताः । पूर्वं । एव । निमित्त+मात्रं । भव । सव्य+साचिन् ॥

अन्वयः— हे सव्यसाचिन् ! तस्मात् त्वं उत्तिष्ठ, यशः लभस्व, शत्रून् जित्वा समृद्धं राज्यं भुंक्ष्व । एते मया पूर्वं एव निहताः । त्वं निमित्तमात्रं भव ॥

अर्थ— हे (सव्यसाचिन्) अर्जुन ! इसलिये तू उठ, यश (लभस्व) लाभ कर, शत्रुओंको जीत करके समृद्ध राज्यका (भुंक्ष्व) उपभोग कर । (एते) ये मैंने पहिले ही (निहताः) मारे हैं । तू निमित्तके लिये (भव) हो ।

भावार्थ— हे अर्जुन ! इसलिये तू उठ और यश प्राप्त कर, शत्रुको जीतो और राज्य प्राप्त करके उसका उपभोग कर । मैं इन सब शत्रुओंको मार डाला हूं, तुम केवल निमित्तमात्र होकर खडा रहो अर्थात् तुम्हें जय मिलेगा और यश बढेगा ।

इस पाठमें जो श्लोक दिये हैं उनका अभ्यास करनेके पश्चात् प्रत्येक श्लोकके पद, अन्वय और अर्थ मनसे ही कीजिये । और जो अशुद्धि प्रतीत होगी उसे ठीक कीजिये । कागजपर लिखनेकी आवश्यकता नहीं है । श्लोक

देखकर यह कार्य मनसे भी किया जा सकता है, और जो अभ्यास इस प्रकार होगा वही विशेष उपयोगी होगा। यदि आप इस रीतिसे अभ्यास करेंगे तो आपकी प्रगति संस्कृतमें निःसंदेह शीघ्र ही होगी।

संधि किये हुए वाक्य।

अतः क्षत्रियः ईदृशं युद्धं सुखेन करोति। तेन स्वर्गं भूमिराज्यं वा प्राप्नोति। परंतु यो भीरुः पुरुषो युद्धं कर्तुं न समर्थः सः न स्वर्गं प्राप्नोति। नाप्यत्र भूमिराज्यं प्राप्नोति।

हे अर्जुन! यदि त्वं धर्म्यं युद्धं न करिष्यसि, तर्हि स्वधर्मं हित्वा, कीर्तिं च हित्वा पापमेवावाप्स्यसि। यदा क्षत्रियो धर्म्य-मपि युद्धं नैव करोति, तदा स पापयुक्तो भवति।

प्रभविष्णुः क्षत्रियः सदा युद्धाय सिद्धो भवति। भो शिष्य! किं क्षत्रिय एव युद्धं करोति?

पाठ ४

संस्कृत–वाचन–पाठः।

श्रेष्ठः उत्तमः मनुष्यः यत् यत् आचरति तत् तत् एव इतरः जनः आचरति। यत् यत् एव नृपः आचरति तत् तत् एव प्रजाजनः आचरति। विद्वान् आचरति तथा एव साधारणः जनः आचरति। यथा त्वं आचरसि तथा एव अहं आचरामि। यथा अहं आचरा-मि तथा त्वं न आचरसि।

सः श्रेष्ठः उत्तमः पुरुषः यत् यत् प्रमाणं कुरुते तत् तत् एव लोकः अनुवर्तते। यत् यत् भूपतिः प्रमाणं कुरुते तत् तत् एव प्रजाजनः अनुवर्तते। विद्वान् यत् यत् प्रमाणं कुरुते साधारणः जनः तत् तत् एव अनुवर्तते।

आत्मना आत्मानं उद्धरेत् सदा आत्मानं एव आत्मना उद्धरेत् कदा अपि आत्मना आत्मानं न अवसादयेत्। मनुष्येन सदा तथा प्रयत्नः कर्तव्यः येन तस्य उद्धारः भविष्यति।

आत्मा एव आत्मनः बंधुः भवति तथा आत्मनः शत्रुः अपि आत्मा एव भवति। यः स्वकर्तव्यं करोति सः एव आत्मनः बंधुः तथा यः स्वकर्तव्यं न करोति स एव आत्मनः शत्रुः भवति।

हे मनुष्य! मनः दुर्निग्रहं चलं च अस्ति इति असंशयं सत्यं एव अस्ति। परंतु तस्य निग्रहः अभ्यासेन वैराग्येण च भवति न अन्येन केन अपि कर्मणा भवति।

अहं लोकस्य क्षयकृत् कालः अस्मि। लोकान् समाहर्तुं इह अस्मिन् युद्धे प्रवृत्तः अस्मि। युद्धे सर्वस्य लोकस्य क्षयं कर्तुं इच्छामि। ये वीराः अस्मिन् युद्धे अत्र अवस्थिताः ते सर्वे त्वां ऋते अपि न भविष्यन्ति एव।

यः वीरः इदानीं युद्धे अवस्थितः स विजयं प्राप्स्यति। यः धीरः पुरुषः युद्धं करोति सः अवश्यं विजयं प्राप्नोति।

तस्मात् त्वं उत्तिष्ठ। हे वीर! इदानीं त्वं युद्धाय उत्तिष्ठ, यशः च लभस्व। शत्रून् जित्वा समृद्धं राज्यं भुंक्ष्व।

एते वीरा मया एव पूर्वं निहताः। अतः त्वं निमित्तमात्रं भव। क्षत्रस्य धर्मस्य तत्त्वं धर्म्यं युद्धं कर्तव्यं इति एव अस्ति। अतः धर्म्यात् युद्धात् पलायनं क्षत्रियाय न योग्यं भवति।

तस्य क्षत्रियस्य किं नगरं अस्ति? सः वीरक्षत्रियः वीरपुरे नगरे निवसति। तस्मात् नगरात् सः इदानीं एव अत्र आगतः। सः किमर्थं अत्र आगतः? स कदा अस्मात् नगरात् स्वनगरं गमिष्यति इति त्वं जानासि किम्?

आदौ वीरेण इंद्रियाणि संयम्य शत्रुणा सह अवश्यं युद्धं कर्तव्यम्। यः वीरः निर्मलः निश्चलः निर्विकारः नित्यपूतः निस्पृहः निर्मोहः सः एव प्रशंसनीयः। स एव युद्धे विजयं प्राप्नोति।

सूचना

यदि पाठक ये वाक्य सुगमतासे समझ जायगे तो ठीक ही है। परन्तु यदि ये वाक्य उनके समझमें न आये, तो उनको पूर्वभाग अर्थात् चतुर्थ पुस्तक पुनः देखनी चाहिये।

पाठक स्वयं अनुभव करेंगे ही कि जो पढनेवाले इस पद्धतिसे नियमपूर्वक अभ्यास कर रहे हैं उनकी उन्नति कितनी हो रही है। अल्पपरिश्रमसे उनको संस्कृतका कितना अधिक ज्ञान हो रहा है। अब पाठक बहुतसे वाक्य बोल सकते हैं, बहुतसे वाक्य लिख सकते हैं तथा सुगम श्लोक भी समझ सकते हैं।

पाठकोंको एक सूचना करनी चाहिये। वह यह है कि वे पहिला पाठ कच्चा रखकर आगे बढनेका प्रयत्न न करें, देर लगी तो भी पर्वाह नहीं है, परन्तु पहिले पाठ पक्के करके ही आगे बढनेका यत्न करें।

पाठ ५

दुष्यन्तस्तु ततो राजा पुत्रं शाकुंतलं तदा।
भरतं नामतः कृत्वा यौवराज्येऽभ्यषेचयत् ॥

महाभारत आदि. ६४।१२९

पदानि— दुष्यन्तः। तु। ततो। राजा। पुत्रं। शाकुन्तलं। तदा। भरतं। नामतः। कृत्वा। यौवराज्ये। अभ्यषेचयत् ॥

अन्वयः— ततः दुष्यन्तः राजा तु तदा शाकुन्तलं पुत्रं नामतः भरतं कृत्वा यौवराज्ये अभ्यषेचयत् ॥

अर्थ— पश्चात् दुष्यन्त राजाने तो तब (शाकुन्तलं) शकुंतलाके पुत्रको भरतके नामसे यौवराज्यमें अभिषेक किया।

तस्य तत्प्रथितं चक्रं प्रावर्तत महात्मनः।
भास्वरं दिव्यमामितं लोकसंनादनं महत् ॥ १३० ॥

पदानि— तस्य । तत् । प्रथितं । चक्रं । प्रावर्तत । महात्मनः । भास्वरं । दिव्यं । अमितं । लोकसंनादनं । महत् ॥

अन्वयः— तस्य महात्मनः महत् लोकसंनादनं अजितं दिव्यं भास्वरं प्रथितं चक्रं प्रावर्तत ॥

अर्थ— उस महात्माका बडा लोकोंमें प्रख्यात अजेय दिव्य तेजस्वी प्रख्यात चक्र प्रवर्तित हुआ।

स विजित्य महीपालांश्चकार वशवर्तिनः ।
चचार च सतां धर्मं प्राप चानुत्तमं यशः ॥ १३१ ॥

पदानि— स । विजित्य । महीपालान् । चकार । वशवर्तिनः । चचार । च । सताम् । धर्मं । प्राप । च । अनुत्तमं । यशः ॥

अन्वयः— स महीपालान् विजित्य, वशवर्तिनः चकार । सतां धर्मं च चकार । अनुत्तमं यशः च प्राप ॥

अर्थ— उसने महीपालोंको जीतकर, वशमें (चकार) कर लिया सज्जनोंके धर्मका आचरण किया और (अनुत्तमं) अत्यंत उत्तम यश (प्राप) प्राप्त किया।

स राजा चक्रवर्त्यासीत्सार्वभौमः प्रतापवान् ।
ईजे च बहुभिर्यज्ञैर्यथा शक्रो मरुत्पतिः ॥ १३२ ॥

पदानि— सः । राजा । चक्रवर्ती । आसीत् । सार्वभौमः । प्रतापवान् । ईजे । च । बहुभिः । यज्ञैः । यथा । शक्रः । मरुत्+पतिः ॥

अन्वयः— सः राजा प्रतापवान् सार्वभौमः चक्रवर्ती आसीत् । यथा मरुत्पतिः शक्रः (तथा सः) बहुभिः यज्ञैः ईजे ॥

अर्थ— वह राजा प्रतापी सार्वभौम और चक्रवर्ती था। जैसा मरुतोंका राजा (शक्र) इन्द्र उस प्रकार बहुत यज्ञोंसे (ईजे) यज्ञ करता रहा।

याजयामास तं कण्वो विधिवद्भूरिदक्षिणम् ।
श्रीमान्गोविततं नाम वाजिमेधमवाप सः ॥ १३३ ॥

पदानि— याजयामास । तं । कण्वः । विधिवत् । भूरिदक्षिणम् । श्रीमान् । गोविततं । नाम । वाजिमेधम् । अवाप । सः ॥

अन्वयः— तं कण्वः विधिवत् याजयामास । भूरि+दक्षिणं गोविततं नाम वाजिमेधं सः श्रीमान् अवाप ॥

अर्थ— उनसे कण्वने विधियुक्त यज्ञ कराया । बहुत दक्षिणावाले गोवितत नामक अश्वमेधको उस श्रीमानने (अवाप) प्राप्त किया अर्थात् यज्ञ किया ।

यस्मिन्सहस्रं पद्मानां कण्वाय भरतो ददौ ।
भरताद्भारती कीर्तिर्येनेदं भारतं कुलम् ॥ १३४ ॥

पदानि— यस्मिन् । सहस्रं । पद्मानां । कण्वाय । भरतः । ददौ । भरतात् । भारती । कीर्तिः । येनेदं । भारतं । कुलम् ॥

अन्वयः— यस्मिन् भरतः पद्मानां सहस्रं कण्वाय ददौ । भरतात् भारती कीर्तिः, येन इदं भारतं कुलम् ॥

अर्थ— जिसमें भरतने सहस्र पद्म कण्वको दान दिये । भरतसे भारत-की कीर्ति हुई, जिससे यह भारत कुल हुआ ।

अपरे ये च पूर्वे वै भारता इति विश्रुताः ।
भरतस्यान्ववायेहि देवकल्पा महौजसः ॥ १३५ ॥

पदानि— अपरे । ये । च । पूर्वे । वै । भारताः । इति । विश्रुताः । भरतस्य । अन्ववाये । हि । देवकल्पा । महौजसः ॥

अन्वयः— भरतस्य अन्ववाये हि महौजसः देवकल्पाः अपरे ये च पूर्वे वै भारताः इति विश्रुताः ॥

अर्थ— भरतके (अन्ववाये) गोत्रमें ही महातेजस्वी देवोंके समान पहिले और पूर्वके सब भारत (इति) इस नामसे (विश्रुताः) प्रसिद्ध हुए हैं ।

बभूवुर्ब्रह्मकल्पाश्च बहवो राजसत्तमाः ।
येषामपरिमेयानि नामधेयानि सर्वशः ॥ १३६ ॥

पदानि— बभूवुः । ब्रह्मकल्पाः । च । बहवः । राजसत्तमाः । येषाम् । अपरिमेयानि । नामधेयानि । सर्वशः ॥

अन्वयः— बहवः राजसत्तमाः ब्रह्मकल्पाः बभूवुः येषां सर्वशः नामधेयानि अपरिमेयानि ॥

अर्थ— बहुत राजश्रेष्ठ पुरुष (ब्रह्मकल्पाः) ब्राह्मण जैसे (बभूवुः) हुए जिनके सर्वोंके नाम अपरिमित हैं ।

ततः स नृपशार्दूल पुरूं राज्येऽभिषिच्य च ।
तपः सुचरितं कृत्वा भृगुतुंगे महातपाः ॥ ५७ ॥

पदानि— ततः । स । नृपशार्दूल । पुरूं । राज्ये । अभिषिच्य । च । तपः । सुचरितं । कृत्वा । भृगुतुंगे । महातपाः ॥

अन्वयः— हे नृपशार्दूल ! ततः पुरूं राज्ये अभिषिच्य सः महातपाः भृगुतुंगे सुचरितं तपः कृत्वा ॥

अर्थ— हे नृपश्रेष्ठ ! पश्चात् पुरुको राज्यपर अभिषेक कर उस महातपस्वीने भृगुतुंग पर्वतपर उत्तम तप करके—

कालेन महता पश्चात्कालधर्ममुपेयिवान् ।
कारयित्वा त्वनशनं सदारः स्वर्गमाप्तवान् ॥ ५० ॥

पदानि— कालेन । महता । पश्चात् । कालधर्मम् । उपेयिवान् । कारयित्वा । तु । अनशनं । सदारः । स्वर्गं । आप्तवान् ॥

अन्वयः— पश्चात् महता कालेन कालधर्मं उपेयिवान् । स-दारः तु अनशनं कारयित्वा स्वर्गं आप्तवान् ॥

अर्थ— पश्चात् बडे समयके नंतर (कालधर्मं) मृत्युको (उपेयिवान्) प्राप्त हुआ । (स-दारः) स्त्रीसहित (अनशनं) उपवासका व्रत करके स्वर्गको (आप्तवान्) प्राप्त हुआ ।

पाठ समाप्तिके पश्चात् पाठक श्लोकोंको वारंवार पढें। स्मरण रखें कि श्लोकोंको वारंवार पढनेसे ही पाठकोंका प्रवेश संस्कृतमें अतिशीघ्र होगा। इसलिये इस विषयमें असावधानी होने न दें।

संधि किये हुए वाक्य।

श्रेष्ठ उत्तमो मनुष्यो यद्यदाचरति तत्तदेवेतरो जन आचरति। यद्यन्नृप आचरति तत्तदेव प्रजाजन आचरति। यथा विद्वानाचरति तथैव साधारणो जन आचरति। यथा त्वमाचरसि तथा एवाह-माचरामि। यथाऽहमाचरामि तथा त्वं नाचरसि।

पाठ ६

अब इस पाठमें पूर्ववत् पूर्वपाठोंके संस्कृत-वाक्योंके सन्धि बनाकर सरल संस्कृत लिखा जाता है। पाठक इसका अभ्यास वैसा ही करें।

संस्कृत-वाचन-पाठः।

रामं रजोमेघेन सा ताटिका राक्षसी मुहूर्तं व्यमोहयत्। परंतु पश्चात्तां ताटिकां रामः शरेणोरसि विव्याध। तेन सा पपात ममार च।

ततस्ताटिकावधेन तुष्टो मुनिवरो विश्वामित्रो राममुवाच।

हे राजपुत्र! सर्वथा परितुष्टोऽस्मि तेऽनेन शौर्येण। अतस्ते सर्वाण्यप्यस्त्राणि प्रीत्या प्रयच्छामि।

तैरस्त्रैः समन्वितो युद्धे शत्रूञ्जेष्यसि। इत्युक्त्वा स विप्रो रामाय तानि सर्वाण्येवास्त्राणि न्यवेदयत्।

ततः स विश्वामित्रो रामं लक्ष्मणं च गृहीत्वा स्वकीयं सिद्धा-श्रमं प्राविशत्।

❀

तत्र मुहूर्तं विश्रान्तौ रामलक्ष्मणौ मुनिश्रेष्ठो यज्ञदीक्षां प्रविश-त्विति तमनुबबन्धतुः । तच्छ्रुत्वा सर्वेऽपि मुनयो रामलक्ष्मणौ प्रशशंसुः ।

अद्यप्रभृति षड्रात्रं रक्षतां युवामिति चोचुः । तावपि यत्तौ षडहोरात्रं तपोवनमरक्षताम् ।

षष्ठयां रात्रौ मायां कुर्वाणौ राक्षसावभ्यधावताम् । परमक्रुद्धो रामो मारीचस्य राक्षस्योरसि मानवमस्त्रं चिक्षेप ।

तेनास्त्रेण मारीचः सागरे क्षिप्तः । मारीचं सागरं क्षिप्तं दृष्ट्वा सुबाहोरुरस्याग्नेयमस्त्रं चिक्षेप ।

सोऽपि सुबाहुरस्त्रेण विद्धो भुवि प्रापतत् । रामोऽपि वायव्या-स्त्रेण शेषान् राक्षसाञ्जघान ।

एवं निर्विघ्नतया समाप्ते यज्ञे विश्वामित्रो दिशो राक्षसहीना दृष्ट्वा राममब्रवीत् ।

कृतार्थोऽस्मि महाबाहो !

मिथिलोपवने तु तत्र निर्जनमाश्रमपदं दृष्ट्वा राघवः पप्रच्छ, कस्यायमाश्रमः ?

विश्वामित्र उवाच -- अत्र पुराऽहल्यासहितो गौतमस्तप आति-ष्ठत् । एष गौतमस्य महर्षे रम्य आश्रम इति ।

पाठक इसका अभ्यास करें । इसमें कोई कठिनता हुई तो पूर्वपाठके वाक्य (भाग ४ में) देखकर उसकी निवृत्ति करें ।

अब पूर्वपाठके श्लोकोंका सरल संस्कृत नीचे दिया जाता है उसका भी उत्तम अभ्यास कीजिये —

ततो दुष्यन्तो राजा तु तदा शाकुन्तलं पुत्रं नामतो भरतं कृत्वा यौवराज्येऽभ्यषेचयत् ।

तस्य महात्मनो महल्लोकसंनादनमजितं दिव्यं भास्वरं प्रथितं चक्रं प्रावर्तत ।

स महीपालान्विजित्य वशवर्तिनश्चकार। सतां धर्मं च चचार। अनुत्तमं यशश्च प्राप।

स राजा प्रतापवान्सार्वभौमश्चक्रवर्ती आसीत्। यथा मरुत्पतिः शक्रस्तथा स बहुभिर्यज्ञैरीजे।

तं कण्वो विधिवद्याजयामास। भूरिदक्षिणं गोविततं नाम वाजिमेधं स श्रीमानवाप। यस्मिन्भरतः पद्मानां सहस्रं कण्वाय ददौ। भरताद्भारती कीर्तिर्येनेदं भारतं कुलम्।

भरतस्यान्ववाये हि महौजसो देवकल्पा अपरे ये च पूर्वे वै भारता इति विश्रुताः। बहवो राजसत्तमा ब्रह्मकल्पा बभूवुः। येषां सर्वशो नामधेयानि अपरिमेयानि।

हे नृपशार्दूल ! ततः पूरुं राज्येऽभिषिच्य स महातपाः भृगुतुंगे सुचरितं तपः कृत्वा, पश्चान्महताकालेन कालधर्ममुपेयिवान्। सदारस्त्वनशनं कारयित्वा स्वर्गमाप्तवान्।

प्रश्नाः।

१ ताटिका रामं कथं व्यमोहयत् ?
२ पश्चाद्रामेण किं कृतम् ?
३ ताटिकावधेन कः तुष्टः ?
४ तुष्टेन विश्वामित्रेण रामाय किं दत्तम् ?
५ सिद्धाश्रमं गत्वा रामेण किं कृतम् ?
६ रामेण केन अस्त्रेण मारीचः हतः ?
७ रामः शेषान् राक्षसान् केन अस्त्रेण जघान ?
८ पश्चात् कस्याः आश्रमं रामः गतः ?

पाठक इन प्रश्नोंका उत्तर संस्कृतमें ही देनेका यत्न करें। पूर्व पाठ यदि ठीक हुआ होगा तो इन प्रश्नोंका उत्तर देना पाठकोंको कठिन नहीं प्रतीत होगा। इससे पाठकोंकी परीक्षा भी हो जायगी।

संधि किये हुए वाक्य।

एते वीरा मयैव पूर्वं निहताः। अतस्त्वं निमित्तमात्रं भव। क्षत्रस्य धर्मस्य तत्त्वं धर्म्यं युद्धं कर्तव्यमित्येवास्ति। अतो धर्म्याद्युद्धात्पलायनं क्षत्रियाय न योग्यं भवति! तस्य क्षत्रियस्य किं नगरमस्ति? स वीरः क्षत्रियो वीरपुरे निवसति। तस्मान्नगरात्स इदानीमेवात्रागतः। स किमर्थमत्रागतः?

पाठ ७

संस्कृत—वाक्यानि।

१ अत्र पुरा अहल्यासहितः महात्मा गौतमः ऋषिः तपः अतप्यत्। २ मुनिवेषधरः इन्द्रः गौतमस्य आश्रमं एकदा आजगाम। ३ तव संगं इच्छामि इति सः अहल्यां अब्रवीत्। ४ तस्मिन्काले गौतमः महामुनिः स्वकीयं आश्रमं प्रविवेश। ५ तदा इन्द्रः विषण्णवदनः च अभवत्। ६ तं तथा दृष्ट्वा मुनिः इन्द्रं शशाप। ७ भार्यां अपि ततो गौतमः शप्तवान्। ८ यदा रामः एतद्वनं आगमिष्यति तदा पूता भविष्यसि। ९ हे राम! इमं आश्रमं देवरूपिणीं अहल्यां च अधुना तारय। १० इति एवं विश्वामित्रस्य ऋषेः वचनं श्रुत्वा सलक्ष्मणः रामः आश्रमं प्रविवेश। ११ तत्र तपस्विनीं दीप्तां अहल्यां रामः ददर्श। १२ रामस्य दर्शनेन सा अहल्या पूता भूत्वा पूर्ववत् रूपसंपन्ना बभूव। १३ रामस्य दर्शनात् एव शापस्य अन्तं गता सा अहल्या। १४ गौतमवचनं स्मरन्ती सा अहल्या रामलक्ष्मणयोः पाद्यं अर्घ्यं आतिथ्यं च चकार। १५ रामलक्ष्मणौ अपि तपोबलविशुद्धायाः तस्याः अहल्यायाः पादौ जगृहतुः। १६ गौतमः अपि

तदा तत्र आगत्य रामं विधिवत् संपूज्य पूर्ववत् तपः तेपे। १७ ततः रामः लक्ष्मणेन सह विश्वामित्रं पुरस्कृत्य उत्तरां दिशं प्रस्थितः। १८ मिथिलापतिः राजा जनकः तु तत् श्रुत्वा विनयेन सहसा प्रत्युज्जगाम। १९ तेन जनकेन दत्तं पूजार्घं प्रतिगृह्य विश्वामित्रः राज्ञः कुशलं यज्ञस्य च निर्विघ्नतां पप्रच्छ। २० तत्सर्वं निवेद्य राजा अपि कृताञ्जलिः मुनिं पप्रच्छ कौ इमौ वीरौ पुत्रौ इति। २१ विश्वामित्रः अपि सर्वं पूर्वं वृत्तान्तं न्यवेदयत्। २२ ततः जनकः उवाच। धन्यः अनुगृहीतः च अस्मि।

भाषा-वाक्य।

१ यहां पूर्वकालमें अहल्याके सहित महात्मा गौतम ऋषि तप तपता रहा। २ मुनिवेष धारण कर इन्द्र गौतमके आश्रमको एक समय आगया। ३ तेरे संगकी इच्छा करता हूं ऐसा वह अहल्यासे बोला। ४ उसी कालमें गौतम महामुनिने अपने आश्रममें प्रवेश किया। ५ तब इन्द्र खिन्नवदन हुआ। ६ उसको वैसा देखकर मुनिने इन्द्रको शाप दिया। ७ स्त्रीको भी पश्चात् गौतमने शाप दिया। ८ जब राम इस वनको आयेगा तब तू पवित्र होगी। ९ हे राम! इस आश्रमका तथा देवरूपिणी अहल्याका अब तारण कर। १० ऐसा यह विश्वामित्र ऋषिका वचन सुनकर लक्ष्मणसहित रामने आश्रममें प्रवेश किया। ११ वहां तपस्विनी तेजस्वी अहल्याको रामने देखा। १२ रामचन्द्रके दर्शनसे वह अहल्या पवित्र होकर पूर्ववत् स्वरूपसे युक्त हो गई। १३ रामके दर्शनसे ही शापके अन्तको प्राप्त हुई वह अहल्या। १४ गौतम-मुनिका वचन स्मरण करती हुई वह अहल्या राम और लक्ष्मण-को (पाद्यं) पांव धोनेके लिये जल (अर्घ्यं) पूजासाहित्य और (आतिथ्यं) आतिथिसत्कार करने लगी। १५ राम और लक्ष्मणने भी तपके बलसे शुद्ध हुए उस अहल्याके पांव पकड लिये। १६ गौतम भी तब वहां आकर रामकी विधिवत् पूजा कर तप करने लगा। १७ तब राम लक्ष्मणके साथ विश्वामित्रको आगे रखकर उत्तर दिशाको चला। १८ मिथिला देशका पालक

राजा जनक वह श्रवण कर विनयसे तत्क्षणमें ही (प्रत्युजगाम) सन्मुख गया। १९ उस जनकने दिये पूजासाहित्यका स्वीकार कर विश्वामित्रने राजाका कुशल और यज्ञकी निर्विघ्नता पूछी। २० वह सब निवेदन कर राजा भी (कृत-अञ्जलिः) हाथ जोडकर मुनिसे पूछने लगा कि कौन ये वीर पुत्र हैं? २१ विश्वामित्रने सब पूर्व वृत्तान्त निवेदन किया। २२ तब जनक बोला कि मैं धन्य और अनुगृहीत हूं।

पाठक ये वाक्य वारंवार पढकर अच्छी प्रकार तैयार करें और अभ्यास ऐसा करें कि इस पाठमें कोई कठिनता न रहे। सावधानीके साथ अच्छा अभ्यास करें। कमसे कम यह पाठ बीस वार पढें।

संधि किये हुए वाक्य।

तेन जनकेन दत्तं पूजार्घ्यं प्रतिगृह्य विश्वामित्रो राज्ञः कुशलं यज्ञस्य च निर्विघ्नतां पप्रच्छ। तत्सर्वं निवेद्य राजापि कृताञ्जलि-र्मुनिं पप्रच्छ काविमौ वीरौ पुत्राविति। विश्वामित्रोऽपि सर्वं पूर्वं वृत्तान्तं न्यवेदयत्। ततो जनक उवाच- धन्योऽनुगृहीत-श्चास्मि।

प्रश्नाः।

१ गौतमः कुत्र तपः अतप्यत्?
२ तत्र आगत्य इन्द्रः किं अब्रवीत्?
३ गौतमः तं दृष्ट्वा किं कृतवान्?
४ अहल्या कदा पूता भविष्यति?
५ विश्वामित्रस्य वचनं श्रुत्वा रामेण किं कृतम्?
६ रामः अहल्यां कथं दृष्टवान्?
७ रामलक्ष्मणौ तत्र किं कृतवन्तौ?
८ जनकः कस्य देशस्य अधिपतिः आसीत्?

पाठ ८

(महाभारत आदि० १४९)

विदुरस्य सुहृत्कश्चित्खनकः कुशलो नरः।
विविक्ते पाण्डवान्राजन्निदं वचमब्रवीत् ॥ १ ॥

पदानि— विदुरस्य। सुहृत्। कश्चित्। खनकः। कुशलः। नरः। विविक्ते। पाण्डवान्। राजन्। इदं। वचनं। अब्रवीत् ॥

अन्वयः— हे राजन्! कश्चित् नरः विदुरस्य सुहृत कुशलः खनकः विविक्ते पाण्डवान् इदं वचनं अब्रवीत् ॥

अर्थ— हे राजा! कोई एक मनुष्य विदुरका (सुहृत्) मित्र कुशल (खनकः) सुरंग खोदनेवाला (विविक्ते) एकान्तमें पाण्डवोंको यह वचन बोला ;

प्रहितो विदुरेणास्मि खनकः कुशलो ह्यहम्।
पाण्डवानां प्रियं कार्यमिति किं करवाणि वः। २ ॥

पदानि— प्रहितः। विदुरेण। अस्मि। खनकः। कुशलः। हि। अहम्। पाण्डवानां। प्रियं। कार्यम्। इति। किम्। करवाणि। वः ॥

अन्वयः— अहं कुशलः खनकः विदुरेण प्रहितः अस्मि। वः पाण्डवानां किं प्रियं कार्यं करवाणि इति ॥

अर्थ— मैं कुशल मिट्टी खोदनेवाला विदुरसे भेजा हुआ हूं। (वः) आप पांडवोंका कौनसा प्रिय कार्य करूं ?

प्रच्छन्नं विदुरेणोक्तः श्रेयस्त्वमिह पाण्डवान्।
प्रतिपाद्य विश्वासादिति किं करवाणि वः ॥ ३ ॥

पदानि— प्रच्छन्नं। विदुरेण। उक्तः। श्रेयः। त्वम्। इह। पाण्डवान्। प्रतिपाद्य। विश्वासात्। इति। किम्। करवाणि। वः ॥

अन्वयः— विदुरेण विश्वासात् प्रच्छन्नं उक्तः इह त्वं पाण्डवान् श्रेयः प्रतिपादय इति । वः किं करवाणि ?

अर्थ— विदुरने विश्वासके कारण (प्रच्छन्नं) गुप्तभावसे कहा कि, वहां तू पांडवोंका हित (प्रतिपादय) कर, सो आपका क्या कार्य (करवाणि) करूं ?

कृष्णपक्षे चतुर्दश्यां रात्रावस्यां पुरोचनः।
भवनस्य तव द्वारि प्रदास्यति हुताशनम् ॥ ४ ॥

पदानि— कृष्णपक्षे । चतुर्दश्यां । रात्रौ । अस्यां । पुरोचनः । भवनस्य । तव । द्वारि । प्रदास्यति । हुताशनम् ॥

अन्वयः—कृष्णपक्षे अस्यां चतुर्दश्यां रात्रौ पुरोचनः तव भवनस्य द्वारि हुताशनं प्रदास्यति ॥

अर्थ— कृष्णपक्षमें इस चतुर्दशी रात्रीमें पुरोचन तेरे गृहके द्वारमें (हुताशनं) अग्नि देगा अर्थात् घर जला देगा ।

मात्रा सह प्रदग्धव्याः पांडवाः पुरुषर्षभाः ।
इति व्यवसितं तस्य धार्तराष्ट्रस्य दुर्मतेः ॥ ५ ॥

पदानि— मात्रा । सह । प्रदग्धव्याः । पांडवाः । पुरुषर्षभाः । इति । व्यवसितं । तस्य । धार्तराष्ट्रस्य । दुर्मतेः ॥

अन्वयः— पुरुषर्षभाः पांडवाः मात्रा सह प्रदग्धव्याः इति तस्य दुर्मतेः धार्तराष्ट्रस्य व्यवसितम् ॥

अर्थ— (पुरुष- ऋषभाः) पुरुषश्रेष्ठ पांडव (मात्रा) माताके साथ (प्र-दग्धव्याः) जलाये जांय यह इस दुष्टबुद्धि (धार्तराष्ट्रस्य) धृतराष्ट्र-पुत्रका (व्यवसितं) निश्चित किया हुआ है ।

किञ्चिच्च विदुरेणोक्तो म्लेच्छवाचासि पांडव ।
त्वया च तत्तथेत्युक्तमेतद्विश्वासकारणम् ॥ ६ ॥

पदानि— किञ्चित् । च । विदुरेण । उक्तः । म्लेच्छवाचा । असि । पांडव । त्वया । च । तत् । तथा । इति । उक्तम् । एतद् । विश्वास-कारणम् ॥

अन्वयः— हे पांडव ! म्लेच्छवाचा विदुरेण किंचित् च उक्तः असि । तत् त्वया च तथा इति उक्तं एतत् विश्वासकारणम् ॥

अर्थ— हे पांडव ! (म्लेच्छवाचा) म्लेच्छ भाषाद्वारा विदुरने तुझे (उक्तः) कहा हुआ है । वह तूने भी (तथा) ठीक है ऐसा कहा (एतत्) यह विश्वासका हेतु है । [अर्थात् इतना कहनेसे तेरा विश्वास मुझपर हो]

उवाच तं सत्यधृतिः कुंतीपुत्रो युधिष्ठिरः ।
अभिजानामि सौम्य त्वां सुहृदं विदुरस्य वै ॥ ७ ॥

पदानि— उवाच । तं । सत्यधृतिः । कुंतीपुत्रः । युधिष्ठिरः । अभिजानामि । सौम्य । त्वां । सुहृदं । विदुरस्य । वै ॥

अन्वयः— सत्यधृतिः कुंतीपुत्रः युधिष्ठिरः तं उवाच । हे सौम्य ! त्वां विदुरस्य सुहृदं अभिजानामि ॥

अर्थ— (सत्यधृतिः) धैर्यवाला कुंतीपुत्र युधिष्ठिर उससे बोला । हे (सौम्य) प्रिय ! तुझे विदुरका मित्र जानता हूं ।

शुचिं प्राप्तं प्रियं चैव सदा च दृढभक्तिकम् ।
न विद्यते कवेः किञ्चिदविज्ञातं प्रयोजनम् ॥ ८ ॥

पदानि— शुचिम् । प्राप्तम् । प्रियम् । च । एव । सदा । च । दृढभक्तिकम् । न । विद्यते । कवेः । किञ्चित् । अविज्ञातम् । प्रयोजनम् ॥

अन्वयः— शुचिं प्रियं सदा दृढभक्तिकं प्राप्तं [त्वां अभिजानामि] कवेः अविज्ञातं किञ्चित् प्रयोजनं न विद्यते ॥

अर्थ— शुद्ध प्रिय सदा दृढभक्ति धरनेवाला तू प्राप्त हुआ ऐसा मैं जानता हूं। (कवेः) प्राज्ञ विदुरको अज्ञात कोई कार्य नहीं है। [अर्थात् तुम जैसा करोगे वह उसको संमत होगा।]

इस पाठके श्लोकोंमें आये हुए संधियोंका विवरण—

१ कुशलो नरः = कुशलः नर।

२ राजन्निदं = राजन् इदं।

३ प्रहितो विदुरेणास्मि = प्रहितः विदुरेण अस्मि।

४ कुशलो ह्यहं = कुशलः हि अहम्।

५ विदुरेणोक्तः = विदुरेण उक्तः।

६ श्रेयस्त्वम् = श्रेयः त्वम्।

७ विश्वासादिति = विश्वासात् इति।

८ किञ्चिच्च = किञ्चित् च।

९ तत्तथेत्युक्तमेतद्विश्वासकारणं = तत् तथा इति उक्तं एतत् विश्वास-कारणम्।

पाठक इन संधियोंको पूर्व श्लोकोंमें देखें और जान लें कि ये संधि कैसे बने हैं।

संधि किये हुए वाक्य।

अत्र पुराऽहल्यासहितो महात्मा गौतम ऋषिस्तपोऽतप्यत्। मुनिवेषधर इन्द्रो गौतमस्याश्रममेकदाजगाम। तत्र संगमिच्छामीति सोऽहल्यामब्रवीत्। तस्मिन्काले गौतमो महामुनिस्स्वकीयमाश्रमं प्रविवेश। तन्देद्रो विषण्णवदनश्चाभवत्। तं तथा दृष्ट्वा मुनिरिन्द्रं शशाप। भार्यामपि तथा गौतमः शप्तवान्। यदा राम एतद्वनमागमिष्यति तदा पूता भविष्यसि। हे राम! इममाश्रमं देवरूपिणीमहल्याञ्चाधुना तारय।

पाठ ९

यदि आपने पूर्व दो पाठोंका अध्ययन ठीक प्रकार किया है तो निम्न-लिखित वाक्य आपकी समझमें आ जायगे।

संस्कृत—वाचन—पाठः।

अत्र पुराऽहल्यासहितो महात्मा गौतमऋषिस्तपोऽतप्यत। मुनिवेषधर इंद्रो गौतमस्याऽऽश्रममेकदाऽऽजगाम। तव संगमिच्छामीति स अहल्यामब्रवीत्। तस्मिन्काले गौतमो महामुनिः स्वकीयमाश्रमं प्रविवेश।

तदेन्द्रो विषण्णवदनश्चाभवत्। तथा तं दृष्ट्वा मुनिरिन्द्रं शशाप। ततो गौतमो भार्यामपि शप्तवान्। यदा राम एतद्वनमागमिष्यति तदा पूता भविष्यसि।

हे राम! इममाश्रमं देवरूपिणीमहल्यां चाधुना तारय। इत्येवं विश्वामित्रस्यर्षेर्वचनं श्रुत्वा सलक्ष्मणो राम आश्रमं प्रविवेश। तत्र तपस्विनीं दीप्तामहल्यां रामो ददर्श। रामस्य दर्शनेन साऽहल्या पूता भूत्वा पूर्ववद्रूपसंपन्ना बभूव। रामस्य दर्शनादेव शापस्यान्तं गता साऽहल्या।

गौतमवचनं स्मरन्ती साऽहल्या रामलक्ष्मणयोः पाद्यमर्घ्यमातिथ्यं च चकार।

रामलक्ष्मणावपि तपोबलविशुद्धायास्तस्या अहल्यायाः पादौ अगृह्णतुः।

गौतमोऽपि तदा तत्रागत्य रामं विधिवत् संपूज्य पूर्ववत्तपस्तेपे।

ततो रामो लक्ष्मणेन सह विश्वामित्रं पुरस्कृत्य उत्तरां दिशं प्रस्थितः।

मिथिलापती राजा जनकस्तु तच्छ्रुत्वा विनयेन सहसा प्रत्युज्जगाम। तेन जनकेन दत्तं पूजार्घं प्रतिगृह्य विश्वामित्रो राज्ञः कुशलं यज्ञस्य च निर्विघ्नतां पप्रच्छ।

तत्सर्वं निवेद्य राजाऽपि कृताञ्जलिर्मुनिं पप्रच्छ। काविमौ वीरपुत्राविति? विश्वामित्रोऽपि सर्वं पूर्ववृत्तान्तं न्यवेदयत्। ततो जनक उवाच– 'धन्योऽनुगृहीतश्चास्मि'।

पाठक इस सरल संस्कृतको पढें। यदि पूर्व पाठ ठीक हो चुके हैं तो यह पाठ विना परिश्रम समझमें आ जायगा। परंतु यदि किसी स्थानपर कुछ कठिनता प्रतीत हुई तो इसी पुस्तकका पाठ ४ देखें, उसमें इसीके वाक्य पदच्छेदपूर्वक दिये हैं। अब निम्न वाक्य पढिये—

कश्चिन्नरो विदुरस्य सुहृत्कुशलः खनको विविक्ते पांडवानिदं वचनमब्रवीत्। अहं कुशलः खनको विदुरेण प्रहितोऽस्मि। वः पांडवानां किं प्रियं कार्यं करवाणीति?

विदुरेण विश्वासात्प्रच्छन्नमुक्तः। इह त्वं पांडवानां श्रेयः प्रतिपादयेति। अधुना वः किं करवाणि? कृष्णपक्षे अस्यां चतुर्दश्यां रात्रौ पुरोचनस्तव भवनस्य द्वारि हुताशनं प्रदास्यति। पुरुषर्षभाः पांडवा मात्रा सह प्रदग्धव्या इति तस्य दुर्मतेर्धार्तराष्ट्रस्य व्यवसितम्।

हे पाण्डव! विदुरेण म्लेच्छवाचा किंचिच्च उक्तोऽसि। तत्त्वया च तथेत्युक्तमेतद्विश्वासकारणम्।

सत्यधृतिः कुंतीपुत्रो युधिष्ठिरस्तमुवाच। हे सौम्य! त्वां विदुरस्य सुहृदमभिजानामि। तथा शुचिं प्रियं सदा दृढभक्तिकं प्राप्तं त्वामभिजानामि। कवेरविज्ञातं किञ्चित्प्रयोजनं न विद्यते।

यदि पूर्व पाठ ठीक हुआ है तो यह पाठ पाठकोंकी समझमें आ सकता है। यदि किसी स्थानपर संदेह हुआ तो इसी पुस्तकका पाठ ८ देखें।

यदि पाठक यह पाठ वारंवार पढ़ेंगे तो केवल वारंवार पढनेसेही संधिस्थान खोलने और उनका अर्थ जाननेकी विधि पाठकोंके मनमें स्वयं उपस्थित हो सकती है। एक एक पाठ वारंवार पढना ही एक अतिसुगम उपाय है।

अब इस पाठमें आये हुए कुछ संधि खोलकर बताते हैं—

१ पुराऽहल्या = पुरा अहल्या।
२ गौतम ऋषिः = गौतमः ऋषिः।
३ तपोऽतप्यत् = तपः अतप्यत्।
४ इन्द्रो गौतमस्याश्रममेकदाजगाम = इंद्रः गौतमस्य आश्रमं एकदा आजगाम।
५ तदेन्द्रो विषण्णवदनश्चाभवत् = तदा इन्द्रः विषण्णवदनः च अभवत्।
६ एतद्वनं = एतत् वनं।
७ चाधुना = च अधुना।
८ विश्वामित्रस्यर्षेः = विश्वामित्रस्य ऋषेः।
९ रामलक्ष्मणावपि = रामलक्ष्मणौ अपि।
१० कश्चिन्नरः = कः चित् नरः।
११ प्रहितोऽस्मि = प्रहितः अस्मि।
१२ कवेरविज्ञातं = कवेः अविज्ञातं।

इसीप्रकार अन्यान्य संधियोंके विषयमें पाठक विचार करके तथा पूर्व-पाठ देखके समझनेका यत्न करें। ध्यानसे देखनेसे इसमें कोई कठिनता नहीं रहेगी।

पाठ १०

अकारान्त नपुंसकलिंग शब्दोंके रूप निम्नलिखित तयार होते हैं—

१ मित्रं	= मित्र	४ मित्राय	= मित्रके लिये
(हे) मित्र !	= (हे) मित्र	५ मित्रात्	= मित्रसे
२ मित्रं	= मित्रको	६ मित्रस्य	= मित्रका
३ मित्रेण	= मित्रसे	७ मित्रे	= मित्रमें

केवल प्रथमाका रूप पुल्लिंगसे भिन्न है। अन्य रूप अकारान्त पुल्लिंग शब्दोंके समान ही हैं, यह बात यहां ध्यानमें धरने योग्य है। इसी प्रकार निम्नलिखित अकारान्त नपुंसकलिंगी शब्दोंके रूप होते हैं—

पापं	= पाप	औषधं	= दवा
दर्शनं	= दर्शन	तोयं	= जल
कार्पण्यं	= कंजूसी	कुसुमं	= फूल
कार्यं	= कर्तव्य	अब्जं	= कमल
दुःखं	= कष्ट	चक्रं	= चाक
व्रतं	= व्रत, नियम	रूपं	= सुंदरता, स्वरूप
दानं	= दान	लावण्यं	= सुंदरता
अंतःपुरं	= अंदरका कमरा	नेत्रं	= आंख
हृदयं	= हृदय	सूत्रं	= धागा

संस्कृत-वाक्यानि ।

१ पापी मनुष्यः पापात् कथं मुक्तः भवति ? २ तव दर्शनाय अहं अद्य अत्र आगतः। ३ दानसमये कार्पण्यं मा कुरु। ४ रुग्णाय औषधं देहि। ५ तृषिताय तोयं देहि। ६ उद्यानात् कुसुमं स आनयति। ७ जले अब्जं भवति। ८ मनुष्यः दुःखं न वांछति। ९ अहं व्रतं चरिष्यामि। १० सत्यं एव परमं व्रतं अस्ति। ११ ज्ञानस्य दानं धनस्य दानात् श्रेष्ठं। १२ गृहस्य मध्ये, अन्तःपुरं भवति।

१३ अन्तःपुरे गृहपत्नी वसति । १४ दुष्टस्य मुखे अमृतं हृदये च विषं भवति । १५ पश्य, रथस्य चक्रं कथं भ्रमति । १६ बालकस्य रमणीयं रूपं अहं पश्यामि। १७ सः पुरुषः रूपेण बलेन लावण्येन च अतीव सुन्दरः अस्ति। १८ तस्य नेत्रं इदानीं रुग्णं जातम् । १९ तत् श्वेतं सूत्रं अत्र आनय ।

भाषा-वाक्य ।

१ पापी मनुष्य पापसे कैसे मुक्त होता है ? २ तेरे दर्शनके लिये मैं आज यहां आगया । ३ दानके समय कंजूसी मत कर । ४ रोगीको औषध दो । ५ प्यासेके लिए जल दो । ६ बागसे फूल वह लाता है ७ जलमें कमल होता है । ८ मनुष्य दुःख नहीं चाहता है । ९ मैं व्रत करूंगा । १० सत्य ही श्रेष्ठ व्रत है । ११ ज्ञानका दान धनके दानसे श्रेष्ठ है । १२ घरके मध्यमें अन्तःपुर होता है । १३ अन्तःपुरमें घरकी स्वामिनी स्त्री रहती है। १४ दुष्टके मुखमें अमृत और हृदयमें विष होता है । १५ देख रथका चक्र कैसा घूमता है ! १६ बालकका रमणीय रूप मैं देखता हूं । १७ वह पुरुष रूप, बल और लावण्यसे अत्यंत सुन्दर है । १८ उसका नेत्र अब रोगी हुआ । १९ वह सफेद धागा यहां ला ।

संस्कृत-वाक्यानि ।

कविः सूत्रेण यज्ञोपवीतं करोति । यथा स नेत्रेण रूपं पश्यति तथा कर्णेन शब्दं शृणोति । तस्य स्वरूपं पश्य । यंत्रस्य चक्रं इदानीं न भ्रमति । सः यंत्रस्य चक्रं कदा भ्रामयिष्यति ? हृदयं शुद्धं कुरु । तव पापं मा अस्तु । यथा अंतःपुरे पुत्री भ्रमति तथा गृहात् बहिः पुत्रः भ्रमति । दानेन पुण्यं भवति वा न ? यदि दानेन पुण्यं भवति तर्हि त्वं दानं किं न करोषि ?

पाठक ये वाक्य पढें तथा स्वयं अपने मनसे उक्त शब्दोंके प्रयोग करके वाक्य बनावें । और यदि हो सके कोई स्थानोंमें संधि भी बनानेका यत्न करें ।

पाठ ११

संस्कृत--वाक्यानि ।

१ जनकः उवाच— हे मुनिपुंगव ! अत्र अस्ति धनुष्यं शंकरस्य। २ क्षेत्रं कृषतः मे लांगलात् उत्थिता एका सुता च अस्ति। ३ क्षेत्रं शोधयता लब्धा अतः सा सीता इति नाम्ना विश्रुता। ४ सा इदानीं स्वयंवरयोग्या संजाता। ५ वर्धमानां तां सीतां सर्वे राजानः अत्र आगत्य वरयितुं इच्छन्ति। ६ वरयितुं इच्छतां अपि तेषां कन्यां न ददामि वीर्यशुल्का इति। ७ सर्वे नृपतयः वीर्यं जिज्ञासवः अत्र उपागच्छन्। ८ तेषां पुरस्तात् मया शैवं धनुः उपाहृतम्। तस्य ग्रहणे तोलने अपि वा ते नृपाः न शेकुः। १० तत् एतत् परमभास्वरं धनुः रामलक्ष्मणयोः च अपि दर्शयिष्यामि। ११ रामः यदि अस्य आरोपणं कुर्यात् अहं सीतां तस्मै दद्याम्। १२ ततः जनकेन समादिष्टाः सचिवाः प्रयासेन धनुः तत्र आनयामासुः। १३ महर्षेः वचनात् तत्र धनुः दृष्ट्वा रामः अब्रवीत्। १४ इदं दिव्यं धनुः पाणिना संस्पृशामि। तस्य तोलने पूरणे अपि यत्नवान् च भविष्यामि। १५ एवं उक्त्वा रामः धनुः मध्ये जग्राह। लीलया पूरयामास च। १६ यदा रामेण मौर्वी आरोपिता तदा तत् धनुः बभञ्ज च। १७ तदा राजा जनकः प्रांजलिः विश्वामित्रं उवाच। १८ अत्यद्भुतं इदं। अचिन्त्यं अतर्कितं च मया। १९ मे सुता सीता रामं भर्तारं प्राप्य कीर्तिं आहरिष्यति। २० मे मंत्रिणः शीघ्रं अयोध्यां गच्छन्तु। राजानं दशरथं च अत्र आनयन्तु। २१ एवं समादिष्टाः दूताः त्रिरात्रेण अयोध्यां प्राविशन्। २२ वृद्धं दशरथं राजानं जनकस्य कृते कुशलं च पप्रच्छुः। २३ तव पुत्रेण रामेण सीता निर्जिता। २४ अतः जनकः राजा विवाहमंगलाय भवन्तं सपुरोहितं निमंत्रयति।

भाषा–वाक्य ।

१ जनक बोला– कि हे मुनि (पुंगव) श्रेष्ठ ! यहां है शांकरका धनुष्य। २ खेतकी (कृषतः) कृषि करनेवाले मेरे हलसे उत्पन्न हुई एक पुत्री और है। ३ खेतका शोधन करनेवालेने (लब्धा) प्राप्त की इसलिए वह सीता इस नामसे (विश्रुता) प्रसिद्ध है। ४ वह अब स्वयंवरके लिये योग्य हो गई है। ५ बढनेवाली उस सीताको सब राजा लोग यहां आकर वरना चाहते हैं। ६ वरनेकी इच्छा करनेवाले उन (राजाओं) को भी कन्या मैं नहीं देता हूं। (क्योंकि) यह (वीर्य-शुल्का) वीर्यके बलसे लेने योग्य है। ७ सब राजालोग वीर्यकी जिज्ञासा करके यहां आगये। ८ उनके सन्मुख मैंने शिवजीका धनुष्य लाया। ९ उसके पकडने और तोलनेमें भी वे राजा नहीं समर्थ हुए। १० वह यह परम तेजस्वी धनुष्य रामलक्ष्मणोंको भी दिखाऊंगा। ११ राम यदि इसको (आरोपणं) डोरी चढायेगा तो मैं सीता उसको दूंगा। १२ तब जनकने आदेश दिये हुए मंत्रियोंने प्रयाससे धनुष्यको वहां लाया। १३ महर्षिके वचनसे वह धनुष्य देखकर राम बोला। १४ इस दिव्य धनुषको (पाणिना) हाथसे स्पर्श करता हूं। उसको तोलने और पूर्ण करनेमें भी यत्नवान् होऊंगा। १५ ऐसा बोलकर रामने धनुष्यको बीचमें पकडा और लीलासे पूर्ण किया। १६ जब रामने (मौर्वी) डोरी चढाई तब वह धनुष (बभञ्ज) टूट गया। १७ तब राजा जनक हाथ जोडकर विश्वामित्रसे बोला। १८ अति अद्भुत यह है। अचिंत्य और मेरेसे अतर्कित है। १९ मेरी लडकी सीता रामको पति प्राप्त कर कीर्ति कमायेगी। २० मेरे मंत्री शीघ्र अयोध्याको जांय और राजा दशरथको यहां ले आंय। २१ इस प्रकार आदिष्ट हुए दूत तीन रात्रीके बाद अयोध्यामें प्रविष्ट हुए। २२ वृद्ध दशरथ राजाको जनकके लिये कुशल पूछने लगे। २३ तेरे पुत्र रामने सीताको जीत लिया है। २४ इसलिए जनक राजा विवाहमंगलके लिये (भवन्तं) आपको पुरोहितोंके साथ निमंत्रण देते हैं।

पाठक इस पाठको खूब तैयार करें। और अनेक बार पढें।

संधि किये हुए वाक्य ।

१ अत्रास्ति धनुष्यं शंकरस्य । शंकरस्य धनुष्यमत्रास्ति । धनुष्यमस्त्यत्र शंकरस्य । अस्त्यत्र धनुष्यं शंकरस्य ।

२ क्षेत्रं कृषतो मे लांगलादुत्थितैका सुता चास्ति । मे क्षेत्रं कृषतो लांगलादुत्थितैका चास्ति सुता । सुता चास्त्येका लांगलादुत्थिता मे क्षेत्रं कृषतः ।

३ क्षेत्रं शोधयता लब्धाऽतः सा सीतेति नाम्ना विश्रुता । लब्धा क्षेत्रं शोधयताऽतः सीतेति नाम्ना विश्रुता ।

४ सेदानीं स्वयंवरयोग्या संजाता । संजातेदानीं सा स्वयंवरयोग्या । सा स्वयंवरयोग्या संजातेदानीम् ।

पाठ १२

श्लोकोंके पाठोंमें पहिले पद देकर अन्वय दिया जाता था परंतु इस पाठसे ही पद देना बंद किया है । पाठकोंको पदके विषयमें संदेह हुआ तो वे अन्वयमें पदोंको देख सकते हैं । पाठक स्वयं अन्वयको देखकर श्लोकके पद लिखनेका अभ्यास करें । इससे उनका अभ्यास बहुत ही बढ जायगा ।

यथा तस्य तथा नस्त्वं निर्विशेषा वयं त्वयि ।
भवतश्च यथा तस्य पालयास्मान्यथा कविः ॥ १ ॥

(म. भारत आदि. १४९)

अन्वयः— यथा तस्य त्वं । तथा नः त्वं । वयं त्वयि निर्विशेषाः । यथा तस्य तथा भवतः । यथा कविः तथा अस्मान् पालय ॥

अर्थ— जैसा उस विदुरके लिये तू है (तथा) वैसा (नः) हमारे लिये तू है । (वयं) हम (त्वयि) तेरे अन्दर (निर्विशेषाः) विशेषतारहित हैं

[अर्थात् कुछ अन्य भाव नहीं रखते] जैसा उस विदुरके विषयमें वैसे ही (भवतः) आपके विषयमें [हमारे मनमें भाव है] जिस प्रकार (कविः) विदुर उसी प्रकार तुम भी (अस्मान्) हमारी (पालय) रक्षा करो ।

इदं शरणमाग्नेयं मदर्थमिति मे मतिः ।
पुरोचनेन विहितं धार्तराष्ट्रस्य शासनात् ॥ १० ॥

अन्वयः— इदं आग्नेयं शरणं धार्तराष्ट्रस्य शासनात् पुरोचनेन मदर्थं विहितं इति मे मतिः ॥

अर्थ— यह (आग्नेयं) अग्निसे जलने योग्य (शरणं) घर धृतराष्ट्र पुत्रकी (शासनात्) आज्ञासे पुरोचनने (मदर्थं विहितं) मेरे लिये निर्माण किया है ऐसा मेरा मत है ।

स पापः कोशवांश्चैव ससहायश्च दुर्मतिः ।
अस्मानपि च पापात्मा नित्यकालं प्रबाधते ॥ ११ ॥

अन्वयः— स दुर्मतिः पापः कोशवान् च ससहायः एव पापात्मा अस्मान् अपि नित्यकालं प्रबाधते ॥

अर्थ— वह दुष्टबुद्धि पापी (कोश–वान्) खजानेसे युक्त अर्थात् धनवान, (स–सहायः) सहायी जनोंसे युक्त पापात्मा (अस्मान्) हमको (अपि) ही सदा सर्वदा बाधा करता है ।

स भवान्मोक्षयत्वस्मान्यत्नेनास्माद्धुताशनात् ।
अस्मास्विह हि दग्धेषु सकामः स्यात्सुयोधनः ॥ १२ ॥

अन्वयः— सः भवान् अस्मात् हुताशनात् यत्नेन अस्मान् मोक्षयतु । हि अस्मासु इह दग्धेषु सुयोधनः सकामः स्यात् ।

अर्थ— वह (भवान्) आप (अस्मात्) इस अग्निसे यत्नके साथ हमको (मोक्षयतु) छुडाइये । क्योंकि यहां (अस्मासु दग्धेषु) हम जल जानेपर (सुयोधनः) दुर्योधन (स–कामः) सफल इच्छावाला हो जायगा ।

इदं तदशुभं नूनं तस्य कर्म चिकीर्षितम् ।
प्रागेव विदुरो वेद तेनास्मानन्वबोधयत् ॥ १४ ॥

अन्वयः— तस्य इदं चिकीर्षितं कर्म नूनं अशुभं । विदुरः प्राक् एव वेद । तेन अस्मान् अन्वबोधयत् ॥

अर्थ— उसका यह (चिकीर्षितं) संकल्पित कर्म (नूनं) निःसंदेह अशुभ है । विदुर (प्राक्) पहिलेसे ही (वेद) जानता है । (तेन) इस कारण (अस्मान्) हमको (अन्वबोधयत्) सावधान किया ।

सेयमापदनुप्राप्ता क्षत्ता यां दृष्टवान्पुरा ।
पुरोचनस्याविदितानस्माँस्त्वं प्रतिमोचय ॥ १५ ॥

अन्वयः— सा इयं आपत् अनुप्राप्ता । यां क्षत्ता पुरा दृष्टवान् । त्वं पुरोचनस्य अविदितान् अस्मान् प्रतिमोचय ॥

अर्थ— वह (इयं) आपत्ति प्राप्त हुई है । (यां) जिसे (क्षत्ता) विदुरने पहिले (दृष्टवान्) देखा था । तू पुरोचनको (अ–विदितान्) विदित न होते हुए (अस्मान्) हमको (प्रतिमोचय) छुडा दे ।

स तथेति प्रतिश्रुत्य खनको यत्नमास्थितः ।
परिखामुत्किरन्नाम चकार च महद्बिलम् ॥ १६ ॥

अन्वयः— स खनकः तथा इति प्रतिश्रुत्य यत्नं आस्थितः । परिखां उत्किरन् नाम महद् बिलं चकार च ॥

अर्थ— वह खोदनेवाला (तथा) ठीक ऐसा (प्रतिश्रुत्य) कहकर यत्न करने लगा । (परिखां) खंदक (उत्किरन् नाम) खोदनेके मिषसे बडा बिल करता रहा ।

इन श्लोकोंमें आये संधियोंके पद अब देखिये—

१ नस्त्वं = नः त्वं ।
२ भवतश्च = भवतः च ।

३ मदर्थमिति = मत् अर्थं इति ।

४ पालयास्मान् = पालय अस्मान् ।

५ कोशवांश्चैव = कोशवान् च एव ।

६ मोक्षयत्वस्मान् = मोक्षयतु अस्मान् ।

७ यत्नेनास्माद्धुताशनात् = यत्नेन अस्मात् हुताशनात् ।

८ अस्मास्विह = अस्मासु इह ।

९ प्रागेव = प्राक् एव ।

१० विदुरो वेद = विदुरः वेद ।

११ सेयमापदनुप्राप्ता = सा इयं आपत् अनुप्राप्ता ।

१२ अस्माँस्त्वं = अस्मान् त्वं ।

ये संधि देखकर संधिके साथ पाठक परिचित हों ।

संधि किये हुए वाक्य ।

यथा तस्य त्वं तथैवास्माकं स्वमसि । यथा कविरस्मान्पालयति, तथैव त्वमपि पालयास्मान् । इदं लाक्षागृहं धार्तराष्ट्रस्याज्ञया पुरोचनेन निर्मितमिति मम मतिः । स दुर्मतिः पापो दुर्योधनो धनवान् सहाय्यवांश्चास्मान्नित्यं प्रबाधते । अतो भगवान् यत्नेनास्माद्धुताशनादस्मान्मोक्षयतु ।

पाठ १२

यदि आपके पूर्व पाठ ठीक हो चुके हैं तो इस पाठमें दिया हुआ सरल संस्कृत आपके ध्यानमें आ जायगा। देखिये—

जनक उवाच— हे मुनिपुंगव ! अत्रास्ति धनुष्यं शंकरस्य। क्षेत्रं कृषतो मे लाङ्गलादुत्थितैका सुता चास्ति। क्षेत्रं शोधयता लब्धा अतः सा सीतेति नाम्ना विश्रुता। सेदानीं स्वयंवरयोग्या संजाता। वर्धमानां तां सीतां सर्वे राजानोऽत्रागत्य वरयितु-मिच्छन्ति।

वरयितुमिच्छतामपि तेषां कन्यां न ददामि वीर्यशुल्केति। सर्वे नृपतयो वीर्यं जिज्ञासवोऽत्रोपागच्छन्। तेषां पुरस्तान्मया शैवं धनुरुपाहृतम्। तस्य ग्रहणे तोलनेऽपि वा ते नृपा न शेकुः। तदेतत्परमं भास्वरं धनू रामलक्ष्मणयोश्चापि दर्शयिष्यामि।

रामो यद्यस्यारोपणं कुर्यादहं सीतां तस्मै दद्याम्। ततो जनकेन समादिष्टाः सचिवाः प्रयासेन धनुस्तत्रानयामासुः।

महर्षेर्वचनात्तद्धनुर्दृष्ट्वा रामोऽब्रवीत्। इदं दिव्यं धनुः पाणिना संस्पृशामि तस्य तोलने पूरणेऽपि यत्नवांश्च भविष्यामि। एव-मुक्त्वा रामो धनुर्मध्ये जग्राह। लीलया पूरयामास च। यदा रामेण मौर्वी आरोपिता तदा तद्धनुर्बभञ्ज च।

तदा राजा जनकः प्रांजलिर्विश्वामित्रमुवाच। अत्यद्भुतमिदम्। अचिंत्यमतर्कितञ्च मया। मे सुता सीता रामं भर्तारं प्राप्य कीर्ति-माहरिष्यति। मे मंत्रिणः शीघ्रमयोध्यां गच्छन्तु। राजानं दशरथं चात्रानयन्तु।

एवं समादिष्टा दूतास्त्रिरात्रेणायोध्यां प्राविशन्। वृद्धं दशरथं राजानं जनकस्य कृते कुशलं च पप्रच्छुः।

तव पुत्रेण रामेण सीता निर्जिता । अतो जनको राजा विवाह-मङ्गलाय भवन्तं सपुरोहितं निमन्त्रयति ।

पाठक इसको बार बार पढ़ें । अनेक बार पढनेसे ही यह सरल संस्कृत पाठकोंके समझमें आ जायगा ।

यदि किसी स्थानपर अर्थके विषयमें अथवा संधिके विषयमें संदेह हुआ तो पाठक पूर्वके तेरहवें पाठमें देखें । वहांके वाक्य देखनेसे सब संदेह निवृत्त हो जायगे । वहां हरएक वाक्य पदच्छेदपूर्वक दिया हुआ है । और पूर्ण शब्दार्थ भी दिया है । तथापि उसको न देखते हुए ही पाठक इस पाठको समझनेका यत्न करें । अब और देखिये—

संस्कृत-वाचन-पाठः ।

यथा तस्य त्वं, तथा नस्त्वम् । वयं त्वयि निर्विशेषाः । यथा तस्य तथा भवतः । यथा कविः तथा त्वमस्मान्पालय ।

इदमाग्नेयं शरणं धार्तराष्ट्रस्य शासनात्पुरोचनेन विहितमिति मे मतिः ।

स दुर्मतिः पापः कोशवांश्च ससहायश्चैव पापात्माऽस्मानपि नित्यकालं प्रबाधते ।

स भवानस्माद्धुताशनाद्यत्नेनास्मान्मोक्षयतु । ह्यस्मास्विह दग्धेषु सुयोधनः सकामः स्यात् । तस्येदं चिकीर्षितं कर्म नूनमशुभम् । विदुरः प्रागेव वेद । तेनास्मानन्वबोधयत् ।

सेयमापदनुप्राप्ता । यां क्षत्ता पुरा दृष्टवान् । त्वं पुरोचनस्याविदितानस्मान्प्रतिमोचय ।

स खनकस्तथेति प्रतिश्रुत्य यत्नमास्थितः । परिखामुत्किरन्नाम महद्बिलं चकार च ।

पाठक इसको भी वारंवार पढें । पढनेसे संधि खोलनेकी विधि ज्ञात हो सकती है । यदि किसी स्थानपर संदेह हुआ तो १२ वाँ पाठ देखें वहां इसके मूल श्लोक, अन्वय, अर्थ आदि सब विद्यमान है । यदि पूर्व पाठ

ठीक हो चुका है तो इसमें कोई कठिनता ही नहीं रहेगी। परंतु किसी कारण संदेह हुआ तो पूर्व पाठ देखनेसे निवृत्त हो सकता है।

निम्नलिखित प्रश्नोंके उत्तर संस्कृतमें ही दीजिये—

१ कस्य धनुष्यं तत् आसीत् ?
२ सीता कथं प्राप्ता ? केन प्राप्ता ?
३ स्वयंवरसमये सर्वे राजानः किं कुर्वन्ति ?
४ नृपाः तस्य धनुष्यस्य तोलने ग्रहणे वा समर्थाः सन्ति वा न ?
५ ततः रामेण किं कृतम् ?
६ यदा धनुः बभञ्ज तदा जनकेन किं कृतम् ?
७ जनकस्य मन्त्रिणः दशरथं किं ऊचुः ?
८ आग्नेयं शरणं केन विहितम् ?
९ कस्य शासनात् तेन विहितम् ?
१० कः पापात्मा दुर्मतिः ?
११ तेन पापेन किं कृतम् ?
१२ विदुरेण किं कृतम् ?

इन प्रश्नोंका उत्तर संस्कृतमें ही देनेका यत्न कीजिये। यदि उत्तर स्वयं न सूझा तो इसी पाठके पूर्व वाक्य देखकर उत्तर दीजिये। ऐसा करनेसे ही आपकी उन्नति निःसंदेह हो सकती है।

प्रश्नोंके उत्तर ठीक आनेतक आप इस पाठका अभ्यास करते रहिये।

संधि किये हुए वाक्य।

तत्कस्य धनुष्यमासीत्। नृपास्तस्य धनुष्यस्य तोलने ग्रहणे वा समर्थाः सन्ति वा न ? ततो रामेण किं कृतम् ? यदा धनुर्बभञ्ज तदा जनकेन किं कृतम् ? जनकस्य मन्त्रिणो दशरथं किमूचुः ? आग्नेयं शरणं केन विहितम् ? कस्य शासनात्तेन विहितम् ? को दुर्मतिः पापात्मा ?

पाठ १४

संस्कृत-वाक्यानि ।

१ ततः दशरथः मिथिलां उपेयिवान् । जनकः च पूजां कल्पयित्वा एनं उवाच । २ दिष्ट्या प्राप्तः असि सह वसिष्ठेन । ददामि सीतां रामाय ऊर्मिलां लक्ष्मणाय च । ३ विश्वामित्रः च उवाच । राजन् ! सदृशः धर्मसंबंधः रामस्य सीतया सह, लक्ष्मणस्य च ऊर्मिलया सह । ४ अन्यत् च । यवीयसः जनकभ्रातुः कुशध्वजस्य अपि सुताद्वयं अस्ति । ५ भरतशत्रुघ्नयोः पत्न्यर्थं सुताद्वयं अपि योग्यम् । ६ वसिष्ठेन अपि तत् अनुमतम् । ७ जनकः तु प्राञ्जलिः उवाच । धन्यं मन्ये मम कुलम् । ८ यतः उभौ अपि मुनिपुंगवौ युवां अस्माकं कुलसंबंधं सदृशं ज्ञापयतः । ९ एकेन एव अह्ना चत्वारो राजपुत्राः चतसृणां राजपुत्रीणां पाणीन् गृह्णन्तु । १० ततः सर्वाभरणभूषितां सीतां समानीय, अग्नेः पुरस्तात् संस्थाप्य, राजा रामं अब्रवीत् । ११ मे सुता इयं सीता अद्य तव सहधर्मचारिणी, प्रतीच्छ एनां पतिव्रतां, छायां इव अनुगामिनीम् । १२ ततः सर्वे महर्षयः साधु साधु इति ऊचुः । १३ लक्ष्मणं भरतं शत्रुघ्नं च तथैव क्रमेण ऊर्मिलया मांडव्या श्रुतकीर्त्या च सह संयोजयामासुः । १४ ते अग्निं त्रिः परिक्रम्य भार्याः ऊहुः । १५ अथ रात्र्यां व्यतीतायां विश्वामित्रः अपृष्ट्वा रामचंद्रं, उत्तरपर्वतं जगाम । १६ राजा दशरथः अपि मिथिलाधिपतिं जनकं पृष्ट्वा अयोध्यानगरीं आशु प्रस्थितः । १७ मार्गे तु क्षत्रियविमर्दनं जामदग्न्यं रामं दशरथः ददर्श । १८ तदा दशरथः प्राञ्जलिः भूत्वा 'अभयं देहि' इति तं प्रार्थयामास । १९ अनादृत्य तद् वाक्यं, रामं एव जामदग्न्यः उवाच । पश्य अद्य एव मे पराक्रमम् । २० रामः अपि धनुः सज्जीकृत्य उवाच । ब्राह्मणः असि त्वम् ।

तस्मात् ते प्राणं न हरामि। २१ ततः जामदग्न्यः महेन्द्रपर्वतं तपश्चरणं कर्तुं गतः, रामः अपि अयोध्यां प्राप्तः।

भाषा-वाक्य।

१ पश्चात् दशरथ मिथिलाके प्रति चला। जनकने पूजा कर उनसे भाषण किया। २ सुदैवसे तू यहां प्राप्त हुआ है वसिष्ठके साथ। देता हूं सीताको रामके लिये और ऊर्मिलाको लक्ष्मणके लिये। ३ विश्वामित्र बोले, हे राजन्! योग्य ही धर्मसंबंध है। रामका सीताके साथ लक्ष्मणका ऊर्मिलाके साथ। ४ और यह है कि जनकके (यवीयसः) छोटे भाई कुशध्वजकी भी दो लडकियां हैं। ५ भरत और शत्रुघ्नकी पत्नीके लिए वे दोनों लडकियां योग्य हैं। ६ वसिष्ठने भी उसकी अनुमति दी। ७ जनक तो हाथ जोडकर बोला, कि धन्य मानता हूं मेरा कुल। ८ क्योंकि (युवां) आप दोनों भी मुनि-श्रेष्ठ हमारे कुलसंबंधको योग्य (ज्ञापयतः) कह रहे हैं। ९ एक ही दिन चारों राजपुत्र चारों राजपुत्रियोंका (पाणीन्) हाथोंको (गृह्णन्तु) लेवें। पाणिग्रहण करें। १० पश्चात् सर्व भूषणोंसे भूषित सीताको ला, अग्निके सामने (संस्थाप्य) रखकर राजा रामसे बोला। ११ मेरी पुत्री यह सीता आजसे तेरी सहधर्मचारिणी (तेरे साथ धर्माचरण करनेवाली) इच्छा कर इस पतिव्रताकी, यह छायाके समान (अनुगामिनी) पीछेसे आनेवाली है। १२ तब सब महर्षि 'उत्तम है' ऐसा कहने लगे। १३ लक्ष्मण, भरत, शत्रुघ्नको उसी क्रमसे ऊर्मिला, मांडवी और श्रुतकीर्तिके साथ संयुक्त किया। १४ उन्होंने तीनवार अग्निकी परिक्रमा कर भार्याओंके साथ (ऊहुः) विवाह किया। १५ तब रात्री व्यतीत होनेपर विश्वामित्र पूछकर रामचंद्रको, उत्तर पर्वतको चला। १६ राजा दशरथ भी मिथिलाके अधीश जनकसे पूछकर अयोध्या नगरीको (आशु) शीघ्र ही चला। १७ मार्गमें तो क्षत्रियघातक जमदग्निपुत्र रामको दशरथने देखा। १८ तब दशरथने हाथ जोडकर 'अभय दो' ऐसी उसकी प्रार्थना की। १९ अनादर कर उस वाक्यका, रामको ही जमदग्निपुत्र बोला। देख अभी मेरा पराक्रम। २० राम भी धनुष्य सज्ज कर बोला, कि ब्राह्मण है तू इसलिये तेरा प्राण नहीं हरण करता। २१ पश्चात्

जमदग्निपुत्र महेंद्रपर्वतपर तप करनेके लिए गया। और राम भी अयोध्याको प्राप्त हुआ।

संधि किये हुए वाक्य।

अनादृत्य तद्वाक्यं राममेव जामदग्न्य उवाच। पश्याद्यैव मे पराक्रमम्। रामोऽपि धनुः सज्जीकृत्योवाच। ब्राह्मणोऽसि त्वम्। तस्मात्ते प्राणं न हरामि। ततो जामदग्न्यो महेन्द्रपर्वतं तपश्चरणं कर्तुं गतः, रामोऽप्ययोध्यां प्राप्तः।

पाठ १५

चक्रे च वेश्मनस्तस्य मध्ये नातिमहद्बिलम्।
कपाटयुक्तमज्ञातं समं भूम्याश्च भारत॥ १७॥

(महाभारत आदि. अ. १४९)

अन्वयः— हे भारत! तस्य वेश्मनः मध्ये न अतिमहत् कपाटयुक्तं अज्ञातं भूम्याः च समं बिलं चक्रे॥

अर्थ— हे भारत! उस (वेश्मनः) घरके मध्यमें (न अतिमहत्) अत्यंत बडा नहीं और (कपाट-युक्तं) किवाडोंसे युक्त तथा (अज्ञातं) गुप्त (भूम्याः समं) भूमिके समान ही (बिलं) बिल (चक्रे) बना दिया।

पुरोचनभयादेव व्यदधात्संवृतं मुखम्।
स तस्य तु गृहद्वारि वसत्यशुभधीः सदा॥ १८॥

अन्वयः— पुरोचन+भयात् एव संवृतं मुखं व्यदधात्। सः अशुभधीः तस्य गृहद्वारि तु सदा वसति॥

अर्थ— पुरोचनके भयसे ही उस बिलका मुख (संवृतं) ढंका हुआ बंद (व्यदधात्) किया। वह (अशुभ-धीः) दुष्ट-बुद्धिवाला उस घरके द्वारमें ही सदा (वसति) रहता था।

तत्र ते सायुधाः सर्वे वसन्ति स्म क्षपां नृप ।
दिवा चरन्ति मृगयां पांडवेया वनाद्वनम् ॥ १९ ॥

अन्वयः— हे नृप ! ते सर्वे पांडवेयाः सायुधाः क्षपां तत्र वसन्ति स्म, दिवा वनात् वनं मृगयां चरन्ति ॥

अर्थ— हे राजा ! वे सब पांडुके पुत्र (स-आयुधाः) हथियारोंके समेत (क्षपां) रात्रिके समय वहां (वसन्ति स्म) रहते थे। (दिवा) दिनके समय एक वनसे दूसरे वनको मृगयाके लिये (चरन्ति) घूमते थे।

विश्वस्तवदविश्वस्ता वञ्चयन्तः पुरोचनम् ।
अतुष्टास्तुष्टवद्राजन्नूषुः परमविस्मिताः ॥ २० ॥

अन्वयः— हे राजन् ! पुरोचनं वञ्चयन्तः, अविश्वस्ताः विश्वस्तवद्, अतुष्टाः तुष्टवत्, परम-विस्मिताः ऊषुः ॥

अर्थ— हे राजा ! पुरोचनको (वञ्चयन्तः) ठगाते हुए (अ-विश्वस्ताः) विश्वास न करते हुए भी विश्वास करनेके समान, (अ-तुष्टाः) संतुष्ट न होते हुए भी संतुष्ट होनेके समान, अत्यंत (विस्मिताः) विस्मित होकर (ऊषुः) वसने लगे।

न चैनानन्वबोधन्त नरा नगरवासिनः ।
अन्यत्र विदुरामात्यात्तस्मात्खनकसत्तमात् ॥ २१ ॥

अन्वयः— तस्मात्, खनकसत्तमात् विदुरामात्यात् अन्यत्र नगरवासिनः नराः एनान् न अन्वबोधन्त ॥

अर्थ— उस खोदनेवालोंमें (सत् तम) श्रेष्ठ विदुरके (अमात्य) मंत्रीको छोडकर (अन्यत्र) दूसरे नगरवासी (नराः) जन (एनान्) इनको नहीं (अन्वबोधन्त) जानते थे।

तांस्तु दृष्ट्वा सुमनसः परिसंवत्सरोषितान् ॥
विश्वस्तानिव संलक्ष्य हर्षं चक्रे पुरोचनः ॥ १ ॥

(महाभारत आदि. अ. १५०)

अन्वयः— परि-संवत्सर-उषितान् सुमनसः तान् दृष्ट्वा, विश्वस्तान् इव संलक्ष्य पुरोचनः हर्षं चक्रे ॥

अर्थ— (संवत्सर) वर्षपर्यंत (उषित) रहे हुए उत्तम मनवाले इन पाण्डवोंको (दृष्ट्वा) देखकर, उनको विश्वास किये समान (संलक्ष्य) अनुभव कर पुरोचन आनंद मानने लगा।

पुरोचने तथा हृष्टे कौन्तेयोऽथ युधिष्ठिरः।
भीमसेनार्जुनौ चोभौ यमौ प्रोवाच धर्मवित् ॥ ९ ॥

अन्वयः— तथा पुरोचने हृष्टे अथ कौन्तेयः धर्मवित् युधिष्ठिरः भीमसेनार्जुनौ उभौ यमौ च प्रोवाच ॥

अर्थ— उस प्रकार पुरोचन संतुष्ट होनेपर (अथ) नंतर (कौन्तेयः) कुन्ती पुत्र धर्मज्ञानी युधिष्ठिर भीम, अर्जुन और (उभौ) दोनों (यमौ) जुडे भाई नकुल सहदेवको (प्रोवाच = प्र उवाच) बोला।

इस पाठके श्लोकोंमें आये सन्धिका विग्रह—

१ वेश्मनस्तस्य = वेश्मनः तस्य ।
२ नातिमहद्बिलम् = न अति महत् बिलम् ।
३ भूम्याश्च = भूम्याः च ।
४ भयादेव = भयात् एव ।
५ वसत्यशुभधीः = वसति-अशुभ-धीः ।
६ सायुधाः = स-आयुधाः ।
७ वनाद्वनं = वनात्-वनम् ।
८ विश्वस्तवदविश्वस्ताः = विश्वस्तवत् अविश्वस्ता ।
९ अतुष्टास्तुष्टवद्राजन्नूषुः = अतुष्टाः तुष्टवत् राजन् ऊषुः ।
१० चैनानन्वबोधन्त = च एनान् अनु-अबोधन्त ।
११ तांस्तु = तान् तु ।
१२ कौन्तेयोऽथ = कौन्तेयः अथ ।
१३ भीमसेनार्जुनौ = भीमसेन अर्जुनौ ।
१४ चोभौ = च उभौ ।
१५ प्रोवाच = प्र-उवाच ।

पाठक ये सन्धि देखें और सन्धि पहचाननेका यत्न करें ।

समासः ।

पूर्व श्लोकोंमें आये समासोंका विवरण—

१ भीमसेनार्जुनौ = भीमसेनः च अर्जुनः च भीमसेनार्जुनौ = (भीम और अर्जुन ।)

२ धर्मवित् = धर्मं वेत्ति धर्मवित् (धर्म जाननेवाला)

३ नगरवासिनः = नगरे वसन्ति इति नगरवासिनः = (नगरमें बसनेवाले)

४ खनकसत्तमः = खनकेषु सत्तमः = (खोदनेवालोंमें उत्तम)

पाठ १६

संस्कृत-वाचन-पाठः ।

ततो दशरथो मिथिलामुपेयिवान् । जनकश्च पूजां कल्पयित्वैनमुवाच । दिष्ट्या प्राप्तोऽसि सह वसिष्ठेन । ददामि सीतां रामायोर्मिलां लक्ष्मणाय च ।

विश्वामित्रश्चोवाच । राजन् ! सदृशो धर्मसम्बन्धो रामस्य सीतया सह, लक्ष्मणस्य चोर्मिलया सह । अन्यच्च यवीयसो जनकभ्रातुः कुशध्वजस्यापि सुताद्वयमस्ति । भरतशत्रुघ्नयोः पत्न्यर्थं सुताद्वयमपि योग्यम् । वसिष्ठेनापि तदनुमतम् ।

जनकस्तु प्राञ्जलिरुवाच– ' धन्यं मन्ये मम कुलम् । यत उभावपि मुनिपुंगवौ युवामस्माकं कुलसंबन्धं सदृशं ज्ञापयतः ।

एकेनैवाह्ना चत्वारो राजपुत्राश्चतसृणां राजपुत्रीणां पाणीन् गृह्णन्तु । ' ततः सर्वाभरणभूषितां सीतां समानीयाग्नेः पुरस्ता-

त्संस्थाप्य राजा राममब्रवीत् " मे सुतेयं सीताद्य तव सहधर्मचारिणी, प्रतीच्छैनां पतिव्रतां, छायामिवानुगामिनीम् । " ततः सर्वे महर्षयः साधुसाध्वित्यूचुः ।

लक्ष्मणं भरतं शत्रुघ्नं च तथैव क्रमेणोर्मिलया मांडव्या श्रुतकीर्त्या च सह संयोजयामासुः । तेऽग्निं त्रिःपरिक्रम्य भार्या ऊढुः ।

अथ रात्र्यां व्यतीतायां विश्वामित्र आपृष्ट्वा रामचन्द्रमुत्तरपर्वतं जगाम ।

राजा दशरथोऽपि मिथिलाधिपतिं जनकं पृष्ट्वाऽयोध्यानगरीमाशु प्रस्थितः । मार्गे तु क्षत्रियविमर्दनं जामदग्न्यं रामं दशरथो ददर्श । तदा दशरथः प्राञ्जलिर्भूत्वा " अभयं देहीति " तं प्रार्थयामास ।

अनादृत्य तद्वाक्यं, राममेव जामदग्न्य उवाच– ' पश्याद्य मे पराक्रमम् । ' रामोऽपि धनुः सज्जीकृत्योवाच–" ब्राह्मणोऽसि त्वं; तस्मात्ते प्राणं न हरामि । " ततो जामदग्न्यो महेन्द्रपर्वतं तपश्चरणं कर्तुं गतो, रामोऽप्ययोध्यां प्राप्तः ।

हे भारत ! स तस्य वेश्मनो मध्ये नातिमहत्कपाटयुक्तमज्ञातं भूम्याश्च समं बिलं चक्रे । पुरोचनभयादेव संवृतं मुखं व्यदधात् । स पुरोचनोऽशुभधीस्तस्य गृहद्वारि तु सदा तिष्ठति ।

हे नृप ! ते सर्वे पाण्डवेयाः सायुधाः क्षपां तत्र वसन्ति स्म, दिवा च वनाद्वनं मृगयां चरन्ति । हे राजन् ! पुरोचनं वञ्चयन्तोऽविश्वस्ता विश्वस्तवत्, अतुष्टास्तुष्टवत्, परमविस्मिता ऊषुः । तस्मात्खनकसत्तमाद्विदुरामात्यादन्यत्र नगरवासिनो नरा एनान्नान्वबोधन्त ।

परिसंवत्सरोषितान्सुमनसस्तान्दृष्ट्वा, विश्वस्तानिव संलक्ष्य, पुरोचनो हर्षं चक्रे । तथा पुरोचने हृष्टे, अथ धर्मविद्युधिष्ठिरो भीमार्जुनौ यमौ च प्रोवाच ।

श्रेष्ठ उत्तमो मनुष्यो यद्यदाचरति तत्तदेवेतरो जन आचरति। यद्यदेव नृप आचरति तत्तदेव प्रजाजन आचरति। यथा विद्वानाचरति तथैव साधारणो जन आचरति। यथा त्वमाचरसि तथैवाहमाचरामि। यथाऽहमाचरामि तथा त्वं नाचरसि।

स श्रेष्ठ उत्तमः पुरुषो यद्यत्प्रमाणं कुरुते तत्तदेव लोक अनुवर्तते। यद्यद्भूपतिः प्रमाणं कुरुते तत्तदेव प्रजाजनः अनुवर्तते। यद्यद्भूपतिः प्रमाणं कुरुते साधारणो जनस्तत्तदेवानुवर्तते।

आत्मनाऽऽत्मानमुद्धरेत्। सदात्मानमेवात्मनोद्धरेत्। कदाऽप्यात्मनाऽऽत्मानं नावसादयेत्। मनुष्येण सदा तथा प्रयत्नः कर्तव्यो येन तस्योद्धारो भविष्यति।

आत्मैवात्मनो बंधुर्भवति, तथाऽऽत्मनः शत्रुरप्यात्मैव भवति। यः स्वकर्तव्यं करोति स एवात्मनो बन्धुर्भवति, तथा यः स्वकर्तव्यं न करोति, स एवात्मनः शत्रुर्भवति।

हे मनुष्य! मनो दुर्निग्रहं चलं चास्तीत्यसंशयं सत्यमेवास्ति। परंतु तस्य निग्रहोऽभ्यासेन वैराग्येण च भवति नान्येन केनापि कर्मणा भवति।

यो वीर इदानीं युद्धेऽवस्थितः स विजयं प्राप्स्यति। यो वीरः पुरुषो युद्धं करोति सोऽवश्यं विजयं प्राप्नोति।

तस्मात्त्वमुत्तिष्ठ। हे वीर! इदानीं त्वं युद्धायोत्तिष्ठ, यशश्च लभस्व। शत्रूञ्जित्वा समृद्धं राज्यं भुंक्ष्व।

एते वीरा मयैव पूर्वं निहताः। अतस्त्वं निमित्तमात्रं भव। क्षत्रस्य धर्मस्य तत्त्वं 'धर्म्यं युद्धं कर्तव्य' - मित्येवास्ति। अतो धर्म्याद्युद्धात्पलायनं क्षत्रियाय न योग्यं भवति।

तस्य क्षत्रियस्य किं नगरमस्ति? स वीरः क्षत्रियो वीरपुरे निवसति। तस्मान्नगरात्स इदानीमेवात्रागतः। स किमर्थमत्रागतः? स कदाऽस्मान्नगरात्स्वनगरं गमिष्यतीति त्वं जानासि किम्?

आदौ वीरेणेन्द्रियाणि संयम्य शत्रुणा सहावश्यं युद्धं कर्तव्यम् । यो वीरो निर्मलो निश्चलो निर्विकारो नित्यपूतो निस्पृहो निर्मोहः स एव प्रशंसनीयः । स एव युद्धे विजयं प्राप्नोति ।

पापी मनुष्यः पापात्कथं मुक्तो भवति ? तव दर्शनायाहमद्यागतः । दानसमये कार्पण्यं मा कुरु । रुग्णायौषधं देहि । तृषिताय तोयं देहि ।

पाठ १७

संस्कृत-वाचन-पाठः ।

(१)

उद्यानात्कुसुमं स आनयति । जलेऽब्जं भवति । मनुष्यो दुःखं न वाञ्छति । अहं व्रतं चरिष्यामि । सत्यमेव परमं व्रतमस्ति । ज्ञानस्य दानं धनस्य दानाच्छ्रेष्ठम् । गृहस्य मध्येऽन्तःपुरं भवति । अन्तःपुरे गृहपत्नी वसति । दुष्टस्य मुखेऽमृतं हृदये च विषं भवति । पश्य रथस्य चक्रं कथं भ्रमति ?

बालकस्य रमणीयं रूपमहं पश्यामि । स पुरुषो रूपेण बलेन लावण्येन चातीव सुन्दरोऽस्ति । तस्य नेत्रमिदानीं रुग्णं जातम् । तच्छ्वेतं सूत्रमानय ।

कविः सूत्रेण यज्ञोपवीतं करोति । यथा स नेत्रेण रूपं पश्यति, तथा कर्णेन शब्दं शृणोति । तस्य रूपं पश्य । यन्त्रस्य चक्रमिदानीं न भ्रमति । स यन्त्रस्य चक्रं कदा भ्रामयिष्यति ? हृदयं शुद्धं कुरु । तत्र पात्रं माऽस्तु । यथाऽन्तःपुरे पुत्री भ्रमति, तथा गृहाद्बहिः पुत्रो भ्रमति । दानेन पुण्यं भवति वा न ? यदि दानेन पुण्यं भवति, तर्हि त्वं दानं किं न करोषि ?

(१)

युद्धं स्वर्गस्यैव द्वारमस्ति। यः क्षत्रियो धर्म्यं युद्धं करोति स तेनैव द्वारेण स्वर्गं गच्छति। यदि स युद्धे मृतो भवति तर्हि स स्वर्गं गच्छति, यदि न मृतो विजयं प्राप्तस्तर्हि राज्यं प्राप्नोति।

अतः क्षत्रिय ईदृशं युद्धं सुखेन करोति। तेन स्वर्गं भूमिराज्यं वा प्राप्नोति। परंतु यो भीरुः पुरुषो युद्धं कर्तुं न समर्थः स न स्वर्गं प्राप्नोति। नाप्यत्र भूमिराज्यं प्राप्नोति।

यः क्षत्रियो धर्मेण राज्यं रक्षति, राज्यस्य रक्षणार्थं चावश्यकं युद्धं करोति, स एव क्षत्रियो यशस्वी कीर्तियुक्तश्च भवति, नान्यः।

उदधेर्जलं स्नानाय योग्यं भवति। उदधेर्जलस्य स्नानेन शरीरस्यारोग्यं भवति। तेन स्नानेन शरीरस्य रोगोऽपि दूरं गच्छति।

एको रथो भूमिमार्गेण गच्छति, स रथ इत्युच्यते। अन्यो रथो जलमार्गेण गच्छति, स जलरथ इत्युच्यते। तृतीयो रथ आकाशमार्गेण गच्छति, स विमान इत्युच्यते।

भूपतिः प्रजापालनेन यशः इच्छति। ब्राह्मणो ज्ञानवर्धनेन श्रेयो वाञ्छति। वैश्यो धनवर्धनेनैश्वर्यं कांक्षति। शूद्रः कर्मणोत्कर्षं प्राप्नोति। सर्वोऽपि जनः स्वकर्मणैव यशस्वी भवति। न तूद्योगं त्यक्त्वा सिद्धिं कोऽपि प्राप्नोति।

ईश्वरो हृदयदेशे तिष्ठति। तं यदि त्वं शरणं गच्छसि, तर्हि स एव त्वां स्वर्गं नेष्यति।

यदि दिनसमये भानोः प्रकाशो भवति, तर्हि रात्रिसमये सोमस्य प्रकाशो भवति। सूर्यस्योष्णः प्रकाशस्तथा सोमस्य शीतः प्रकाशोऽस्ति।

यः स्वधर्मं पालयति स एवोत्कर्षं प्राप्नोति, नान्यः। तस्यैव सर्वत्र कीर्तिर्भवति नान्यस्य। स एवोत्तमं यशः प्राप्नोति, नान्यः।

अहं लोकस्य क्षयकृत्कालोऽस्मि । लोकान्समाहर्तुमिहास्मिन्युद्धे प्रवृत्तोऽस्मि । अस्मिन्युद्धे सर्वस्य लोकस्य क्षयं कर्तुमिच्छामि । ये वीरा अस्मिन्युद्धेऽत्रावस्थितास्ते सर्वेऽपि त्वामृतेऽपि न भविष्यन्त्येव ।

यो वीर इदानीं युद्धेऽवस्थितः स विजयं प्राप्स्यति । यो धीरः पुरुषो युद्धं करोति सोऽवश्यं विजयं प्राप्नोति ।

तस्मात्त्वमुत्तिष्ठ । यशो लभस्व । हे वीर ! इदानीं त्वं युद्धायोत्तिष्ठ, यशश्च लभस्व । शत्रूञ्जित्वा समृद्धं राज्यं भुंक्ष्व ।

एते वीरा मयैव पूर्वं निहताः, अतस्त्वं निमित्तमात्रं भव ।

सा ताटिका राक्षसी रजोमेघेन रामं मुहूर्तं व्यमोहयत् । परन्तु पश्चाद्रामस्तां राक्षसीं ताटिकां विव्याधोरसि शरेण । तेन बाणेनोरसि विद्धा सा राक्षसी पपात ममार च ।

ततस्ताटिकावधेन संतुष्टो मुनिवरो विश्वामित्रो राममुवाच । हे रामचन्द्र ! सर्वथाऽहं संतुष्टोऽस्मि तेऽनेन शौर्येण । अतः प्रीत्याऽहं ते सर्वाण्यस्त्राणि प्रयच्छामि । तैरस्त्रैः समन्वितो युद्धे त्वं शत्रूञ्जेष्यसि । इत्युक्त्वा विश्वामित्रः सर्वाण्यस्त्राणि यथाशास्त्रं रामाय न्यवेदयत् । ततः स विश्वामित्रो रामं लक्ष्मणं च गृहीत्वा स्वकीयं सिद्धाश्रमं प्राविशत् ।

तत्र मुहूर्तं विश्रान्तौ रामलक्ष्मणौ ' मुनिश्रेष्ठो यज्ञदीक्षां प्रविशतु ' इति तमनुबबन्धतुः । तच्छ्रुत्वा सर्वेऽपि मुनयो रामलक्ष्मणं प्रशशंसुः ।

" अद्य प्रभृति षड्रात्रं रक्षतां युवां " इति चोचुः । तावपि यत्तौ षडहोरात्रं तपोवनमरक्षताम् ।

षष्ठ्यां रात्रौ मायां कुर्वाणौ राक्षसावभ्यधावताम् । परमक्रुद्धो रामो मारीचस्य राक्षसस्योरसि मानवमस्त्रं चिक्षेप ।

तेनास्त्रेण मारीचः सागरे क्षिप्तः । मारीचं सागरे क्षिप्तं दृष्ट्वा सुबाहोरुरस्याग्नेयास्त्रं रामो वेगेन चिक्षेप ।

पाठ १८

वैशम्पायन उवाच।

अथ मुक्ता भयात्कृष्णा सूतपुत्रान्निरस्य च।
मोक्षिता भीमसेनेन जगाम नगरं प्रति ॥ ११ ॥

महाभारत विराट २४

अन्वयः— अथ भीमसेनेन सूतपुत्रान् निरस्य च भयात् मुक्ता कृष्णा मोक्षिता नगरं प्रति जगाम ॥

अर्थ— इसके बाद भीमसेनके द्वारा सूतपुत्र (कीचक) को मारे जाने-पर भयसे मुक्त हुई द्रौपदी नगरके तरफ गई।

त्रासितेव मृगी बाला शार्दूलेन मनस्विनी।
गात्राणि वाससी चैव प्रक्षाल्य सलिलेन सा ॥ १२ ॥

अन्वयः— शार्दूलेन त्रासिता मृगी इव, सा मनस्विनी बाला गात्राणि वाससी च सलिलेन प्रक्षाल्य ॥

अर्थ— सिंहसे भयभीत हुई हरिणीके समान वह बुद्धिमान् स्त्री (द्रौपदी) अपने अवयव और वस्त्रको जलसे पवित्र करके—

तां दृष्ट्वा पुरुषा राजन् प्राद्रवन्त दिशो दश।
गंधर्वाणां भयत्रस्ताः केचिद् दृष्ट्वा न्यमीलयन् ॥ १३ ॥

अन्वयः— हे राजन्! पुरुषाः तां दृष्ट्वा दश दिशः प्राद्रवन्त। गंधर्वाणां भयत्रस्ताः केचित् तां दृष्ट्वा न्यमीलयन् ॥

अर्थ— हे राजन्! लोग उसे देखकर चारों तरफ भागने लगे। गंधर्वोंके डरसे कोई व्यक्ति आँखें बन्द करके वहां रहा।

ततो महानसद्वारि भीमसेनमवस्थितम्।
ददर्श राजन्पांचाली यथा मत्तं महाद्विपम् ॥ १४ ॥

अन्वयः— हे राजन् ! ततः महानसद्वारि भीमसेनं अवस्थितं पांचाली ददर्श यथा महाद्विपं मत्तम् ॥

अर्थ— हे राजन् ! इसके बाद पाकगृहके दरवाजेमें खडा हुआ भीमको द्रौपदीने देखा । मानो बडा हाथी मतवाला (हुआ है) ।

तं विस्मयन्ती शनकैः संज्ञाभिरिदमब्रवीत् ।
गंधर्वराजाय नमो येनाऽस्मि परिमोचिता ॥ १५ ॥

अन्वयः— तं संज्ञाभिः विस्मयन्ती शनकैः इदं अब्रवीत् । येन परिमोचिता अस्मि (तस्मै) गंधर्वराजाय नमः ॥

अर्थ— उसके तरफ अंगुली दिखाकर आश्चर्य व्यक्त करती हुई धीरेसे बोली । जिसने (मुझको) मुक्त किया (उस) गंधर्वराजाको मेरा नमस्कार है ।

भीमसेन उवाच ।

ये पुरा विचरन्तीह पुरुषा वशवर्तिनः ।
तस्यास्ते वचनं श्रुत्वा ह्यनृणा विहरन्त्वतः ॥ १६ ॥

अन्वयः— पुरा इह ये पुरुषाः वशवर्तिनः विचरन्ति (ते) तस्याः ते वचनं श्रुत्वा अनृणाः (भूत्वा) अतः विहरन्तु ॥

अर्थ— पहले जो पुरुष यहां परतन्त्र घूमता था वह तेरा भाषण सुनकर अबसे अनृणी होकर घूमेगा ।

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥ १ ॥

अन्वयः— यः कर्मफलं अनाश्रितः कार्यं कर्म करोति, स संन्यासी च योगी च, निरग्निः अक्रियः च न ॥

अर्थ— जो कर्मफलका आश्रय न करके अपना कर्तव्यकर्म करता है वही संन्यासी और वही योगी है ।

मुद्रक और प्रकाशक— व. श्री. सातवलेकर, भारत मुद्रणालय, पारडी [जि. सूरत]

६

ॐ

संस्कृत-पाठ-माला।

[संस्कृत-भाषाका अध्ययन करनेका सुगम उपाय]

षष्ठम भाग।

लेखक

पं. श्रीपाद दामोदर सातवलेकर

अध्यक्ष- स्वाध्याय-मण्डल, साहित्य-वाचस्पति, गीतालंकार

नवम बार

संवत् २०१६, शक १८८१, सन १९५९

मूल्य ५० नये पैसे

समास

संस्कृतमें 'समास' का प्रकरण विशेष महत्त्वका है। इस समास विषयका प्रारंभ इस भागमें किया है। पाठक यदि इस भागका विशेष अभ्यास करेंगे, तो उनको समासोंके साथ थोडासा परिचय हो जायगा।

आगेके भागोंमें यह समास-प्रकरण क्रमशः समाप्त किया जायगा।

इस भागमें जो संस्कृतके वाक्य दिये हैं, उनका विशेष अभ्यास पाठक करें, तथा फुरसतके समय उनको वारंवार पढते रहें।

ऐसा करनेसे पाठकोंको बहुत लाभ हो सकता है।

लेखक

श्रीपाद दामोदर सातवलेकर

मुद्रक और प्रकाशक — वसंत श्रीपाद सातवलेकर, बी. ए.
भारत मुद्रणालय, स्वाध्याय मण्डल,
पोस्ट- 'स्वाध्याय मण्डल (पारडी)'
पारडी [जि. सूरत]

संस्कृत-पाठ-माला ।

षष्ठ भाग ।

पाठ १

यदि आपका इस समयतकका अभ्यास ठीक हो गया है, तो निम्नलिखित सरल संस्कृत आप समझ सकते हैं —

संस्कृत-वाचन-पाठः ।

ततो दशरथो मिथिलामुपेयिवान् । जनकश्च पूजां कल्पयित्वैनमुवाच । दिष्ट्या प्राप्तोऽसि सह वसिष्ठेन । ददामि सीतां रामायोर्मिलां लक्ष्मणाय च ।

विश्वामित्रश्चोवाच । राजन् ! सदृशो धर्मसम्बन्धो रामस्य सीतया सह । अन्यच्च यवीयसो जनकभ्रातुः कुशध्वजस्यापि सुताद्वयमस्ति । भरतशत्रुघ्नयोः पत्न्यर्थं सुताद्वयमपि योग्यम् । वसिष्ठेनापि तदनुमतम् । जनकस्तु प्राञ्जलिरुवाच । धन्यं मन्ये मम कुलम् । यत उभावपि मुनिपुङ्गवौ युवामस्माकं कुलसम्बन्धं सदृशं ज्ञापयथः । एकस्मिन्नेवाहनि चत्वारो राजपुत्राः चतसृणां राजपुत्रीणां पाणीन् गृह्णन्तु । ततः सर्वाभरणभूषितां सीतां समानीयाऽग्नेः पुरस्तात्संस्थाप्य राजा राममब्रवीत् ।

'मे सुतेयं सीताऽद्य तव सहधर्मचारिणी, प्रतीच्छैनां पतिव्रतां छायामिवानुगामिनीम् ।' ततः सर्वे महर्षयः साधु साध्वित्यूचुः । लक्ष्मणं भरतं शत्रुघ्नं च तथैव क्रमेणोर्मिलया माण्डव्या श्रुतकीर्त्या च सह संयोजयामासुः । ते अग्निं त्रिःपरिक्रम्य भार्या ऊहुः ।

अथ रात्र्यां व्यतीतायां विश्वामित्र आपृष्ट्वा रामचन्द्रमुत्तरपर्वतं जगाम । राजा दशरथोऽपि मिथिलाधिपतिं जनकं पृष्ट्वाऽयोध्या-नगरीमाशु प्रस्थितः । मार्गे तु क्षत्रियविमर्दनं जामदग्न्यं रामं दशरथो ददर्श । तदा दशरथः प्राञ्जलिर्भूत्वा 'अभयं देहि' इति तं प्रार्थयामास ।

अनादृत्य तद्वाक्यं राममेव जामदग्न्य उवाच । पश्याद्यैव मे पराक्रमम् । रामोऽपि धनुः सज्जीकृत्योवाच । ब्राह्मणोऽसि त्वम् । तस्मात्ते प्राणान् न हरामि । इति ।

ततो जामदग्न्यो महेन्द्रपर्वतं तपश्चरणं कर्तुं गतः । रामोऽप्य-योध्यां प्राप्तः ।

पाठक इस पाठको बारबार पढें और कोई संदेह हुआ तो पूर्वभागमें ये ही वाक्य देखें । वहां ये ही वाक्य पदच्छेदपूर्वक दिये हैं । अब निम्नलिखित संस्कृत पाठ पढिये—

संस्कृत-वाचन-पाठः ।

हे भारत ! तस्य वेश्मनो मध्ये नातिमहत् कपाटयुक्तमज्ञातं भूम्याश्च समं बिलं चक्रे । (पुरोचनभयादेव संवृत्तं मुखं व्यदधात् ।) स अशुभधीस्तस्य गृहद्वारि तु सदा वसति । हे नृप ! ते सर्वे पाण्डवेयाः सायुधाः क्षपां तत्र वसन्ति स्म । दिवा वनाद्वनं मृगयां चरन्ति स्म च । हे राजन् ! पुरोचनं वञ्चयन्तोऽविश्वस्ता विश्वस्तवदतुष्टास्तुष्टवत्परमविस्मिता ऊषुः । तस्मात्खनकसत्तमा-द्विदुरामात्यादन्यत्र नगरवासिनो नरा एनान्नान्वबोधन्त । परि-संवत्सरोषितान्सुमनसस्तान्दृष्ट्वा विश्वस्तानिव संलक्ष्य पुरोचनो हर्षं चक्रे । तथा पुरोचने हृष्टे अथ कौन्तेयो धर्मविद्युधिष्ठिरो भीम-सेनार्जुनावुभौ यमौ च प्रोवाच ।

सूचना ।

इसको बारंबार पढनेसे पाठक सुगमताके साथ समझ सकते हैं । इसमें कोई कठिनता नहीं है । जो वाक्य नहीं समझा है वह पुनः पुनः पढने और विचार करनेसे समझमें आ जायगा । यदि किसी स्थानपर संदेह हुआ तो

पूर्वभागमें देख लें। वहां वेही वाक्य पदच्छेदपूर्वक दिये हैं, इसलिये उनको देखनेसे सब संदेह निवृत्त हो सकते हैं। पाठक इसी प्रकार अपनी बुद्धि चलाते रहेंगे तो उनका प्रवेश संस्कृतभाषामें अतिशीघ्र हो जायगा।

अब निम्नलिखित प्रश्नोंका उत्तर संस्कृतमें ही दीजिये—

प्रश्नाः।

१ दशरथः कुत्र उपेयिवान् ?
२ दशरथं दृष्ट्वा जनकः किं अवदत् ?
३ तदा विश्वामित्रः किं अब्रवीत् ?
४ राजपुत्राः केषां पाणिग्रहणं अकुर्वन् ?
५ सीतां अग्नेः पुरस्तात्संस्थाप्य राजा किं अब्रवीत् ?
६ रात्र्यां व्यतीतायां विश्वामित्रः कुत्र गतः ?
७ दशरथः अपि कां नगरीं प्रस्थितः ?
८ मार्गे दशरथः कं ददर्श ?
९ तं दशरथः किं अब्रवीत् ?
१० जामदग्न्येन रामं किं उक्तम् ?
११ तदा रामचन्द्रेण किं कृतम् ?
११ जामदग्न्यः रामः कुत्र गतः ? किं कर्तुं गतः ?

इन प्रश्नोंके उत्तर पाठक संस्कृतमें ही दें। यदि कुछ कठिनता प्रतीत हुई तो पूर्व पाठ देख लें। उस पाठमें प्रारंभमें जो वाक्य दिये हैं, उनको देखनेसे ही इन प्रश्नोंके उत्तर स्वयं दिये जा सकते हैं।

पाठ २

इकारान्त नपुंसकलिंगी शब्दोंके रूप निम्नलिखित रीतिसे होते हैं—

वारि पाणी

१ वारि = जल	४ वारिणे = जलके लिये
(हे) वारे = (हे) जल	५ वारिणः जलसे
२ वारि = जलको	६ वारिणः = जलका
३ वारिणा = जलसे	७ वारिणि = जलमें

संस्कृत-वाक्यानि ।

१ तत्र कूपे वारि अस्ति । २ सः वृषभः वारि तत्र पिबति । ३ अहं वारिणा स्नानं करोमि । ४ सः वारिणे कूपं गच्छति । ५ तस्मात् वारिणः सः मण्डूकः अत्र आगच्छति । ६ तस्य वारिणः वर्णं पश्य । ७ तस्मिन् वारिणि चन्द्रबिंबं पतति ।

भाषा-वाक्य ।

१ इस कूपमें जल है । २ वह बैल जल वहां पीता है । ३ मैं जलसे स्नान करता हूं । ४ वह जलके लिये कूएंके पास जाता है । ५ उस जलसे वह मेंडक वहां आता है । ६ उस जलका रंग देख । ७ उस जलमें चन्द्र-बिम्ब पडा है ।

संस्कृत–वाचन--पाठः ।

तव गृहे मञ्चकस्य उपरि मया तव पुस्तकं स्थापितं अस्ति। तव पुत्रः अश्वं कदा आरोहति इति त्वं जानासि किम् ? शत्रून् निहत्य एव राज्यं प्राप्तुं शक्यं अस्ति न अन्यथा । यदा उपासनेन ईश्वरस्य प्रसादः भवति तदा एव शाश्वतं सुखं भवति, इति निश्चयः एव अस्ति । यदा दशरथः अयोध्यायां राज्यं अकरोत् तदा तस्मिन् राष्ट्रे दुष्टः, पापी, चौरः वा न आसीत् । तत्र सर्वः अपि जनः सुखपूर्णः मुदितः ईश्वरभक्तः च आसीत् ।

यथा मूषकः वस्त्रं खादति तथा एव अन्नं अपि खादति एव । यथा मानवः जलं पिबति तथा रसं अपि पिबति एव । सः मनुष्यः आपणं गत्वा आम्रं सदा आनयति खादति च । सः सदा एव आम्रं खादति परन्तु कदाचित् अपि न पुस्तकं पठति । तस्मात् नगरात् त्वं कदा अत्र आगतः ?

यः मनुष्यः इन्द्रियाणि संयम्य ज्ञाननाशकं पापविचारं त्यजति सः एव महात्मा इति उच्यते । ऋषिः मन्त्रविचारं करोति, मुनिः मौनं धारयति, महर्षिः तपः करोति, मनुष्यः भोजनं करोति, योगी योगं आचरति ।

यदा वृक्षं कपिः आरोहति तदा त्वं किं करोषि ? कपिः मनुष्य-वत् एव सर्वं व्यवहारं करोति, परन्तु सः पठनं, मननं, विचारं च कर्तुं न समर्थः भवति ।

वारिधौ क्षारं जलं भवति, कूपे मधुरं जलं भवति । नदीजलं कदाचित् क्षारं कदाचित् मधुरं अपि भवति । मम कूपस्य जलं अतीव मधुरं अस्ति, न तथा तव कूपस्य ।

पुण्यकर्मकर्ता जनः स्वर्गं गच्छति न तथा पापकर्मकर्ता मनुष्यः । अतः त्वं धर्मस्य एव आचरणं सदा कुरु । कदाचित् अपि धर्मस्य विरोधकं पापं न कुरु ।

तव गुरोः गृहं कुत्र अस्ति कदा च सः तत्र भवति ? मम गुरोः गृहं पुण्यनगरे संस्कृतपाठशालासमीपं एव अस्ति । सः तत्र प्रातः सायं च भवति एव । दिवसस्य मध्यसमये न भवति । संस्कृत-पाठशालां गत्वा शिष्यान् व्याकरणं पाठयति ।

यदा मनुष्यः प्राणान् धनं च त्यक्त्वा स्वराष्ट्रार्थं युद्धं करोति, तदा एव विजयं प्राप्नोति । सर्वस्व-त्यागेन विना विजयः अशक्यः एव अस्ति ।

युद्धसमये दुन्दुभिः शब्दं करोति, सैनिकः धावति, वीरः शस्त्रं गृहीत्वा अग्रे भवति । एवं सर्वत्र वीर्यं शौर्यं च भवति । तेन विजयः भवति ।

सूचना ।

ये वाक्य पाठक पढें और इस प्रकार अनेक वाक्य करते रहें । यह अच्छा होगा यदि पाठक विविध वाक्य बनाकर कागजपर लिखते रहेंगे । जो जो शब्द आ गये हैं उनका उपयोग करके अनेकानेक वाक्य बनानेसे संस्कृतमें अतिशीघ्र गति हो सकती है ।

संस्कृत-वाचन-पाठः ।

राजा दशरथः तदनंतरं मिथिलानगरीं आगतः । जनकश्च राजा तस्य दशरथस्य राजपूजां कृत्वा उक्तवान्- ' दैवयोगेन

प्राप्तः अस्ति वसिष्ठेन ऋषिणा सह । अहं तु सीतां मम कन्यां रामाय प्रदातुं इच्छामि, लक्ष्मणाय च ऊर्मिलां । कुरु तस्य अनुमोदनम् । ' तत् श्रुत्वा विश्वामित्र उवाच– ' योग्यः अयं विवाह-संबन्धः रामस्य सीतया सह, लक्ष्मणस्य च ऊर्मिलया सह । '

पाठ ३

रामायणम् ।

१ अथ वृद्धस्य राज्ञः दशरथस्य एषा मतिः बभूव, यत् जीवति मयि रामः कथं राजा स्यात् । २ तं च समुदितैः गुणैः युक्तं समीक्ष्य, सचिवैः सार्धं निश्चित्य च तस्य यौवराज्यं अमन्यत । ३ नाना नागरिकान् पृथक् जानपदान् अपि समानिनाय । ४ ततः सर्वां परिषदं आमन्त्र्य वसुधाधिपः उवाच । ५ कृत्स्नस्य लोकस्य हितं चरत एव मम इदं शरीरं जीर्णं, अतः विश्रान्तिं अभिरोचये । ६ श्रेष्ठः हि मम आत्मजः सर्वैः गुणैः युक्तः । प्रातः यौवराज्ये तं नियोक्ता अस्मि, तद् अनुमन्यताम् । ७ ते अपि तं ऊचुः । नृपते ! ते सुतस्य बहवः कल्याणगुणाः । धर्मज्ञः, सत्यसन्धः, शीलवान्, अनसूयकः हि असौ । ८ विजितेन्द्रियः अपि सन्, स्वजनवत् पौरान् नित्यं कुशलं पृच्छति । ९ नास्ति तस्य प्रसादः क्रोधश्च कदाचन निरर्थकः । १० तस्मात् सर्वशत्रुदमनं इमं रामं यौवराज्यस्थं वयं अपि द्रष्टुं इच्छामः । ११ तदा राजा दशरथः प्रत्युवाच । १२ अहो ! प्रीतः अस्मि । रामस्य यौवराज्याय सर्वं एव उपकल्प्यताम् । १३ भोः सुमन्त्र ! अत्र रामः शीघ्रं आनीयताम् । १४ सः अपि ' तथा ' इति उक्त्वा रामं तत्र आनयांचक्रे । १५ रामः प्राञ्जलिः प्रणतः पितुः अन्तिके अभिप्रेत्य स्वं नाम श्रावितवान् । १६ पितुः चरणौ च ववन्दे । तदा राजा तं इदं वचः उवाच । १७ सदृश्यां पत्न्यां उत्पन्नः गुणज्येष्ठः आत्मजः असि, तस्मात् यौवराज्यं अवाप्नुहि ।

१८ हे पुत्र ! ते स्नेहात् हितं वक्ष्यामि । १९ जितेन्द्रियः भव । कामक्रोधसमुत्थितानि व्यसनानि त्यजस्व । यः परोक्षया तथा प्रत्यक्षया अपि वृत्त्या मेदिनीं पालयति, तस्य मित्राणि नन्दन्ति ।

भाषा–वाक्य ।

१ अब वृद्ध राजा दशरथकी यह बुद्धि हुई, कि (जीवति मयि) मेरे जीवित रहते हुए ही राम कैसे राजा होवे ? २ उसको श्रेष्ठ गुणोंसे युक्त देखकर और मन्त्रियोंके साथ निश्चय कर, उसके यौवराज्यका निश्चय किया। ३ नाना प्रकारके नागरिक और पृथक् पृथक् (जानपदान्) देशोंके जन (अपि) भी (समानिनाय) बुलाये। ४ पश्चात् सब (परिषदं) सभाको आमंत्रण देकर (वसुधा–अधिपः) राजा बोले ।५ (कृत्स्न) सब लोगोंका हित करते हुए ही मेरा यह शरीर (जीर्णं) बुढ्ढा हो गया, इसलिये विश्रांति लेना (अभिरोचये) चाहता हूं। ६ श्रेष्ठ ही है मेरा (आत्म–जः) पुत्र सब गुणोंसे । प्रातःकाल यौवराज्यमें उसको नियुक्त करनेवाला हूं, उसके लिये अनुमति दें। ७ वे भी उसे बोले। हे राजा ! तेरे (सुतस्य) पुत्रके बहुत कल्याणमय गुण हैं। (असौ) यह धर्म जाननेवाला, सत्य (संध) प्रतिज्ञा करनेवाला, शीलवान् तथा (अन्–असूयकः) अनिन्दक है। ८ जितेन्द्रिय (सन्) होता हुआ भी, अपने जनोंके समान (पौरान्) पुरवासियोंसे नित्य कुशल पूछता है। ९ नहीं है उसकी (प्रसादः) प्रसन्नता और क्रोध (कदाचन) कभी भी निरर्थक। १० इसलिये हम भी सब शत्रुओंका दमन करनेवाले इस रामको यौवराज्यपर (स्थं) बैठा हुआ देखना चाहते हैं। ११ तब राजा दशरथ उत्तर देने लगा। १२ अहो ! मैं सन्तुष्ट हूं। रामके यौवराज्यके लिये सब ही सिद्धता होवे। १३ हे सुमन्त्र ! यहां रामको लाओ। १४ उसने भी ठीक ऐसा कहकर रामको वहां पहुँचा दिया। १५ रामने (प्राञ्जलिः) हाथ जोड (प्र-नतः) नम्रभावसे (पितुः) पिताके (अन्तिके) पास (अभि· प्रेत्य) जाकर अपना नाम (श्रावितवान्) सुनाया । १६ पिताके चरणोंकी वन्दना की। तब राजा उसे यह वचन बोला। १७ तू सदृश धर्मपत्नीमें उत्पन्न, गुणोंसे श्रेष्ठ पुत्र है, इसलिये यौवराज्यको प्राप्त हो । १८ हे पुत्र !

तेरे स्नेहसे कल्याणका उपदेश करता हूं। १२ जितेंद्रिय हो। काम और क्रोधसे उत्पन्न व्यसन छोड दो। जो अप्रत्यक्ष तथा प्रत्यक्ष (दृष्ट्या) बुद्धिसे (मेदिनीं) पृथिवीका पालन करता है, उसके मित्र आनंदित होते हैं।

समासाः।

संस्कृतमें दो अथवा अधिक शब्द इकट्ठे होकर समास बनते हैं और उनमें विशेष अर्थ होता है। इसको समझनेकी पद्धति यह है—

१ नृपतिः = नृणां पतिः नृपतिः (मनुष्योंका पति राजा; नरपति, नरेश)।
२ धर्मज्ञः = धर्मं जानाति इति (धर्मको जो जानता है, धर्मज्ञानी)।
३ सर्वशत्रुदमनः = सर्वशत्रूणां दमनः नाशकः (सब शत्रुओंका नाशक)।
४ गुणज्येष्ठः = गुणैः ज्येष्ठः (गुणोंसे श्रेष्ठ)।

इस रीतिसे पाठक समासोंकी ओर देखें और उनको समझनेका यत्न करें। यहां जैसा समासोंको संस्कृतमें ही खोलकर बताया है, उसी प्रकार और भी बताया जायगा।

समासाः।

१ जनकभ्राता = जनकस्य भ्राता (जनकका भाई)
२ सुताद्वयम् = सुतयोः द्वयम् (दो कन्या)
३ सर्वाभरणभूषिता = सर्वैः आभरणैः भूषिता (सब अलंकारोंसे सुशोभित)
४ मिथिलाधिपतिः = मिथिलायाः अधिपतिः (मिथिलाका राजा)
५ क्षत्रियविमर्दनः = क्षत्रियाणां विमर्दनः (क्षत्रियोंका नाश करनेवाला)
६ तद्वाक्यं = तस्य वाक्यं (उसका वाक्य)
७ कपाटयुक्तं = कपाटैः युक्तं (कपाटोंसे युक्त)
८ पुरोचनभयं = पुरोचनस्य भयं (पुरोचनका भय)
९ गृहद्वारं = गृहस्य द्वारं (घरका दरवाजा)
१० धर्मवित् = धर्मं वेत्ति (धर्म जाननेवाला)

इस रीतिसे पाठक समासोंका अभ्यास करें।

पाठ ४

यदा निवृत्ता राजानो धनुषः सज्जकर्मणः ।
अथोदतिष्ठद्विप्राणां मध्याज्जिष्णुरुदारधीः ॥ १ ॥
(महाभारत आदि. अ. १९०)

अन्वयः— यदा राजानः धनुषः सज्जकर्मणः निवृत्ता, अथ विप्राणां मध्यात् उदारधीः जिष्णुः उदतिष्ठत् ।

अर्थ— जब राजाओंने धनुष्यको सज्ज करनेके कर्मसे निवृत्त हुए, तब विप्रोंके बीचमेंसे उदार बुद्धिवाला (जिष्णुः) अर्जुन उठा ।

उदक्रोशन्विप्रमुख्या विधुन्वन्तोऽजिनानि च ।
दृष्ट्वा संप्रस्थितं पार्थमिन्द्रकेतुसमप्रभम् ॥ २ ॥

अन्वयः— इन्द्रकेतुसमप्रभं पार्थं संप्रस्थितं दृष्ट्वा विप्रमुख्याः अजिनानि विधुन्वन्तः उदक्रोशन् ।

अर्थ— (इन्द्रकेतु) बादलसमान तेजस्वी अर्जुनको (संप्रस्थितं) आते देखकर मुख्य ब्राह्मण (अजिनानि) चर्म (विधुन्वन्तः) कंपाते हुए (उदक्रोशन्) कोलाहल मचाने लगे ।

केचिदासन्विमनसः केचिदासन्मुदान्विताः ।
आहुः परस्परं केचिन्निपुणा बुद्धिजीविनः ॥ ३ ॥

अन्वयः— केचित् विमनसः आसन्, केचित् मुदान्विताः आसन्, केचित् निपुणाः बुद्धिजीविनः परस्परं आहुः ।

अर्थ— कोई कोई (विमनसः) दुःखी (आसन्) हुए, (केचित्) कोई (मुदा-अन्विताः) आनंदयुक्त हुए, कोई निपुणतायुक्त बुद्धिजीवी विप्र परस्पर बोलने लगे ।

यत्कर्णशल्यप्रमुखैः क्षत्रियैर्लोकविश्रुतैः ।
नानतं बलवद्भिर्हि धनुर्वेदपरायणैः ॥ ४ ॥
तत्कथं त्वकृतास्त्रेण प्राणतो दुर्बलीयसा ।
बटुमात्रेण शक्यं हि सज्जं कर्तुं धनुर्द्विजाः ॥ ५ ॥

अन्वयः— यत् कर्णशल्यप्रमुखैः लोकविश्रुतैः धनुर्वेदपरायणैः बलवद्भिः क्षत्रियैः न आनतं, हे द्विजाः ! तत् धनुः हि कथं अकृतास्त्रेण, प्राणतः दुर्बलीयसा बटुमात्रेण तु सज्जं कर्तुं शक्यम् ?

अर्थ— जो कर्ण, शल्य आदि लोकप्रसिद्ध धनुर्वेदप्रवीण बलवान् क्षत्रियोंने नहीं (आनतं) नमाया, हे द्विजो ! वह धनुष् कैसे (अकृत–अस्त्रेण) जिसने अस्त्रमें परिश्रम किया नहीं, ऐसे शक्तिसे ही दुर्बल (बटुमात्रेण) बालकने ही सज्ज करनेके लिये शक्य है ?

अवहास्या भविष्यन्ति ब्राह्मणाः सर्वराजसु ।
कर्मण्यस्मिन्नसंसिद्धे चापलादपरीक्षिते ॥ ६ ॥

अन्वयः— चापलात् अपरीक्षिते अस्मिन् कर्मणि असंसिद्धे सर्वराजसु ब्राह्मणाः अवहास्याः भविष्यन्ति ।

अर्थ— चपलतासे (अपरीक्षिते) अनजाने इस कर्ममें (असंसिद्धे) सिद्धि न मिलनेपर सब राजाओंमें ब्राह्मण हँसीके योग्य बन जायेंगे ।

यद्येष दर्पाद्धर्षाद्वाऽप्यथ ब्राह्मणचापलात् ।
प्रस्थितो धनुरायन्तुं वार्यतां साधु मा गमत् ॥ ७ ॥

अन्वयः— यदि एषः दर्पात् हर्षात् वा अपि अथ ब्राह्मण–चापलात् धनुः आयन्तुं प्रस्थितः, वार्यतां, साधु मा गमत् ।

अर्थ— यदि यह (दर्पात्) अहङ्कारसे, हर्षसे अथवा ब्राह्मणोंकी चपलतासे धनुष्य (आयन्तुं) झुकानेको (प्रस्थितः) जा रहा है, इसको (वार्यतां) रोको, भला न जाय ।

ब्राह्मणाः ऊचुः—

नाऽवहास्या भविष्यामो न च लाघवमास्थिताः ।
न च विद्विष्टतां लोके गमिष्यामो महीक्षिताम् ॥ ८ ॥

अन्वयः— ब्राह्मणाः ऊचुः– अवहास्याः न भविष्यामः लाघवं आस्थिताः च न, लोके महीक्षितां विद्विष्टतां च न गमिष्यामः ।

अर्थ— ब्राह्मण बोले कि, हम हंसनेयोग्य नहीं होंगे, लघुत्वको (आस्थिताः) प्राप्त नहीं होंगे। तथा लोकमें (महीक्षितां) राजाओंके द्वेषको नहीं प्राप्त होंगे।

समासाः।

अब इस पाठके श्लोकोंमें आये समासोंका विवरण देखिये—

१ उदारधीः= उदारा धीः (बुद्धिः) यस्य सः (उदार है बुद्धि जिसकी वह)।

२ विप्रमुख्याः= विप्रेषु मुख्याः (ब्राह्मणोंमें मुख्य)।

३ इन्द्रकेतुसमप्रभः= इन्द्रस्य केतुः इन्द्रकेतुः (मेघः) इन्द्रकेतोः समा इन्द्रकेतुसमा। इन्द्रकेतुसमा प्रभा यस्य सः। (जिसकी प्रभा इन्द्रकेतुके अर्थात् मेघके समान है)।

४ बुद्धिजीविनः= बुद्धिभिः जीवन्ति इति बुद्धिजीविनः। (बुद्धिसे जीनेवाले)।

५ लोकविश्रुतः= लोके विश्रुतः (लोकमें प्रसिद्ध)।

६ धनुर्वेदपरायणः= धनुषः वेदः धनुर्वेदः। धनुर्वेदे परायणः धनुर्वेद-परायणः (धनुर्वेदमें प्रवीण)।

७ अपरीक्षितं= न परीक्षितं अपरीक्षितं (अनजाना हुआ)।

सूचना

पाठक इन समासोंका अभ्यास करें और अर्थके अनुसार समास खोलनेका ज्ञान प्राप्त करें। समास यहां संस्कृतमें ही खोले जाते हैं। इस अभ्याससे पाठकोंकी गति संस्कृतमें अति शीघ्र होगी।

संस्कृत-वाचन-पाठः।

तव गुरोर्गृहं कुत्राऽस्ति? कदा च स तत्र भवति? मम गुरोर्गृहं पुण्यनगरे संस्कृत-पाठशाला-समीपमेवाऽस्ति। स तत्र प्रातः सायं च भवत्येव। दिवसस्य मध्यसमये तत्र स न भवति। संस्कृत-पाठ-शालां गत्वा शिष्यान् व्याकरणं पाठयति।

*

पाठ ५

पिछले चार पाठोंमें जो संस्कृत वाक्य दिये हैं, इनके सन्धि बनाकर यहां वाक्य दिये जाते हैं। संस्कृत श्लोकोंके अन्वयके सन्धि भी यहां ही पाठक देखेंगे। यदि पिछले पाठ हो चुके हैं, तो यह पाठ बिना कष्ट समझमें आ जायगा।—

संस्कृत-वाचन-पाठः।

रामायणम्।

अथ वृद्धस्य राज्ञो दशरथस्यैषा मतिर्बभूव यज्जीवति मयि रामः कथं राजा स्यात्। तं च समुदितैर्गुणैर्युक्तं समीक्ष्य, सचिवैः सार्धं निश्चित्य च, तस्य यौवराज्यममन्यत। नानानागरिकान् पृथग्जनपदानपि समानिनाय।

ततः सर्वां परिषदमामन्त्र्य वसुधाधिप उवाच। कृत्स्नस्य लोकस्य हितं चरत एव ममेदं शरीरं जीर्णमतो विश्रान्तिमभिरोचये। श्रेष्ठो हि ममात्मजः सर्वैर्गुणैः। प्रातर्यौवराज्ये तं नियोक्ताऽस्मि। तदनुमन्यताम्। इति।

तेऽपि तमूचुः। नृपते! ते सुतस्य बहवः कल्याणगुणः। धर्मज्ञः सत्यसन्धः शीलवाननसूयको ह्यसौ। विजितेन्द्रियोऽपि सन्स्वजनवत्पौरान् नित्यं कुशलं पृच्छति। नास्ति तस्य प्रसादः क्रोधश्च कदाचन निरर्थकः। तस्मात्सर्वशत्रुदमनमिमं रामं यौवराज्यस्थं वयमपि द्रष्टुमिच्छामः। इति।

तदा राजा दशरथः प्रत्युवाच। अहो! प्रीतोऽस्मि। रामस्य यौवराज्यस्य सर्वमेवोपकल्प्यताम्। भोः सुमंत्र! अत्र रामः शीघ्रमानीयताम्।

सोऽपि तथेत्युक्त्वा रामं तत्रानयांचक्रे। रामः प्राञ्जलिः प्रणतः पितुरन्तिकेऽभिप्रेत्य स्वं नाम श्रावितवान्। पितुश्चरणौ च ववन्दे। तदा राजा तमिदं वचनं उवाच।

सदृश्यां पत्न्यामुत्पन्नो गुणज्येष्ठ आत्मजोऽसि । तस्माद्यौवराज्यमवाप्नुहि । हे पुत्र ! स्नेहाद्धितं ते वक्ष्यामि । जितेन्द्रियो भव । कामक्रोधसमुत्थितानि व्यसनानि त्यजस्व । यः परोक्षया तथा प्रत्यक्षयाऽपि वृत्त्या मेदिनीं पालयति, तस्य मित्राणि नन्दन्ति ।

अब श्लोकोंके पाठका संधिसमेत संस्कृत देखिये—

महाभारतम् ।

यदा राजानो धनुषः सज्जकर्मणो निवृत्ता, अथ विप्राणां मध्यादुदारधीर्जिष्णुरुदतिष्ठत् । इन्द्रकेतुसमप्रभं पार्थं संप्रस्थितं दृष्ट्वा विप्रमुख्या अजिनानि विधुन्वन्त उदक्रोशन् ।

केचिद्विमनस आसन्, केचिन्मुदिता आसन्, केचिन्निपुणा बुद्धिजीविनः परस्परमाहुः ।

यत्कर्णशल्यप्रमुखैर्लोकविश्रुतैर्धनुर्वेदपरायणैर्बलवद्भिः क्षत्रियैर्नानतं, हे द्विजाः ! तद्धनुर्हि कथमकृतास्त्रेण प्राणतो दुर्बलीयसा बटुमात्रेण तु सज्जं कर्तुं शक्यम् ? चापलादपरीक्षितेऽस्मिन् कर्मण्यसंसिद्धे सर्वराजसु ब्राह्मणा अवहास्या भविष्यन्ति । यद्येष दर्पाद्धर्षाद्वाऽप्यथ ब्राह्मणचापलाद्धनुरायन्तुं प्रस्थितो, वार्यतां, साधु मा गमत् ।

ब्राह्मणा ऊचुः- अवहास्या न भविष्यामो, लाघवमास्थिताश्च न, लोके महीक्षितां विद्विष्टतां च न गमिष्यामः ।

सूचना ।

चारों पाठोंका सरल संस्कृत यह है । इसमें संधि बना दिये हैं । पाठक दोचार वार पढेंगे तो उनके मनमें सबका अर्थ आ सकता है । तथापि किसी स्थानका अर्थ समझमें न आया, तो वह वाक्य पिछले पाठोंमें देख सकते हैं, ऐसा करनेसे सब शंका निवृत्त हो जायगी । अब यहां कुछ सन्धि खोलकर बताते हैं ।

राज्ञो दशरथस्य = राज्ञः दशरथस्य ।
दशरथस्यैषा = दशरथस्य एषा ।
गुणैर्युक्तं = गुणैः युक्तं ।
पृथग्जानपदान् = पृथक् जानपदान् ।
विजितेन्द्रियोऽपि = विजितेन्द्रियः अपि ।
प्रीतोऽस्मि = प्रीतः अस्मि ।
प्रत्यक्षयाऽपि = प्रत्यक्षया अपि ।

अब संस्कृत वाक्योंके अर्थ संस्कृतमें ही देते हैं ।

१ वृद्धस्य राज्ञो दशरथस्यैषा मतिर्बभूव = जरठस्य नृपतेर्दशरथस्यैषा बुद्धिः सञ्जाता ।

२ तं च समुदितैर्गुणैर्युक्तं समीक्ष्य, सचिवैः सार्धं निश्चित्य च, तस्य यौवराज्यममन्यत = तं च शोभनैः शुभगुणैर्मण्डितं दृष्ट्वा, मन्त्रिभिः सह निश्चयं कृत्वा च, तस्य युवराजपदाभिषेचनममन्यत ।

३ ते सुतस्य बहवः कल्याणगुणाः = तव पुत्रस्य अनेका शोभना गुणाः सन्ति ।

४ अहो ! प्रीतोऽस्मि = अहो ! संतुष्टोऽस्मि ।

५ यदा राजानो धनुषः सज्जकर्मणो निवृत्ताः = यस्मिन् काले क्षत्रिया धनुष्यस्य सज्जकरणप्रयत्नात् परावृत्ताः ।

६ तदा विप्राणां मध्यादुदारधीर्जिष्णुरुदतिष्ठत् = तस्मिन् काले ब्राह्मणानां मध्यादुदारबुद्धिरर्जुन उत्थितवान् ।

सूचना ।

पाठक ये वाक्य वारंवार पढें । संस्कृतका ही अर्थ संस्कृतमें कैसा दिया जाता है और वह कैसा सुगम होता है, यह देखें और अनुभव करें । इसको पाठक बहुत वार पढें । बहुत वार पढनेसे ही बहुत लाभ होगा ।

पाठ ६

इस पाठमें निम्नलिखित शब्द स्मरण कीजिये। ये अकारान्त पुल्लिंग शब्द हैं। इनके रूप पाठक बना सकते हैं—

अकारान्त पुल्लिंगी शब्द।

अंशः	= भाग	कालः	= समय
स्नेहः	= मित्रता	अकालः	= अयोग्य समय
अभ्यासः	= अभ्यास	विरोधः	= विरोध, झगडा
वेदः	= वेद	कालज्ञः	= समय जाननेवाला
जनः	= मनुष्य	जलदः	= मेघ, बादल
उदयः	= उदय	आतपः	= धूप, सूर्यकिरण
समुद्रः	= सागर	क्रमः	= क्रम
क्रोधः	= क्रोध, गुस्सा	पराक्रमः	= पराक्रम
दण्डः	= दण्ड	विक्रमः	= पराक्रम
कर्णः	= कान	करः	= हाथ

इन शब्दोंके विभक्तियोंके रूप आप पूर्व बतायी रीतिसे बना सकते हैं। अब ये वाक्य पढिये—

संस्कृत-वाक्यानि।

१ अयं अध्ययनस्य कालः सञ्जातः। २ गच्छ स्वकीयं स्थानं, पुस्तकं गृहीत्वा अभ्यासं कुरु। ३ कारणं विना तेन सह विरोधं मा कुरु। ४ सः सूर्यस्य आतपे भ्रमणं करोति। ५ विक्रमयुक्तस्य क्षत्रियस्य सर्वत्र यशः भवति। ६ आकाशे इदानीं जलदः नास्ति, अतः अद्य वृष्टिः न भविष्यति। ७ अद्य प्रातः यदा सूर्यस्य उदयः जातः, तदा एव त्वया एतत् कर्म कृतम्। ८ दण्डेन सर्पं हन्मि। ९ यथा समुद्रस्य जलं क्षारं भवति, तथा तडागस्य जलं क्षारं न

भवति । १० क्रोधं कदापि मा कुरु । ११ स जनः यथा कर्णेन शृणोति, तथा त्वं अपि शृणोषि । १२ मम एव सनातनः अंशः जीवलोके जीवभूतः । १३ अस्मिन् मम सहोदरस्नेहः अस्ति एव । १४ विद्याभ्यासेन एव मनुष्यस्य उद्धारः भवितुं शक्यः, न अन्यथा । १५ कालज्ञः यथाकालं पुरुषार्थं करोति । १६ धर्मज्ञस्य राज्ञः युधिष्ठिरस्य हस्तिनापुरे कदा शासनं आसीत् ? १७ मन्त्रज्ञं मन्त्रिवरं आहूय राजा किं करोति ? १८ यत्र गुरुः वसति, तत्र अधुना गच्छ । १९ तत् भाषणं श्रुत्वा नारदप्रमुखाः सर्वे अपि मुनयः तत्र नैव स्थिताः । २० तस्य युद्धस्य अन्ते तव पुत्रः कुत्र गतः ? २१ कुलस्य यशोवर्धनः एक एव वीरः पुत्रः श्रेयान् भवति, न तु कुलघातिनः शतशः पुत्राः । २२ स तथा इति उक्त्वा युद्धाय प्रवृत्तः । २३ तस्मात् यज्ञात् निर्मलं यशः सर्वत्र प्रसृतम् । २४ त्वं पायसं पीत्वा पुष्टः भवसि किम् ? २५ यदा चैत्रः मासः भवति, तदा घर्मः अधिकः एव अस्मिन् देशे भवति । २६ यदा राजपुत्रस्य जन्म भवति, तदा अत्र महान् उत्सवः भवति । २७ सः महाबाहुः भीमः गदां गृहीत्वा युद्धाय गतः ।

भाषा-वाक्य ।

१ यह पढनेका समय हुआ है । २ जा अपने स्थानपर, पुस्तक लेकर अभ्यास कर । ३ कारणके विना उसके साथ झगडा न कर । ४ वह सूर्यकी धूपमें भ्रमण करता है । ५ पराक्रमी क्षत्रियका सर्वत्र यश होता है । ६ आकाशमें अब मेघ नहीं है, इसलिये वर्षा नहीं होगी । ७ आज सवेरे जब सूर्यका उदय हुआ तब ही तूने यह कर्म किया । ८ दण्डसे सापको मारता हूं । ९ सागरका जल खारा होता है, वैसा तालावका जल खारा नहीं होता है । १० गुस्सा कभी न कर । ११ वह मनुष्य जैसा कानसे सुनता है वैसा तू भी सुनता है । १२ मेरा ही सनातन अंश जीवलोकमें जीव बना है । १३ इसमें मेरा (सह-उदर) एक पेटसे जन्म होनेकी मित्रता है ही । १४ विद्याभ्याससे ही मनुष्यका उद्धार होना शक्य है, नहीं दूसरे प्रकारसे ।

१५ समय जाननेवाला योग्य कालमें पुरुषार्थ करता है। १६ धर्म जाननेवाले राजा युधिष्ठिरका (हस्तिनापुरे) देहलीमें कब राज्यशासन था? १७ विचार जाननेवाले मंत्रिश्रेष्ठको बुलाकर राजा क्या करता है? १८ जहां गुरु रहता है, वहां अब जा। १९ वह भाषण सुनकर नारद आदि सब मुनि वहां नहीं रहे। २० उस युद्धके अन्तमें तेरा पुत्र कहां गया? २१ कुलका यश बढानेवाला एक ही वीर पुत्र श्रेयस्कर होता है, परन्तु कुलघातक सैकडों पुत्र नहीं। २२ वह ठीक ऐसा कहकर युद्धके लिये प्रवृत्त हुआ। २३ उस यज्ञसे निर्मल यश सर्वत्र फैला। २४ तू पायस पीकर पुष्ट होता है क्या? २५ जब चैत्र महिना होता है, तब गर्मी अधिक ही इस देशमें होती है। २६ जब राजपुत्रका जन्म होता है, तब यहां बडा उत्सव होता है। २७ वह महाबाहु भीम गदा लेकर युद्धके लिये गया।

समासाः।

अब इस पाठमें आये हुए शब्दोंके समास कैसे बनते हैं देखिये—

१ अध्ययनस्य कालः	= (अध्ययनकालः)	= अभ्यासका समय।
२ स्वकीयं स्थानं	= (स्वस्थानं)	= अपनी जगह।
३ सूर्यस्य आतपः	= (सूर्यातपः)	= सूर्यका ताप।
४ सूर्यस्य उदयः	= (सूर्योदयः)	= सूर्यका उदय।
५ समुद्रस्य जलं	= (समुद्रजलं)	= समुद्रका पानी।
६ मनुष्यस्य उद्धारः	= (मनुष्योद्धारः)	= मनुष्यका उद्धार।
७ तस्य भाषणं	= (तद्भाषणं)	= उसका भाषण।
८ युद्धस्य अन्ते	= (युद्धान्ते)	= युद्धका अन्त।
९ कुलस्य यशः	= (कुलयशः)	= कुलका यश।
१० तव पुत्रः	= (त्वत्पुत्रः)	= तेरा पुत्र।

सूचना।

शब्दोंका समास कैसे बनाना वे यहां बताये हैं। यदि पाठक इसका मननपूर्वक अभ्यास करेंगे, तो उनको समासोंकी अच्छी तरह ज्ञान हो जायगा।

पाठ ७

संस्कृत—वाक्यानि ।

रामायणम् ।

१ मंथरा तु अयोध्यापुरीं सर्वशृङ्गारैः उद्भासितां, उच्छ्रितध्वज-मालिनीं दृष्ट्वा, परं विस्मयं आगता । २ सा अदूरस्थितां धात्रीं पप्रच्छ । ३ धात्री तु हर्षेण विदीर्यमाणा इव रामस्य यौवराज्या-भिषेकवृत्तान्तं मंथरायै आचचक्षे । ४ श्रुतमात्रेण तु धात्र्याः वचनेन क्षिप्रं अमर्षिता कुब्जा मंथरा । ५ क्रोधेन दह्यमाना इव पापदर्शिनी, मंथरा शयानां एव कैकेयीं गत्वा इदं अब्रवीत् । ६ उत्तिष्ठ मूढे ! शेषे किं ? भयं अभिवर्तते त्वाम् । ७ दशरथः यौवराज्ये रामं अभिषेक्ष्यति । सा अहं अनलेन दह्यमाना इव अस्मि, तव हितार्थं अत्र आगता । ८ हे महिषि ! कथं त्वं राज-धर्माणां उग्रत्वं न अवबुध्यसे ? ९ तव भर्ता दशरथः त्वयि अनर्थकं सान्त्वं प्रयुञ्जानः अपि अद्य कौसल्यां अर्थेन एव योज-यिष्यति । १० ते भरतं बन्धुषु अपवाह्य श्वः प्रभाते रामं निष्कंटके राज्ये स्थापयिता । ११ हे कैकेयी ! सा त्वं आत्मनः हितं कुरु इदानीम् । त्रातस्व आत्मानं पुत्रं भरतं मां च । १२ हर्षपूर्णा शयनात् उत्थिता कैकेयी इदं अब्रवीत् । १३ मंथरे ! इदं तु मह्यं त्वया परमं प्रियं आख्यातम् । १४ न अहं रामे वा भरते वा विशेषं उपलक्षये । १५ मंथरा तु तदा दुःखिता, एनां कैकेयीं उवाच ह । १६ बालिशे ! किमर्थं अस्थाने हर्षं कृतवती असि ? शोकसाग-रस्य मध्यगतां अपि आत्मानं न अवबुध्यसे ? १७ सुभगा किल कौसल्या, यस्याः पुत्रः यौवराज्ये अभिषेक्ष्यते । तां एव कौसल्यां इदानीं दासीवत् त्वं उपस्थास्यासि । १८ ते पुत्रः अपि रामस्य दास्यं कुर्यात् ।

भाषा-वाक्य ।

१ मंथरा तो अयोध्या नगरीको सब (शृंगारैः) सजावटोंसे (उद्भासितां) तेजस्वी (उच्छ्रित) ऊंचे किये हुये (ध्वजमालिनीं) झंडोंकी मालासे युक्त देखकर, बडे (विस्मयं) आश्चर्यको प्राप्त हो गई । २ उसने समीप स्थित दाईसे (पप्रच्छ) पूछा । ३ दाई तो हर्षसे फट जानेके समान होकर रामके यौवराज्याभिषेकका वृत्तांत मंथरासे कहने लगी । ४ सुनते ही दाईके वचनसे (क्षिप्रं) तत्काल (अमर्षिता) क्रोधित हुई (कुब्जा) टेढी मंथरा । ५ क्रोधसे जली हुईके समान पापी मंथरा सोनेवाली कैकेयीके पास जाकर यह बोली । ६ उठ मूर्खे ! सोती है क्यों ? भय आया है तेरे प्रति । ७ दशरथ यौवराज्यपर रामको अभिषेक करेगा । वह मैं (अनलेन) अग्निसे जली हुईके समान हुई हूं, तेरे हितके लिये यहां आयी हूं । ८ हे रानी ! कैसे तू राजनीतिका उग्रत्व नहीं जानती ? ९ तेरा पति दशरथ तेरे लिये निरर्थक शांतिका भाषण (प्रयुंजानः) करनेवाला आज कौसल्याको धनसे ही संयुक्त करेगा । १० तेरे भरतको भाइयोंके पास भेजकर कल प्रातःकाल रामको निष्कंटक राज्यमें स्थापन करेगा । ११ हे कैकेयी ! वह तू अपना हित कर अब । रक्षा कर अपनी, पुत्र भरतकी और मेरी । १२ हर्षसे परिपूर्ण होकर शयनसे उठी कैकेयी यह बोली । १३ मंथरे ! यह तो मेरे लिये तूने परम प्रिय कहा । १४ नहीं मैं राममें अथवा भरतमें विशेष भेद देखती हूं । १५ मंथरा तो तब दुःखी हुई, इस कैकेयीसे बोली । १६ मूढे ! क्यों (अस्थाने) अयोग्य स्थानमें हर्ष करती ? शोकसमुद्रके मध्यमें पहुंचती हुई, अपने आपको भी नहीं जानती ? १७ भाग्यवान् निश्चयसे कौसल्या है, जिसका पुत्र यौवराज्यपर अभिषिक्त होगा । उसी कौसल्याके पास अब दासीके समान तू रहेगी । १८ तेरा पुत्र रामका दास्य करेगा ।

समासाः ।

अब इस पाठमें कुछ समास देखिये—

१ अदूरस्थिता = दूरे स्थिता दूरस्थिता । न दूरस्थिता अदूरस्थिता । (जो नहीं दूर खडी—समीप खडी हुई)

२ उग्रत्वं = उग्रस्य भावः उग्रत्वं । (उग्रका गुण उग्रत्व है)

३ अनर्थकं = न विद्यते अर्थः यस्मिन् तत् अनर्थकम् । (जो धन देनेवाला नहीं, निरर्थक)

४ हर्षपूर्णा = हर्षेण पूर्णा । (हर्षसे परिपूर्ण)

५ अस्थानं = न स्थानं अस्थानम् । (जो स्थान नहीं)

६ शोकसागरः = शोकस्य सागरः शोकसागरः । (शोकका समुद्र)

७ मध्यगता = मध्ये गता मध्यगता । (बीचमें प्राप्त)

८ अभिषेकवृत्तान्तः = अभिषेकस्य वृत्तान्तः । (अभिषेकका वृत्तान्त)

९ पापदर्शनी = पापं पश्यति या । (जो पाप देखती)

१० धात्रीवचनं = धात्र्याः वचनं । (दाईका भाषण)

११ अयोध्या = न योद्धुं शक्या । (युद्ध करना अशक्य)

१२ उच्छ्रितध्वजमालिनी = ध्वजानां माला ध्वजमाला, उच्छ्रिता ध्वजमाला यस्यां सा । उच्छ्रितध्वजमालाभिः युक्ता । (ध्वजपताकाओंसे सुशोभित)

१३ राजधर्मः = राज्ञां धर्मः । (राजाका धर्म)

१४ सुभगा = सुष्ठु भाग्यं यस्याः सा । (उत्तम भाग्ययुक्त)

१५ धर्मज्ञः = धर्मं जानाति इति । (धर्म जाननेवाला)

१६ राजपुत्रः = राज्ञः पुत्रः । (राजाका पुत्र)

१७ विक्रमयुक्तः = विक्रमेण युक्तः । (पराक्रम करनेवाला)

इस तरह पाठक इन समासोंका अभ्यास करें । समास खोलनेसे उनका अर्थ शीघ्र ही ध्यानमें आता है, इसका अनुभव पाठकोंको यहां होगा ।

संधि किये हुए वाक्य ।

दशरथो यौवराज्ये राममभिषेक्ष्यति । साऽहमनलेन दह्यमानेवाऽस्मि, तव हितार्थमत्रागता । हे महिषि ! कथं त्वं राजधर्माणामुग्रत्वं नावबुध्यसे ? तव भर्ता दशरथस्त्वय्यनर्थकं सान्त्वं प्रयुञ्जानोऽद्य कौसल्यामर्थेनैव योजयिष्यति ।

पाठ ८

केचिदाहुर्युवा श्रीमान्नागराजकरोपमः ।
पीनस्कन्धोरुबाहुश्च धैर्येण हिमवानिव ॥ ९ ॥
सिंहखेलगतिः श्रीमान्मत्तनागेन्द्रविक्रमः ।
संभाव्यमस्मिन्कर्मेदमुत्साहाच्चानुमीयते ॥ १० ॥
(महाभारत आदि० १९०)

अन्वयः— केचित् आहुः युवा, श्रीमान्, नागराजकरोपमः, पीनस्कंधोरुबाहुः, धैर्येण हिमवान् इव, सिंहखेलगतिः, श्रीमान्, मत्तनागेन्द्रविक्रमः। उत्साहात् अनुमीयते इदं कर्म अस्मिन् संभाव्यम् ।

अर्थ— कोई बोले कि यह (युवा) जवान, श्रीमान्, (नागराज-कर-उपमः) गजराजकी सूंडके समान् हाथवाला, (पीनस्कंध-उरु-बाहुः) विशाल गर्दन उरु और बाहुवाला, धैर्यसे हिमाचल जैसा, सिंहके खेलकी नाई चलनेवाला, श्रीमान्, उन्मत्त (नाग-इंद्र-विक्रमः) गजश्रेष्ठके समान विक्रमी है। इसके उत्साहसे अनुमान होता है कि यह कर्म इसमें संभवनीय है ।

शक्तिरस्य महोत्साहा न ह्यशक्तः स्वयं व्रजेत् ।
न च तद्विद्यते किञ्चित्कर्म लोकेषु यद्भवेत् ॥ ११ ॥
ब्राह्मणानामसाध्यं च नृषु संस्थानचारिषु ।

अन्वयः— अस्य महोत्साहा शक्तिः । हि अशक्तः स्वयं न व्रजेत् । लोकेषु तत् किञ्चित् कर्म न विद्यते यत् संस्थानचारिषु नृषु ब्राह्मणानां असाध्यं भवेत् ।

अर्थ— इसकी बडी उत्साहकी शक्ति है। (हि) क्योंकि अशक्त स्वयं ही नहीं जायेगा। लोकोंमें वह कोई भी कर्म नहीं है कि जो [संस्थानचारिषु] संघोंमें चलनेवाले मनुष्योंमें ब्राह्मणोंके लिये असाध्य हो ।

अब्भक्षा वायुभक्षाश्च फलाहारा दृढव्रताः ॥ १२ ॥
दुर्बला अपि विप्रा हि बलीयांसः स्वतेजसा ।
ब्राह्मणो नावमन्तव्यः सदसद्वा समाचरन् ॥ १३ ॥
सुखं दुःखं महद्ह्रस्वं कर्म यत्समुपागतम् ।

अन्वयः— अब्भक्षाः, वायुभक्षाः, फलाहाराः, दृढव्रताः, दुर्बलाः अपि विप्राः हि स्वतेजसा बलीयांसः । सत् असत्, सुखं दुःखं, महत् ह्रस्वं, यत् समुपागतं कर्म वा समाचरन् ब्राह्मणः न अवमन्तव्यः ।

अर्थ— (अप्-भक्षाः) जलभक्षण करनेवाले, वायुभक्षण करनेवाले, फल-भोजन करनेवाले, दृढव्रती, दुर्बल भी ब्राह्मण हुए तो भी अपने तेजसे बलवान् ही होते हैं । इस कारण भला बुरा, सुखदाई दुःखदाई, बडा छोटा जो कोई (समुपागतं) प्राप्त कर्म हो उसको (समाचरन्) करनेवाले ब्राह्मणका अवमान नहीं करना चाहिये ।

जामदग्न्येन रामेण निर्जिताः क्षत्रिया युधि ॥ १४ ॥
पीतः समुद्रोऽगस्त्येन अगाधो ब्रह्मतेजसा ।

अन्वयः— जामदग्न्येन रामेण युधि क्षत्रियाः निर्जिताः । ब्रह्मतेजसा अगस्त्येन अगाधः समुद्रः पीतः ।

अर्थ— जमदग्निपुत्र परशुरामने युद्धमें क्षत्रियोंका (निर्जिताः) पराभव किया । ब्रह्मतेजसे तेजस्वी अगस्त्यने अगाध समुद्र [पीतः] पीया था ।

तस्मात् ब्रुवन्तु सर्वेऽत्र बटुरेष धनुर्महान् ॥ १५ ॥
आरोपयतु शीघ्रं वै तथेत्यूचुर्द्विजर्षभाः ।

अन्वयः— तस्मात् सर्वे अत्र ब्रुवन्तु, एषः महान् बटुः धनुः शीघ्रं आरोपयतु वै । द्विजर्षभाः तथा इति ऊचुः ।

अर्थ— इसलिये सब यहां (ब्रुवन्तु) बोलें कि यह बडा युवक धनुपर शीघ्र गुण चढावे ही । ब्राह्मणश्रेष्ठोंने वैसा हो ऐसा कहा ।

एवं तेषां विलपतां विप्राणां विविधा गिरः ॥ १६ ॥
अर्जुनो धनुषोऽभ्याशे तस्थौ गिरिरिवाचलः ।

अन्वयः— विविधाः गिरः एवं विलपतां तेषां विप्राणां अर्जुनः धनुषः अभ्याशे गिरिः इव अचलः तस्थौ ।

अर्थ— विविध (गिरः) भाषण इस प्रकार (विलपतां) बोलनेवाले इन ब्राह्मणोंके बीचमेंसे अर्जुन धनुष्यके निकट (गिरिः) पर्वतके समान (अ-चलः) स्थिर (तस्थौ) खडा हुआ ।

समासाः ।

इस पाठमें आये हुए समासोंका परिचय अब दिया जाता है—

१ नागराजकरोपमः = नागानां राजा नागराजः । नागराजस्य करः नागराजकरः । नागराजकरस्य उपमा यस्य सः नागराजकरोपमः । (हाथियोंमेंसे श्रेष्ठ हाथीकी सूंडकी उपमा है जिसको ।)

२ पीनस्कन्धोरुबाहुः = स्कन्धः च ऊरू च बाहू च स्कन्धोरुबाहवः । पीनाः स्कन्धोरुबाहवः यस्य सः पीनस्कन्धोरुबाहुः । (जिसके कंधे, उरु और बाहु विशाल हैं ।)

३ मत्तनागेन्द्रविक्रमः— नागानां इन्द्रः नागेन्द्रः । मत्तः च असौ नागेन्द्रः च मत्तनागेन्द्रः । मत्तनागेन्द्रस्य विक्रमः इव विक्रमः यस्य । (उन्मत्त गजराजके समान विक्रमी ।)

४ अशक्तः = न शक्तः । (शक्तिरहित ।)

५ दृढव्रतः = दृढं व्रतं यस्य सः । (दृढ नियमवाला)

६ संस्थानचारी = संस्थाने चरति इति । (संघमें जानेवाला)

७ अब्भक्षाः = अपः भक्षयन्ति इति । (जल पीनेवाले)

८ वायुभक्षाः = वायुं भक्षयन्ति इति । (वायु खानेवाले)

९ द्विजर्षभाः = द्विजेषु ऋषभाः (ब्राह्मणोंमें श्रेष्ठ)

१० अचलः = न चलः अचलः (स्थिर, न हिलनेवाला)

सूचना ।

इस पाठमें आये हुए श्लोकोंमें और भी बहुत समास हैं, वे सब यहां नहीं दिये हैं । जो दिये हैं उन्हीका ही वारंवार अभ्यास पाठक करें । विशेषतः समासका संस्कृतमें दिया हुआ विवरण वारंवार पढिये ।

संधि।

केचिदाहुः	= केचित + आहुः।
आहुर्युवा	= आहुः + युवा।
स्कंधोरुः	= स्कंध + ऊरुः।
नागेन्द्रः	= नाग + इन्द्र।
उत्साहाच्च	= उत्साहात् + च।
महोत्साहः	= महा + उत्साहः।
ह्यशक्तः	= हि + अशक्तः।
तद्विद्यते	= तत् + विद्यते।
अब्भक्षाः	= अप् + भक्षाः।

इस तरह पाठक संधियोंका अभ्यास करें।

पाठ ९

गत दो पाठोंमें जो संस्कृत वाक्य दिये हैं, उनके संधि बनाकर सरल संस्कृत वाक्य इस पाठमें देते हैं—

(१) रामायणम्।

मन्थरा त्वयोध्यां पुरीं सर्वशृंगारैरुद्भासितामुच्छ्रितध्वजमालिनीं दृष्ट्वा परं विस्मयमागता। साऽदूरस्थितां धात्रीं पप्रच्छ। धात्री तु हर्षेण विदीर्यमाणेव रामस्य यौवराज्याभिषेकवृत्तान्तं मन्थराया आचचक्षे। श्रुतमात्रेण तु धात्र्या वचनेन क्षिप्रममर्षिता कुब्जा मन्थरा। क्रोधेन दह्यमानेव मन्थरा पापदर्शिनी शयानामेव कैकेयीं गत्वेदानीमिदमब्रवीत्।

उत्तिष्ठ मूढे! शेषे किम्? भयमभिवर्तते त्वाम्। दशरथो यौवराज्ये राममभिषेक्ष्यति। साऽहमनलेन दह्यमानेवास्मि। तव

हितार्थमागता । हे महिषि ! कथं त्वं राजधर्माणामुग्रत्वं नावबुध्यसे ? तव भर्ता दशरथस्त्वय्यनर्थकं सान्त्वं प्रयुञ्जानोऽद्य कौसल्यामर्थेनैव योजयिष्यति । ते भरतं बन्धुष्वपवाह्य श्वः प्रभाते रामं निष्कण्टके राज्ये स्थापयिता ।

हे कैकेयि ! सा त्वमात्मनो हितं कुर्विदानीम् । त्रायस्वात्मानं पुत्रं भरतं मां च । हर्षपूर्णा शयनादुत्थिता कैकेयीदमब्रवीत् । मंथरे ! इदं तु मह्यं त्वया परमं प्रियमाख्यातम् । नाहं रामे वा भरते वा विशेषमुपलक्षये ।

मंथरा तु तदा दुःखिता । एनां कैकेयीमुवाच च । बालिशे ! किमर्थमस्थाने हर्षं कृतवत्यसि ? शोकसागरस्य मध्यगतामप्यात्मानं नावबुध्यसे । सुभगा किल कौसल्या, यस्याः पुत्रो यौवराज्येऽभिषेक्ष्यते । तामेव कौसल्यामिदानीं दासीवत्त्वमुपस्थास्यसि । ते पुत्रोऽपि रामस्य दास्यं कुर्यात् ।

(२) महाभारतम् ।

अब पूर्व पाठके श्लोकोंके अन्वयका संधियुक्त संस्कृत देखिये—

केचिदाहुर्युवा श्रीमान्नागराजकरोपमः पीनस्कन्धोरुबाहुर्धैर्येण हिमवानिव सिंहखेलगतिर्मत्तनागेन्द्रविक्रमः । उत्साहादनुमीयत, इदं कर्मास्मिन्संभाव्यम् ।

अस्य महोत्साहा शक्तिः । ह्यशक्तः स्वयं न व्रजेत् । लोकेषु तत्किञ्चित्कर्म न विद्यते, यत्संस्थानचारिषु नृषु ब्राह्मणानामसाध्यं भवेत् ।

अब्भक्षा वायुभक्षाः फलाहारा दृढव्रता दुर्बला अपि विप्रा हि स्वतेजसा बलीयांसः । सदसत् सुखं दुःखं महद्ह्रस्वं यत्समुपागतं कर्म वा समाचरन् ब्राह्मणो नावमन्तव्यः ।

जामदग्न्येन रामेण युधि क्षत्रिया निर्जिताः। ब्रह्मतेजसाऽगस्त्येनागाधः समुद्रः पीतस्तस्मात्सर्वेऽत्र ब्रुवन्त्वेष महान्बटुर्धनुः शीघ्रमारोपयतु वै। द्विजर्षभास्तथेत्यूचुः।

विविधा गिर एवं विलपतां तेषां विप्राणामर्जुनो धनुषोऽभ्याशे गिरिरिवाचलस्तस्थौ।

सूचना।

पूर्व स्थानके पाठोंका सरल संस्कृत यह है। इसमें संधि किये गये हैं। पाठक दोचार बार पढेंगे तो उनको यह भी समझमें आ जायगा। यदि किसी स्थानपर समझमें नहीं आया, तो वे इस वाक्यको पूर्व पाठोंमें देखकर उसका अर्थ जान सकते हैं। अब थोडेसे संधि खोलकर बताये जाते हैं—

संधि।

शृंगारैरुद्भासिता	= शृंगारैः उद्भासिता।
दह्यमानेव	= दह्यमाना इव।
गत्वेदानीं	= गत्वा इदानीं।
त्वय्यनर्थकं	= त्वयि अनर्थकं।
बन्धुष्वपवाह्य	= बन्धुषु अपवाह्य।
कैकेयीदमब्रवीत्	= कैकेयी इदं अब्रवीत्।
कृतवत्यसि	= कृतवती असि।
केचिदाहुः	= केचित् आहुः।

अब कुछ संस्कृत वाक्योंका अर्थ संस्कृतमें ही दिया जाता है—

संस्कृत वाक्योंका संस्कृतमें अर्थ।

१ साऽदूरस्थितां धात्रीं पप्रच्छ = सा समीपस्थां उपमातरं अपृच्छत्।

२ उत्तिष्ठ मूढे! = उत्तिष्ठ मूर्खे!

३ साऽहमनले दह्यमानेवास्मि = सा अहं अग्निना ज्वलिता इव अस्मि।

४ सा त्वमात्मनो हितं कुर्विदानीं = सा त्वं स्वकीयं मङ्गलं विधेहि अधुना।

५ इदं तु मह्यं त्वया परमं प्रियमाख्यातं = एतत् तु मह्यं त्वया अत्यन्तं प्रीतिकरं कथितम् ।

६ शोकसागरस्य मध्यगतामप्यात्मानं नावबुध्यसे = दुःखसमुद्रस्य अन्तर्गतां अपि आत्मानं न जानासि ।

७ ते पुत्रोऽपि रामस्य दास्यं कुर्यात् = तव सुतः अपि रामचन्द्रस्य सेवां कुर्यात् ।

इस प्रकार संस्कृतका अर्थ संस्कृतमें करनेसे आपका संस्कृतके साथ परिचय बहुत ही बढ जायगा ।

पाठ १०

अब इस पाठमें निम्नलिखित अकारान्त पुल्लिंग शब्दोंका अभ्यास कीजिये—

शब्द ।

व्यवहारः	= व्यापार	दरिद्रः	= दरिद्री, निर्धन
यवः	= जौ	पुरुषः	= पुरुष
उपयोगः	= उपयोग	पुरुषोत्तमः	= पुरुषोंमें उत्तम
अभियोगः	= लगना, मुकदमा, युद्ध	प्रणयः	= प्रीति, मित्रता
		दम्भः	= ढोंग
दिवाकरः	= सूर्य	स्वेदः	= पसीना
न्यासः	= रखना	कण्टकः	= कांटा
वत्सः	= बछडा	संस्कारः	= संस्कार
बालः	= बालक	रसः	= रस
गन्धः	= गंध, सुगंध	भेदः	= भेद
स्पर्शः	= स्पर्श	दीपः	= दीप
संयोगः	= संयोग		

अकारान्त पुल्लिंग शब्दोंके सातों विभक्तियोंके रूप बनाना पाठक जानते ही हैं। अतः वे इन शब्दोंके रूप बनाकर विविध वाक्य बना सकते हैं—

संस्कृत-वाक्यानि।

१ व्यवहारे कुशलः पुरुषः विजयं प्राप्नोति। २ सः दिने यवान् रात्रौ च व्रीहीन् भक्षयति। ३ यः बलस्य उपयोगं जानाति, सः एव श्रेष्ठः भवति, न अन्यः। ४ त्वया तेन सह किमर्थं अभियोगः कृतः? ५ राष्ट्रस्य उद्धाराय सर्वस्वस्य न्यासः कर्तव्यः एव। ६ स बालः भूत्वा वृद्धः इव वदति। ७ तं गोवत्सं इदानीं अत्र आनय। ८ तस्य पुष्पस्य गन्धः शोभनः अस्ति। ९ यदा पिता बालकं पश्यति, तदा सुखी भवति। १० एषः पूर्वमार्गेण सह पश्चिम-मार्गस्य संयोगः अस्ति। ११ दरिद्रः पुरुषः धनहीनः भवति। १२ पुरुषस्य भाग्यं देवः न जानाति, कुतः मनुष्यः? १३ पुरुषः पुरुषोत्तमस्य उपासनां करोतु। १४ दम्भेन मनुष्यस्य अधःपातः भवति। १५ ग्रीष्मकाले मनुष्यस्य शरीरात् स्वेदः निःसरति। १६ यदि वृक्षस्य कण्टकः पादे प्रविशति, तर्हि कण्टकेन एव सः बहिः निःसार्यः। १७ संस्कारेण हीनः शूद्रः। संस्कारेण एव द्विजः भवति। १८ फलानां मधुरः रसः एव पेयः। १९ भेदः एव युद्धस्य मूलं अस्ति। २० अन्धकारे दीपः एव मार्गं दर्शयति। २१ अन्नस्यार्धं भागं शूद्राय स ददाति।

भाषा-वाक्य।

१ व्यवहारमें कुशल मनुष्य विजय प्राप्त करता है। २ वह दिनमें जौ और रात्रिमें चावल खाता है। ३ जो बलका उपयोग जानता है, वही श्रेष्ठ होता है, दूसरा नहीं। ४ तूने उससे किस लिये युद्ध किया? ५ राष्ट्रके उद्धारके लिये सर्वस्वका दान करना ही चाहिये। ६ वह बालक होकर भी वृद्धके समान बोलता है। ७ उस गोवत्सको अब यहां ला। ८ उस फूलका गन्ध उत्तम है। ९ जब पिता बालकको देखता है, तब सुखी होता है।

१० यह पूर्व मार्गके साथ पश्चिम मार्गका संयोग है। ११ दरिद्र मनुष्य धनहीन होता है। १२ पुरुषका भाग्य देव नहीं जानता, कैसे मनुष्य जानेगा? १३ पुरुष पुरुषश्रेष्ठकी उपासना करे। १४ ढोंगसे मनुष्यका अधः-पात होता है। १५ ग्रीष्मकालमें मनुष्यके शरीरसे पसीना निकलता है। १६ यदि वृक्षका कांटा पांवमें प्रवेश करता है, तो कांटेसे ही वह बाहर निकालना योग्य है। १७ संस्कारसे हीन शूद्र। संस्कारसे ही द्विज होता है। १८ फलोंका मधुर रस ही पीने योग्य है। १९ भेद ही लडाईका मूल है। २० अन्धकारमें दीप ही मार्ग बताता है। २१ अन्नका आधा भाग शूद्रको वह देता है।

संस्कृत-वाचन-पाठः।

यथा शूद्रः अन्नं खादति, तथा एव इतरः जनः भोजनं करोति। गान्धारी दुर्योधनं पुत्रं अजनयत्। कुन्ती च युधिष्ठिरं पुत्रं अजनयत्। राजा सैनिकान् दूरतः विसृज्य आश्रमं गच्छति। तस्य शब्दं श्रुत्वा राक्षसी तत्र एव आगता। पूजितः मुनिः इदं वचनं अब्रवीत्। यत् सत्यं एव परमः धर्मः इति। सा कन्या तस्मिन् एव आश्रमे विद्याऽध्ययनादिकं समाप्य स्वगृहं आगता। तेन राज्ञा तस्मै जनाय धनं दत्तं, तत् धनं गृहीत्वा सः देशान्तरं गतः तत्र विद्याऽध्ययनं कर्तुम्। ज्ञानात् एव बन्धनात् मुक्तिः भवति, तथा कर्मकरणात् अपि भवति।

संधि किये हुए वाक्य।

यथा शूद्रोऽन्नं खादति, तथैवेतरो जनो भोजनं करोति। गान्धारी दुर्योधनं पुत्रमजनयत् कुन्ती च युधिष्ठिरं पुत्रमजनयत्। राजा सैनिकान्दूरतो विसृज्याश्रमं गच्छति। तस्य शब्दं श्रुत्वा राक्षसी तत्रैवागता। पूजितो मुनिरिदं वचनमब्रवीद्यत्सत्यमेव परमो धर्म इति। सा कन्या तस्मिन्नेवाश्रमे विद्याऽध्ययनादिकं समाप्य स्वगृहमागता। ज्ञानादेव बन्धनान्मुक्तिः भवति।

पाठ ११

संस्कृत-वाक्यानि ।

१ एवं तु उक्ता कैकेयी क्रुद्धा बभूव। अब्रवीत् च मंथराम्। रामं वनं अद्य क्षिप्रं प्रस्थापयामि। २ भरतं एव यौवराज्ये अभिषेचये। एतत् तु संदृश्य केनापि उपायेन साधयेदम्। ३ पापदर्शिनी मंथरा अपि रामार्थं उपहसन्ती कैकेयीं अब्रवीत्। हन्त इदानीं पश्य, यथा ते भरतः राज्यं प्राप्स्यति। ४ पुरा देवासुरयुद्धे ते पतिः देवराज्यस्य साहाय्यं अकरोत्। ५ तदा त्वं एव उपादाय गत आसीत्। ६ शम्बरासुरेण तत्र राजा महायुद्धं अकरोत्। ७ यदा असुरैः शस्त्रैः शकलीकृतः राजा अभवत्, तदा त्वया एव तत्र रक्षितः। ८ तुष्टेन तदा तेन राज्ञा द्वौ वरौ ते दत्तौ। ९ सः च त्वया उक्तः, यदा इच्छेयं तदा गृह्णीयां इति। १० याचस्व अधुना तौ वरौ। भरतस्य अभिषेचनं रामस्य प्रव्राजनं वर्षाणि चतुर्दश, इति रूपौ द्वौ वरौ। ११ तावता हि कालेन स्थिरो भविष्यति पुत्रः ते प्रजाभावगतस्नेहः। १२ पश्चात् कैकेयी एवं प्रोत्साहिता आभरणानि मुक्त्वा क्रोधागारं प्रविश्य, भूमौ एव निपतिता। १३ महाराजः दशरथः प्रियार्हां प्रियं आख्यातुं कैकेय्याः अन्तःपुरं प्रविवेश। १४ शयनोत्तमे तां न ददर्श सः। न हि तस्य तां वेलां देवी पुरा अत्यवर्तत। १५ प्रतिहारी तु कृताञ्जलिः उवाच। देव! देवी भृशं क्रुद्धा आभिद्रुता क्रोधागारम्। १६ अपापः राजा पापसंकल्पां तां कैकेयीं धरणीतले ददर्श। १७ स तां उवाच, किमर्थं भूमौ शेषे? १८ कैकेयी उवाच– प्रतिजानीष्व प्रतिज्ञां यदि कर्तुं इच्छसि। १९ अनन्तरं ते व्याहरिष्यामि यथा मम अभिप्रार्थितम्।

भाषा-वाक्य ।

१ इस प्रकार कहनेपर कैकेयी क्रुद्ध हो गई और बोली मन्थरासे। रामको वनमें आज शीघ्र भेजूंगी। २ भरतको ही यौवराज्यपर अभिषेक करूंगी। यह तो देख लेना, किसी उपायसे यह सिद्ध कर। ३ पापी मन्थरा भी रामके कारण उपहास करनेवाली कैकेयीसे बोली। अजी, अब देख कैसा तेरा भरत राज्य प्राप्त करेगा। ४ प्राचीन समयमें देव और असुरोंके युद्धमें तेरा पति देवराजकी सहायता करता रहा। ५ तुझे ही लेकर गया था। ६ शंबरासुरसे वहां राजाने बडा युद्ध किया। ७ असुरोंने शस्त्रोंसे जब राजाको जर्जरित किया तब तूने ही वहां रक्षित किया। ८ सन्तुष्ट हुए उस राजाने दो वेर तेरे लिये दिये। ९ उससे तुमने कहा कि जब इच्छा करूंगी तब लूंगी। १० मांग अब वे दो वर। भरतका राज्याभिषेक और रामको बाहर भेजना चौदह वर्ष, ये दो वर। ११ उतने ही समयसे स्थिर हो जायगा पुत्र तेरा प्रजाके स्नेहसे। १२ पश्चात् कैकेयी इस प्रकार प्रोत्साहित होकर, आभूषण फेंक कर क्रोधागारमें प्रविष्ट हो भूमिपर ही पडी रही। १३ महाराज दशरथ प्रियके लिये योग्य कैकेयीको प्रिय (आख्यातुं) कहनेके लिये कैकेयीके अन्तःपुरमें प्रविष्ट हुआ। १४ शयनके लिये उत्तम मंदिरमें उसे नहीं देखा उसने। उसके उस समयका देवी पहिले अतिक्रमण नहीं करती थी। १५ प्रतिहारी तो हाथ जोडकर बोली, हे (देव) राजा! देवी बहुत क्रोधित हुई है और (अभिद्रुता) गई है क्रोधशालामें। १६ निष्पाप राजाने पापसंकल्पा उस कैकेयीको भूमिके ऊपर पडी देखी। १७ वह उससे बोला, किस लिये भूमिपर सोती है? १८ कैकेयी बोली- (प्रतिजानीष्व) प्रतिज्ञा कर, यदि प्रतिज्ञा पूर्ण करना चाहता है। १९ पश्चात् तुझे कहूंगी जैसी मेरी इच्छा है।

समासाः ।

१ **देवासुरयुद्धं** = देवाः च असुराः च देवासुराः। देवासुराणां युद्धं देवासुरयुद्धं। (देव और असुरोंका युद्ध)

२ **देवराजः** = देवानां राजा देवराजः। (देवोंका राजा)

३ **शम्बरासुरः** = शम्बरः च असौ असुरः च शम्बरासुरः। (शम्बर नामक असुर)

४ क्रोधागारं = क्रोधस्य आगारं क्रोधागारं । (क्रोधभवन)
५ प्रजाभावगतस्नेहः = प्रजायाः भावः प्रजाभावः प्रजाभावे गतस्नेहः।
(प्रजाभावमें प्राप्त स्नेहसे युक्त)
६ शयनोत्तमं = शयनाय उत्तमं । (शयनके लिये उत्तम) ।
७ कृताञ्जलिः = कृता अञ्जलिः येन सः कृताञ्जलिः । (हाथ जोडे हुए)
८ पापदर्शिनी = पापं पश्यति इति । (पाप देखनेवाली, पापी)
९ रामार्थं = रामस्य अर्थं । (रामके लिये)
१० देवराजः = देवानां राजा । (देवोंका राजा)
११ महायुद्धं = महच्च तद्युद्धं । (बडा युद्ध)
१२ शयनोत्तमं = शयनानां उत्तमं । (उत्तम बिछाना)
१३ अपापः = न विद्यते पापं यस्मिन् । (जिसमें पाप नहीं)
१४ पापसंकल्पाः = पापः संकल्पः यस्याः। (पापी विचार करनेवाली)
१५ धरणीतलं = धरण्याः तलं । (जमीनका ऊपरका भाग)
१६ प्रोत्साहिता = प्रकर्षेण उत्साहिता । (बहुत उत्साहसे)

इस तरह पाठक समासोंका अभ्यास करें ।

पाठ १२

स तद्धनुः परिक्रम्य प्रदक्षिणमथाकरोत् ॥ १७ ॥
प्रणम्य शिरसा देवमीशानं वरदं प्रभुम् ।
कृष्णं च मनसा ध्यात्वा जगृहे चार्जुनो धनुः ॥ १८ ॥
(महाभारत आदि० अ० १९०)

अन्वयः— अथ सः तत् धनुः परिक्रम्य प्रदक्षिणं अकरोत् । शिरसा देवं ईशानं वरदं प्रभुं प्रणम्य । मनसा कृष्णं च ध्यात्वा अर्जुनः धनुः जगृहे ।

अर्थ— अब उसने उस धनुष्यके (परिक्रम्य) चारों ओर परिक्रमा की। शिरसे देव ईश्वर वरदाता प्रभुको प्रणाम कर और मनसे कृष्णका ध्यान करके अर्जुनने धनुष्यको (जगृहे) लिया, पकडा ।

चैलानि विव्यधुस्तत्र ब्राह्मणाश्च सहस्रशः ।
विलक्षितास्ततश्चक्रुर्हाहाकारांश्च सर्वशः ॥ २३ ॥

अन्वयः— सहस्रशः ब्राह्मणाः तत्र चैलानि विव्यधुः, ततः विलक्षिताः सर्वशः हाहाकारान् च चक्रुः ।

अर्थ— सहस्रों ब्राह्मण वहां अपने (चैलानि) दुपट्टोंको (विव्यधुः) उडाने लगे । उससे (विलक्षिताः) विलक्षण अर्थात् जो वैसा कर नहीं सके थे, वे सब प्रकारसे हाय हाय (चक्रुः) करने लगे ।

न्यपतंश्चात्र नभसः समन्तात्पुष्पवृष्टयः ।
शताङ्गानि च तूर्याणि वादकाः समवादयन् ॥ २४ ॥

अन्वयः— अत्र च नभसः समन्तात् पुष्पवृष्टयः न्यपतन् । वादकाः शताङ्गानि च तूर्याणि समवादयन् ।

अर्थ— यहां (नभसः) आकाशसे (समन्तात्) चारों ओरसे फूलकी वृष्टि (न्यपतन्) पडने लगी अर्थात् हो गई । बाजेवाले सैकडों अङ्गोंसे युक्त (तूर्यं) ढोल आदि वाद्य (समवादयन्) बजाने लगे ।

सूतमागधसंघाश्चाप्यस्तुवंस्तत्र सुस्वराः ।
तं दृष्ट्वा द्रुपदः प्रीतो बभूव रिपुसूदनः ।
सह सैन्यैश्च पार्थस्य साहाय्यार्थमियेष सः ॥ २५ ॥

अन्वयः— अत्र सूतमागधसंघाः च अपि सुस्वराः अस्तुवन् । तं दृष्ट्वा रिपुसूदनः द्रुपदः प्रीतः बभूव । सैन्यैः च सह सः पार्थस्य साहाय्यार्थं इयेष ।

अर्थ— यहां सूत और मागधोंके संघ सुस्वरसे (अस्तुवन्) स्तुति करने लगे । इसे देखकर (रिपुसूदनः) शत्रुनाशी द्रुपद (प्रीतः) संतुष्ट हुआ । सैन्योंके साथ उसने (पार्थस्य) अर्जुनकी सहायता करनेको (इयेष) इच्छा की ।

तस्मै दित्सति कन्यां तु ब्राह्मणाय तदा नृपे ।
कोप आसीन्महीपानामालोक्यान्योन्यमन्तिकात् ॥

(महाभारत आदि० १९१।१)

अन्वयः— तदा तस्मै ब्राह्मणाय कन्यां दित्सति नृपे अन्योऽन्यं आलोक्य महीपानां कोपः आसीत् ।

अर्थ— तब उस ब्राह्मणको कन्या (दित्सति) दान करनेकी (नृपे) राजाकी इच्छा जानकर, परस्परको (आलोक्य) देखकर (मही-पानां) राजाओंका क्रोध (आसीत्) था, हो गया। अर्थात् राजा बड़े क्रुद्ध हुए।

अस्मानयमतिक्रम्य तृणीकृत्य च सङ्गतान् ।
दातुमिच्छति विप्राय द्रौपदीं योषितां वराम् ॥ २ ॥

अन्वयः— अस्मान् सङ्गतान् तृणीकृत्य अतिक्रम्य च अयं योषितां वरां द्रौपदीं विप्राय दातुं इच्छति ।

अर्थ— हम (संगतान्) मिले हुओंको तिनकेके समान समझकर और (अतिक्रम्य च) उल्लंघन करके (अयं) यह (योषितां) स्त्रियोंमें (वरां) श्रेष्ठ द्रौपदीको (विप्राय) ब्राह्मणको देनेकी इच्छा करता है।

अवरोप्येह वृक्षं तु फलकाले निपात्यते ।
निहन्मैनं दुरात्मानं योऽयमस्मान्न मन्यते ॥ ३ ॥

अन्वयः— इह वृक्षं अवरोप्य तु फलकाले निपात्यते । यः अयम् अस्मान् न मन्यते, एनं दुरात्मानं निहन्म ।

अर्थ— यहां वृक्षका रोपण करके फलनेके कालमें (निपात्यते) काट रहा है। जो हमको नहीं मानता, इस दुरात्माको (निहन्म) मार डालेंगे।

समासाः ।

१ वरदः = वरं ददाति इति । (वर देनेवाला)
२ पुष्पवृष्टिः = पुष्पाणां वृष्टिः । (फूलोंकी वृष्टि)
३ शताङ्गः = शतानि अङ्गानि यस्य । (सौ अङ्ग हैं जिसके)
४ वादकः = वादयति इति । (जो बजाता है)
५ सूतमागधसंघाः = सूताः च मागधाः च सूतमागधाः, सूतमागधानां संघाः सूतमागधसंघाः । (सूत और मागधोंके संघ)
६ रिपुसूदनः = रिपोः सूदनः । (शत्रुका घातक)
७ महीपः = महीं पाति इति । (पृथ्वीका पालक)

८ फलकालः = फलस्य कालः । (फलका समय)

९ दुरात्मा = दुष्टः आत्मा यस्य । (दुष्ट है आत्मा जिसका)

पाठक ये समासके विवरण वारंवार पढकर ठीक समझनेका यत्न करें ।

संधि किये हुए वाक्य ।

अथ स तद्धनुः परिक्रम्य प्रदक्षिणमकरोत् । शिरसेशानं वरदं प्रभुं प्रणम्य, मनसा कृष्णं च ध्यात्वा, अर्जुनो धनुर्जगृहे । सहस्रशो ब्राह्मणास्तत्र चैलानि विव्यधुः । ततो विलक्षिताश्च सर्वशो हाहाकारांश्चक्रुः ।

पाठ १३

पूर्व तीन पाठोंमें जो संस्कृतके वाक्य दिये हैं, उनका संधियुक्त सरल संस्कृत अब दिया जाता है ।

(१) रामायणम् ।

एवं तूक्ता कैकेयी क्रुद्धा बभूव । अब्रवीच्च मंथराम् । रामं वनमद्य क्षिप्रं प्रस्थापयामि । भरतमेव यौवराज्येऽभिषेचये । एतत्तु संदृश्य केनाप्युपायेन साधयेदम् ।

पापदर्शिनी मंथराऽपि रामार्थमुपहसन्ती कैकेयीमब्रवीत् । हन्तेदानीं पश्य, यथा ते भरतो राज्यं प्राप्स्यति ।

पुरा देवासुरयुद्धे ते पतिर्देवराजस्य साहाय्यमकरोत् । तदा त्वामेवोपादाय गत आसीत् । शम्बरासुरेण तत्र राजा महायुद्धमकरोत् । यदाऽसुरैः शस्त्रैः शकलीकृतो राजाऽभवत्तदा त्वयैव तत्र रक्षितः । तुष्टेन तदा तेन राज्ञा द्वौ वरौ ते दत्तौ । स च त्वयोक्तः । यदिच्छेयं तदा गृह्णीयामिति । यावस्वाधुना तौ वरौ । भरतस्याभिषेचनं, रामस्य प्रव्राजनं वर्षाणि चतुर्दशेति रूपौ द्वौ वरौ । तावता हि कालेन स्थिरो भविष्यति पुत्रस्ते प्रजाभावगतस्नेहः । पश्चात्कैकेय्येवं प्रोत्साहिताऽऽभरणानि मुक्त्वा क्रोधागारं प्रविश्य भूमावेव निपतिता ।

महाराजो दशरथः प्रियार्हां प्रियमाख्यातुं कैकेय्या अन्तःपुरं प्रविवेश। शयनोत्तमे तां न ददर्श सः। न हि तस्य तां वेलां देवी पुराऽत्यवर्वत।

प्रतिहारी तु कृताञ्जलिरुवाच। देव! देवी भृशं क्रुद्धा अभिद्रुता क्रोधागारम्।

अपापो राजा पापसंकल्पां तां कैकेयीं धरणीतले ददर्श। स तामुवाच। किमर्थं भूमौ शेषे?

कैकेय्युवाच—प्रतिजानीष्व प्रतिज्ञां, यदि कर्तुमिच्छसि। अनन्तरं ते व्याहरिष्यामि, यथा ममाभिप्रार्थितम् इति।

(२) महाभारतम्।

अब श्लोकोंके पाठका संधियुक्त सरल संस्कृत देखिये—

अथ स तद्धनुः परिक्रम्य प्रदक्षिणमकरोत्। शिरसा देवमीशानं वरदं प्रभुं प्रणम्य, मनसा कृष्णं च ध्यात्वाऽर्जुनो धनुर्जगृहे। तत्र सहस्रशो ब्राह्मणास्तत्र चैलानि विव्यधुः। ततो विलक्षिताः सर्वशो हाहाकारांश्च चक्रुः।

अत्र च नभसः समन्तात्पुष्पवृष्टयो न्यपतन्। वादकाः शताङ्गानि च तूर्याणि समवादयन्।

अत्र सूतमागधसंघाश्चापि सुस्वरा अस्तुवन्। तं दृष्ट्वा रिपुसूदनो द्रुपदः प्रीतो बभूव। सैन्यैश्च सह स पार्थस्य साहाय्यार्थमियेष।

तदा तस्मै ब्राह्मणाय कन्यां दित्सति नृपेऽन्योन्यमालोक्य महीपानां क्रोध आसीत्। अस्मान्संगतांस्तृणीकृत्यातिक्रम्य चायं योषितां वरां द्रौपदीं विप्राय दातुमिच्छति। इह वृक्षमवरोप्य तु फलकाले निपात्यते। योऽस्मान्न मन्यते। एनं दुरात्मानं निहन्म।

संधि।

अब इस पाठके कुछ संधियोंको खोलकर बताया जाता है—

अब्रवीच्च = अब्रवीत् च।
यौवराज्याभिषेकः = यौवराज्य अभिषेकः।

केनाप्युपायेन	= केन अपि उपायेन ।
पतिर्देवराजस्य	= पतिः देवराजस्य ।
त्वामेवोपादाय	= त्वां एव उप+आदाय ।
यदृच्छेयं	= यदा इच्छेयं ।
शयनोत्तमे	= शयन उत्तमे ।
अपापो राजा	= अपापः राजा ।
कैकय्युवाच	= कैकेयी उवाच ।

अब संस्कृतका अर्थ संस्कृतमें ही दिया जाता है। इसका अभ्यास पाठक अच्छी प्रकार करें—

१ रामं वनमद्य क्षिप्रं प्रस्थापयामि = रामचन्द्रं अरण्यं अस्मिन्दिने शीघ्रं प्रेषयिष्यामि।

२ हन्तेदानीं पश्य, यथा ते भरतो राज्यं प्राप्स्यति = शोभनं अधुना अवलोकय, येन उपायेन तव भरतः राज्यं अवाप्स्यति ।

३ पुरा देवासुरयुद्धे ते पतिः देवराजस्य साहाय्यमकरोत्= पूर्वं सुरासुरसंग्रामे तव भर्ता सुरपतेः सहाय्यतां कृतवान् ।

४ तदा त्वामेवोपादाय गत आसीत् = तस्मिन् समये त्वां गृहीत्वा एव स गतवान् ।

५ तुष्टेन तदा तेन राज्ञा द्वौ वरौ ते दत्तौ = सन्तुष्टेन तस्मिन्समये तेन भूपेन द्वौ वरौ तुभ्यं दत्तौ ।

६ मनसा कृष्णं ध्यात्वाऽर्जुनो धनुर्जगृहे = हृदयेन वासुदेवं ध्यात्वा पार्थः धनुष्यं गृहीतवान् ।

पाठक इसका अभ्यास करें ।

संधि किये हुए वाक्य ।

रामचन्द्रमरण्यमस्मिन्दिने शीघ्रं प्रेषयिष्यामि । शोभनमधुनावलोकय येनोपायेन तव भरतो राज्यमवाप्स्यति । पूर्वं सुरासुरसंग्रामे तव भर्ता सुरपतेस्सहाय्यतां कृतवाँस्तस्मिन्समये त्वां गृहीत्वैव स गतवान् ।

पाठ १४

संजय उवाच—

वर्तमाने तथा युद्धे क्षत्रियाणां निमज्जने।
गाण्डीवस्य महाघोषः श्रूयते युधि मारिष ॥ १ ॥

(महाभारत कर्णपर्व अ. ५३)

अन्वयः— हे मारिष! तथा क्षत्रियाणां निमज्जने युद्धे वर्तमाने युधि गाण्डीवस्य महाघोषः श्रूयते।

अर्थ— हे धृतराष्ट्र! इस प्रकार क्षत्रियोंका नाश करनेवाला युद्ध शुरू होनेके पश्चात् उस युद्धमें गाण्डीव धनुष्यका बड़ा शब्द सुनाई दिया।

संशप्तकानां कदनमकरोद्यत्र पाण्डवः।
कोसलानां तथा राजन्नारायणबलस्य च ॥ २ ॥

अन्वयः— हे राजन्! यत्र पाण्डवः संशप्तकानां कोसलानां तथा नारायणबलस्य च कदनं अकरोत्।

अर्थ— हे राजा! जहां पाण्डव अर्जुन संशप्तक सैन्य, कोसल सेना और नारायणीय दलका नाश करता था।

संशप्तकास्तु समरे शरवृष्टीः समन्यवः।
अपातयन्पार्थमूर्ध्नि जयगृद्धाः प्रमन्यवः ॥ ३ ॥

अन्वयः— जयगृद्धाः प्रमन्यवः संशप्तकाः तु समरे पार्थमूर्ध्नि शरवृष्टीः अपातयन्।

अर्थ— विजयप्राप्तिकी इच्छा करनेवाले क्रोधसे भरे संशप्तक वीर तो उस युद्धमें पृथापुत्र अर्जुनके सिरपर बाणोंकी वृष्टि करने लगे।

ता वृष्टीः सहसा राजँस्तरसा धारयन् प्रभुः।
व्यगाहत रणे पार्थो विनिघ्नन् रथिनां वरान् ॥ ४ ॥

अन्वयः— हे राजन्! सहसा ताः वृष्टीः धारयन् तपसा च रथिनां वरान् विनिघ्नन् प्रभुः रणे व्यगाहत।

अर्थ— हे राजा! साहससे इस बाणवृष्टिको धारण करता हुआ और रथियोंमें श्रेष्ठ शत्रुके वीरोंको मारता हुआ वीर पार्थ अर्जुन युद्धमें घूमने लगा।

विगाह्य तद्रथानीकं कङ्कपत्रैः शिलाशितैः ।
आससाद ततः पार्थः सुशर्माणं वरायुधम् ॥ ५ ॥

अन्वयः— तत् रथानीकं विगाह्य, ततः पार्थः वरायुधं सुशर्माणं शिलाशितैः कङ्कपत्रैः आससाद ।

अर्थ— उस रथसेनामें प्रविष्ट होकर, पश्चात् पृथापुत्र अर्जुन उत्तम आयुधोंको धारण करनेवाले सुशर्माके साथ शिलापर घिसे कंकपत्र बाणोंसे युद्ध करनेके लिये गया ।

स तस्य शरवर्षाणि ववर्ष रथिनां वरः ।
तथा संशप्तकाश्चैव पार्थं बाणैः समार्पयन् ॥ ६ ॥

अन्वयः— स रथिनां वरः तस्य शरवर्षाणि ववर्ष, तथा संशप्तकाः च एव पार्थं बाणैः समार्पयन् ।

अर्थ— उस रथियोंमें श्रेष्ठने उसपर बाणोंकी वृष्टि की तथा संशप्तक वीरोंने भी अर्जुनपर बाण चलाना आरंभ किया ।

सुशर्मा तु ततः पार्थं विध्वा दशभिराशुगैः ।
जनार्दनं त्रिभिर्बाणैरहनद्दक्षिणे भुजे ॥ ७ ॥

अन्वयः— ततः सुशर्मा तु पार्थं दशभिः आशुगैः विध्वा जनार्दनं दक्षिणे भुजे त्रिभिः बाणैः अहनत् ।

अर्थ— पश्चात् सुशर्माने तो अर्जुनपर दश बाण मारकर, श्रीकृष्णको दक्षिण भुजापर तीन बाण मारे ।

ततोऽपरेण भल्लेन केतुं विव्याध मारिष ।
स वानरवरो राजन् विश्वकर्मकृतो महान् ॥ ८ ॥
ननाद सुमहानादं भीषयाणो जगर्ज च ।

अन्वयः— मे मारिष ! ततः अपरेण भल्लेन केतुं विव्याध, हे राजन् ! स महान् विश्वकर्मकृतः वानरवरः भीषयाणः सुमहानादं ननाद जगर्ज च ।

अर्थ— हे धृतराष्ट्र ! पश्चात् दूसरे भल्लबाणसे ध्वजका वेध किया, हे राजा ! तब वह बडा विश्वकर्माका बनाया वानरश्रेष्ठ डराता हुआ शब्द करने लगा और वेगसे गर्जने लगा ।

पाठ १५

संधि किये हुए वाक्य।

हे मारिष! तथा क्षत्रियाणां निमज्जने युद्धे वर्तमाने युधि गाण्डीवस्य महाघोषः श्रूयते। हे राजन्! यत्र पाण्डवः संशप्तकानां कोसलानां तथा नारायणबलस्य च कदनमकरोत्। जयगृद्धाः प्रमन्यवः संशप्तकास्तु समरे पार्थमूर्ध्नि शरवृष्टीरपातयन्। हे राजन्! सहसा ता वृष्टीर्धारयन्तरसा च रथिनां वरान्विनिघ्नन्प्रभुः पार्थो रणे व्यगाहत। तद्रथानीकं विगाह्य ततः पार्थो वरायुधं सुशर्माणं शिलाशितैः कङ्कपत्रैराससाद। स रथिनां वरस्तस्य शरवर्षाणि ववर्ष, तथा संशप्तकाश्चैव पार्थं बाणैः समर्पयन्। ततः सुशर्मा तु पार्थं दशभिराशुगैर्विध्वा, जनार्दनं दक्षिणे भुजे त्रिभिर्बाणैरहनत्। हे मारिष! ततोऽपरेण भल्लेन केतुं विव्याध। हे राजन्! महान्विश्वकर्मकृतो वानरवरो भीषयाणः सुमहामहानादं ननाद जगर्ज च॥

समासाः।

क्षत्रियः = क्षतात् त्रायते इति क्षत्रियः। (दुःखसे मुक्त करनेवाला)
वर्तमानं = वर्तते तत् वर्तमानं (जो है)
नारायणबलं = नारायणानां बलं (नारायणोंका बल)
जयगृद्धाः = जये गृद्धाः जयगृद्धाः। (जयकी इच्छावाले)
प्रमन्यवः = प्रकर्षेण मन्युः येषां ते प्रमन्यवः। (बडे क्रोधवाले)
पार्थमूर्धाः = पार्थस्य मूर्धा पार्थमूर्धा (अर्जुनका सिर)
शरवृष्टिः = शराणां वृष्टिः शरवृष्टिः (बाणोंकी वृष्टि)
पार्थः = पृथायाः अपत्यं पुमान् पार्थः। (कुन्तीका पुत्र)
आशुगः = आशु गच्छतीत्याशुगः। (शीघ्र चलनेवाला)
विश्वकर्मकृतः = विश्वकर्मणा कृतः विश्वकर्मकृतः। (विश्वकर्मासे बनाया हुआ)

वानरवरः = वानरेषु वरः वानरवरः । (बन्दरोंमें श्रेष्ठ)
भीषयाणः = भीषयतेऽसौ भीषयाणः (भय देनेवाला)
सुमहानादं = महांश्च असौ नादश्च महानादः । शोभनः महानादः सुमहानादः । (अच्छा बड़ा नाद)
रथी = रथोऽस्यास्तीति । (रथमें बैठनेवाला)
रथानीकं = रथानां अनीकं । (रथसेना)
जनार्दनः = जनं (जन्म) अर्दयति इति । (जन्मका नाश करनेवाला अर्थात् मुक्ति देनेवाला)

कपेस्तु निनदं श्रुत्वा सन्त्रस्ता तव वाहिनी ।
भयं विपुलमाधाय निश्चेष्टा समपद्यत ॥ ९ ॥

(महाभारत कर्ण० अ० ५३)

अन्वयः— कपेः तु निनदं श्रुत्वा तव वाहिनी संत्रस्ता, विपुलं भयं आधाय निश्चेष्टा समपद्यत ।

अर्थ— वानरका घोर शब्द सुनकर तेरी सेना भयभीत हो गई । बहुत भय धारण करके चेतनारहित हो गई ।

ततः सा शुशुभे सेना निश्चेष्टाऽवस्थिता नृप ।
नानापुष्पसमाकीर्णं यथा चैत्ररथं वनम् ॥ १० ॥

अन्वयः— हे नृप ! ततः निश्चेष्टा अवस्थिता सा सेना शुशुभे, यथा नानापुष्पसमाकीर्णं चैत्ररथं वनम् ।

अर्थ— हे राजा ! अनंतर चेष्टारहित खड़ी हुई वह सेना वैसी शोभने लगी, जैसा नाना प्रकारके पुष्पोंसे युक्त चैत्ररथ नामक वन शोभायमान होता है ।

प्रतिलभ्य ततः संज्ञां योधास्ते कुरुसत्तम ।
अर्जुनं सिषिचुर्बाणैः पर्वतं जलदा इव ॥ ११ ॥

अन्वयः— हे कुरुसत्तम ! ततः ते योधाः संज्ञां प्रतिलभ्य बाणैः अर्जुनं सिषिचुः, जलदाः पर्वतं इव ।

अर्थ— हे कुरुश्रेष्ठ ! नंतर वे वीर चेतनाको प्राप्त करके बाणोंको अर्जुन-पर बरसाने लगे, जैसे मेघ पर्वतपर वृष्टि करते हैं।

परिवव्रुस्ततः सर्वे पाण्डवस्य महारथम् ।
निगृह्य तं प्रचुक्रुशुर्वध्यमानाः शितैः शरैः ॥ १२ ॥

अन्वयः— ततः सर्वे पाण्डवस्य महारथं परिवव्रुः । शितैः शरैः वध्य-मानाः तं निगृह्य प्रचुक्रुशुः ।

अर्थ— पश्चात् सब वीरोंने अर्जुनके महारथको चारों ओरसे घेर लिया। तीक्ष्ण बाणोंसे पीडित होकर वे वीर उसको पकडकर कोलाहल करने लगे।

ते हयान् रथचक्रे च रथेषां चापि मारिष ।
निग्रहीतुमुपाक्रामन् क्रोधाविष्टाः समन्ततः ॥ १३ ॥

अन्वयः—हे मारिष ! ते क्रोधाविष्टाः हयान्, रथचक्रे च रथेषां च अपि, समन्तात् निग्रहीतुं उपाक्रामन् ।

अर्थ— हे धृतराष्ट्र ! वे क्रोधसे युक्त होकर घोडोंको, रथके चक्रोंको और धुरीको भी चारों ओरसे पकडने लगे।

निगृह्य तं रथं तस्य योधास्ते तु सहस्रशः ।
निगृह्य बलवत् सर्वे सिंहनादमथानदन् ॥ १४ ॥

अन्वयः— ते तु सहस्रशः योधाः तस्य तं रथं निगृह्य सर्वे बलवत् निगृह्य अथ सिंहनादं अनदन् ।

अर्थ— वे तो हजारों वीर उसके उस रथको पकडकर, सब बलसे पकडकर पश्चात् सिंहनाद करने लगे।

अपरे जगृहुश्चैव केशवस्य महाभुजौ ।
पार्थमन्ये महाराज रथस्थं जगृहुर्मुदा ॥ १५ ॥

अन्वयः— अपरे केशवस्य महाभुजौ जगृहुः, हे महाराज ! अन्ये रथस्थं पार्थं मुदा जगृहुः ।

अर्थ— दूसरोंने केशवकी बडी भुजाओंको पकडा, हे महाराज! अन्योंने रथमें रहनेवाले पृथापुत्र अर्जुनको आनंदसे पकड लिया।

केशवस्तु ततो बाहू विधुन्वन् रणमूर्धनि ।
पातयामास तान् सर्वान् दुष्टहस्तीव हस्तिपान् ॥ १६ ॥

अन्वयः— केशवः तु ततः बाहू विधुन्वन् रणमूर्धनि तान् सर्वान् पातयामास, दुष्टहस्ती हस्तिपान् इव ।

अर्थ— केशवने तो पश्चात् बाहुओंको झटका देकर युद्धभूमिमें उन सबको गिरा दिया, जिस प्रकार दुष्ट हाथी महावतोंको गिराता है ।

पाठ १६

संधि किये हुए वाक्य ।

कपेस्तु निनदं श्रुत्वा तव वाहिनी सन्त्रस्ता । विपुलं भयमाधाय निश्चेष्टा समपद्यत । हे नृप ! ततो निश्चेष्टाऽवस्थिता सा सेना शुशुभे, यथा नानापुष्पसमाकीर्णं चैत्ररथं वनम् । हे कुरुसत्तम ! ततस्ते योधाः संज्ञां प्रतिलभ्य बाणैरर्जुनं सिषिचुर्जलदाः पर्वतमिव । ततः सर्वे पाण्डवस्य महारथं परिवव्रुः । शितैः शरैर्वध्यमानास्तं निगृह्य प्रचुक्रुशुः । हे मारिष ! ते क्रोधाविष्टा हयान्रथचक्रं च रथेषां चापि, समन्तान्निग्रहीतुमुपक्रामन् । ते तु सहस्रशो योधास्तस्य तं रथं निगृह्य, सर्वे बलवन्निगृह्याथ सिंहनादमनदन् । अपरे केशवस्य महाभुजौ जगृहुः । हे महाराज ! अन्ये रथस्थं पार्थं मुदा जगृहुः । केशवस्तु ततो बाहू विधुन्वन् रणमूर्धनि तान्सर्वान् पातयामास दुष्टहस्ती हस्तिपानिव ॥

समासाः ।

संत्रस्ता = सम्यक्त्रस्ता संत्रस्ता । (बहुत पीडित)
निश्चेष्टा = निर्गता चेष्टा यस्याः सा निश्चेष्टा (चेष्टारहित)
नानापुष्पसमाकीर्णं = नानाविधैः पुष्पैः समाकीर्णम् (अनेक जातिके पुष्पोंसे युक्त)

कुरुसत्तमः = अतिशयेन सन् सत्तमः, कुरुषु सत्तमः कुरुसत्तमः (कुरुकुलोत्पन्न लोगोंमें अति उत्तम)

महारथः = महान् च असौ रथश्च महारथः (बडा रथ)

जलदाः = जलं ददति ते जलदाः । (मेघ)

सिंहनादः = सिंहवत् नादः सिंहनादः । (सिंहके समान शब्द)

क्रोधाविष्टाः = क्रोधेन आविष्टाः । (क्रोधयुक्त)

रणमूर्धनि = रणस्य मूर्धनि । (रणभूमिमें)

दुष्टहस्ती = दुष्टश्चासौ हस्ती च । दुष्ट हाथी)

हस्तिपाः = हस्तिनः पान्ति ते (हाथियोंके पालक)

संधि किये हुए वाक्य ।

जामदग्न्येन रामेण युधि क्षत्रिया निर्जिताः । महातेजसाऽगस्त्येनागाधः समुद्रः पीतः । तस्मात्सर्वेऽत्र ब्रुवन्तु 'एष महान् बद्धुर्धनुः शीघ्रमारोपयतु वै । ' द्विजर्षभास्तथेत्यूचुः ।

तदा तस्मै ब्राह्मणाय कन्यां दित्सति नृपेऽन्योन्यमालोक्य महीपानां क्रोध आसीत् । अस्मान्संगतांस्तृणीकृत्यातिक्रम्य चायं योषितां वरां द्रौपदीं विप्राय दातुमिच्छति । इह वृक्षमवरोप्य तु फलकाले निपात्यते । योऽस्मान्न मन्यते, एनं दुरात्मानं निहन्मः ।

धृतराष्ट्र उवाच—

सुदुष्करमिदं कर्म कृतं भीमेन संजय ।
येन कर्णो महाबाहू रथोपस्थे निपातितः ॥ १ ॥
कर्णो ह्येको रणे हन्ता पाण्डवान् सृञ्जयैः सह ।
इति दुर्योधनः सूत प्राब्रवीन्मां मुहुर्मुहुः ॥ २ ॥
पराजितं तु राधेयं दृष्ट्वा भीमेन संयुगे ।
ततः परं किमकरोत् पुत्रो दुर्योधनो मम ॥ ३ ॥

(महाभारत कर्ण० अ० ५१)

अन्वयः— हे संजय ! इदं दुष्करं कर्म भीमेन कृतम् । येन महाबाहुः कर्णः रथोपस्थे निपातितः । हे सूत ! हि एकः कर्णः सृञ्जयैः सह पाण्डवान्

हन्ता इति दुर्योधनः मां मुहुर्मुहुः प्र-अब्रवीत् । भीमेन संयुगे तु राधेयं पराजितं दृष्ट्वा ततः परं मम पुत्रः दुर्योधनः किं अकरोत् ?

अर्थ— हे संजय ! यह कठिन कर्म भीमने किया । जिसने महाबाहु कर्णको रथके उपस्थ भागमें गिरा दिया । हे सूत ! क्योंकि अकेला कर्ण ही सञ्जयोंके सहित पाण्डवोंका नाश करनेवाला है, यह बात दुर्योधनने मुझे बारबार कही थी । भीमने युद्धमें राधापुत्र कर्णको पराजित किया देखकर पश्चात् मेरे पुत्र दुर्योधनने क्या किया ?

पाठ १७

इस पाठके अगले श्लोकोंका भलि प्रकार अभ्यास कीजिये—

(महाभारत उद्योगपर्व अ० ७३)

श्रीभगवानुवाच—

संजयस्य श्रुतं वाक्यं भवतश्च श्रुतं मया ।
सर्वं जानाम्यभिप्रायं तेषां च भवतश्च यः ॥ १ ॥

अन्वयः— श्रीभगवान् उवाच- संजयस्य वाक्यं श्रुतम् । भवतः च वाक्यं मया श्रुतम् । तेषां च भवतः च यः (अभिप्रायः अस्ति) तं सर्वं अभिप्रायं जानामि ।

अर्थ— श्रीभगवान् बोले- संजयका वाक्य सुना । आपका कहना भी मैंने सुना । उनका और आपका जो (अभिप्राय है) वह सब मैं जानता हूं ।

तव धर्माश्रिता बुद्धिस्तेषां वैराश्रया मतिः ।
यदयुद्धेन लभ्येत तत्ते बहुमतं भवेत् ॥ २ ॥

अन्वयः— तव बुद्धिः धर्माश्रिता, तेषां मतिः वैराश्रया । यत् अयुद्धेन लभ्येत तत् ते बहुमतं भवेत् ।

अर्थ— तेरी बुद्धि धर्मका आश्रय करती है, उसकी बुद्धि वैरका आश्रय करती है । जो युद्धके बिना मिलेगा वह तेरे लिये बहुत होगा ।

न चैवं नैष्ठिकं कर्म क्षत्रियस्य विशांपते ।
आहुराश्रमिणः सर्वे न भैक्ष्यं क्षत्रियश्चरेत् ॥ ३ ॥

अन्वयः— हे विशांपते ! क्षत्रियस्य च भैक्षिकं कर्म एवं न । सर्वे आश्रमिणः ' क्षत्रियः भैक्षं न चरेत् ' इति आहुः ।

अर्थ— हे प्रजापालक ! क्षत्रियका धार्मिक कर्म यह नहीं है । समस्त आश्रमवासी यही कहते हैं कि ' क्षत्रिय भिक्षा न मांगे ' ।

जयो वधो वा संग्रामे धात्रा दिष्टः सनातनः ।
स्वधर्मः क्षत्रियस्यैष कार्पण्यं न प्रशस्यते ॥ ४ ॥

अन्वयः— संग्रामे जयः वधः वा धात्रा क्षत्रियस्य सनातनः दिष्टः । एव क्षत्रियस्य स्वधर्मः । कार्पण्यं न प्रशस्यते ।

अर्थ— युद्धमें जय अथवा वधके विषयमें ईश्वरने क्षत्रियको बताया है कि वे सनातन हैं यही क्षत्रियोंका स्वधर्म है । कृपणता–दीनता प्रशस्त नहीं ।

नहि कार्पण्यमास्थाय शक्या वृत्तिर्युधिष्ठिर ।
विक्रमस्व महाराज जहि शत्रून्परंतप ॥ ५ ॥

अन्वयः— हे युधिष्ठिर ! हि कार्पण्यं आस्थाय वृत्तिः न शक्या । हे परंतप महाराज ! विक्रमस्व, शत्रून् जहि ।

अर्थ— हे युधिष्ठिर ! कारण दीनता स्वीकार करके जीवित रहना सम्भव नहीं है; अतः हे तपस्वी महाराजा ! पराक्रम कर, शत्रुओंको जीत ।

यावच्च मार्दवेनैतान्राजन्नुपचरिष्यसि ।
तावदेते हरिष्यन्ति तव राजमरिन्दम ॥ ८ ॥

अन्वयः— हे अरिंदम राजन् ! यावच्च एतान् मार्दवेन उपचरिष्यसि तावत् एते तव राज्यं हरिष्यन्ति ।

अर्थ— हे शत्रुदमन करनेवाले राजा ! जबतक इनके साथ नरमीसे बर्तोगे तबतक ये तेरा राज्य हरण करते रहेंगे ।

नानुक्रोशान्न कार्पण्यान्न च धर्मार्थकारणात् ।
अलं कर्तुं धार्तराष्ट्रस्तव काममरिन्दम ॥ ९ ॥

अन्वयः— हे अरिंदम ! न अनुक्रोशात्, न कार्पण्यात्, न च धर्मार्थकारणात् धार्तराष्ट्रः तव कामं कर्तुं अलम् ।

अर्थ— हे शत्रुका दमन करनेवाले ! करुणाके कारण, दीनताके कारण अथवा धर्म और अर्थके लिये धृतराष्ट्रके पुत्र तेरा मनोरथ पूर्ण करनेके लिये तैयार होंगे, ऐसी बात नहीं है ।

एतदेव निमित्तं ते पाण्डवास्तु यथा त्वयि ।
नान्वतप्यन्त कौपीनं तावत्कृत्वाऽपि दुष्करम् ॥ १० ॥

अन्वयः— हे पांडव ! ते एतत् एव निमित्तं अस्तु, यथा त्वयि तावत् दुष्करं कौपीनं कृत्वा अपि न अन्वतप्यन्त ।

अर्थ— हे धर्मराज ! तेरे लिये यही एक कारण बहुत है कि जिससे तेरे जैसेके लिये लंगोटी धारण करने जैसे दुष्कर कर्मको कराकर भी किंचित् भी दुःखी नहीं हुए ।

पितामहस्य द्रोणस्य विदुरस्य च धीमतः ।
ब्राह्मणानां च साधूनां राज्ञश्च नगरस्य च ॥ ११ ॥
पश्यतां कुरुमुख्यानां सर्वेषामेव तत्त्वतः ।
दानशीलं मृदुं दान्तं धर्मशीलमनुव्रतम् ॥ १२ ॥
यत्त्वामुपाधिना राजन् द्यूते वंचितवाँस्तदा ।
न चापत्रपते तेन नृशंसः स्वेन कर्मणा ॥ १३ ॥

अन्वयः— पितामहस्य द्रोणस्य च धीमतः विदुरस्य ब्राह्मणानां साधूनां राज्ञः च नगरस्य च तत्त्वतः सर्वेषां कुरुमुख्यानां पश्यतां एव दानशीलं मृदुं दान्तं धर्मशीलं अनुव्रतं त्वां, हे राजन् ! तदा उपाधिना द्यूते वंचितवान्, नृशंसः च तेन स्वेन कर्मणा न च अपत्रपते ।

अर्थ— पितामह भीष्माचार्य, द्रोणाचार्य, बुद्धिमान् विदुर, समस्त ब्राह्मण व साधु, राजा, नागरिक एवं कौरवोंको समस्त मुख्य पुरुषोंके भलिप्रकार देखते हुए तुझ जैसे दानशील, नम्र, दमनशील नियमशील व्यक्तिको जुएमें ठग लिया और वह घातकी उस अपने कर्मसे लज्जित भी नहीं होता।

पाठ १८

तथाशीलसमाचारे राजन्मा प्रणयं कृथाः ।
वध्यास्ते सर्वलोकस्य किं पुनस्तव भारत ॥ १४ ॥

अन्वयः— हे राजन् ! तथाशीलसमाचारे प्रणयं मा कृथाः । ते सर्वलोकस्य वध्याः । हे भारत ! किं पुनः तव ?

अर्थ— हे राजा ! उस प्रकारके दुःशील एवं दुराचारीपर कृपा न कर । वे सबके लिये वध्य हैं । हे भरतकुलोत्पन्न ! ऐसी स्थितिमें 'वे वध्य हैं या नहीं' इस प्रकारकी शंका तुझे क्यों है ?

वाग्भिस्त्वप्रतिरूपाभिरतुदत्त्वां सहानुजम् ।
श्लाघमानः प्रहृष्टः सन्भ्रातृभिः सह भाषते ॥ १५ ॥

अन्वयः— अप्रतिरूपाभिः वाग्भिः तु सहानुजं त्वां अतुदत् भ्रातृभिः सह श्लाघमानः प्रहृष्टः सन् भाषते ।

अर्थ— अनुचित शब्दोंद्वारा उसने तुझे तेरे बान्धवोंके साथ बुरा भला कहा । वह अपने भाइयोंके साथ आत्मप्रशंसा करके सन्तुष्ट हुआ हुआ बोलता है ।

एतावत्पाण्डवानां हि नास्ति किञ्चिदिह स्वकम् ।
नामधेयं च गोत्रं च तदप्येषां न शिष्यते ॥ १६ ॥

अन्वयः— एतावत् इह पांडवानां स्वकं किञ्चित् नास्ति हि । एषां नामधेयं च गोत्रं च तदपि न शिष्यते ।

अर्थ— यहांतक कि पाण्डवोंका अपना यहाँ कुछ भी नहीं है । इनका तो नाम और गोत्र भी अवशिष्ट नहीं है ।

कालेन महता चैषां भविष्यति पराभवः ।
प्रकृतिं ते भजिष्यन्ति नष्टप्रकृतयो मयि ॥ १७ ॥

अन्वयः— महता कालेन एषां च पराभवः भविष्यति । नष्टप्रकृतयः ते मयि प्रकृतिं भजिष्यन्ति ।

अर्थ— बहुत समय बाद इनका पराभव होगा। राज्य नष्टप्राय हो जाने पर वे मेरे अधिकारके अन्तर्गत प्रजा बनेंगे।

दुःशासनेन पापेन तदा द्यूते प्रवर्तिते।
अनाथवत्तदा देवी द्रौपदी सुदुरात्मना॥ १८॥
आकृष्य केशे रुदती सभायां राजसंसदि।
भीष्मद्रोणप्रमुखतो गौरिति व्याहृता मुहुः॥ १९॥

अन्वयः— तदा द्यूते प्रवर्तिते, सुदुरात्मना पापेन दुःशासनेन केशे आकृष्य अनाथवत् रुदती देवी द्रौपदी भीष्मद्रोणप्रमुखतः राजसंसदि सभायां मुहुः गौः इति व्याहृता।

अर्थ— तब द्यूत आरम्भ हो जानेपर दुरात्मा, पापी, दुःशासन द्वारा केश खींचे जानेपर अनाथके समान रोती हुई द्रौपदीको भीष्म और द्रोणके सामने राजसभामें बार बार "गाय" कहा।

भवता वारिताः सर्वे भ्रातरो भीमविक्रमाः।
धर्मपाशनिबद्धाश्च न किञ्चित्प्रतिपेदिरे॥ २०॥

अन्वयः— सर्वे भीमविक्रमाः भ्रातरः भवता वारिताः धर्मपाशनिबद्धाः च किंचित् न प्रतिपेदिरे।

अर्थ— सम्पूर्ण अति पराक्रमी भाइयोंको निवारण कर देनेके कारण धर्म पाशसे बद्ध हुए (उन भाइयोंने) कुछ भी प्रतिकार नहीं किया।

पूर्व पाठोंके श्लोकोंका सरल संस्कृत कथानक इस प्रकार बनता है।

महाभारतम्।

श्री भगवानुवाच। श्रुतं वाक्यं संजयस्य। श्रुतं च मया भवतो वाक्यम्। भवतस्तेषां च योऽभिप्रायोऽस्ति तं सर्वमभिप्रायमहं जानामि। तव बुद्धिर्धर्माश्रिताः तेषां कौरवाणां वैराश्रया मतिः। युद्धेन यल्लभ्यते तत्ते बहुमतं भवेत्। हे विशांपते धर्मराज! नैवं नैष्ठिकं कर्म क्षत्रियस्य प्रशस्तम्। सर्वेऽप्याश्रमितो 'न चरेद्भैक्ष्यं क्षत्रियः' इत्येवाहुः।

संस्कृत-पाठ-माला।

(चौबीस भाग)

[संस्कृत-भाषाका अध्ययन करनेका सुगम उपाय]

संस्कृत-पाठ-मालाके अध्ययनसे लाभ—

१ अपना [illegible] किसी गुरुकी सहायताके [illegible] रामायण अथवा महाभारत [illegible]

२ [illegible] है।

३ [illegible] है।

इस पद्धतिकी विशेषता यह है—

भाग १–३ इनमें संस्कृतके [illegible] है।

भाग ४ इसमें संधिविचार बताया है।

भाग ५–६ इनमें संस्कृतके साथ विशेष परिचय कराया है।

भाग ७–१० इनमें पुंलिंग स्त्रीलिंग और नपुंसकलिंगी नामोंके रूप बनानेकी विधि बताई है।

भाग ११ इसमें "सर्वनाम" के रूप बताये हैं।

भाग १२ इसमें समासोंका विचार किया है।

भाग १३–१८ इनमें क्रियापद-विचारकी पाठविधि बताई है।

भाग १९–२४ इनमें वेदके साथ परिचय कराया है।

प्रत्येक पुस्तकका मूल्य ॥) और डा. व्य. =)
२४ पुस्तकोंका मूल्य १२) और डा. व्य. १।)

मंत्री— स्वाध्याय मण्डल,

पोस्ट- 'स्वाध्याय मण्डल (पारडी)', पारडी [जि. सूरत]

मुद्रक और प्रकाशक- व. श्री. सातवलेकर, भारत मुद्रणालय, पारडी [जि. सूरत]

अंक ७

ॐ

संस्कृत-पाठ-माला।

[संस्कृत-भाषाका अध्ययन करनेका सुगम उपाय]

सप्तमो भागः

लेखक

पं. श्रीपाद दामोदर सातवलेकर

अध्यक्ष- स्वाध्याय-मण्डल, साहित्यवाचस्पति, गीतालंकार

अष्टम वार

संवत् २०१४, शक १८७९, सन १९५७

नामोंके रूप ।

नामोंके सातों विभक्तियोंके रूप बनानेकी रीति इस पुस्तकमें देनेका प्रारंभ किया है । पाठक इसका ठीक अध्ययन करेंगे, तो उनको संस्कृत वाक्य बनानेका उत्तम अभ्यास हो जायगा ।

साथ साथ क्रियाओंके रूप भी बताये जाते हैं । इनके अध्ययनसे पाठक स्वयं क्रियापद बनाकर उनका उपयोग कर सकते हैं ।

आशा है कि पाठक इसका योग्य अध्ययन करके लाभ प्राप्त करेंगे ।

लेखक
श्रीपाद दामोदर सातवलेकर

मुद्रक व प्रकाशक- वसंत श्रीपाद सातवळेकर, बी. ए.,
भारत-मुद्रणालय, पोस्ट- 'स्वाध्यायमण्डल, (पारडी)' [जि. सूरत]

ॐ

संस्कृत-पाठ-माला।

सप्तम भाग।

पाठ १

संस्कृतमें ' वचन ' तीन हैं। भाषामें केवल दो ही हैं। एक संख्याको ' एकवचन ' कहते हैं, और अनेक संख्याको ' अनेकवचन ' कहते हैं,

एकः अश्वः = एक घोडा (एकवचन)

बहवः अश्वाः = बहुत घोडे (अनेकवचन)

परंतु संस्कृतमें इनके बीचमें और एक ' द्विवचन ' भी होता है, जैसा—

एकः गजः = एक हाथी (एकवचन)

द्वौ गजौ = दो हाथी (द्विवचन)

बहवः गजाः = बहुत हाथी (बहुवचन)

हिन्दी भाषाके व्यवहारमें और संस्कृत भाषाके व्यवहारमें यह वचनोंका भेद ध्यानमें रखने योग्य है।

इस समयतक पाठक एकवचनके रूप बनानेकी योग्यता प्राप्त कर चुके हैं, और वैसे रूप बनाकर कई वाक्य भी पाठक बनाने लगे हैं। इसलिये अब तीनों वचनोंके रूप बनानेकी रीति बतानेका विचार किया है। आशा है कि पाठक इस पाठका योग्य अभ्यास करके शब्दोंके रूप बनानेकी योग्यता प्राप्त करेंगे।

अकारान्त पुल्लिंग शब्दोंके सातों विभक्तियोंके और तीनों वचनोंके रूप इस प्रकार होते हैं—

गजः (हाथी)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	गजः	गजौ	गजाः
संबोधन (हे)	गज !	(हे) गजौ !	(हे) गजाः !
द्वितीया	गजं	गजौ	गजान्
तृतीया	गजेन	गजाभ्यां	गजैः
चतुर्थी	गजाय	गजाभ्यां	गजेभ्यः
पंचमी	गजात्	गजाभ्यां	गजेभ्यः
षष्ठी	गजस्य	गजयोः	गजानाम्
सप्तमी	गजे	गजयोः	गजेषु

इनके अर्थ निम्नलिखित होते हैं—

प्रथमा	[१ गजः	=	एक हाथी
	[२ गजौ	=	दो हाथी
	[३ गजाः	=	बहुत हाथी
संबोधन	[१ गज	=	हे एक हाथी !
	[२ गजौ	=	हे दो हाथियो !
	[३ गजाः	=	हे बहुत हाथियो !
द्वितीया	[१ गजं	=	एक हाथीको
	[२ गजौ	=	दो हाथियोंको
	[३ गजान्	=	बहुत हाथियोंको
तृतीया	[१ गजेन	=	एक हाथीने
	[२ गजाभ्यां	=	दो हाथियोंने
	[३ गजैः	=	बहुत हाथियोंने

	[१ गजाय	=	एक हाथीके लिये
चतुर्थी	[२ गजाभ्यां	=	दो हाथियोंके लिये
	[३ गजेभ्यः	=	बहुत हाथियोंके लिये
	[१ गजात्	=	एक हाथीसे
पंचमी	[२ गजाभ्यां	=	दो हाथियोंसे
	[३ गजेभ्यः	=	बहुत हाथियोंसे
	[१ गजस्य	=	एक हाथीका
षष्ठी	[२ गजयोः	=	दो हाथियोंका
	[३ गजानां	=	बहुत हाथियोंका
	[१ गजे	=	एक हाथीमें
सप्तमी	[२ गजयोः	=	दो हाथियोंमें
	[३ गजेषु	=	बहुत हाथियोंमें

पूर्वभागोंमें अकारान्त पुल्लिंग शब्द बहुत आगये हैं। उनके रूप पाठक स्वयं इस रीतिसे बना सकते हैं। एकवचनके रूप तो पाठक स्वयं बना सकते ही हैं।

सूचना।

द्विवचनके रूप— प्रथमा, संबोधन और द्वितीयाके समान ही हैं। तृतीया, चतुर्थी और पंचमीके भी एकसे ही होते हैं। तथा षष्ठी और सप्त-मीके भी एकसे होते हैं।

पाठक इस समताको ध्यानमें धरेंगे तो द्विवचनके रूप बनाना बहुत ही सुगम हो जायगा।

बहुवचनके रूप— प्रथमा और संबोधनके परस्पर समान हैं। चतुर्थी और पंचमीके भी समान हैं।

यह समानता पाठकोंके ध्यानमें आनेके लिये एक और शब्दके रूप बताये जाते हैं।

हस्तः (हाथ)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	हस्तः	हस्तौ	हस्ताः
संबोधन	(हे) हस्त !	(हे) हस्तौ !	(हे) हस्ताः !
द्वितीया	हस्तं	हस्तौ	हस्तान्
तृतीया	हस्तेन	हस्ताभ्यां	हस्तैः
चतुर्थी	हस्ताय	हस्ताभ्यां	हस्तेभ्यः
पंचमी	हस्तात्	हस्ताभ्यां	हस्तेभ्यः
षष्ठी	हस्तस्य	हस्तयोः	हस्तानाम्
सप्तमी	हस्ते	हस्तयोः	हस्तेषु

संस्कृत-वाक्यानि ।

१ सः मनुष्यः पादाभ्यां गच्छति । २ अहं कर्णाभ्यां शृणोमि । ३ गजेभ्यः जलं देहि । ४ तत्र गजानां पंक्तिः अस्ति । ५ सः बालः शब्दानां प्रयोगं जानाति । ६ अश्वानां शब्दं शृणु । ७ सः नराणां पालकः अस्ति ।

भाषा-वाक्य ।

१ वह मनुष्य (दो) पैरोंसे जाता है । २ मैं (दो) कानोंसे सुनता हूं । ३ (बहुत) हाथियोंके लिये जल दो । ४ वहां (बहुत) हाथियोंकी पंक्ति है । ५ वह बालक (बहुत) शब्दोंका प्रयोग जानता है । ६ (बहुत) घोडोंका शब्द सुन । ७ वह मनुष्योंका पालक है ।

संधि किये हुए वाक्य ।

स नराणां पालकोऽस्ति । गजेभ्यो जलं देहि । तत्र गजानां पंक्तिरस्ति । पंक्तिर्नास्ति तत्र गजानाम् । पालको नराणां सोऽस्ति । त्वं देहि जलं गजेभ्यः । अस्ति पंक्तिस्तत्र गजानाम् । तत्र नास्ति पंक्तिर्गजानाम् ।

पाठ २

इस पाठमें भी पुनः अकारान्त पुल्लिंग शब्दोंके रूप बनानेकी रीति बताते हैं—

नरः (मनुष्य)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	नरः	नरौ	नराः
संबोधन	(हे) नर !	(हे) नरौ !	(हे) नराः !
द्वितीया	नरम्	नरौ	नरान्
तृतीया	नरेण	नराभ्याम्	नरैः
चतुर्थी	नराय	नराभ्याम्	नरेभ्यः
पंचमी	नरात्	नराभ्याम्	नरेभ्यः
षष्ठी	नरस्य	नरयोः	नराणाम्
सप्तमी	नरे	नरयोः	नरेषु

पाठक इनको ठीक मननपूर्वक देखें और ध्यानमें रखें। यह स्मरण रखनेसे पाठक बहुत ही सुगमतासे विभक्तियोंके रूप बना सकते हैं।

इनका अब उपयोग देखिये—

‘ प्रथमा ’

१ एकः नरः तत्र अस्ति। २ द्वौ नरौ तत्र न स्तः। ३ बहवः नराः अत्र सन्ति।

१ एक मनुष्य वहां है। २ दो मनुष्य वहां नहीं हैं। ३ बहुत मनुष्य यहां हैं।

‘ संबोधन ’

१ हे नर ! त्वं किं करोषि ? २ हे नरौ ! कुत्र गच्छथः ? ३ हे नराः ! मद्वचनं शृणुत।

१ हे (एक) मनुष्य ! तू क्या करता है ? २ हे (दो) मनुष्यो ! आप कहां जाते हैं ? ३ हे (बहुत) मनुष्यो ! मेरा वचन सुनो ।

'द्वितीया'

१ धनं पुरुषार्थिनं नरं आगच्छति । २ स पुरुषः नरौ प्रति गच्छति । ३ त्वं तान् नरान् अत्र आनय ।

१ धन पुरुषार्थी मनुष्यके प्रति जाता है । २ वह मनुष्य (दो) मनुष्योंके प्रति जाता है । ३ तू उन (बहुत) मनुष्योंको यहां ला ।

'तृतीया'

१ तेन नरेण इदानीं किं कृतम् ? २ नराभ्यां न किमपि कृतम् । ३ सर्वैः नरैः किं उक्तम् ?

१ उस मनुष्यने अब क्या किया ? २ (दो) मनुष्योंने कुछ भी नहीं किया । ३ सब मनुष्योंने क्या कहा ?

'चतुर्थी'

१ त्वं तस्मै नराय किं ददासि ? २ नराभ्यां उदकं देहि । ३ सः नरेभ्यः अन्नं ददाति ।

१ तू उस मनुष्यके लिये क्या देता है ? २ (दो) मनुष्योंके लिये जल दो । ३ वह (बहुत) मनुष्योंके लिये अन्न देता है ।

'पंचमी'

१ तस्मात् नरात् मया धनं लब्धं । २ ताभ्यां नराभ्यां त्वं किं इच्छसि ? ३ नीचेभ्यः नरेभ्यः त्वं अत्र आगच्छ ।

१ उस मनुष्यसे मैंने धन प्राप्त किया । २ उन (दो) मनुष्योंसे तू क्या चाहता है ? ३ नीच मनुष्योंसे तू यहां आ ।

'षष्ठी'

१ तस्य नरस्य प्रशस्तं रूपं अस्ति । २ तयोः नरयोः इदानीं युद्धं जातं । ३ इदानीं तत्र नराणां महान् समूहः संमिलितः ।

१ उस मनुष्यका प्रशस्त रूप है। २ उन (दो) मनुष्योंका अब युद्ध हुआ। ३ अब वहां (बहुत) मनुष्योंका बड़ा समूह संमिलित हुआ है।

' सप्तमी '

१ तस्मिन् नरे कः विशेषः ? २ तयोः नरयोः न कः अपि विशेषः। ३ नरेषु विद्वान् पुरुषः प्रशस्यते।

१ उस मनुष्यमें क्या विशेष है ? २ उन (दो) मनुष्योंमें कोई विशेष नहीं है। ३ मनुष्योंमें विद्वान् पुरुष प्रशंसित होता है।

अकारान्त पुल्लिंगी ' नर ' शब्दके सातों विभक्तियोंके रूप वाक्योंमें इसी प्रकार प्रयुक्त किये जाते हैं। पाठक इसी प्रकार रूप बनाकर उन रूपोंसे अनेक संस्कृतके वाक्य बनानेका अभ्यास करें।

अकारान्त पुल्लिंग शब्द।

स्वाध्यायः	= अपना अध्ययन	कोविदः	= ज्ञानी
सज्जनः	= सत्पुरुष	त्यागः	= दान
आर्यः	= आर्य	जयः	= विजय
वर्णः	= रंग	बुधः	= विद्वान्
आश्रमः	= आश्रम	आचार्यः	= आचार्य
यागः	= यज्ञ	उपवासः	= उपवास

संस्कृत-वाक्यानि।

१ त्वं किं स्वाध्यायं न करोषि ? २ तव गुरुः सज्जनः अस्ति। ३ आर्येण किं अधीतम् ? ४ शास्त्रेषु कोविदः अत्र न कः अपि अस्ति ? ५ यः धनस्य त्यागं करोति स एव त्यागी इति उच्यते। ६ अहं जयाय यत्नं करोमि। ७ अद्य अहं उपवासं करोमि।

भाषा–वाक्य ।

१ तू क्यों स्वाध्याय नहीं करता है ? २ तेरा अध्यापक सज्जन है । ३ आर्यने क्या अध्ययन किया ? ४ शास्त्रोंमें ज्ञानी यहां कोई भी नहीं है । ५ जो धनका दान करता है, वही त्यागी कहा जाता है । ६ मैं जयके लिये यत्न करता हूं । ७ आज मैं उपवास करता हूं ।

संधि किये हुए वाक्य ।

आर्येण किमधीतम् ? किमधीतमार्येण ? किमार्येणाधीतम् ? आर्येणाधीतं किम् ? शास्त्रेषु कोविदोऽत्र न कोऽप्यस्ति । अत्र न कोऽपि शास्त्रेषु कोविदोऽस्ति । कोविदः शास्त्रेष्वत्र न कोऽप्यस्ति । कोऽपि नास्त्यत्र कोविदः शास्त्रेषु । अद्याहमुपवासं करोमि । करोम्युपवासमद्याहम् । अहमद्य करोम्युपवासम् । उपवासमहमद्य करोमि । करोम्यहमद्योपवासम् । यो धनस्य त्यागं करोति स एव त्यागीत्युच्यते । यः करोति त्यागं धनस्य स एवोच्यते त्यागीति । त्यागीति स एवोच्यते यस्त्यागं धनस्य करोति । उच्यते स एव त्यागीति यः करोति धनस्य त्यागम् । करोति यो धनस्य त्यागं स एवोच्यते त्यागीति ।

पाठ ३

पूर्व दो पाठोंमें शब्दोंके तीनों वचनोंका थोडासा विचार किया है । नामोंके वचनोंके साथ साथ क्रियाओंका भी विचार होना आवश्यक है, इसलिये इस पाठमें क्रियाओंका विचार थोडासा किया जाता है । जिस प्रकार नामोंके विभक्तिरूपोंमें एकवचन, द्विवचन और बहुवचन ऐसे तीन वचन होते हैं, ठीक उसी प्रकार क्रियाओंमें भी तीन वचन होते हैं । जैसा–

वर्तमान काल ।

'वद्' (बोलना)

पुरुष	एकवचन	द्विवचन	बहुवचन
उत्तम पुरुष	वदामि	वदावः	वदामः
मध्यम पुरुष	वदसि	वदथः	वदथ
तृतीय पुरुष	वदति	वदतः	वदन्ति

१ वर्तमान काल— उसको कहते हैं कि जो वर्तमान समयका वर्णन करता है। वर्तमानकालके ये रूप हैं। जैसा—

'वदामि' का अर्थ 'मैं इस समय बोलता हूं।' 'गच्छामि' मैं अभी जाता हूँ, आदि।

२ भूत काल— वह होता है जो भूत अर्थात् गत कालकी स्थिति बताता है। जैसे- 'अगच्छत्' अर्थात् गया, 'अवदत्' बोला।

३ भविष्य काल— वह होता है, जो आगे आनेवाला होता है। जैसे- 'गमिष्यति' वह जायगा, 'करिष्यति' वह करेगा, इत्यादि।

वर्तमान कालके रूप ऊपर दिये हैं, भूत और भविष्यकालके रूप पीछेसे दिये जायेंगे।

ऊपर तीन पुरुष दिये हैं, उनका अर्थ यह है—

उत्तम पुरुष— 'मैं' यह अर्थ बतानेवाला। इसको भाषामें 'प्रथम पुरुष' भी कोई कहते हैं।

मध्यम पुरुष— 'तू' यह अर्थ बतानेवाला। इसको भाषामें 'द्वितीय पुरुष' भी कहते हैं।

तृतीय पुरुष— 'वह' अथवा 'तीसरा' यह अर्थ बतानेवाला। इसको संस्कृतमें 'प्रथम पुरुष' कहते हैं और भाषामें 'तृतीय पुरुष' कहते हैं।

वाक्य बनानेके पूर्व (अहं) मैं तथा (त्वं) तू के तीनों वचनोंके रूप जाननेकी आवश्यकता है । इसलिये वे रूप यहां देते हैं—

	एकवचन	द्विवचन	बहुवचन
(उत्तम पुरुष)	अहं	आवां	वयं
प्रथमा	(मैं)	(हम दो)	(हम सब)
(मध्यम पुरुष)	त्वं	युवां	यूयं
प्रथमा	(तू)	(तुम दो)	(तुम सब)
(तृतीय पुरुष)	सः	तौ	ते
प्रथमा	(वह)	(वे दो)	(वे सब)

तृतीय पुरुषके स्थानपर किसी भी नामका उपयोग किया जाता है, परंतु उत्तम और मध्यम पुरुषोंके स्थानपर उक्त सर्वनामोंके शब्दोंका ही प्रयोग होता है । उक्त क्रियाके रूपोंके साथ एक एक शब्द उत्तम, मध्यम और तृतीय पुरुषके लगकर वाक्य बनते हैं । उत्तम पुरुषकी क्रियाओंके साथ क्रमशः वचनोंके अनुसार उत्तम पुरुषके सर्वनाम तथा अन्योंके साथ अन्य लगते हैं । देखिये—

उत्तम पुरुष ।

१ अहं वदामि = मैं बोलता हूं ।
२ आवां वदावः = हम (दो) बोलते हैं ।
३ वयं वदामः = हम (सब) बोलते हैं ।

मध्यम पुरुष ।

१ त्वं वदसि = तू बोलता है ।
२ युवां वदथः = तुम (दो) बोलते हो ।
३ यूयं वदथ = तुम (सब) बोलते हो ।

तृतीय पुरुष ।

१ सः वदति = वह बोलता है ।
२ तौ वदतः = वे (दो) बोलते हैं ।
३ ते वदन्ति = वे (सब) बोलते हैं ।

— किंवा —

१ रामः वदति = राम बोलता है ।
२ रामलक्ष्मणौ वदतः = राम-लक्ष्मण बोलते हैं ।
३ मनुष्याः वदन्ति = (सब) मनुष्य बोलते हैं ।

यही रीति ठीक समझमें आनेके लिये और थोडे वाक्य यहां देते हैं —

१ अहं गच्छामि = मैं जाता हूं ।
२ आवां गच्छावः = हम (दो) जाते हैं ।
३ वयं गच्छामः = हम (सभी) जाते हैं ।
१ त्वं गच्छसि = तू जाता है ।
२ युवां गच्छथः = तुम (दो) जाते हो ।
३ यूयं गच्छथ = तुम (सब) जाते हो ।
१ सः गच्छति = वह जाता है ।
२ तौ गच्छतः = वे (दो) जाते हैं ।
३ ते गच्छन्ति = वे (सब) जाते हैं ।

— किंवा —

१ मनुष्यः गच्छति = मनुष्य जाता है ।
२ मनुष्यौ गच्छतः = (दो) मनुष्य जाते हैं ।
३ मनुष्याः गच्छन्ति = (सब) मनुष्य जाते हैं ।

प्रत्येक वचनके रूपके साथ ही क्रियाका उसी वचनका रूप प्रयुक्त होता है । भाषामें क्रियाके भी दो वचन ही केवल हैं, परंतु संस्कृतमें तीन वचन

हैं। पाठक इनका उपयोग विशेष विचारसे देखें और स्मरण रखें, ता
आगे अशुद्धि होने न पाये। यह विषय अत्यंत महत्त्वका है, इसलिये वि
मननसे स्मरण करना चाहिये।

पाठ ४

अब इस पाठमें कुछ अकारान्त पुल्लिंग शब्द देते हैं। उनके रूप
लिखे नियमके अनुसार ही कीजिये—

शब्द (अकारान्त पुल्लिंग)

ग्रामः	=	गांव	अपूपः		पूआ, बड़ा
आपणः	=	बाजार	सूपः		
लेखकः	=	लेखक	ओदनः	=	(पके) चावल
पर्वतः	=	पहाड़	रथः	=	रथ, गाडी
मार्गः	=	मार्ग, रास्ता	अर्भकः	=	लड़का
चरणः	=	पांव	प्रसादः	=	कृपा
मूषकः	=	चूहा	रक्षकः	=	रखवाला
वत्सः	=	बछड़ा	सेवकः	=	नौकर

संस्कृत-वाक्यानि

१ अहं ग्रामं गच्छामि। २ सः ग्रामात् आगच्छति। ३
ग्रामं गच्छतः। ४ ते मनुष्याः ग्रामात् आगच्छन्ति। ५ सेव
आपणं गच्छति। ६ सेवकौ आपणं गच्छतः। ७ सेवकाः आप
गच्छन्ति। ८ तव लेखकः कदा आगमिष्यति। ९ मम लेख
अधुना आगमिष्यतः। १० ते सर्वे पुरुषाः श्वः आगमिष्यन्ति
११ हिमपर्वतस्य मार्गं त्वं जानासि किम्? १२ तव वत्सः

करोति ? १३ मम द्वौ वत्सौ धावतः । १४ तस्य पुत्रः तत्र धावति । १५ मम सर्वे पुत्राः इदानीं धावन्ति ।

भाषा--वाक्य ।

१ मैं ग्रामको जाता हूं । २ यह गांवसे जाता है । ३ वे (दो) गांवको जाते हैं । ४ वे मनुष्य ग्रामसे जाते हैं । ५ नौकर बाजार जाता है । ६ (दो) नौकर बाजार जाते हैं । ७ (अनेक) नौकर बाजार जाते हैं । ८ तेरा लेखक कब आयेगा ? ९ मेरे (दो) लेखक अब आयेंगे । १० वे सब पुरुष कल आयेंगे । ११ हिमपर्वतका मार्ग तू जानता है क्या ? १२ तेरा बछडा क्या करता है ? १३ मेरे दोनों बछडे दौडते हैं । १४ उनका लडका वहां दौडता है । १५ मेरे सब पुत्र अब दौडते हैं ।

यदि इन सब वचनोंका पाठ आपकी समझमें आगया हो, तो आपको निम्नलिखित वाक्य बिना आयास समझमें आ सकते हैं ।

संस्कृत-वाचन-पाठः ।

त्वं कुत्र गच्छसि ? युवां कुत्र गच्छथः ? यूयं कदा अत्र आगच्छथ ? अहं तत्र न गच्छामि । आवां तत्र न गच्छावः । वयं कदापि तत्र न गच्छामः । तत्र त्वं किं न गच्छसि ? तत्र युवां किं न गच्छथः ? तत्र यूयं किं न गच्छथ ? यत् अहं पठामि, तत् त्वं किं न वदसि ? यत् अहं न पठामि, तत् युवां किं वदथः ? यत् अहं पठामि, तत् यूयं किं वदथ ?

रामः इदानीं उद्यानं गच्छति । रामलक्ष्मणौ इदानीं उद्यानं गच्छतः । रामलक्ष्मणभरताः इदानीं उद्यानं गच्छन्ति । अद्य सः मनुष्यः आपणं गच्छति । अद्य तौ मनुष्यौ आपणं गच्छतः । अद्य ते मनुष्याः आपणं गच्छन्ति ।

श्वः अहं तत्र नैव गमिष्यामि । श्वः आवां तत्र नैव गमिष्यावः । श्वः वयं तत्र नैव गमिष्यामः ।

कदा तौ पाठशालां गच्छतः ? कदा ते ग्रामं गच्छन्ति ? का
सः नगरं गच्छति ?

स सर्वदा नगरात् नगरं किं गच्छति ? तौ सदा ग्रामात् ग्रा
किं गच्छतः ? ते सर्वदा ग्रामात् ग्रामं किं गच्छन्ति ?

बालकः उद्यानं कदा गच्छति ? द्वौ बालकौ उद्यानं गच्छ
पश्चात् आपणं गच्छतः । सर्वे बालकाः अध्ययनस्य पश्चात् भ्र
णाय गच्छन्ति ।

त्वं सायंकाले कुत्र गमिष्यसि ? युवां प्रातःसमये कुत्र ग
ष्यथः ? यूयं मध्याह्नसमये अत्र न किं आगच्छथ ?

अहं रात्रौ गुरोः गृहं गच्छामि । आवां दिनसमये पाठशा
गच्छावः । वयं अनध्यायसमये कुत्र अपि न गच्छामः ।

यथा अहं तत्र गच्छामि, तथा त्वं अपि तत्र आगच्छसि किं
अहं तत्र कथं गन्तुं शक्नोमि ? यदि त्वं आगमिष्यसि, तर्हि अ
अपि आगमिष्यामि ।

पाठक इन वाक्योंमें नामों और क्रियाओंके वचनोंका सम्बन्ध देखें । ए
वचनके नामोंके साथ एकवचनकी क्रिया आती है, द्विवचनके साथ द्विव
नकी और बहुवचनके साथ बहुवचनकी क्रिया आती है, यह स्मरण रख
चाहिये ।

संधि किये हुए वाक्य ।

यदहं पठामि तद्यूयं किं वदथ ? यदहं पठामि तदेव यूयं
वदथ ! राम इदानीमुद्यानं गच्छति । गच्छतीदानीमुद्यानं राम
रामो गच्छतीदानीमुद्यानम् । गच्छत्युद्यानमिदानीं रामः । इदा
रामो गच्छत्युद्यानम् ।

पाठ ५

इस पाठमें अकारान्त नामोंके कुछ प्रत्यय देते हैं, इनको नामोंके साथ लगानेसे विभक्तिके रूप सुगमतासे बनाये जा सकते हैं—

विभक्तियोंके प्रत्यय।

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	—ः	—औ	—अः
संबोधन	—+	—औ	—अः
द्वितीया	—म्	—औ	—अन्
तृतीया	—इन	—आभ्यां	—ऐः
चतुर्थी	—आय	—आभ्यां	—इभ्यः
पंचमी	—आत्	—आभ्यां	—इभ्यः
षष्ठी	—स्य	—योः	—अनां
सप्तमी	—इ	—योः	—इषु

इन प्रत्ययोंको अकारान्त पुल्लिंग नामोंके साथ लगाकर विभक्तियोंके रूप कीजिये—

प्रथमा	मोदकः	मोदकौ	मोदकाः
संबोधन	(हे) मोदक !	(हे) मोदकौ !	(हे) मोदकाः !
द्वितीया	मोदकम्	मोदकौ	मोदकान्
तृतीया	मोदकेन	मोदकाभ्यां	मोदकैः
चतुर्थी	मोदकाय	मोदकाभ्यां	मोदकेभ्यः
पंचमी	मोदकात्	मोदकाभ्यां	मोदकेभ्यः
षष्ठी	मोदकस्य	मोदकयोः	मोदकानां
सप्तमी	मोदके	मोदकयोः	मोदकेषु

पाठक इन नामोंमें प्रत्ययोंका अनुभव करें और इस प्रकार प्रत्ययोंका

स्मरण रखके नामोंके रूप बनानेका प्रयत्न करें। एक वार यह विधि ठीक समझमें आगई तो फिर कोई कठिनता नहीं रहेगी।

अब कुछ अकारान्त पुल्लिंग शब्द कंठ कीजिये और उनके रूप पूर्ववत बनाइये—

अकारान्त पुल्लिंग शब्द।

आम्रः = आम	वृक्षः = वृक्ष
वेदः = वेद	मन्त्रः = मंत्र
दण्डः = सोटी	धूम्रः = धूआं
लोभः = लोभ	कुमारः = लडका
वासः = रहना	समुद्रः = सागर
स्वरः = आवाज	रसः = रस
जनः = मनुष्य	इन्द्रः = राजा, प्रमुख

वाक्यानि।

१ अहं आम्रं खादामि = मैं आम खाता हूं।
२ आवां आम्रौ खादावः = हम (दो) आमोंको खाते हैं।
३ वयं आम्रौ खादामः = हम (सब) दो आम खाते हैं।

पाठक इसमें एक विशेष बात देखें। प्रत्येक वाक्यमें 'कर्ता' होता है। क्रियाका करनेवाला कर्ता होता है। उक्त वाक्योंमें खानेकी क्रिया करनेवाला शब्द कर्ता है। प्रथम वाक्यमें 'अहं' यह कर्ता है। कर्ताके वचनके अनुसार ही क्रियाके वचन होते हैं। प्रथम वाक्यमें कर्ताका एक वचन है, इस कारण क्रिया भी एकवचनी हो गई। द्वितीय वाक्यमें कर्ताका द्विवचन है, इसलिये क्रिया द्विवचनी हो गई और तृतीय वाक्यमें कर्ता बहुवचनी है, इसलिये क्रिया भी बहुवचनी हो गई है। इस प्रकार कर्ताके वचनके अनुसार क्रियाका वचन होना ही चाहिये।

कर्ता और क्रिया इन दो पदोंको छोडनेसे उक्त वाक्योंमें जो तीसरा शब्द है, उसको ' कर्म ' कहते हैं। कर्ता जो कार्य करता है, उस कार्यका परिणाम जिस पदार्थपर होता है, उसका नाम ' कर्म ' होता है।

कई क्रियाएं कर्मके साथ होती हैं, उनको ' सकर्मक क्रियापद ' कहते हैं। तथा कई क्रियाएं कर्मके विना होती हैं, उनको ' अकर्मक क्रियापद ' कहते हैं। इन दोनोंके उदाहरण देखिये—

सकर्मक क्रियापद।

१ रामः आम्रं भक्षयति	= राम आम खाता है।
२ विष्णुः विश्वं धारयति	= विष्णु विश्व धारण करता है।
३ कृष्णः युद्धं करोति	= कृष्ण युद्ध करता है।
४ मनुष्यः जलं पिबति	= मनुष्य जल पीता है।
५ सः पुस्तकं नयति	= वह पुस्तक ले जाता है।
६ त्वं पाठं पठसि	= तू पाठ पढता है।

ये क्रियापद सकर्मक हैं, क्योंकि इन क्रियाओंको कर्मकी अपेक्षा रहती है। यदि केवल ' सः पठति ' इतना ही कहा जाय तो प्रश्न हो सकता है कि ' क्या पढता है ? ' इस प्रश्नके उत्तर आने अर्थात् ' कर्म ' बतानेतक समाधान ही नहीं होता। इसलिये ये क्रियापद सकर्मक कहलाते हैं। अब ' अकर्मक क्रियापद ' देखिये।

अकर्मक क्रियापद।

१ सः अस्ति	= वह है।
२ अहं धावामि	= मैं दौडता हूं।
३ सः तिष्ठति	= वह ठहरता है।
४ सः भवति	= वह होता है।

ये क्रियापद अकर्मक हैं, क्योंकि किसी भी अन्य कर्मकी अपेक्षा इन क्रियाओंको नहीं है। ' धावति ' कहने मात्रसे क्रियाका पूर्ण अर्थ ज्ञात

होता है । ' वादति ' इस प्रकार नहीं है, क्योंकि इस क्रियाके उच्चारण साथ आनेका पदार्थ भी कहना आवश्यक होता है। पाठक इस बात अच्छी प्रकार विचार करें और समझें कि ये क्रियाओंके भेद कैसे हैं । आगे इस विषयकी गलती न हो।

पाठ ६

इस पाठमें क्रियापदोंके प्रत्यय देते हैं, उनको लगाकर क्रियापदोंके पाठक बना सकते हैं—

पुरुष	एकवचन	द्विवचन	बहुवचन
उत्तम०	—मि	—वः	—मः
मध्यम०	—सि	—थः	—थ
तृतीय०	—ति	—तः	—अन्ति

जिन प्रत्ययोंके प्रारंभमें ' म ' अथवा ' व ' होते हैं, उनके पूर्व अकारका ' आ ' होता है । जैसा—

१	गच्छामि	गच्छावः	गच्छामः
२	गच्छसि	गच्छथः	गच्छथ
३	गच्छति	गच्छतः	गच्छन्ति

वाक्यानि ।

अहं गच्छामि । आवां गच्छावः । वयं गच्छामः । त्वं गच्छसि युवां गच्छथः । यूयं गच्छथ । सः गच्छति । तौ गच्छतः । गच्छन्ति । पुरुषः गच्छति । मनुष्यौ गच्छतः । देवाः गच्छन्ति अहं वदामि । आवां न वदावः । वयं कथं वदामः ? त्वं वदसि किं ? युवां किं वदथः ? यूयं शब्दान् वदथ । जनः मुखेन वदति अश्वौ न वदतः । मयूराः वदन्ति ।

अब कुछ क्रियायें दी जाती हैं उनके रूप पूर्ववत् कीजिये—

धातु	अर्थ	रूप
१ गम् (गच्छ)	जाना	गच्छति
२ भक्ष्	खाना	भक्षयति
३ दृश् (पश्य)	देखना	पश्यति
४ नी (नय)	ले जाना	नयति
५ पठ्	पढ़ना	पठति
६ स्था (तिष्ठ्)	ठहरना	तिष्ठति
७ धाव्	दौड़ना	धावति
८ पा (पिब)	पीना	पिबति
९ वद्	बोलना	वदति
१० क्रीड्	खेलना	क्रीडति

इन धातुओंके वर्तमान कालके रूप बनानेके प्रत्यय इस पाठमें दिये हैं। मूल धातुके जो भिन्न रूप बनते हैं, वे कंसमें (   ) दिये हैं।

वाक्यानि।

अहं पुस्तकं पठामि = मैं पुस्तक पढ़ता हूं।
आवां पुस्तकं न पठावः = हम (दो) पुस्तक नहीं पढ़ते हैं।
वयं ग्रन्थं पठामः = हम (सब) ग्रंथ पढ़ते हैं।
रामः लेखं नैव पठति = राम लेख नहीं पढ़ता।
बालकौ पुस्तकं न पठतः ? = (दो) बालक पुस्तक क्यों नहीं पढ़ते ?
बालकाः ग्रन्थं इदानीं पठन्ति = (बहुत) बालक ग्रंथ अब पढ़ते हैं।
अहं अत्र क्रीडामि = मैं यहां खेलता हूं।
आवां अत्र न क्रीडावः = हम (दोनों) यहां नहीं खेलते।

तापसो भवतु । ८ एष मे परमः कामः । त्वया दत्तं एव वरं १
अद्य एव रामं वने प्रयान्तं पश्यामि । ९ इति एवं दारुणं १
श्रुत्वा महाराजः दशरथः सद्यः निःसंज्ञः इव बभूव । १० १
संज्ञां प्राप्य, असंवृतायां एव भूम्यां आसीनः, दीर्घं उष्णं च १
श्वस्य, भूयः अपि मोहं आपेदिवान् । ११ चिरेण तु संज्ञां प्र
लभ्य क्रुद्धः राजा कैकेयीं इदं अब्रवीत् । १२ पापे ! किं ते रा
अपकृतं ? १३ सदा तव विषये जननीतुल्यां वृत्तिं रामः वह
१४ तीक्ष्णविषा सर्पिणी इव मया त्वं आत्मविनाशाय एव स्व
वनं निवेशिता । १५ रामं अपश्यतः तु मम चेतनं नष्टं भवति ।
तत् अलं । त्यज्यतां एष निश्चयः । अपि एषः अहं ते चरणौ मू
स्पृशामि, प्रसीद । १७ अथ कैकेयी रौद्रात् रौद्रं प्रत्युवाच ।
हे राजन् ! यदि वरौ दत्वा पुनः अनुतप्यसे तर्हि पृथिव्यां धा
कत्वं कथं कथयिष्यसि ? १९ अहं तव अग्रतः अद्य एव म
ष्यामि विषं पीत्वा, यदि रामः अभिषिच्यते । २० ऋते रामवि
सनात् अहं न तुष्येयम् ।

भाषा—वाक्य ।

१ राजा दशरथ बोला— हे कैकेयि ! रामसे भिन्न मेरा तेरेसे अधिक प्रि
कोई भी नहीं है । २ उस रामचन्द्रकी ही शपथ लेता हूं । ३ तेरे मन
(ईप्सितं) इष्ट कह, वह अब करूंगा । ४ उससे संतुष्ट हुई कैकेयी व
क्रूर अपना अभिप्राय बोलने लगी । ५ यहां यह सत्यप्रतिज्ञ सत्यभाष
राजा दशरथ मुझे वर देता है । ६ इसी रामके अभिषेक–समारंभसे मे
भरतको राज्यमें अभिषिक्त कीजिये । ७ और राम वल्कल और चर्म धार
कर चौदह वर्ष दण्डक अरण्यका आश्रय कर तापसी होवे । ८ यह मेरी
परम इच्छा है । तूने दिया हुआ ही वर (मुझे) स्वीकार करती हूं । आ
ही राम वनमें चला हुआ देखूंगी । ९ इस प्रकार यह भयानक भाषण सुन
कर महाराज दशरथ (सद्यः) तत्क्षण (निःसंज्ञ) मूर्छितसा हो गया

१० पुनः (संज्ञां) चेतना प्राप्त कर, (अ-संवृतायां) न आच्छादित भूमिपर ही बैठा हुआ, दीर्घ और उष्ण श्वास छोडकर, वारंवार ही मोहको प्राप्त हुआ। ११ देरसे फिर चेतना प्राप्त कर क्रुद्ध राजा कैकेयीसे यह बोला। १२ हे पापी स्त्री ! क्या तेरा रामने अपराध किया ? १३ हमेशा तेरे विषयमें माताके समान वृत्ति राम धारण करता है। १४ तीखे विषवाली सांपनीके मैंने तुमको अपने विनाशके लिये ही अपने घरमें प्रविष्ट कराई। १५ रामको न देखनेपर तो मेरी चेतना ही नष्ट होती है। १६ तो बस, छोडा जाय यह निश्चय, अब यह मैं तेरे चरणोंको सिरसे स्पर्श करता हूं, प्रसन्न हो। १७ अब कैकेयी भयानकसे भयानक बोलने लगी। १८ हे राजा ! यदि दो वर देकर फिर पश्चात्ताप करता है, तो पृथ्वीपर धार्मिक कैसा कहलावेगा ? १९ मैं तेरे सामने आज ही मरूंगी विष पीकर, यदि रामका अभिषेक होगा। २० रामके वनवासके (ऋते) विना मैं नहीं संतुष्ट होऊंगी।

समास।

१ रामविवासनं = रामस्य विवासनं (रामका वनवास)
२ स्वाभिप्रायः = स्वस्य अभिप्रायः (अपना अभिप्राय)
३ सत्यसन्धः = सत्या सन्धा प्रतिज्ञा यस्य (सत्य है प्रतिज्ञा जिसकी)
४ सत्यवाक् = सत्या वाक् वाणी यस्य (सत्य है वचन जिसका)
५ अभिषेकसमारम्भः = अभिषेकस्य समारम्भः— (अभिषेकका समारंभ)
६ चीराजिनधरः = चीरं च अजिनं च चीराजिने। चीराजिने धरति इति चीराजिनधरः (वल्कल और चर्म धारण करनेवाला)

सूचना।

पाठक इन समासोंका अच्छा अभ्यास करें। तथा इस पाठके वाक्योंका भी उत्तम अध्ययन करें। और यदि हो सके तो इन वाक्योंके संधि बनाकर सरल संस्कृत वाक्य बनाकर लिखकर रखें।

संधि किये हुए वाक्य।

अहं तवाग्रतोऽद्यैव मरिष्यामि विषं पीत्वा यदि रामोऽभिषिच्यते। रामो यद्यभिषिच्यते तर्ह्यहं विषं पीत्वाऽद्यैवाग्रयस्तव मरिष्यामि। मरिष्याम्यग्रतस्तवाद्यैवाहं विषं पीत्वा यदि रामोऽभिषिच्यते।

पाठ ८

तथा तान्दुःखितान्दृष्ट्वा पाण्डवान्धृतराष्ट्रजः।
क्लिश्यमानां च पाञ्चालीं विकर्ण इदमब्रवीत्॥ ११॥

(म. भा. सभा. ६८)

(तथा) एवं प्रकारेण तान् पाण्डवान् दुःखितान् दृष्ट्वा (धृतराष्ट्रजः) धृतराष्ट्रात् जातः पुत्रः विकर्णः (क्लिश्यमानां) क्लेशैः पीडितां दुःखितां (पाञ्चालीं) द्रौपदीं च दृष्ट्वा इदं (अब्रवीत्) अवदत्।

याज्ञसेन्या यदुक्तं तद्वाक्यं विब्रूत पार्थिवाः।
अविवेकेन वाक्यस्य नरकः सद्य एव नः॥ १२॥

हे (पार्थिवाः) नृपाः! (याज्ञसेन्या) द्रौपद्या यत् (उक्तं) कथितं (वाक्यं) वचनं तत् (विब्रूत) विशेषेण ब्रूत कथयत। द्रौपद्याः प्रश्नस्य उत्तरं दातव्यं इति अर्थः। वाक्यस्य (अविवेकेन) अविचारेण (नः) अस्माकं सर्वेषां (सद्यः) तत्क्षणं एव नरकः भविष्यति।

भीष्मश्च धृतराष्ट्रश्च कुरुवृद्धतमावुभौ।
समेत्य नाहतुः किञ्चिद्विदुरश्च महामतिः॥ १३॥

भीष्मः च धृतराष्ट्रः च (उभौ) द्वौ अपि (कुरुवृद्धतमौ) सर्वेषु कुरुषु अत्यन्तवृद्धौ। तौ द्वौ अपि (समेत्य) संगत्य किंचित् न (आहतुः) न उक्तवन्तौ (महामतिः) महाबुद्धिमान् विदुरः च किंचित् अपि न आह।

भारद्वाजश्च सर्वेषामाचार्यः कृप एव च ।
कुत एतावपि प्रश्नं नाहतुर्द्विजसत्तमौ ॥ १४ ॥

(भारद्वाजः) द्रोणः च सर्वेषां कुरूणां आचार्यः । (कृपः) कृपनामकः एव च सर्वेषां कुरूणां आचार्यः । एतौ द्वौ अपि आचार्यौ (द्विजसत्तमौ) द्विजश्रेष्ठौ (कुतः) किमर्थं प्रश्नं न आहतुः ?

ये त्वन्ये पृथिवीपालाः समेताः सर्वतो दिशम् ।
कामक्रोधौ समुत्सृज्य ते ब्रुवन्तु यथामति ॥ १५ ॥

ये तु अन्ये (पृथिवीपालाः) भूपाः सर्वतः दिशां (समेताः) संगताः प्राप्ताः ते कामक्रोधौ (समुत्सृज्य) त्यक्त्वा परित्यज्य यथामति (ब्रुवन्तु) कथयन्तु ।

यदिदं द्रौपदी वाक्यमुक्तवत्यसकृच्छुभा ।
विमृश्य कस्य कः पक्षः पार्थिवा वदतोत्तरम् ॥ १६ ॥

शुभा द्रौपदी (असकृत्) अनेकवारं यद् इदं वाक्यं उक्तवती । हे (पार्थिवाः) नृपाः ! (विमृश्य) विचार्य कस्य कः पक्षः इति उत्तरं (वदत) कथयत ।

सूचना ।

इस पाठमें संस्कृत श्लोकोंका अर्थ सुगम संस्कृतमें ही दिया है । पाठक ध्यानपूर्वक इसे वारंवार पढेंगे तो उनकी समझमें सब अर्थ आ जायगा । श्लोकके कठिन शब्द ( ) ऐसे कंसमें रखे हैं और आगे उनका अर्थ दिया है । यदि यह अर्थ विना आयास पाठकोंके मनमें आगया, तो समझिये कि अच्छी प्रगति हो चुकी है । अब यहां श्लोकोंके समास देते हैं ।

समास ।

१ धृतराष्ट्रजः = धृतराष्ट्रात् जातः । (धृतराष्ट्रसे उत्पन्न हुआ)

२ कुरुवृद्धतमौ = कुरुषु वृद्धः कुरुवृद्धः । अत्यन्तं कुरुवृद्ध कुरुवृद्धतमः तौ कुरुवृद्धतमौ । (कौरवोंमें अतिवृद्ध)

३ महामतिः = महती विशाला मतिः बुद्धिः यस्य । (विशाल बुद्धिवाला)

४ द्विजसत्तमः = द्विजेषु ब्राह्मणक्षत्रियवैश्येषु सत्तमः श्रेष्ठः द्विजसत्तमः। (द्विजोंमें श्रेष्ठ)

५ पृथिवीपालः = पृथिव्याः पालः पालकः। (पृथिवीका पालनकर्ता)

६ कामक्रोधौ = कामः च क्रोधः च कामक्रोधौ। (काम और क्रोध)

७ असकृत् = न सकृत् असकृत् (नहीं एकवार अनेकवार)

पाठक इन समासोंका ठीक ठीक अध्ययन करें। इस अध्ययनसे समासोंका उत्तम ज्ञान हो सकता है।

संधि।

१ विकर्ण इदं	=	विकर्णः इदं।
२ यदुक्तं	=	यत् उक्तं।
३ तद्वाक्यं	=	तत् वाक्यं।
४ सद्य एव	=	सद्यः एव।
५ भीष्मश्च	=	भीष्मः च।
६ कृप एव	=	कृपः एव।
७ एतावपि	=	एतौ अपि।
८ नाहतुर्द्विज०	=	न आहतुः द्विज०।
९ त्वन्ये	=	तु अन्ये।
१० सर्वतो दिशं	=	सर्वतः दिशं।
११ उक्तवत्यसकृच्छुभा	=	उक्तवती अ-सकृत् शुभा।

पाठक इन संधियोंको ध्यानसे देखें।

संधि किये हुए वाक्य।

व्याधो बाणैर्मृगं विध्यति। विध्यति मृगं बाणैर्व्याधः। बाणैर्व्याधो विध्यति मृगम्। विध्यति व्याधो मृगं बाणैः। बाणैर्मृगं व्याधो विध्यति। किं व्याधस्तत्र बाणैर्मृगं विध्यति? कदा खलु बाणैर्विध्यति मृगं व्याधः? एष व्याधोऽत्र विध्यति मृगं बाणैः।

पाठ ९

पूर्व दो पाठोंमें जो संस्कृत वाक्य दिये हैं, उनकी संधि करके सरल संस्कृत इस पाठमें दी जाती है—

रामायणम् ।

राजा दशरथ उवाच— हे कैकेयि ! रामादन्यः मे त्वत्तः प्रियतरः कोऽपि नास्ति । तेन राघवेणैव शपे । अत इदानीं मनसेप्सितं ब्रूहि, तदधुना करिष्यामि । तेन हृष्टा कैकेयी महाघोरं स्वाभिप्रायं व्याजहार ।

अत्रायं सत्यसन्धः सत्यवाग्राजा दशरथो मे वरं ददाति । अनेनैव रामस्याभिषेकसमारंभेण मे भरतो राज्येऽभिषिच्यताम् । रामश्च चीराजिनधरश्चतुर्दशवर्षाणि दण्डकारण्यमाश्रितस्तापसो भवतु ।

एष मे परमः कामः । त्वया दत्तमेव वरं वृणे । अद्यैव रामं वने प्रयान्तं पश्यामि ।

इत्येवं दारुणं वचः श्रुत्वा महाराजो दशरथः सद्यो निःसंज्ञ इव बभूव । पुनः संज्ञां प्राप्य असंवृतायामेव भूम्यामासीनो, दीर्घमुष्णं च निःश्वस्य भूयोऽपि मोहमापेदिवान् ।

चिरेण तु संज्ञां प्रतिलभ्य क्रुद्धो राजा कैकेयीमिदमब्रवीत् । पापे ! किं ते रामेणापकृतं ? सदा तव विषये जननीतुल्यां वृत्तिं रामो वहति । तीक्ष्णविषा सर्पिणीव मया त्वमात्मविनाशायैव स्वभवनं निवेशिता । राममपश्यतस्तु मम चेतनं नष्टं भवति । तदलं, त्यज्यतामेष निश्चयः । अप्येषोऽहं ते चरणौ मूर्ध्ना स्पृशामि, प्रसीद ।

अथ कैकेयी रौद्राद्रौद्रं प्रत्युवाच । हे राजन् ! यदि वरौ दत्त्वा पुनरनुतप्यसे, तर्हि पृथिव्यां धार्मिकत्वं कथं कथयिष्यसि ? अहं तवाग्रतोऽद्यैव मरिष्यामि विषं पीत्वा, यदि रामोऽभिषिच्यते। ऋते रामविवासनादहं न तुष्येयम्।

सूचना ।

सप्तम पाठके संस्कृत वाक्योंकी यह संधियुक्त संस्कृत है। यदि इसमें कोई कठिनता प्रतीत हुई, तो सप्तम पाठ देखनेसे निवृत्त हो सकती है।

अब पूर्व पाठमें दिये श्लोकोंकी सरल संस्कृत यह है, देखिये—

महाभारतम् ।

तथा तान्पाण्डवान्दुःखितान्दृष्ट्वा धृतराष्ट्रजो विकर्णः क्लिश्यमानां पाञ्चालीं च दृष्ट्वेदमब्रवीत् ।

हे पार्थिवाः ! याज्ञसेन्या यद्वाक्यमुक्तं तद्विब्रूत । वाक्यस्य अविवेकेन सद्य एव नरकः ।

भीष्मश्च धृतराष्ट्रश्चोभौ कुरुवृद्धतमौ समेत्य किंचिन्नाहतुः, महामतिः विदुरश्च किंचित् नाह ।

भारद्वाजः सर्वेषामाचार्यः कृप एव चैतावपि द्विजसत्तमौ कृतं प्रश्नं नाहतुः ।

ये त्वन्ये पृथिवीपालाः सर्वतो दिशां समेतास्ते कामक्रोधौ समुत्सृज्य यथामति ब्रुवन्तु ।

शुभा द्रौपद्यसकृद्यदिदं वाक्यमुक्तवती । हे पार्थिवाः ! विमृश्य कस्य कः पक्ष इत्युत्तरं वदत ।

सूचना ।

ये संधियुक्त वाक्य हैं । इनके मूल श्लोक पूर्व पाठमें हैं । संदेहके स्थान-पर वहीं पाठक देखें और संदेह निवृत्त करें ।

इन वाक्योंमें पूर्व श्लोकोंकी अपेक्षा किसी किसी स्थानपर कुछ शब्द अधिक भी रखे हैं । अर्थका ज्ञान सुगमतासे होनेके लिये ऐसा करना आवश्यक हुआ है ।

संधि ।

१ दशरथ उवाच	दशरथः उवाच ।
२ रामादन्यः	रामात् अन्यः ।
३ कोऽपि	कः अपि ।
४ राघवेणैव	राघवेण एव ।
५ तदधुना	तत् अधुना ।
६ स्वाभिप्रायं	स्व अभिप्रायम् ।
७ सत्यवाग्राजा	सत्यवाक् राजा ।
८ अद्यैव	अद्य एव ।
९ इत्येवं	इति एवं ।
१० क्रुद्धो राजा	क्रुद्धः राजा ।
११ सर्पिणीव	सर्पिणी इव ।

पाठक इन संधियोंका अभ्यास करें और अन्य संधि खोलनेका भी अभ्यास करें ।

पाठ १०

इस पाठमें निम्नलिखित अकारान्त पुल्लिंग शब्द याद कीजिये—

अर्थः	=	पैसा, धन	उद्यमः	=	उद्योग
वानरः	=	बंदर	कुक्कुरः	=	कुत्ता
छात्रः	=	शिष्य	समाजः	=	समाज
दण्डः	=	सोटी	दैत्यः	=	राक्षस
मृगः	=	हिरन	पाठः	=	पाठ
स्तेनः	=	चोर	ब्राह्मणः	=	ब्राह्मण
द्विरेफः	=	भ्रमर	शक्रः	=	इंद्र
व्याधः	=	शिकारी	पान्थः	=	मुसाफिर
लेखः	=	लेख	अलंकारः	=	जेवर
करः	=	हाथ	स्नेहः	=	मित्रता
प्रवाहः	=	प्रवाह	विचारः	=	विचार

वाक्य ।

सः अर्थं वांछति = वह धनकी इच्छा करता है ।
वानरौ वृक्षस्य उपरि भवतः = (दो) वानर वृक्षके ऊपर होते हैं ।
छात्राः गुरोः समीपं पठन्ति = (सब) शिष्य गुरुके समीप पढते हैं ।
दण्डं धरति इति दण्डधरः = दंड धरनेवाला दंडधर (होता) है ।
तौ द्वौ दण्डौ अत्र आनय = वे दो सोटियाँ यहां ला ।
व्याधः दण्डेन एव मृगान् ताडयति = शिकारी डंडेसे ही (सब) मृगोंको ताडन करता है ।
स्तेनाय दण्डं देहि = चोरको दंड दो ।
सः हस्ताभ्यां भारं नयति = वह (दो) हाथोंसे बोझ ले जाता है ।

व्याधः बाणैः मृगं विध्यति = शिकारी बाणोंसे हिरनको बींधता है।

द्विरेफः शब्दं करोति = भ्रमर शब्द करता है।

लेखकः लेखं न लिखति = लेखक लेख नहीं लिखता।

यः न लिखति स लेखकः भवितुं न योग्यः = जो नहीं लिखता, वह लेखक होने योग्य नहीं।

अहं कराभ्यां मुखं आच्छादयामि = मैं (दो) हाथोंसे मुख आच्छादित करता हूं।

इदानीं अत्र जलस्य महान् प्रवाहः अस्ति = अब यहां जलका बडा प्रवाह है।

उद्यमेन हि कार्याणि सिद्ध्यन्ति, न मनोरथैः = उद्योगसे ही कार्य सिद्ध होते हैं, मनोरथसे नहीं।

व्याधः कुक्कुरैः व्याघ्रं अन्वेषति = शिकारी कुत्तोंसे शेरको ढूंढता है।

यदा मनुष्याणां महान् समाजः भवति, तदा तस्मिन् बहु बलं अस्ति = जब मनुष्योंका बडा समाज होता है, तब उसमें बडा बल होता है।

दैत्यः मनुष्यं भक्षयति = राक्षस मनुष्यको खाता है।

अद्य त्वं कं पाठं पठसि ? = आज तू किस पाठको पढता है ?

प्राज्ञः ब्राह्मणः वेदं पठति = ज्ञानी ब्राह्मण वेद पढता है।

स्वर्गे शक्रः राज्यं करोति = स्वर्गमें इंद्र राज्य करता है।

पान्थाय जलं देहि = मुसाफिरके लिये जल दो।

मूर्खः अलंकारैः देहं भूषयति = मूढ मनुष्य जेवरोंसे देहको सजाता है।

स्नेहेन सुखं लभते = मित्रतासे सुख प्राप्त होता है।

वाचन पाठः ।

यदा त्वं जलं पिबसि तदा एव अहं दुग्धं पिबामि । यदा त्वं तत्र आगमिष्यसि तदा अहं एतत्पुस्तकं पठिष्यामि । अहं रात्रौ बहिः न गमिष्यामि । अहं इदानीमेव गृहं गत्वा आम्रं भक्षयामि । दुग्धेन सह आम्रस्य भक्षणं अतीव मधुरं भवति । आकाशात् द्विरेफः पतति । सः पुरुषः किमर्थं पुस्तकं आनयति ? अहं यदा तत्र गतः तदा सः तत्र नासीत् । अहं वनं गत्वा पुष्पमालां शीघ्रं कृत्वा अत्र आनयिष्यामि । त्वं उद्यानपुष्पाणां मालां इच्छसि वा वनपुष्पाणां मालां वांछसि ? यत्र यज्ञदत्तः गच्छति तत्र देवदत्तः न गच्छति । परंतु यज्ञदत्तदेवदत्तौ सदा अत्र भवतः । त्वं मम वस्त्रं गृहीत्वा शीघ्रं अत्र आगच्छ, मम रक्तं वस्त्रं एव अत्र आनय, न श्वेतं वस्त्रम् ।

सूचना ।

पाठक इस प्रकार अनेकानेक वाक्य बनाकर अपना अभ्यास बढावें । वाक्य बनानेके समय एकवचन, द्विवचन और बहुवचनका ख्याल अवश्य करें, नहीं तो वाक्य अशुद्ध बनेंगे । ऊपर जो वाक्य दिये हैं, उनका मनन करनेसे यह अभ्यास सुगमतासे हो जायगा ।

संधि किये हुए वाक्य ।

यत्र यज्ञदत्तो गच्छति तत्र देवदत्तो न गच्छति । न गच्छति तत्र देवदत्तो यत्र गच्छति यज्ञदत्तः । गच्छति यत्र यज्ञदत्तस्तत्र न गच्छति देवदत्तः । त्वं मम वस्त्रं गृहीत्वा शीघ्रमत्रागच्छ । आगच्छ त्वमत्र शीघ्रं गृहीत्वा मम वस्त्रम् । मम वस्त्रं शीघ्रं गृहीत्वा-गच्छ त्वमत्र । मम रक्तं वस्त्रमेवात्रानय । आनयात्रैव मम रक्तं वस्त्रम् । अत्रैवानय मम रक्तं वस्त्रम् । कोऽसौ यज्ञदत्तो यो न जलं पिबति ?

पाठ ११

इस पाठमें निम्नलिखित धातु कंठ करके उसके रूप पूर्ववत् बनाइये—

	धातु	अर्थ	रूप
१	आगम् (आगच्छ्)	आना	आगच्छति
२	आनी (आनय्)	लाना	आनयति
३	भू (भव्)	होना	भवति
४	पत्	गिरना	पतति
५	चल्	चलना	चलति
६	चर्	घूमना	चरति
७	लिख्	लिखना	लिखति
८	स्था (तिष्ठ्)	ठहरना	तिष्ठति
९	उपविश्	बैठना	उपविशति
१०	पच्	पकाना	पचति
११	वस्	रहना	वसति
१२	वह्	ढोना	वहति
१३	वप्	बोना	वपति
१४	रट्	बोलना	रटति
१५	रण	शब्द करना	रणति
१६	भण्	बोलना	भणति

पाठक इन धातुओंके रूप पूर्व बतायी हुई रीतिके अनुसार करके वाक्य करें—

वाक्यानि ।

पुरुषः आगच्छति = पुरुष आता है ।
मनुष्यौ आनयतः = (दो) मनुष्य ले आते हैं ।
बालकाः तत्र भवन्ति = बालक वहां होते हैं ।

हे मनुष्य ! त्वं पतसि = हे मनुष्य ! तू गिरता है ।
हे वीरौ ! युवां चलथः = हे वीरो ! तुम (दो) चलते हो ।
हे मानवाः ! यूयं चरथ = हे मानवों ! तुम (सब) घूमते हो ।
अत्र अहं लेखं लिखामि = यहां मैं लेख लिखता हूं ।
आवां अत्र तिष्ठावः = हम (दो) यहां ठहरते हैं ।
वयं तत्र उपविशामः = हम (सब) वहां बैठते हैं ।
सूदः अन्नं पचति = रसोइया अन्न पकाता है ।
परिचारकौ तत्र वसतः = (दो) सेवक वहां रहते हैं ।
अश्वाः रथं वहन्ति = घोड़े रथको चलाते हैं ।
कृषीवलः बीजं वपति = किसान बीज बोता है ।
बालकौ तत्र किमपि रटतः = (दो) बालक वहां कुछ भी बोलते हैं ।
घंटाः रणन्ति = घंटाएं शब्द करती हैं ।
त्वं किं इदानीं भणसि ? = तू क्या अब बोलता है ?

वाक्यानि ।

अहं आगच्छामि । त्वं आगच्छसि । स आगच्छति । आवां आगच्छावः । युवां आगच्छथः । तौ आगच्छतः । वयं आगच्छामः । यूयं आगच्छथ । ते आगच्छन्ति ।

अहं फलं आनयामि । आवां जलं आनयावः । वयं धान्यं आनयामः । त्वं पात्रं आनयसि । युवां वस्त्रं आनयथः । यूयं पुस्तकं आनयथ । सः अश्वं आनयति । तौ अश्वं आनयतः । ते अश्वं आनयन्ति ।

वृक्षः भवति । वृक्षौ भवतः । वृक्षाः भवन्ति । त्वं भवसि । युवां भवथः । यूयं भवथ । अहं भवामि । आवां भवावः । वयं भवामः ।

बालकः पतति । बालकौ पततः । बालकाः पतन्ति । त्वं पतसि ।

युवां पतथः । यूयं पतथ । अहं पतामि । आवां पतावः । वयं पतामः ।

अहं ग्रामं चलामि । आवां नगरं चलावः । वयं देशान्तरं चलामः । त्वं कदा चलसि ? युवां कुत्र चलथः ? यूयं किं न चलथ ? सः इदानीं न चलति । तौ इदानीं न चलतः । ते इदानीं एव चलन्ति ।

अश्वः वने चरति । अश्वौ वने चरतः । अश्वाः वने चरन्ति । त्वं कुत्र चरसि ? युवां कुत्र चरथः ? यूयं कुत्र चरथ ? सः न चरति । तौ तत्र चरतः । ते न चरन्ति ।

गंगाधरः लिखति । विश्वामित्रभरद्वाजौ लिखतः । छात्राः लिखन्ति । त्वं किं न लिखसि ? युवां लिखथः । किं यूयं लिखथ ? अहं अत्र लिखामि । आवां अत्र लिखावः । वयं अत्र न लिखामः ।

सूचना ।

धातुओंके रूप बनानेका अभ्यास इस पद्धतिसे पाठक करें । कर्ताका वचन और क्रियाका वचन एक होना चाहिये । थोड़े ही शब्दोंसे प्रत्येक धातुके रूप जोड़कर इस प्रकार अनेक वाक्य हो सकते हैं । यदि पाठक इस रीतिसे प्रतिदिन अभ्यास करेंगे, तो उनको संस्कृत वाक्य बनाना सुगम हो जायगा ।

संधि किये हुए वाक्य ।

अश्वो वने चरति । चरत्यश्वो वने । वनेऽश्वो चरति । गंगाधरो लिखति । वयमत्र न लिखामः । अत्र न लिखामो वयम् । न वयं लिखामोऽत्र । तौ तत्र चरथः । चरथस्तत्र तौ । तत्र चरथस्तौ । आवामत्र लिखावः ।

पाठ १२

इस पाठमें आप निम्नलिखित शब्द स्मरण कीजिये—

अकारान्त पुल्लिंग शब्द ।

कूपः	= कुआ	यवः	= जौ
दुर्जनः	= दुष्ट मनुष्य	लोभः	= लोभ
विनयः	= नम्रता	ओष्ठः	= होंठ
शुकः	= तोता	मयूरः	= मोर
मार्जनलेपः	= साबुन	सुजनः	= सज्जन
देहः	= शरीर	कामः	= काम, इच्छा
ओदनः	= पके चावल	पेटकः	= पेटी, संदूक
प्रश्नः	= प्रश्न, सवाल	प्रकाशः	= प्रकाश, उजाला
जडः	= जड, मूढ	काचः	= शीशा
नागः	= सांप, हाथी	जनकः	= पिता

इदानीं तव कूपस्य जलं पिबामि = अब तेरे कुंएका जल पीता हूं ।

दुर्जनं दूरतः परित्यज = दुष्ट मनुष्यको दूरसे परित्याग कर ।

विद्वान् विनयेन शोभते = विद्वान् नम्रतासे सुहाता है ।

शुकः वृक्षस्य उपरि वसति = तोता वृक्षके ऊपर बसता है ।

मार्जनलेपेन जलेन च शरीरं निर्मलं कुरु = साबुनसे तथा जलसे शरीर निर्मल स्वच्छ कर ।

अश्वस्य देहः मनुष्यस्य शरीरात् बलिष्ठतरः अस्ति = घोडेका शरीर मनुष्यके देहसे अधिक बलिष्ठ है ।

त्वं कथं ओदनं पचसि ? = तू कैसे चावल पकाता है ?

सः इदानीं प्रश्नं पृच्छति = वह अब प्रश्न पूछता है ।

जडः ज्ञानेन हीनः भवति = मूढ ज्ञानसे हीन होता है ।

नागः विषयुक्तः भवति = सांप विषयुक्त होता है ।
तव जनकः किं लिखति ? = तेरा पिता क्या लिखता है ?
काचः त्वया दृष्टः किं ? = शीशा तूने देखा है क्या ?
इदानीं सूर्यस्य शुभ्रः प्रकाशः अस्ति = अब सूर्यका शुभ्र प्रकाश है।
तव पटके मम पुस्तकं अस्ति = तेरी संदूकमें मेरी पुस्तक है ।
यथा कामः तथा एव लोभः = जैसा काम वैसा ही लोभ है ।
सुजनं नमस्करोमि = सुजनको नमस्कार करता हूं ।
मयूरः अतीव शोभनः भवति = मोर अति सुंदर होता है ।
ओष्ठः कथं रक्तवर्णः न भवति ? = होंठ क्यों लालवर्णवाला नहीं होता है ?

वाचन पाठः ।

त्वं मुद्गं किं न पचसि ? मुद्गमिश्रितः ओदनः मधुरः भवति । मुद्गानां अन्नं मधुरं भवति । तस्य हिमपर्वतस्य शिखरं अतीव रमणीयं अस्ति । एकस्य बालकस्य पुस्तकं अन्यः नयति । तदा द्वौ अपि बालकौ युद्धं कुरुतः । यस्य बालकस्य मुखं मलिनं भवति सः मूढः भवति । सः बालकः इदानीं किं भक्षयति ? स इदानीं आम्रं भक्षयति, दुग्धं च पिबति । आम्रस्य भक्षणानंतरं जलं न पिब । तस्मै मार्गं देहि । सः अंधः बधिरः च अस्ति ।

आचार्यः धर्मस्य वचनं उपदिशति । त्वया तत् किं न श्रुतम् ? उपदेशकः धर्मवचनस्य अमृतं ददाति । तत् यथा इच्छसि तथा पिब ।

नृपतिः चोरं ताडयति । राजा यदा नगरात् बहिः गच्छति, तदा एव चोरः अत्र आगच्छति ।

त्वं अत्र कुमारं किमर्थं ताडयसि ? किं तेन कृतं ? सः शोभनः छात्रः अस्ति । तं न ताडय । सः इदानीं स्वपाठं करोति ।

स्वादु दुग्धं मिष्टं भवति। तथा फलानां रसः अपि मिष्टः अस्ति। अस्य कूपस्य जलं मधुरं नास्ति, तत् अतीव क्षारं अस्ति। अस्य कारणं किं अस्ति ?

विष्णुमित्रः कदा स्नानं करोति ? त्वं कदा भोजनं करोषि ? तव पुत्रः कदा पठति ? त्वं कुत्र वससि ? युवां कुत्र वसथः ? अहं प्रातः वनं गतः, इदानीं एव गृहं आगतः।

रामः नदीतीरं गत्वा तत्र शीतजलेन स्नानं करोति। त्वं नदीतीरं किं न गच्छसि ? अहं अधुना एव गच्छामि तत्र च स्नानं करोमि।

सूचना।

पाठक इस प्रकार छोटे छोटे वाक्य बनाकर बोलनेका यत्न करें। जो जो शब्द इस समयतक पाठकोंको कंठ हो चुके हैं, उनका उपयोग करके अनेकानेक वाक्य पाठक बोल सकते हैं।

इस प्रकार छोटे छोटे वाक्य बनानेका अभ्यास समय समयपर पाठक करेंगे, तो उनको सैकडों वाक्य बनानेका अवसर मिलेगा और उनको विश्वास भी हो जायगा, कि अपनी प्रगति संस्कृतमें इतनी हो गई है।

संधि किये हुए वाक्य।

मुद्गमिश्रित ओदनो मधुरो भवति। भवति मधुरो मुद्गमिश्रित ओदनः। यस्य बालकस्य मुखं मलिनं भवति, स मूढो भवति। भवति स मूढो बालको यस्य मुखं मलिनं भवति। स बालकोऽत्र किं भक्षयतीदानीम् ? स इदानीमाम्रं भक्षयति दुग्धं च पिबति। पिबतीदानीं स दुग्धमाम्रं च भक्षयति। सोऽन्धो बधिरश्चास्ति। सोऽस्त्यन्धो बधिरश्च। अहं प्रातर्वनं गत इदानीमेव गृहमागतः। गृहमिदानीमेवागतोऽहं प्रातश्च वनं गतः। तथा फलानां रसोऽपि मिष्टोऽस्ति। अस्ति मिष्टः फलानां रसः।

पाठ १३

रामायणम् ।

१ श्रुत्वा तत् कैकेयीवचनं राजा दशरथः निःश्वस्य छिन्नः तरुः इव अपतत् । २ दीनया वाचा च कैकेयीं अपृच्छत् । ३ केन त्वं एवं उपदिष्टा ? ४ नानादिग्भ्यः समागताः राजानः किं मां वक्ष्यन्ति ? ५ रामं वनं गच्छन्तं, सीतां च रुदतीं दृष्ट्वा चिरं जीवितुं न आशंसे । ६ हे कैकेयि ! सर्वान् अस्मान् नरके प्रक्षिप्य सुखिता भव । ७ मयि मृते, रामे वनं गते च, त्वं विधवा भूत्वा एव राज्यं करिष्यसि । ८ तथा विलपतः दशरथस्य सूर्यः अस्तं गतः । रजनी च अभ्यावर्तत । प्रभातकालः अपि जातः । ९ प्रभाते एव आशु वसिष्ठः संभारान् उपगृह्य राजमंदिरं प्रविवेश । १० सचिवं सुमन्त्रं आहूय प्रोवाच । ११ मां आगतं नृपतेः क्षिप्रं आचक्ष्व । १२ तथा त्वरस्व, यथा पुष्यनक्षत्रे रामः राज्यं अवाप्नुयात् । १३ एवं श्रुत्वा सः अपि प्रविवेश अन्तःपुरम् । १४ राज्ञः अवस्थां अज्ञात्वा एव तं अभिष्टोतुं प्रचक्रमे । १५ धार्मिकः राजा दशरथः रामं प्रति भग्नहृदयः शोकरक्तेक्षणः तं उवाच । १६ एतैः वाक्यैः खलु त्वं मम मर्माणि कृन्तसि । १७ सुमन्त्रः अस्य वाक्यस्य अर्थं न अन्वबुध्यत । १८ यदा दशरथः दैन्यात् न वक्तुं शशाक, तदा मन्त्रज्ञा कैकेयी सुमंत्रं प्रत्युवाच । १९ हे सुमन्त्र ! राजा रजनीं प्रजागरपरिश्रान्तः निद्रां गतः, अतः त्वरितं रामं अत्र आनय ।

भाषा-वाक्य ।

१ सुनकर वह कैकेयीका भाषण राजा दशरथ श्वास छोडकर काटे हुए वृक्षके समान गिर पडा । २ दीन वाणीसे कैकेयीसे पूछने लगा । ३ किसने तुझे इस प्रकार उपदेश किया ? ४ नाना दिशाओंसे आये हुए राजा लोग

क्या मुझे कहेंगे ? ५ रामको वनमें जाते और सीताको रोते देखकर देरतक जीनेकी आशा नहीं है । ६ हे कैकेयी ! हमको नरकमें फेंककर सुखी हो जाओ । ७ मेरे मरनेपर और रामके वनको जानेपर, तू विधवा होकर ही राज्य करेगी । ८ इस प्रकार विलाप करते हुए दशरथके, सूर्य अस्त हो गया । रात्रि हो गई । और प्रातःकाल भी हुआ । ९ सबेरे ही शीघ्र वसिष्ठ सामग्री लेकर राजमंदिरमें प्रविष्ट हुआ । १० मंत्री सुमंत्रको बुलाकर बोला। ११ मैं आया हूं, यह राजाको शीघ्र कह दो । १२ वैसी त्वरा कर कि जिससे पुष्यनक्षत्रमें राम राज्यको प्राप्त होवे । १३ यह सुनकर वह भी प्रविष्ट हुआ अन्तःपुरमें । १४ राजाकी अवस्था न जानकर ही उसकी स्तुति करनी प्रारंभ की । १५ धार्मिक राजा दशरथ रामके प्रति छिन्न हृदय होकर शोकसे लाल (ईक्षण) नेत्र होकर उससे बोला । १६ इन वाक्योंसे तो तू मेरे मर्म ही काट रहा है । १७ सुमन्त्र इस वाक्यका अर्थ नहीं समझा । १८ जब दशरथ दीनताके कारण नहीं समर्थ हुआ बोलनेके लिये तब विचारका भाव समझनेवाली कैकेयी सुमंत्रसे बोली । १९ हे सुमंत्र ! राजा रात्रिमें जागरणके कारण थका हुआ निद्रित हुआ है । इसलिये शीघ्र रामको ही यहाँ ला ।

समास ।

१ **कैकेयीवचनं** कैकेय्याः वचनं कैकेयीवचनं (कैकेयीका भाषण)

२ **विधवा** = विगतः मृतः धवः पतिः यस्याः सा विधवा पतिहीना मृतपतिका स्त्री । (जिसका पति मर चुका है ।)

३ **राजमंदिरं** = राज्ञः मंदिरं राजमंदिरं (राजाका भवन)

४ **भग्नहृदयः** = भग्नं हृदयं यस्य सः भग्नहृदयः । (जिसका हृदय छिन्नभिन्न हुआ है ।)

५ **मंत्रज्ञा** = मंन्त्रं जानाति इति मन्त्रज्ञा (विचारका भाव जाननेवाली)

६ **प्रजागरपरिश्रान्तः** = प्रकर्षेण अतिशयेन जागरः जागरणं प्रजागरः । परितः सर्वतः श्रांतः परिश्रांतः । प्रजागरेण परिश्रांतः प्रजागर-परिश्रांतः । (जागरण करनेके कारण थका हुआ ।)

सूचना ।

पाठक समासोंका भी अभ्यास अच्छा करें । तथा इन पाठके वाक्योंका भी अच्छा अभ्यास करें और जब सम्पूर्ण पाठ हो जाय, तब केवल वाक्य ही वारंवार अनेक समय पढते रहें ।

वाचन--पाठः ।

एवंप्रकारेण तान्पांडवान्दुःखितान् दृष्ट्वा धृतराष्ट्रस्य पुत्रः विकर्णः दुःखितां द्रौपदीं च दृष्ट्वा सभास्थितान् कौरवान् इदं अब्रवीत् । हे पार्थिवाः ! द्रौपद्याः वाक्यं श्रुत्वा तस्य उत्तरं किं न शीघ्रं कथयत । यदि भवन्तः तस्या योग्यं उत्तरं न प्रदास्यन्ति तर्हि शीघ्रमेव सर्वेषां अस्माकं नरके वासः भविष्यति ।

भीष्मः धृतराष्ट्रश्च द्वौ अपि वृद्धौ । परंतु तौ किंचिद् अपि न आहतुः । महाबुद्धिमान् विदुरोऽपि न किंचित् आह । द्रोणः कृपाचार्यश्च किमपि नो आहतुः । अतः अन्ये महीपालाः यथामति कथयन्तु ।

संधि किये हुए वाक्य ।

श्रुत्वा तत्कैकेयीवचनं राजा दशरथो निःश्वस्य छिन्नस्तरुरिवापतत् । दीनया वाचा च कैकेयीमपृच्छत् । केन त्वमेवमुपदिष्टा ? नानादिग्भ्यः समागता राजानः किं मां वक्ष्यन्ति ? रामं वनं गच्छन्तं, सीतां च रुदतीं दृष्ट्वा, चिरं जीवितुं नाशंसे । हे कैकेयि ! सर्वानस्मान्नरके प्रक्षिप्य सुखिता भव । मयि मृते, रामे च वनं गते, त्वं विधवा भूत्वैव राज्यं करिष्यसि । तथा विलपतो दशरथस्य सूर्योऽस्तं गतः । रजनी चाभ्यावर्तत । प्रभातकालोऽपि जातः । प्रभात एवाशु वसिष्ठः संभारानुपगृह्य राजमन्दिरं प्रविवेश । सचिवं सुमन्त्रमाहूय प्रोवाच । मामागतं नृपतेः क्षिप्रमाचक्ष्व ।

पाठ १४

इस पाठमें पूर्वके वाक्योंके ही स्तरपर, किन्तु सन्धियुक्त वाक्य दिये गये हैं। पाठक उसे पढ़ें तथा सन्धिरहित करके उनका अर्थ समझें।

स वदति। वदति सः। स न वदति। न स वदति। वदति न सः। मनुष्यो गच्छति। गच्छति मनुष्यः। मनुष्यो न गच्छति। न मनुष्यो गच्छति। न गच्छति मनुष्यः।

स ग्रामादत्रागच्छति। ग्रामात्सोऽत्रागच्छति। अत्र स ग्रामादागच्छति। आगच्छति ग्रामात्सोऽत्र। ग्रामादत्र स आगच्छति।

ते सर्वे पुरुषाश्च आगमिष्यन्ति। श्वस्ते सर्वे पुरुषा आगमिष्यन्ति। आगमिष्यन्ति सर्वे ते पुरुषाः।

राम इदानीमुद्यानं गच्छति। गच्छतीदानीं राम उद्यानम्। उद्यानमिदानीं रामो गच्छति। उद्यानं रामो गच्छतीदानीम्।

अद्य स मनुष्य आपणं गच्छति। स मनुष्योऽद्यापणं गच्छति। आपणं गच्छति स मनुष्योऽद्य। गच्छत्यद्य स मनुष्य आपणम्।

अहं रात्रौ गुरोर्गृहं गच्छामि। रात्रावहं गुरोर्गृहं गच्छामि। गुरोर्गृहं रात्रौ गच्छाम्यहम्। गच्छाम्यहं गुरोर्गृहं रात्रौ।

अब इस पाठमें महाभारतके कुछ श्लोक देते हैं। श्लोक, उस श्लोकके पद, अन्वय तथा बादमें अर्थ दिया है, इस पद्धतिसे वाचक श्लोकोंके अर्थ लगा सकेंगे।

आत्मा जेयः सदा राज्ञा ततो जेयाश्च शत्रवः।
अजितात्मा नरपतिर्विजयेत कथं रिपून्॥ ४॥

पदानि— आत्मा। जेयः। सदा। राज्ञा। ततः। जेयाः। च। शत्रवः। अजितात्मा। नरपतिः। विजयेत। कथं। रिपून्।

अन्वयः— राज्ञा सदा आत्मा जेयः। ततः। शत्रवः च जेयाः। अजितात्मा नरपतिः रिपून् कथं विजयेत।

संस्कृत अर्थ— राज्ञा राष्ट्रशासकेन, सदा सर्व कालं, आत्मा जेयः स्वकीयं अन्तःकरणं जेयं। ततः तदनंतरं शत्रवः अरयः जेयाः विजेतव्याः। अ–जित–आत्मा, न जितः आत्मा येन तादृशः, अजितान्तःकरणः नरपतिः नराणां मनुष्याणां पालकः राजा, रिपून् स्वकीयान् शत्रून् कथं विजयेत, स्वकीयानां शत्रूणां कथं पराभवं कर्तुं शक्नुयात् ?

अर्थ— (राज्ञा) राजासे (सदा आत्मा जेयः) हमेशा अपना अन्तःकरण जीतकर अपने वशमें रखा जाय। (ततः) उसके बाद (शत्रवः च जेयाः) अपने शत्रु जीत जांय। (अजितात्मा नरपतिः) जिसका अन्तःकरण अपने वशमें न हो ऐसा राजा (कथं रिपून् विजयेत) किस प्रकार अपने शत्रुओंको जीत सकेगा ?

एतावानात्मविजयः पञ्चवर्ग विनिग्रहः।
जितेन्द्रियो नरपतिर्बाधितुं शक्नुयादरीन् ॥ ९ ॥

पदानि— एतावान्। आत्मविजयः। पञ्च-वर्ग-विनिग्रहः। जितेन्द्रियः। नरपतिः। बाधितुं। शक्नुयात्। अरीन्।

अन्वयः— एतावान् आत्मविजयः पञ्चवर्गविनिग्रहः जितेन्द्रियः नरपतिः अरीन् बाधितुं शक्नुयात्।

संस्कृत अर्थ— एतावान् एवंविधः आत्मविजयः विजितान्तःकरणः, पञ्च-वर्ग-विनिग्रहः पञ्चानां इंद्रियाणां निग्रहकर्ता, जितेन्द्रियः जितानि इन्द्रियाणि येन सः, नरपतिः राजा, अरीन् शत्रून् बाधितुं विजेतुं शक्नुयात् समर्थो भवेत।

अर्थ—(एतावान्) इस प्रकार (आत्म विजयः) अपना अन्तःकरण स्वाधीन रखनेवाला, (पंचवर्ग विनिग्रहः) पांचों इन्द्रियोंको अपने वशमें रखनेवाला, (जितेन्द्रियः) इन्द्रियोंपर अपना अधिकार रखनेवाला (नरपतिः) राजा (अरीन्) शत्रुओंको (बाधितुं) बाधा पहुंचानेके लिये (शक्नुयात्) समर्थ होता है।

इसके विपरीत जो स्वेच्छासे आचार करनेवाला होगा। वह अपने शत्रुओंका पराभव नहीं कर सकेगा। । तो उसके शत्रु बलवान् होंगे और वे ही उसका पराभव करेंगे। अतः राजाने अपनी इन्द्रियां अपने वशमें रखनी चाहिये। संयमी होकर आचरण करे।

न्यसेत गुल्मान् दुर्गेषु सन्धौ च कुरुनन्दन।
नगरोपवने चैव पुरोद्यानेषु चैव ह ॥ ६ ॥
संस्थानेषु च सर्वेषु पुरेषु नगरेषु च।
मध्ये च नरशार्दूल तथा राजनिवेशने ॥ ७ ॥

(शांति पर्व अ० ६९)

पदानि— न्यसेत। गुल्मान्। दुर्गेषु। सन्धौ। च। कुरुनन्दन। नगरोपवने। च। एव। पुरोद्यानेषु। च। एव। हि ॥ ६ ॥ संस्थानेषु। च। सर्वेषु। पुरेषु। नगरेषु। च। मध्ये। च। नरशार्दूल। तथा। राजनिवेशने ॥ ७ ॥

अन्वयः— हे कुरुनन्दन! दुर्गेषु सन्धौ च गुल्मान् न्यसेत। नगरोपवने च एव, पुरोद्यानेषु च एव हि न्यसेत। सर्वेषु संस्थानेषु च पुरेषु नगरेषु च मध्ये। हे नरशार्दूल! तथा राजनिवेशने गुल्मान् न्यसेत।

संस्कृत अर्थ— हे कुरुनन्दन! हे कुरुवंशज! दुर्गेषु कोटेषु संधौ संधिस्थाने सीमाप्रान्ते च गुल्मान् सैनिकान् रक्षकसमूहान् न्यसेत स्थापयेत्। नगरोपवने नगरस्य समीपस्थे उपवने चैव, पुरोद्यानेषु अन्तःपुरस्य उद्यानेषु च रक्षकान् स्थापयेत्। सर्वेषु संस्थानेषु पुरेषु नगरेषु च मध्ये संरक्षकान् न्यसेत। हे नरशार्दूल, नरश्रेष्ठ! तथा राजनिवेशने राजप्रासादे च सैनिकान् स्थापयेत्। एतेषां संरक्षणार्थं सुयोग्यः प्रयत्नः कर्तव्यः।

अर्थ— हे (कुरुनन्दन) हे धर्मराज! किले, कोट, सीमाप्रान्त, नगर, उपवन, अन्तःपुरके उद्यान, अन्तःपुर, चार रास्ता, नगरके अंदरका भाग, राजवाडा इन सबका संरक्षण करनेके लिये सैनिकों अथवा रक्षकोंकी टुकडी रखनी चाहिये।

यदा तु हीनं नृपतिर्विद्यादात्मानमात्मना ।
अमात्यैः सह संमन्त्र्य कुर्यात् संधिं बलीयसा ॥ ६४ ॥

पदानि— यदा । तु । हीनं । नृपतिः । विद्यात् । आत्मानं । आत्मना । अमात्यैः । सह । संमन्त्र्य । कुर्यात् । संधिं । बलीयसा ।

अन्वयः— यदा तु नृपतिः आत्मना आत्मानं हीनं विद्यात्, तदा अमात्यैः सह संमन्त्र्य बलीयसा संधिं कुर्यात् ।

संस्कृत अर्थ— यदा तु यस्मिन् काले तु नृपतिः प्रजापालकः राजा, आत्मना आत्मानं स्वकीयं राष्ट्रं हीनं निर्बलं विद्यात्, तदा अमात्यैः सचिवैः मन्त्रिभिः सह संमन्त्र्य सम्यक् विचारं कृत्वा, बलीयसा बलशालिना शत्रुभूतेन नृपेण सह संधिं कुर्यात् ।

अर्थ— जब राजा स्वयं अपने आपको शत्रुकी अपेक्षा निर्बल है ऐसा माने, तब वह उस बलवान् शत्रुके साथ सन्धि करे । उस समय उसके साथ युद्ध करनेके लिये न जाय ।

सान्त्वेन तु प्रदानेन भेदेन च नराधिप ।
यदर्थं शक्नुयात् प्राप्तुं तेन तुष्येत पण्डितः ॥ ६५ ॥
(शांति पर्व अ० ६९)

पदानि— सान्त्वेन । तु । प्रदानेन । भेदेन । च । नराधिप । यदर्थं । शक्नुयात् । प्राप्तुं । तेन । तुष्येत । पण्डितः ।

अन्वयः— हे नराधिप ! पण्डितः सान्त्वेन तु प्रदानेन भेदेन च यदर्थं प्राप्तुं शक्नुयात्, तेन तुष्येत ।

संस्कृत अर्थ— हे नराधिप, नराणां अधिपते राजन् ! पण्डितः समयज्ञः राजा सान्त्वेन साम्ना, प्रदानेन धनं दत्वा प्रलोभनेन वा, भेदेन च शत्रुराष्ट्रे भेदं कृत्वा, यदर्थं प्राप्तुं शक्नुयात् यत् धनं लब्धुं शक्नुयात् , तेन एव अर्थलाभेन तुष्येत, संतुष्टो भवेत् ।

अर्थ— हे राजन् ! बुद्धिमान् राजा साम, दाम और भेद इन तीनों उपायोंसे जितना लाभ प्राप्त हो सके, उतनेसे ही संतुष्ट रहे । अधिक इच्छा न करे ।

पाठ १५

भीमकर्णयोर्युद्धम् ।

रणे ज्वलन्तं पावकं इव क्रुद्धं भीमसेनं दृष्ट्वा कर्णः वातेन उद्धूतः अर्णवः इव अन्यं रथं आस्थाय अभ्ययात्। क्रुद्धं कर्णं दृष्ट्वा सर्वे भीमसेनं हुताशने हुतं इव अमन्यन्त। ततः घोरं चापशब्दं कृत्वा राधेयः भीमसेनरथं प्रति अभ्यद्रवत्। ततः तयोः भीमकर्णयोः घोरं युद्धं प्रारब्धम्। परस्परवधेच्छया लोचनैः दहन्तौ इव अन्योन्यं ददृशतुः, परुषाणि च वाक्यानि ऊचतुः। ततः कर्णः नवभिः शितैः शरैः महाबलं भीमं विव्याध।

भरतशार्दूलः भीमसेनः तु हेमपृष्ठं महत् धनुः रथे निक्षिप्य करे गदां गृहीत्वा कर्णरथं प्रति वेगात् अभ्यधावत्। तं पाण्डवर्षभं तथा वेगेन आपतन्तं विलोक्य कर्णः अपि मत्तः द्विपः मत्तं द्विपं

भीम और कर्णका युद्ध।

लड़ाईके अन्दर जलती हुई आगके समान क्रोधित भीमसेनको देखकर कर्ण हवासे तरंगोंको उछालते हुए समुद्रके समान, दूसरे रथपर चढ़कर आया। गुस्सेमें आये हुए कर्णको देखकर सब भीमसेनको अग्निमें होमा हुआ समझने लगे। तब घोर धनुष्के शब्दको करके कर्ण भीमसेनके रथकी तरफ दौड़ा। इसके बाद उन भीम और कर्णका भयानक युद्ध हुआ। एक दूसरेको मारनेकी इच्छासे आखोंसे जलाते हुए एक दूसरेको देखने लगे; और कठोर वचनोंको कहने लगे। तब कर्णने नौ तेज बाणोंसे महाबलवाले भीमको बींध डाला।

भरतकुलमें व्याघ्रके समान भीमसेन सोनेकी पीठवाले महान् धनुष्को रथमें डालकर हाथमें गदा लेकर कर्णके रथकी ओर वेगसे दौड़ा। उस पाण्डवोंमें श्रेष्ठको उस प्रकार वेगसे आ पड़ते हुए देखकर कर्ण भी मस्त

इव युद्धाय प्रत्युद्ययौ । तौ तथाविधौ दृष्ट्वा उभये अपि बले सर्वे च महारथाः कौतुकपरवशाः चित्रे इव तस्थुः । तस्मिन् समये तयोः जयपराजयौ न व्यक्तं अलक्षयताम् । ततः तौ अन्योन्यं तीक्ष्णैः बाणैः जिघांसन्तौ वर्षिमन्तौ अम्बुदौ इव प्रेक्षणीयतरौ आस्ताम् । ताभ्यां मुक्ताः गृध्रपत्राः शराः आकाशे शरदि मत्तानां सारसानां श्रेण्यः इव चकाशिरे ।

एवं प्रवृत्ते भीमः कर्णस्य धनुः त्रिभिः विशिखैः चकर्त, रथात् च सारथिं अपातयत् । तदा महाबलः कर्णः निःश्वसन् उरगः इव जीवितस्य अन्तकरीं महाशक्तिं उत्क्षिप्य भीमसेनाय चिक्षेप । ततः सूतनन्दनः राधेयः शक्तिं पुरन्दरः अशनिं इव विसृज्य सुमहानादं ननाद । तस्य नादं निशम्य कौरवाः अत्यन्तं मुमुदुः । तां कर्णेन निर्मुक्तां अर्कप्रभां शक्तिं भीमः आशुगैः शरैः वियति एव चिच्छेद ।

हाथीके प्रति मत्त हाथीकी तरह युद्धके लिये सामने गया । उन दोनोंको इस प्रकार देखकर दोनों ओरकी सेना तथा सब महारथी-गण कौतुकवश हुए हुए चित्रकी तरह ठहर गए । उस समय उनका जय और पराजय स्पष्ट नहीं दिखाई देता था । तब वे दोनों एक दूसरेको तेज बाणोंसे मारनेकी इच्छा करते हुए, वर्षा करते हुए दो बादलोंकी तरह दर्शनीय थे ।

उनसे छोड़े हुए गीधके पंखवाले बाण आकाशमें शरद् ऋतुमें मत्त सारसोंकी पंक्तियोंकी तरह शोभायमान होने लगे । इस प्रकार युद्ध छिड़ जानेपर भीमने कर्णका धनुष् तीन बाणोंसे काट डाला और रथसे सारथीको गिरा दिया । तब अति बलवान् कर्णने फुंकारते हुए सांपकी तरह जीवनका अन्त करनेवाली बड़ी शक्तिको उठाकर भीमसेनकी तरफ फेंका । इसके बाद सूतनन्दन कर्ण इसको वज्रकी तरह छोड़कर बड़ा शब्द करता हुआ आनन्द मनाने लगा । उसके शोरको सुनकर कौरव अत्यन्त प्रसन्न होने लगे । उस कर्णसे छोड़ी हुई सूर्यके समान तेजवाली शक्तिको भीमने तेज गतिवाले बाणोंसे आकाशमें ही काट डाला ।

एवं अन्योन्यं प्रजिहीर्षन्तौ गोष्ठेषु महर्षभौ इव परस्परं अभिवीक्षन्तौ तदा सायकान् व्यसृजताम्। ततः कर्णः भीमस्य शरैः आहतः अश्रुभिः पूर्णाक्षः विह्वलः रणं हित्वा महाभयात् जवनैः अश्वैः प्राद्रवत्। एवं कर्णे रणात् अपगते भीमः धृतराष्ट्रात्मजान् यमालयं निन्ये। तान् तथा पतितान् दृष्ट्वा प्रतापवान् कर्णः महता क्रोधेन आविष्टः पुनरपि युद्धाय कृतनिश्चयः समरभूमिं समाययौ। पुनः च तयोः प्रारब्धे युद्धे कर्णः सायकैः भीमसेनस्य कवचं पाटयामास।

भीमसेनः तु कर्णस्य हयान् हत्वा, सारथिं च विनिहत्य प्रजहास। तत् दृष्ट्वा कर्णः तस्मात् रथात् अवारोहत्, गदां च गृहीत्वा रुषा भीमाय प्राहिणोत्। महागदां आपतन्तीं भीमः आलक्ष्य स्वनिशितैः शरैः सर्वसैन्यस्य पश्यतः एव अवारयत्। एवं पुनः अपि विफलमनोरथः कर्णः पदातिः एव भीमसेनात् पराङ्मुखः अभवत्।

इस प्रकार एक दूसरेको हरानेकी इच्छा करते हुए, गौशालाओंमें बडे दो सांडोंकी तरह एक दूसरेको देखते हुए, तब बाणोंको छोडने लगे। तब कर्ण भीमके बाणोंसे ताडन किया गया, आंसुओंसे भरी हुई आंखोंवाला, दुःखी हुआ हुआ रणको छोडकर बडे भयसे वेगवाले घोडोंसे भाग निकला। इस प्रकार कर्णके रणसे भाग जानेपर भीम धृतराष्ट्रके पुत्रोंको यमपुरी पहुंचाने लगा। उनको इस प्रकार गिरे हुए देखकर प्रतापशाली कर्ण बडे गुस्सेमें भरा हुआ फिर भी युद्धके लिये निश्चय करके लडाईके मैदानमें आया। और फिर उन दोनोंके युद्धके शुरू हो जानेपर कर्णने भीमसेनके कवचको तोड डाला।

भीमसेन कर्णके घोडोंको और सारथिको मारकर जोरसे हंसने लगा। यह देखकर कर्ण उस रथसे उतर पडा, और गदा लेकर क्रोधसे भीमकी ओर फेंककर मारा। उस बडी गदाको आती हुई देखकर भीमने अपने तेज बाणोंसे सारी फौजके देखते ही रोक दिया। इस प्रकार फिर भी असफल मनोरथ कर्ण पैदल ही भीमसेनसे मुख मोडकर चला गया।

समास

१ चापशब्दः = चापस्य शब्दः ।
२ हुताशनः = हुतं अश्नाति भक्षयति इति हुताशनोऽग्निः ।
३ भीमकर्णौ = भीमश्च कर्णश्च ।
४ परस्परवधेच्छा = परस्परस्य वधेच्छा । वधस्य इच्छा वधेच्छा ।

पाठ १६

काकशृगालौ ।

एकदा एकेन काकेन इतः ततः पर्यटतां एकं मांसखण्डं समासादितम् । तत् चञ्चुना गृहीत्वा सः कस्मिंश्चित् तुङ्गशाखिनः शिखरे भक्षणाय यावत् तिष्ठति तावत् केनापि शृगालेन अदृश्यत । शृगालः असौ बुभुक्षातः आसीत् । सकलं अपि दिनं पर्यटतां तेन न प्राप्तं आसीत् किं अपि बुभुक्षात्राणाय इति । अतः तं वायसं दृष्ट्वा तेन चिन्तितं यत् येन केन प्रकारेण अपि अस्मात् इदं मांसखण्डं हरणीयं, नोचेत् प्राणयात्रा अपि दुष्करा भविष्यति इति ।

कौवा और गीदड़ ।

एकबार एक कौएको इधर उधर घूमते हुए एक मांसका टुकड़ा मिला । वह उसे चोंचमें लेकर किसी ऊंचे वृक्षकी चोटीपर खानेके लिये ज्योंही बैठने लगा कि इतनेमें उसे एक गीदड़ने देख लिया । वह गीदड़ भूखा था। सारा दिन घूमकरके भी उसे भूख मिटानेके लिए कुछ भी न मिला । अतः उसने उस कौएको देखकर सोचा कि जिस किसी प्रकारसे यह मांसका टुकड़ा छीन लेना चाहिये, नहीं तो जीना भी कठिन हो जायगा ।

इत्थं मनसि संप्रधार्य असौ उपायं क्षणं चिन्तयामास । उपायं संचिन्त्य असौ प्रसन्नवदनः काकं सम्बोधयन् प्राह– अहो नु खलु अदृष्टपूर्वः विलक्षणः भवान् विहगः । मन्ये किल भवान् विहङ्गमराजः । सौन्दर्यातिशयं तु भवतः नूनं वचसा वर्णयितुं न शक्यते । अहो नु खलु तव गतिः । मन्ये हंसमपि प्रत्यादेष्टुं सृष्टः भवान् । इत्येवं सर्वाङ्गसुन्दरत्वात् भवतः स्वरेण अपि अतीव सुमधुरेण भाव्यम् । यदि च सत्यं एतत् तर्हि अवश्यं अद्य भवान् मे श्रवणसरणिं स्वमधुरेण आलापेन कृतार्थयिष्यति इति ।

वायसः तु इमां कपटस्तुतिं आकर्ण्य विस्मृत्यात्मनः स्वरूपं नितरां मुमोद । स्वरमाधुर्यं च प्रदर्शयितुकामः "का का" इत्येवं नितान्तं कर्णकटुनादं यावत् कर्तुं आरभते तावत् तत् मांसखण्डं अधःस्थितस्य शृगालस्य मुखे न्यपतत् । जम्बुकः तु तत् भक्षयित्वा वायसमुपहसन् तारस्वरेण प्राह, अलं आलापेन ।

इस प्रकार मनमें सोचकर वह थोडी देर उपाय सोचने लगा । तरीका सोचकर वह प्रसन्नमुखवाला कौएको संबोधन करता हुआ बोला कि, ओहो ! आप जैसा विचित्र पक्षी तो कहीं नहीं देखा ! मैं समझता हूं, आप पक्षियोंके राजा हैं । आपकी सुन्दरताका तो वाणीसे वर्णन भी नहीं किया जा सकता । अहो ! क्या कहना आपकी चालका ! मेरी समझमें तो हंसको भी सिखानेके लिए आपको बनाया गया है । इस प्रकार सर्वाङ्गसुन्दर आपका स्वर भी अवश्य मधुर होना चाहिए । और यदि यह बात सत्य है तो जरूर आज आप मेरे कर्ण मार्गको अपने मीठे आलापोंसे कृतार्थ करेंगे ।

कौआ इस कपटपूर्ण प्रशंसाको सुनकर अपना स्वरूप भूलकर अत्यन्त खुश हुआ । और अपने स्वरकी मिठास दिखानेकी इच्छासे "का का" इस प्रकार कानोंको अत्यन्त काटनेवाला शब्द ज्योंही करने लगा कि इतनेमें वह मांसका टुकडा नीचे बैठे हुए गीदडके मुंहमें जा पडा । वह गीदड उसे खाकर कौएपर हंसता हुआ जोरसे कहने लगा कि ' आलाप मत करो । क्यों

किमर्थं व्यर्थं कर्णविवरं विदारयसि कर्णकटुना अनेन आलापेन? तत् अन्यत्र गत्वा स्वैरं कुरु आलापमिति ।

यः पुरुषः स्वगुणान् सम्यक् इह न परीक्षति सः खलु मिथ्याऽभिमानेन परितुष्यन् वायसदशां लभते इति अत्र नास्ति संशयः।

व्यर्थमें कानोंको कड़वा लगनेवाले अपने आलापसे कानोंको फाड़ रहा है? कहीं और जाकर यथेच्छ आलाप कर।'

जो पुरुष अपने गुणोंकी संसारमें अच्छी तरह परीक्षा नहीं कर लेता वह मिथ्याभिमानसे फूला हुआ कौए जैसी हालत प्राप्त करता है, इसमें बिलकुल संदेह नहीं है।

समास ।

१ काकशृगालौ = काकश्च शृगालश्च (कौआ और गीदड़)
२ मांसखण्डं = मांसस्य खण्डम्। (मांसका टुकड़ा)
३ बुभुक्षार्तः = बुभुक्षया आर्तः। (भूखसे पीडित)
४ प्राणयात्रा = प्राणानां यात्रा। (जीवनयात्रा)
५ प्रसन्नवदनः = प्रसन्नं वदनं यस्य सः (प्रसन्न मुखवाला)
६ अदृष्टपूर्वः = न दृष्टं अदृष्टं। अदृष्टं पूर्वं यस्य।
७ विहङ्गमराजाः = विहङ्गमानां राजा। (पक्षिराज)
८ सौंदर्यातिशयः = सौंदर्यस्य अतिशयः (अति सुंदरता)
९ सर्वांगसुंदरत्वं = सर्वाणि च तानि अंगानि सर्वांगानि, सर्वाङ्गानां सुंदरत्वं। सुंदरस्य भावः सुंदरत्वं।
१० कपटस्तुतिः = कपटयुक्ता स्तुतिः।
११ तारस्वरः = तारश्चासौ स्वरश्च। (ऊंचा स्वर)
१२ कर्ण विवरं = कर्णस्य विवरं। (कानका छेद)

समाप्त

सचित्र

वाल्मिकीय रामायण

(१) बालकांड, (२) अयोध्याकांड पूर्वार्ध, (३) अयोध्याकांड उत्तरार्ध, (४) अरण्यकांड, (५) किष्किन्धाकांड, (६) सुंदरकांड, (७) युद्धकांड पूर्वार्ध, (८) युद्धकांड उत्तरार्ध ये ८ पुस्तक तैयार हैं। युद्धकांड समालोचना और उत्तरकांड छप रहे हैं।

रामायणके इस संस्करणमें पृष्ठके ऊपर श्लोक दिये हैं, पृष्ठके नीचे आधे भागमें उनका अर्थ दिया है और आवश्यक स्थानोंमें विस्तृत टिप्पणियां दी हैं। जहां पाठके विषयमें सन्देह है, वहां सत्य पाठ दर्शाया है।

इन काण्डोंमें रंगीन चित्र हैं और कई सादे चित्र भी हैं। जहांतक की जा सकती है, वहांतक चित्रोंसे बडी सजावट की गई है।

इसका मूल्य— सात काण्डोंका प्रकाशन १० भागोंमें होगा। प्रत्येक भाग करीब करीब ५०० पृष्ठोंका होगा। प्रत्येक भागका मूल्य ४) रु. तथा डा. व्य. रजिस्ट्रीसमेत १) होगा। यह सब व्यय ग्राहकोंके जिम्मे रहेगा। प्रत्येक भागका मूल्य ४) रु. है, अर्थात् सब दसों भागोंका मूल्य ४०) रु. और सबका डा. व्यय १०) रु. हैं।

मंत्री- स्वाध्याय-मण्डल,

पोस्ट- 'स्वाध्याय-मण्डल, (पारडी)', पारडी, जि. सूरत

संस्कृत-पाठ-माला

(चोवीस भाग)

[संस्कृत-भाषाका अध्ययन करनेका सुगम उपाय]

संस्कृत-पाठ-मालाके अध्ययनसे लाभ—

१- अपना काम-धन्धा करते हुए फुरसदके समय आप किसी दूसरेकी सहायताके विना इन पुस्तकोंको पढकर अपना संस्कृतका ज्ञान बढा सकते हैं।

२- प्रतिदिन एक घंटा पढनेसे एक वर्षके अन्दर आप रामायण-महाभारत समझनेकी योग्यता प्राप्त कर सकते हैं।

३- पाठशालामें जानेवाले विद्यार्थी भी इन पुस्तकोंसे बडा लाभ प्राप्त कर सकते हैं।

इस पद्धतिकी विशेषता यह है—

भाग १-३	इनमें संस्कृतके साथ साधारण परिचय करा दिया गया है।
भाग ४	इसमें संधिविचार बताया है।
भाग ५-६	इनमें संस्कृतके साथ विशेष परिचय कराया है।
भाग ७-१०	इनमें पुल्लिंग, स्त्रीलिंग और नपुंसकलिंगी नामोंके रूप बनानेकी विधि बताई है।
भाग ११	इसमें " सर्वनाम " के रूप बताये हैं।
भाग १२	इसमें समासोंका विचार किया है।
भाग १३-१८	इनमें क्रियापद-विचारकी पाठविधि बताइ है।
भाग १९-२४	इनमें वेदके साथ परिचय कराया है।

प्रत्येक पुस्तकका	मूल्य ॥)	और डा. व्य. ≈)
२४ पुस्तकोंका	मूल्य १२)	और डा. व्य. १।)

मंत्री— स्वाध्याय मण्डल,

पोस्ट- ' स्वाध्याय मण्डल (पारडी) ' [पारडी-जि. सूरत]

मुद्रक और प्रकाशक- व. श्री. सातवळेकर, भारत मुद्रणालय, पारडी (जि. सूरत)

अंक ८

ॐ

संस्कृत-पाठ-माला

(संस्कृत-भाषाका अध्ययन करनेका सुगम उपाय)

अष्टमो भागः ।

लेखक

पं. श्रीपाद दामोदर सातवळेकर,

स्वाध्याय-मण्डल, किल्ला-पारडी (जि. सूरत)

सप्तम वार

संवत २००७, शके १८७२, सन १९५०

मूल्य ८ आने ।

ऋग्वेदका सुबोध भाष्य–

ऋषि दर्शन

[१] मधुच्छन्दा १) रु. [२] मेधातिथि २) रु
[३] शुनःशेप १) रु. [४] हिरण्यस्तूप १) रु. [५] कण्व २) रु
[६] सव्य १) रु. [७] नोधा १) रु. [८] पराशर १) रु
[९] गोतम २) रु. [१०] कुत्स २) रु. [११] त्रित १॥) रु
[१२] संवनन ।॥) रु, [१३] हिरण्यगर्भ ॥) रु. [१४] नारायण १) रु
[१५] बृहस्पति १) रु. [१६] वागाम्भृणी ऋषिका १) रु
[१७] विश्वकर्मा १॥) रु. [१८] सप्तऋषि ।=) रु.

ऋग्वेदानुक्रमणी, ऋगर्थदीपिका मू. ४) रु. डा. व्य. ।॥) रु

ऋग्वेदके अग्निसूक्त

ऋग्वेदके अग्निसूक्तोंका मनन। मू. २) रु डा. व्य. ॥)

यजुर्वेदका सुबोध भाष्य

अध्याय १ श्रेष्ठतम कर्मका आदेश १॥) रु.
,, ३६ सच्ची शांतीका सच्चा उपाय १॥) ,,
,, ४० आत्मज्ञान-ईशोपनिषद् २) ,,
,, ३२ एक ईश्वरकी उपासना
अर्थात् पुरुषमेध १॥) ,,

शतपथ-बोधामृत

शतपथके बोध-वचनोंका संग्रह। मू. ।=) डा. व्य. ~)

केन उपनिषद् मू. १॥) रु. डा. व्य. ।=)

मंत्री– स्वाध्यायमण्डल, ' किल्ला-पारडी (जि० सूरत)

अंक ८

ॐ

संस्कृत-पाठ-माला ।

(संस्कृत-भाषाका अध्ययन करनेका सुगम उपाय)

अष्टम भाग

लेखक

पं. श्रीपाद दामोदर सातवळेकर

अध्यक्ष - स्वाध्यायमंडल, साहित्यवाचस्पति

सप्तम बार

संवत् २००७, शक १८७२, सन १९५१

विभक्तियोंके रूप ।

इस पुस्तकमें विभक्तियोंके रूपोंपर विशेष बल दिया है । इस पुस्तकके अध्ययन करनेके समय इस विषयपर पाठक अधिक ध्यान देंगे तो उनके लिये आगेकी पाठविधि अति सुगम हो जायगी ।

आशा है कि पाठक इस ओर विशेष ध्यान देंगे ।

स्वाध्याय-मण्डल, किल्ला-पारडी (जि. सूरत)

लेखक
श्रीपाद दामोदर सातवळेकर

मुद्रक और प्रकाशक-व० श्री० सातवळेकर, बी. ए.,
भारत-मुद्रणालय, किल्ला पारडी (जि० सूरत)

ॐ

संस्कृत-पाठ-माला ।

अष्टम भाग

पाठ १

अ-कारान्त पुल्लिंग शब्दोंके रूप पाठक जानते ही हैं, तथापि फिरसे स्मरण दिलानेके लिये यहां पुनः दिये जाते हैं-

जनः (मनुष्य)

(१) जनः, जनौ, जनाः । (सं०) हे जन, हे जनौ, हे जनाः । (२) जनं, जनौ, जनान् । (३) जनेन, जनाभ्यां, जनैः । (४) जनाय, जनाभ्यां, जनेभ्यः । (५) जनात्, जनाभ्यां, जनेभ्यः । (६) जनस्य, जनयोः, जनानां (७) जने, जनयोः, जनेषु ॥

रामः ।

(१) रामः, रामौ, रामाः । (सं०) हे राम, हे रामौ, हे रामाः । (२) रामं, रामौ, रामान् । (३) रामेण, रामाभ्यां, रामैः । (४) रामाय, रामाभ्यां रामेभ्यः । (५) रामात्, रामाभ्यां, रामेभ्यः ।

(६) रामस्य, रामयोः, रामाणां । (७) रामे, रामयोः, रामेषु ॥

पाठक इन दोनों शब्दोंके रूप देखें। इनके रूपोंमें थोडासा भेद है ।

	जनः	रामः
तृतीया एकवचन–	जनेन	रामेण
षष्ठी बहुवचन–	जनानां	रामाणां

यहां ' जन ' शब्दके रूपमें प्रत्ययका जो ' न ' है वह ' राम ' शब्दके रूपमें जाकर ' ण ' में बदल गया है । इसका नियम यह है—

१८ नियम

' र अथवा ष ' के पीछे आनेवाले ' न ' कारको ' ण ' होता है, और इनके बीचमें स्वर, क वर्ग, ह य व र के आनेपर भी ' न ' को ' ण ' होता है। देखिये—

'राम' शब्द ' र्+आ+म्+अ ' इतने वर्णोंसे बना है। इसके सामने तृतीयाका ' इन ' प्रत्यय आगया तो = [राम +इन] = हो कर—

र्+ [आ+म्+अ+इ] + न = रामेण

ऐसी स्थिति होती है, अर्थात् ' र ' और ' न ' के बीचमें ' आ + म् + अ + इ ' इतने वर्ण आनेपर भी उक्त नियमके अनुसार ' न ' का ' ण ' होता है।

इसी प्रकार 'रामाणां' के स्थानपर भी इसी नियमसे न-कारका णकार होता है। ऐसे ही अन्यत्र समझना चाहिये।

'जनेन, जनानां' इन रूपोंमें 'र अथवा ष' नहीं है, अतः यहां नकारको ण नहीं होता।

शब्द

पटः– वस्त्र	ज्वरः– ज्वर
पाकः– पका हुआ अन्न	भृत्यः– नौकर
दीपः– दिया	बुधः– ज्ञानी
योधः– वीर	कपोतः– कबूतर
तरंगः–लहर	आश्रमः– आश्रम
आतपः– धूप	पायसः– पायस, खीर
ग्रंथः– पुस्तक	वायसः– कौआ
पार्थिवः– राजा	वैद्यः– वैद्य

संस्कृत–वाक्यानि।

हे मित्र! तं पटं अत्र आनय। सः पटः कस्य अस्ति? केन तत्र स्थापितः? केन सः कृतः?

इदानीं भोजनस्य समयः जातः। किं पाकः सिद्धः न वा? यदि पाकः सिद्धः अस्ति, तर्हि इदानीं एव भोजनाय अहं आगन्तुं इच्छामि।

अस्मिन् स्थाने दीपः नास्ति। त्वया अत्र दीपः किं न स्थापितः? शीघ्रं त्वं तत्र गच्छ दीपं च अत्र

आनय । सः मनुष्यः ज्वरेण पीडितः अस्ति । इदानीं तस्य शरीरे अतीव ज्वरः अस्ति । अतः एतत् औषधं तस्मै देहि । अधुना एव देहि ।

तव भृत्यः इदानीं अत्र नास्ति किम् ? तेन ह्यः किं कृतम् ? येन कुपितः असि ।

बुधः सदा योग्यं वचनं एव उपदिशति । कदा अपि अयोग्यं भाषणं न वदति । अतः बुधस्य एव मित्रता संपादनीया ।

यथा योधः संग्रामं इच्छति तथा त्वं अपि इच्छसि किम् ? योधे धैर्यं भवति । शौर्यं अपि तत्रैव भवति ।

बुधः इदानीं शोभनं ग्रंथं लिखति । तस्य ग्रंथस्य पठनं कः करिष्यति ?

यदि तव गृहे पायसः अस्ति तर्हि मह्यं देहि । अहं पातुं इच्छामि ।

वायसः कठोरं शब्दं करोति, न तथा कोकिलः । कोकिलः मधुरं शब्दं करोति ।

मम आश्रमे उत्तमः कोकिलः अस्ति । सः प्रतिदिनं मधुरं गायनं करोति । सायंकाले तस्य मधुरं शब्दं श्रुत्वा मम हृदयं सन्तोषं प्राप्नोति ।

पाठ २

अब निम्नलिखित शब्द कंठस्थ कीजिये—

अकारान्त पुल्लिंग शब्द ।

शब्दः = शब्द
द्वेषः = द्वेष, शत्रुता
प्रयत्नः = यत्न
वर्णः = रंग, वर्ण
आर्यः = आर्य
बुधः = ज्ञानी
अध्यापकः = गुरु
दमः = इंद्रियदमन
शमः = मनका शमन
दुर्जनः = दुष्ट मनुष्य
पाठः = पाठ
होमः = यज्ञ, हवन
यज्ञः = „ „
आश्रमः = आश्रम
यागः = यज्ञ
धीरः = धैर्यवान्
आचार्यः = आचार्य
उपवासः = उपवास
जयः = विजय

अकारान्त पुल्लिंग नामोंके समान ही इनके रूप होते हैं। पाठक इनके रूप बनाकर अनेक वाक्य बना सकते हैं—

संस्कृत–वाक्यानि ।

१ यथा गर्दभस्य शब्दः तथा एव उष्ट्रस्य रूपम् ।
२ उष्ट्रस्य विवाहे गर्दभः गायकः भवति ।

भाषा—वाक्य

१ जैसा गधेका शब्द वैसा ही ऊंटका रूप । २ ऊंटके विवाहमें गधा गायक होता है।

संस्कृत–वाक्यानि ।

३ गर्दभस्य विवाहे उष्ट्रः नर्तकः भवितु अर्हति । ४ शब्दे नित्यः अर्थः विद्यते । ५ यथा मूषकस्य मार्जारेण सह स्वाभाविकः द्वेषः अस्ति तथैव सिंहस्य गजेन सह वैरं अस्ति । ६ प्रयत्नेन सर्वं सिद्धं भवति । ७ यत्ने कृते यदि न सिध्यति तत्र कः दोषः ? ८ आर्यः सर्वदा प्रयत्नं करोति । ९ तव कः वर्णः ? तस्य किं कर्तव्यं ? १० बुधः सर्वं जानाति न तथा मूढः । ११ दुर्जनं प्रथमं वंदेत् सज्जनं तदनंतरम् । १२ अद्य तव अध्यापकेन कः पाठः पाठितः ?

भाषा–वाक्य

३ गधेकी शादीमें ऊंट नाचनेवाला होनेयोग्य है । ४ शब्दमें नित्य अर्थ हाता है । ५ जैसा चूहेका बिल्लीके साथ स्वाभाविक द्वेष है उसी प्रकार सिंहका हाथीके साथ वैर है । ६ यत्नसे सब सिद्ध होता है । ७ यत्न करनेपर यदि सिद्धी न हुई तो उसमें क्या दोष है ? ८ आर्य सदा प्रयत्न करता है । ९ तेरा वण क्या है ? उसका क्या कर्तव्य है ? १० ज्ञानी सब जानता है, वसा मूढ नहीं (जानता है) । ११ दुष्ट मनुष्यको प्रथम वंदन करे तत्पश्चात् सज्जनको । १२ आज तेरे अध्यापकने कौनसा पाठ पढाया है ?

संस्कृत-वाक्यानि ।

१३ ब्राह्मणः यज्ञं करोति । १४ धीरः आचार्यः यथा उपदिशति तथा एव स्वयं आचरति । १५ शिष्यः नमस्कृत्य, आचार्यात् विद्यां गृह्णाति । १६ आचार्येण सह शिष्यः वनं गत्वा तत्र पठति ।

भाषा-वाक्य

१३ ब्राह्मण यज्ञ करता है । १४ धैर्यशाली आचार्य जैसा उपदेश देता है वैसा ही स्वयं आचरण करता है । १५ शिष्य नमस्कार करके आचार्यसे विद्या ग्रहण करता है । १६ आचार्यके साथ शिष्य वनमें जाकर वहां पढता है ।

संस्कृत-वाक्यानि ।

प्राणेन एव शरीरे बलं भवति । अन्नं अपि शरीरस्य बलं वर्धयति । तृषाशमनार्थं जलस्य पानं अवश्यं कर्तव्यम् । प्राणायामेन प्राणस्य वर्धनं भवति । ध्यानेन मनःशक्तिसंवर्धनं भवति ।

रावणस्य राज्यं लंकायां आसीत् । तस्य रावणस्य हननं रामेण कृतम् । लंकाराज्ये राक्षसानां आसीत् । दुर्गं आश्रित्य राक्षसः युद्धं कर्तुं न शक्तः ।

वृक्षस्य पत्रं पुष्पं फलं च सर्वं उत्तमं अस्ति । पुष्पस्य उत्तमः गन्धः, फलस्य शोभनः रसः, पत्रस्य च वर्णः आनन्दकरः भवति ।

सः एव वीर्यवान् भवति यः मरणात् न बिभेति। यः मरणात् भीतः सः भीरुः इति उच्यते। राज्यस्य हेतोः क्षत्रियेण किं पातकं न क्रियते?

युद्धे शत्रुं निहत्य पापं न भवति। युद्धात् यदि पलायनं क्रियते तर्हि पातकं भवति। यदि क्षत्रियः युद्धे मृतः भवति, तर्हि सः स्वर्गं आप्नोति। यदि विजयं प्राप्तः तर्हि सः राज्यं प्राप्नोति।

इदानीं सर्वः स्वकीयां रक्षां करोति। ज्ञानेन रक्षणं भवति। यथा बुधः स्वकीयं रक्षणं कर्तुं समर्थः अस्ति न तथा अज्ञः मूढः मनुष्यः। अतः ज्ञानं अवश्यं प्राप्तव्यम्।

आदौ इंद्रियाणि नियम्य ज्ञाननाशनं क्रोधं कामं च जहि। तेन एव नरः सुखी भवति।

संधि किये हुए वाक्य।

स एव वीर्यवान्भवति यो मरणान्न बिभेति। यो मरणाद्भीतः स भीरुरित्युच्यते। राज्यस्य हेतोः क्षत्रियेण किं पातकं न क्रियते? युद्धे शत्रुं निहत्य पापं न भवति। युद्धाद्यदि पलायनं क्रियते तर्हि पातकं भवति। यदि क्षत्रियो युद्धे मृतो भवति, तर्हि स स्वर्गमाप्नोति। यदि विजयं प्राप्तस्तर्हि स राज्यं प्राप्नोति।

पाठ ३

इस पाठमें इकारान्त पुल्लिंग शब्दोंके रूप बताये जाते हैं--

रविः (सूर्य)

विभक्ति	एकवचन	द्विवचन	बहुवचन
१	रविः	रवी	रवयः
सं.	हे रवे	हे ,,	हे ,,
२	रविम्	,,	रवीन्
३	रविणा	रविभ्याम्	रविभिः
४	रवये	,,	रविभ्यः
५	रवेः	,,	रविभ्यः
६	,,	रव्योः	रवीणाम्
७	रवौ	,,	रविषु

इस शब्दमें भी 'रविणा' और 'रवीणां' इन रूपोंमें नकारको णकार पूर्व पाठमें कहे हुए नियमानुसार हुआ है।

कविः (ज्ञानी, काव्यकर्ता)

(१) कविः, कवी, कवयः (सं.) हे कवे, हे कवी, हे कवयः (२) कविं, कवी, कवीन्। (३) कविना कविभ्यां, कविभिः। (४) कवये, कविभ्यां, कविभ्यः। (५) कवेः, कविभ्यां, कविभ्यः। (६) कवेः, कव्योः कवीनां। (७) कवौ, कव्योः, कविषु।

इस शब्दके रूपोंमें नकारको णकार नहीं हुआ। इसका

कारण इसमें र अथवा ष अक्षरका न होना है ।

अस्तु । अब इकारान्त पुल्लिंग शब्द पढिये—

शब्द ।

पाणिः = हाथ	रश्मिः = किरण
मुष्टिः = मुक्का	कविः = कवि
मणिः = मणि	नृपतिः = राजा
रविः = सूर्य	भूपतिः = ,,
उदधिः = समुद्र	ग्रंथिः = ग्रंथि
इषुधिः = बाणोंका कोश	कपिः = बंदर
ऋषिः = ऋषि	दुंदुभिः = ढोल
मुनिः = मुनि	प्रजापतिः = प्रजापति

संस्कृत–वाक्यानि ।

त्वं एकेन पाणिना इदानीं किं करोषि ? अहं पाणिभ्यां वस्त्रं आनयामि । सः पाणौ धनं गृह्णाति । इदानीं मम पाणिः मलिनः अस्ति । सः मुष्टिना युद्धं करोति । त्वं मुष्टियुद्धं जानासि किम् ? तेन सः मुष्टिभिः ताडितः । पुरुषेण मुष्टियुद्धं अवश्यं कर्तव्यम् । अहं मणिं कंठे धारयामि । सः मणीनां मालां पुत्रस्य कंठे स्थापयति । यदा मणिषु सूत्रं प्रविष्टं भवति तदा तेषां माला भवति । रविः प्रातःसमये आगच्छति । सः तस्य

उदयः इति उच्यते। सः सूर्यः सायंकाले अस्तं गच्छति। सायंकालानंतरं रात्रिः भवति। रात्रिसमये अंधकारः भवति। प्रकाशस्य अभावः एव अंधकारः। त्वया उदधिः दृष्टः न वा? मया उदधिः दृष्टः। यदा अहं मुंबापुरीप्रदेशे गतः तदा तत्र उदधिः मया दृष्टः। उदधेः जलं क्षारं भवति। उदधिजलात् एव लवणं प्राप्नोति। यदा उदधेः जलं सूर्यस्य रश्मिभिः शुष्यति तदा लवणं भवति। इषुधौ बाणाः भवन्ति। वीरः इषुधेः बाणं गृह्णाति।

ऋषिः आश्रमे स्थित्वा किं करोति? सः स्वशिष्यान् किं उपदिशति? स वेदमन्त्रान् उपदिशति। शिष्याः वेदमंत्रान् पठन्ति। तेषां मननं च कुर्वन्ति। यः मननं करोति सः एव मनुष्यः भवति। मुनिः मौनं साधयति। मननाय मौनं एव आवश्यकं अस्ति। सूर्यस्य रश्मिः अद्य शोभनः अस्ति। यदा मेघाः भवन्ति तदा एव सूर्यस्य रश्मिः न भवति। नृपतिः नरान् पालयति। भूपतिः भूमिं रक्षति। प्रजापतिः प्रजानां पालनं करोति। कपिः वृक्षे भवति। यदा सः ग्रामं आगच्छति तदा कुमाराः तं दण्डैः ताडयन्ति।

त्वया दुंदुभेः शब्दः श्रुतः न वा? इदानीं दुंदुभेः महान् शब्दः भवति।

पाठ ४

इस पाठमें आप निम्नलिखित शब्द स्मरण कीजिये—

पठितुं = पढनेके लिये
पुनः = फिर
विमानः = विमान
काष्ठं = लकडी
निर्माणं = बनावट
मृत्तिका = मिट्टी
= सोना
माला = माला
रथांगं = रथके भाग
श्रोता = सुननेवाला
पूजकः = पूजा करनेवाला
विचारणा = विचार
मननं = मनन
मनोबलं = मनका बल
कंदुकः = गेंद

मह्यं = मेरे लिये
तुभ्यं = तेरे लिये
वस्त्रकारः = जुलाहा
रथकारः = तर्खाण
कुंभकारः = कुम्हार
सुवर्णकारः = सुनार
लोहकारः = लुहार
मालाकारः = माली
लेखकः = लिखनेवाला
याजकः = यज्ञकर्ता
शिक्षकः = अध्यापक
धारयित्वा = धारण करके
योगाचारः=योगका आचार
यशोवर्धकः = यश बढाने वाला
अनध्यायः = छुट्टी

इन शब्दोंको कंठस्थ करनेसे पाठक निम्नलिखित वाक्य विना आयास समझ सकते हैं—

वाचनपाठः ।

हे मित्र ! तव पुस्तकं अहं पठितुं इच्छामि । कुत्र अस्ति तव पुस्तकं ? यदि त्वं अधुना तत् न पठसि तर्हि मह्यं देहि । अहं तत् श्वः वा परश्वः वा तुभ्यं पुनः दास्यामि । रामः रथेन अन्यं ग्रामं गच्छति । विष्णुमित्रः जलरथेन अन्यं देशं गन्तुं इच्छति । गोपालः आकाशस्थेन विमानेन अन्यं प्रदेशं गच्छति ।

वस्त्रकारः सूत्रेण वस्त्रं करोति । रथकारः काष्ठात् रथस्य निर्माणं करोति । कुम्भकारः मृत्तिकापात्रं करोति । सुवर्णकारः सुवर्णस्य आभूषणं करोति । मालाकारः पुष्पाणां मालाः करोति । लोहकारः लोहस्य रथांगानि करोति । लेखकः पुस्तकं लिखति ।

पाठकः लेखं पुस्तकं च पठति । उपदेशकः धर्मस्य उपदेशं करोति । श्रोता तस्य श्रवणं मननं च करोति । याजकः यजनं करोति । पूजकः पूजां करोति । शिक्षकः शिष्यं पाठयति । योधः युद्धं करोति । सैनिकः शस्त्रं गृहीत्वा धावति । वीरः अश्वं आरोहति । राजा सैनिकान् प्रेरयति । मंत्रिः युद्धस्य विचारणां करोति ।

ऋषिः वने आश्रमस्थाने तपः तपति । मुनिः मौनं धारयित्वा मननं करोति । योगी योगाचारं आश्रित्य स्वकीयं मनोबलं वर्धयति ।

ये मनुष्याः भिन्नाः वर्तन्ते तेषां योगक्षेमं नैव कल्पते। भिन्नानां मनुष्याणां विनाशः एव शीघ्रं भवति। तेषां कः अपि तरणोपायः नैव अस्ति।

कुलस्य यशोवर्धनाय सदाचारसंपन्नः पुत्रः आवश्यकः अस्ति। एकः अपि सत्पुत्रः यशोवर्धकः भवति अहं अद्य सायंकाले तव गृहं प्रति आगमिष्यामि। त्वं तदा तत्र भविष्यसि किम्? यदि त्वं तत्रैव स्थास्यसि तर्हि अहं आगमिष्यामि नोचेत् नैव आगमिष्यामि।

अस्मिन् गृहे एकः बालकः दुग्धं पिबति। अन्यः पुत्रः जलं पिबति। तत्र वृद्धमनुष्यः फलस्य रसं पिबति। कश्चित् तरुणः पुरुषः मोदकं भक्षयति।

अत्र बालः कंदुकेन क्रीडति। सः तत्र जले क्रीडति। अन्यः कश्चित् पुरुषः शीघ्रं धावति।

इदानीं तस्मिन् कूपे किञ्चित् अपि जलं नास्ति, परंतु अस्मिन् तडागे शोभनं सलिलं अस्ति। अत्र गुरुः इदानीं पर्यन्तं न आगतः तथा च शिष्यः अपि न आगतः। अद्य इदानीं कः अपि नैव आगमिष्यति। अद्य अनध्यायः अस्ति। पश्य तस्य वीरस्य पराक्रमं। सः शस्त्रस्य उपयोगं कर्तुं जानाति।

पाठक ये वाक्य वारंवार पढें और इनका अच्छा अभ्यास करें।

पाठ ५

संस्कृत-वाक्यानि।

१ सुमंत्रः गत्वा रामं ददर्श। ववन्दे च तं। उवाच च। २ हे राम! पिता त्वां द्रष्टुं इच्छति। राज्ञी कैकेयी अपि त्वां द्रष्टुं इच्छति। गम्यतां तत्र। मा चिरं इति। ३ एव उक्तः नरसिंहः रामः सीतां संमान्य अन्तःपुरं अत्यगात्। अभिवाद्य च पितुः चरणौ सुसमाहितः कैकेय्या अपि चरणौ ववन्दे। ४ नृपतिः तु दीनः न शशाक ईक्षितुं, किं पुनः अभिभाषितुम्? तच्च नरपतेः रूपं भयावहं दृष्ट्वा भयं आपन्नः रामः।

भाषा-वाक्य

१ सुमंत्रने जाकर रामको देखा। नमस्कार किया उसको। और बोला। २ हे राम! पिता तुझे देखनेकी इच्छा करता है। रानी कैकेयी भी तुझे देखना चाहती है। जाओ वहां। देर न हो। ३ इस प्रकार कहा हुआ नरश्रेष्ठ राम सीताका संमान करके अन्तःपुरमें गया। पिताके चरणोंको नमस्कार करके उसने सावधान होकर कैकेयीके चरणोंकी भी वंदना की। ४ राजा तो दीन होकर देखनेके लिये भी समर्थ न हुआ, तो क्या फिर बोलनेके लिये? उस राजाके भयानक रूपको देखकर राम भयको प्राप्त हुआ।

संस्कृत–वाक्यानि।

५ कैकेयीं अभिवाद्य एव अब्रवीत्-कच्चित् मया न अपराद्धं येन मे कुपितः पिता ? कच्चित् न भरते शत्रुघ्ने मातॄणां वा मे अशुभम् ? ६ नृपे तु कुपिते मुहूर्तमपि जीवितुं न उत्सहे। ७ कैकेयी तु निर्लज्जा तदा आत्महितं वचः उवाच। राम ! राजा न कुपितः। न अस्य किंचन व्यसनं। मनोगतं तु किंचित् त्वद्भयात् न अनुभाषते। ८ त्वां अप्रियं वक्तुं न प्रवर्तते अस्य वाणी। एष हि पुरा मां अभिपूज्य वरं च दत्त्वा पश्चात् तप्यते राजा, यथा अन्यः प्राकृतः।

भाषा–वाक्य

५ कैकेयीको अभिवादन करके ही बोला कि क्या मैंने तो कोई अपराध नहीं किया जिससे मेरा पिता क्रोधित हुआ ? भरत, शत्रुघ्न वा माताओंके विषयमें मैंने कोई अशुभ तो नहीं किया होगा ? ६ राजाके क्रोधित होनेपर घडीभर भी जीनेको मैं उत्साहित नहीं हूं। ७ निर्लज्ज कैकेयी तब अपने हितका भाषण बोली। हे राम ! राजा क्रोधित नहीं है। नहीं इसको कोई कष्ट है। मनके कुछ विचार तेरे भयके कारण नहीं बोलता है। ८ तेरे लिये अप्रिय बोलनेको इसकी वाणी प्रवृत्त नहीं होती। यह तो पहिले मुझे पूजकर और वर देकर पश्चात् संतप्त हो रहा है राजा, जैसा (अन्यः प्राकृतः) साधारण मनुष्य होता है।

संस्कृत-वाक्यानि ।

९ एतत् श्रुत्वा रामः व्यथितः उवाच । अहो धिक्। हे देवि ! मां एवं वक्तुं न अर्हसि । राज्ञः वचनात् पावके अपि पतेयम्। तत् राज्ञः यत् अभिकांक्षितं तत् ब्रूहि १० रामः द्विः न अभिभाषते। ११ ततः कैकेयी तं दारुणं वचः उवाच । १२ हे राम ! ते पित्रा मे वरौ दत्तौ। तत्र मे याचितः अधुना राजा, भरतस्य अभिषेचनं तव च अद्य एव दंडकारण्ये गमनं। यदि पितरं आत्मानं च सत्यप्रतिज्ञं कर्तुं इच्छसि, तत् पितुः सन्निदेशे तिष्ठ।

भाषा-वाक्य ।

९ यह सुनकर राम दुःखी होकर बोला। अहो धिक्कार है। हे देवि ! मुझे ऐसा बोलेनेके लिये तू योग्य नहीं है। राजाके वचनसे अग्निमें भी गिरूंगा । इसलिये राजाका जो इष्ट है वह बोल। १० राम दो बार नहीं बोलता है। ११ तब कैकेयी उससे कठोर वचन बोली। १२ हे राम ! तेरे पिताने मुझे दो वर दिये थे।उसमें मैंने अब राजाकी याचना की कि भरतका राज्याभिषेक और तेरा आज ही दंडकारण्यमें गमन हो । यदि पिताको और अपनेको सत्यप्रतिज्ञ करनेकी इच्छा है, तो पिताकी आज्ञामें रह ।

संस्कृत–वाक्यानि

१३ नव पञ्च च वर्षाणि त्वया अरण्यं प्रवेष्टव्यम् । त्यक्त्वा अभिषेकं जटाचीरधारी भव। भरतः तु इमां पृथिवीं प्रशास्तु । १४ मरणोपमं वचनं श्रुत्वा रामः न विव्यथे। कैकेयीं च अब्रवीत् ।

भाषा–वाक्य ।

१३ नौ और पांच वर्ष तूने वनमें प्रवेश करना । राज्याभिषेक छोडकर जटावल्कल धारण करनेवाला हो। भरत इस पृथिवीका शासन करे। १४ मरणके समान वचन सुनकर रामको दुःख न हुआ । और कैकेयीसे बोला ।

पाठक इन वाक्योंका उत्तम अभ्यास करें । संस्कृत वाक्यमें शब्द आगेपीछे होते हैं । उनका अर्थ पूर्वापर संबंधसे देखें और समझनेका यत्न करें ।

संधि किये हुए वाक्य ।

नव च पञ्च वर्षाण्यरण्यं त्वया प्रवेष्टव्यम् । प्रवेष्टव्यमरण्यं त्वया नव पञ्च च वर्षाणि । त्वयाऽरण्यं प्रवेष्टव्यं नव पञ्च च वर्षाणि ।

त्यक्त्वाऽभिषेकं जटाचीरधारी भव । भव जटाचीरधार्यभिषेकं त्यक्त्वा । भरतस्त्विमां पृथिवीं प्रशास्तु। प्रशास्त्विमां पृथिवीं भरतः ।

पाठ ६

इस पाठमें उकारांत पुल्लिंग शब्दोंके रूप बताये जाते हैं-

सूनुः (पुत्र, लडका)

विभक्ति	एकवचन	द्विवचन	बहुवचन
१	सूनुः	सूनू	सूनवः
सं० हे	सूनो	हे ,,	,,
२	सूनुं	,,	सुनून्
३	सूनुना	सूनुभ्यां	सूनुभिः
४	सूनवे	,,	सूनुभ्यः
५	सूनोः	,,	,,
६	,,	सून्वोः	सूनूनां
७	सूनौ	,,	सूनषु

इस रीतिसे उकारान्त पुल्लिंग शब्दोंके रूप बनाये जाते हैं

गुरुः (अध्यापक)

(१) गुरुः, गुरू, गुरवः। (सं.) हे गुरो, हे गुरू, हे गुरवः। (२) गुरुं, गुरू, गुरून्। (३) गुरुणा, गुरुभ्यां, गुरुभिः। (४) गुरवे, गुरुभ्यां, गुरुभ्यः। (५) गरोः, गुरु ं, गुरुभ्यः। (६) गुरोः, गुर्वोः, गुरूणां। (७) गुरौ, गुर्वोः, गुरुषु॥

इस 'गुरु' शब्दके रूपोंमें "गुरुणा" और "गुरूणां" में तृतीय पाठमें उक्त नियमसे ही न के स्थानपर ण हुआ है।

उकारान्त पुंल्लिंग शब्द-

मृत्युः = मृत्यु	ऋतुः = दो मासकी अवधि
गुरुः = अध्यापक	क्रतुः = यज्ञ
इक्षुः = ईख	साधुः = साधु
मेरुः = मेरु पर्वत	तन्तुः = धागा
वायुः = वायु	इषुः = बाण
सेतुः = पुल	स्तनयित्नुः = मेघ
प्रभुः = स्वामी	बाहुः = बाहु
भिक्षुः = भिक्षु	पशुः = पशु
शिशुः = बालक	जन्तुः = प्राणी

संस्कृत-वाक्यानि ।

यदा गुरुः पाठशालां आगच्छति तदा पठनं भवति। यथा गुरुः वदति, तथा एव त्वं पठ। मृत्युः सर्वस्य ईशः अस्ति। मृत्युना सर्वं व्याप्तम्। मृत्यवे त्वं किं दास्यसि? मृत्योः आत्मनं रक्ष। इक्षोः रसः अतिमधुरः भवति। इक्षुरसात् एव गुडः भवति। इक्षुं भक्षय इदानीम्। स भृत्यान् इक्षुभिः ताडयति। इक्षूणां रसं तस्मिन् भाण्डे स्थापय। मेरुः नामकः एकः पर्वतः अस्ति। उत्तरदेशे मेरोः स्थानं आस्ति। मेरौ देवानां एका सभा आसीत्। इदानीं वायुः वाति। यथा इदानीं वायुः वाति तथा रात्रौ न वाति तेन अतीव कष्टं भवति।

वायुना एव सर्वे जन्तवः जीवन्ति । वायौ एव प्राणः अस्ति । सेतुं कृत्वा नदीपारं गच्छ । यत्र सेतवः वन्ति, तत्र सुखेन मनुष्याः गंन्तु समर्थाः भवन्ति।

ईश्वरः सर्वस्य प्रभुः अस्ति । राजा राष्ट्रस्य प्रभुः भवति। एषः सज्जनः अस्य ग्रामस्य प्रभुः अस्ति । प्रभुणा मह्यं धनं दत्तम् । त्वं प्रभवे किं दास्यसि ? अहं प्रभोः चरणौ वंदे । प्रभुं एव शरणं गच्छ । भिक्षुः ग्रामात् ग्रामं भ्रमति । धर्मस्य प्रचाराय एव स नगरात् नगरं अटति । भिक्षवे अन्नं वस्त्रं च देहि । तत्र मम शिशुः क्रीडति । तं शिशुं पश्य । तेन शिशुना पात्रं तत्र एव स्थापितम् । शिशवे दुग्धं देहि । एषः वसंतः ऋतुः अस्ति । द्वितीये ग्रीष्मे ऋतौ त्वं कुत्र गमिष्यसि ?

पाठक इस प्रकार पूर्वोक्त शब्दोंके रूप बनाकर वाक्य बनावें और वाक्य बनानेका अभ्यास बढावें । इस पाठमें आये हुए कुछ शब्दोंका अर्थ इस प्रकार है—

व्याप्तं = व्यापक	वाति = चलता है ।
आत्मानं = अपनेको	अतीव = अत्यंत
गुडः = गुड	जीवति = जीवित रहता है
ताडयति = पीटता है	पारं = पार
भांडं = पात्र, बर्तन	वंदे = वंदन करता हूं
आसीत् = थी, था	राष्ट्रं = देश

पाठ ७

अटति = घूमता है	क्रीडति = खेलता है
ग्रीष्मः = उष्ण ऋतु	वसंतः = वसंत ऋतु

संस्कृत--वाक्यानि ।

१ रामः उवाच, मातः! एवं अस्तु। अहं इतः वनं गमिष्यामि। राज्ञः प्रतिज्ञां अनुपालयन् जटाचीर-धरः च भवामि। हे देवि! मन्युः न कार्यः। २ इदं तु ज्ञातुमिच्छामि, किमर्थं महीपतिः यथापूर्वं मां इदानीं न अभिनंदति? हितेन, गुरुणा, कृतज्ञेन, नृपेण, पित्रा नियुज्यमानः अहं किं प्रियं न कुर्याम्? ३ एतत् एकं एव मे हृदयं दहति, यद् राजा मां स्वयं एव भरतस्य अभिषेचनं न आह।

भाषा-वाक्य

१ राम बोला--माता! ऐसाही हो। मैं यहांसे वनको जाऊंगा। राजाकी प्रतिज्ञाका पालन करता हुआ जटा और वल्कलधारी बनूंगा। हे देवि! क्रोध मत कीजिये। २ यह मैं जाननेकी इच्छा करता हूं कि, क्यों राजा पूर्वके समान अब मेरा अभिनंदन नहीं करता? हितकारक, गुरु, कृतज्ञ, राजा, पिताके द्वारा नियुक्त हुआ मैं कौनसा प्रिय कार्य न करूंगा? ३ यह एक ही बात मेरे हृदयको जलाती है कि राजाने मुझे स्वयं ही भरतके राज्याभिषेकके विषयमें नहीं कहा।

संस्कृत–वाक्यानि ।

४ तथापि राजानं आश्वासय । दूताः गच्छन्तु भरतं मातुलकुलात् आनयितुम् । एष अहं अपि गच्छामि दण्डकारण्यं चतुर्दश समाः वस्तुम् । ५ एतत् श्रुत्वा हृष्टा कैकेयी त्वरयामास राघवं प्रस्थानार्थम् । ६ कैकेयी उवाच–व्रीडान्वितः नृपः स्वयं न अभिभाषते त्वाम् । यावत् त्वं न यातः असि न तावत् तव पिता स्नास्यते भोक्ष्यते अपि । ७ राजा दशरथः एतत् वचनं श्रुत्वा दीर्घं निःश्वस्य 'धिक् कष्टं' इति उक्त्वा मूर्च्छितः न्यपतत् ।

भाषा--वाक्य ।

४ तथापि राजाका समाधान कर । नौकर चले जायँ भरतको मामाके घरसे लानेके लिये । यह मैं भी जाता हूं दण्डकारण्यमें चौदह वर्ष वसनेके लिये । ५ यह सुनक संतुष्ट हुई कैकेयी शीघ्रता करने लगी रामको भेजनेके लिये । ६ कैकेयी बोली, लज्जायुक्त राजा स्वयं तुझे नहीं कहता । जब तक तू नहीं जाता है तबतक न तेरा पिता स्नान करेगा, और नहीं भोजन करेगा । ७ राजा दशरथ यह वचन सुनकर दीर्घ श्वास लेकर 'धिक्कार है ! दुःख है !' ऐसा बोलकर मूर्च्छित होकर गिर पडा ।

संस्कृत-वाक्यानि।

८ कशाया हतः वाजी इव रामः अपि वनं गन्तुं कृतत्वरः बभूव। सः राजानं उत्थाप्य उवाच। ९ देवि! न अहं अर्थपरः। मां धर्मे आस्थितं विद्धि। पितृशुश्रूषायाः महत्तरं किंचित् धर्माचरणं नास्ति। १० भवतु! मातरं आपृच्छे तावत्। सीतां च अनुनयामि। ततः अद्य एव महत् वनं गमिष्यामि। ११ भवत्या तथा कर्तव्यं यथा भरतः राज्यं पालयेत् पितरं च शुश्रूषेत्, नः सः एव हि धर्मः।

भाषा--वाक्य।

८ चाबुकसे ताडित घोडेके समान राम भी वनको जानेके लिये शीघ्रता करने लगा। वह राजाको उठाकर बोला। ९ हे देवि! मैं धनका लोभी नहीं हूं। मैं धर्मपर स्थित हूं यह जान। पिताकी सेवा करनेसे अधिक बडा कोई धर्मका आचरण नहीं है। १० अस्तु। मातासे पूछता हूं। सीताको साथ ले जाऊंगा। तब आज ही बडे वनको जाऊंगा। ११ आपने वैसा करना जिससे भरत राज्यकी पालना करे और पिताकी शुश्रूषा करे, क्योंकि हमारा वही धर्म है।

संस्कृत-वाक्यानि ।

१२ विसंज्ञस्य अपि राज्ञः तथा कैकेय्याः अपि चरणौ रामः निष्पपात । निष्क्रम्य च अंतःपुरात् स्वं सुहृज्जनं च ददर्श । १३ क्रुद्धः लक्ष्मणः बाष्पपूरित-लोचनः तं अनुजगाम १४ तदा माता कौसल्या तं आह- हे राम ! राजर्षीणां धर्मशीलानां कुलोचितं धर्मं कीर्तिं आयुः च प्राप्नुहि ।

भाषा-वाक्य ।

१२ मूर्छित पडे हुए भी राजाके तथा कैकेयीके चरणोंपर रामने नमन किया । निकलकर अन्तःपुरसे, अपने मित्रजनोंको देखा । १३ क्रुद्ध लक्ष्मण आँसुओंसे नेत्र भरकर उसके पीछे चला । १४ तब माता कौसल्या उसे बोली कि, हे राम ! राजर्षि वृद्ध धार्मिकोंके कुलके उचित धर्मको तथा कीर्ति और आयुको प्राप्त हो ।

पाठक इन वाक्योंका अच्छी प्रकार अभ्यास करें और संस्कृत वाक्योंका पाठ वारंवार करें । कमसे कम वीस पचीस बार इनका पाठ करें ।

संधि किये हुए वाक्य

विसंज्ञस्यापि राज्ञस्तथा कैकेय्या अपि चरणौ रामो निष्पपात । निष्क्रम्य चान्तःपुरात्स्वं सुहृज्जनं च ददर्श ।

पाठ ८

इस पाठमें ऋकारान्त पुल्लिंग शब्दोंके रूप बताते हैं—

कर्तृ (करनेवाला, कर्ता)

वि०	एक०	द्वि०	बहु०
१	कर्ता	कर्तारौ	कर्तारः
सं०	हे कर्तः	हे ,,	हे ,,
२	कर्तारं	,,	कर्तॄन्
३	कर्त्रा	कर्तृभ्यां	कर्तृभिः
४	कर्त्रे	,,	कर्तृभ्यः
५	कर्तुः	,,	,,
६	,,	कर्त्रोः	कर्तॄणाम्
७	कर्तारि	,,	कर्तृषु

इसी प्रकार ऋकारान्त पुल्लिंग शब्दोंके रूप बनते हैं। ऋकारान्त शब्दोंमें रकार होनेके कारण इन शब्दोंके नकारको ण होता है, जैसा 'कर्तॄणां' षष्ठीका बहुवचन हुआ है। 'पितृ' शब्दके रूपोंमें थोडी भिन्नता है। देखिये उसके रूप-

१	पिता	पितरौ	पितरः
सं०	हे पितः	हे ,,	हे ,,
२	पितरं	,,	पितॄन्
३	पित्रा	पितृभ्यां	पितृभिः

४	पित्रे	पितृभ्यां	पितृभ्यः
५	पितुः	,,	,,
६	,,	पित्रोः	पितॄणाम्
७	पितरि	,,	पितृषु

इसमें जो भिन्नता है, वह भी देखिये—

प्रथमा	कर्ता	कर्तारौ	कर्तारः
,,	पिता	पितरौ	पितरः

यहां 'कर्तारौ' के समान 'पितारौ' नहीं हुआ 'कर्तारः' के समान 'पितारः' नहीं हुआ। यह भेद पाठक स्मरणमें रखें।

वक्तृ (बोलनेवाला, वक्ता)

(१) वक्ता, वक्तारौ, वक्तारः। (सं.) हे वक्तः, हे वक्तारौ, हे वक्तारः। (२) वक्तारं, वक्तारौ, वक्तॄन्। (३) वक्त्रा, वक्तृभ्यां, वक्तृभिः। (४) वक्त्रे, वक्तृभ्यां, वक्तृभ्यः। (५) वक्तुः, वक्तृभ्यां; वक्तृभ्यः। (६) वक्तुः वक्त्रोः, वक्तॄणां। (७) वक्तरि, वक्त्रोः, वक्तृषु।

इस प्रकार पाठक ऋकारान्त शब्दोंके रूप बना सकते हैं। पाठकोंकी सुविधाके लिये अब नीचे ऋकारान्त शब्द दिये जाते हैं, पूर्वोक्त प्रकारसे उनके रूप बनाकर पाठक वाक्य बनावें—

शब्द ।

कर्तृ = करनेवाला	स्रष्टृ = उत्पन्न करनेवाला
स्तोतृ = स्तुति करनेवाला	भर्तृ = भरण करनेवाला
धातृ = धारण करनेवाला	निर्मातृ=निर्माण करनेवाला
विधातृ = ,, ,,	+ नृ = मनुष्य
वक्तृ = बोलनेवाला	+भ्रातृ = भाई
क्षत्तृ = सारथी	+जामातृ = दामाद
त्वष्टृ = तर्खाण	देवृ = देवर

[+इन शब्दोंके 'पितृ' शब्दके समान रूप होते हैं ।]

इन शब्दोंके रूप बनाकर पाठक पूर्ववत् वाक्य बनानेका यत्न करें ।

संस्कृत-वाक्यानि ।

१ अस्य विश्वस्य कः कर्ता अस्ति ? २ जगत्स्रष्टारं अहं पूजयामि। ३ स्तोता इदानीं किं वदति ? ४ धात्रा इदं विश्वं रचितम् । ५ अस्य विश्वस्य ईश्वरः एव विधाता अस्ति । ६ तव जामाता कुत्र गतः ?

भाषा-वाक्य ।

१ इस विश्वका कर्ता कौन है ? २ जगत्स्रष्टाकी मैं पूजा करता हूं । ३ स्तुति करनेवाला अब क्या बोलता है ? ४ धाताने यह विश्व रचा है । ५ इस विश्वका ईश्वर ही विधाता है । ६ तेरा दामाद कहाँ गया है ?

संस्कृत–वाक्यानि ।

७ त्वं जामात्रे किं दातुं इच्छसि ? ८ तव जामातुः गृहं अत्र नास्ति । ९ मम पञ्च भ्रातृभिः एतत् निर्मितम् । १० त्वष्टारं अत्र आनय । ११ क्षत्तारं तत्र इदानीं एव नय । १२ तव गृहस्य निर्माता इदानीं एव अत्र आगतः । १३ धातुः इच्छा बलीयसि ।

भाषा–वाक्य

७ तू दामादके लिये क्या देना चाहता है ? ८ तेरे दामाद का घर यहां नहीं है । ९ मेरे पांच भाइयोंने यह निर्माण किया है । १० तर्खाणको यहां ला । ११ सारथीको वहां अभी ले जा । १२ तेरे घरका निर्माण करनेवाला अभी यहां आया था । १३ धाता (ईश्वर) की इच्छा बलवती है ।

इस रीतिसे छोटे छोटे वाक्य बनानेका अभ्यास पाठकोंको करना चाहिये । सातों विभक्तियोंके रूप बनानेसे उनका वाक्योंमें प्रयोग करना सुगम हो जाता है । इसलिये इस पाठमें इन शब्दोंके रूप बनाना पाठक सीखें ।

पाठ ९

पूर्व पाठोंमें दिये हुए रामायणके वाक्य इस पाठमें संधि करके दिये जाते हैं। इनके पढनेसे संधियोंका ज्ञान पाठकोंको हो सकता है।

सुमंत्रो गत्वा रामं ददर्श। ववन्दे च तमुवाच च। हे राम! पिता त्वां द्रष्टुमिच्छति। गम्यतां तत्र, मा चिरमिति। एवमुक्तो नरसिंहो रामः सीतां संमान्यान्तःपुरमत्यगात्। अभिवाद्य च पितुश्चरणौ सुसमाहितः कैकेय्या अपि चरणौ ववन्दे। नृपतिस्तु दीनो न शशाकेक्षितुं किं पुनरभिभाषितुम्? तच्च नरपते रूपं भयावहं दृष्ट्वा भयमापन्नो रामः।

कैकेयीमभिवाद्यैवाब्रवीत्, कच्चिन्मया नापराद्धं येन मे कुपितः पिता? कच्चिन्न भरते शत्रुघ्ने मातॄणां वा मेऽशुभम्? नृपे तु कुपिते मुहूर्तमपि जीवितुं नोत्सहे।

कैकेयी तु निर्लज्जा तदाऽऽत्महितं वच उवाच। राम! राजा न कुपितः। नास्य किंचन व्यसनं, मनोगतं तु किंचित्त्वद्भयान्नानुभाषते। त्वामप्रियं वक्तुं न प्रवर्ततेऽस्य वाणी। एष हि पुरा मामभिपूज्य वरं च दत्त्वा पश्चात्तप्यते राजा यथाऽन्यः प्राकृतः।

एतच्छ्रुत्वा रामो व्यथित उवाच। अहो धिक्! हे देवि! मामेवं वक्तुं नार्हसि। राज्ञो वचनात्पाव-

केऽपि पतेयम् । तद्राज्ञी यदभिकांक्षितं तद् ब्रूहि । रामो द्विर्नाभिभाषते । ततः कैकेयी तं दारुणं वच उवाच । हे राम ! ते पित्रा मे वरौ दत्तौ । तत्र मे याचितोऽधुना राजा, भरतस्याभिषेचनं तव चाद्यैव दंडकारण्ये गमनम् । यदि पितरमात्मानं च सत्य-प्रतिज्ञं कर्तुमिच्छसि तात्पितुः सन्निदेशे तिष्ठ । नव पंच च वर्षाणि त्वयाऽरण्यं प्रवेष्टव्यम् । त्यक्त्वा-ऽभिषेकं जटाचीरधारी भव । भरतस्त्विमां पृथिवीं प्रशास्तु । मरणोपमं वचः श्रुत्वा रामो न विव्यथे । कैकेयीं चाब्रवीत् ।

इस पाठको अनेक वार पाठक पढें । इससे संधिसहित संस्कृत पढने और समझनेका अभ्यास हो जायगा । अब इस पाठमें आये हुए समासोंका विवरण दिया जाता है । उसका अभ्यास पाठक ध्यानसे करें—

समास ।

नरसिंहः = नराणां सिंहः (मनुष्योंमें शेर)
सुसमाहितः = सुष्ठु समाहितः (उत्तम शांत)
नृपतिः = नृणां पतिः (मनुष्योंका पति)
नरपतिः = नराणां पतिः (,, ,,)
अशुभं = न शुभं (जो शुभ नहीं)
मनोगतं = मनसि गतं (मनमें गया हुआ)

त्वद्भयं = तव भयं (तेरा भय)

अप्रियं = न प्रियं (जो प्रिय नहीं)

सत्यप्रतिज्ञः = सत्या प्रतिज्ञा यस्य सः (सत्य है प्रतिज्ञा जिसकी वह)

जटाचीरधारी=जटा च चीरं च जटाचीरे। जटाचीरे धारयतीति जटाचीरधारी। (जटा और वल्कल धारण करनेवाला)

मरणोपमं–मरणस्य उपमा यस्य तत्। (मरणकी उपमा है जिसकी)

अब पाठकोंकी सुविधाके लिये कुछ संधियाँ यहां बताते हैं

सुमंत्रो गत्वा– सुमंत्रः गत्वा। चोवाच– च उवाच।

नरसिंहोरामः–नरसिंहः रामः। तद्ब्रूहि– तत् ब्रूहि।

पितुश्चरणौ– पितुः चरणौ।

कैकेय्या अपि– कैकेय्याः अपि।

शशाकेक्षितुं– शशाक ईक्षितुम्।

तच्च नरपते रूपं– तत् च नरपतेः रूपं।

नापराद्धं–न अपराद्धं। एतच्छ्रुत्वा– एतत् श्रुत्वा।

किंचित्त्वद्भयान्नानुभाषते— किंचित् त्वत्–भयात् न अनुभाषते।

पाठक इस ढंगसे संधियोंका विचार करें। वारंवार इन संधियोंको देखनेसे ही इनका परिचय हो जायगा और एक बार इनका परिचय हुआ तो फिर कोई भी कठिनता नहीं रहेगी।

पाठ १०

इस समयतक पाठक पुल्लिंग शब्दोंके रूप बनाना सीख चुके हैं। अब थोडे ही अभ्याससे नपुंसकलिंग शब्दोंके रूप बनानेका ज्ञान प्राप्त हो सकता है, इसलिये इसकी विधि यहां दी जाती है। अकारान्त नपुंसकलिंग शब्दके रूप निम्नलिखित प्रकारसे होते हैं—

ज्ञानम् शब्दः।

विभक्ति	एकवचन	द्विवचन	बहुवचन
१	ज्ञानम्	ज्ञाने	ज्ञानानि
सं०	हे ज्ञान	हे ,,	हे ,,
२	ज्ञानम्	,,	,,
३	ज्ञानेन	ज्ञानाभ्याम्	ज्ञानैः
४	ज्ञानाय	,,	ज्ञानेभ्यः
५	ज्ञानात्	,,	,,
६	ज्ञानस्य	ज्ञानयोः	ज्ञानानाम्
७	ज्ञाने	,,	ज्ञानेषु

प्रथमा, संबोधन और द्वितीयाके रूपोंको छोडकर अन्य विभक्तियोंके रूप अकारान्त पुल्लिंग शब्दोंके रूपोंके समान ही होते हैं। यह समानता पाठक अवश्य देखें। इसके जाननेसे नपुंसकलिंग शब्दोंके रूप बनाना बहुत ही सुगम हो जायगा।

❀

मित्र-शब्दः ।

१	मित्रं	मित्रे	मित्राणि
सं०	हे मित्र	हे „	हे „
२	मित्रं	„	„

शेष रूप अकारान्त पुल्लिंग शब्दोंके रूपोंके समान ही होते हैं, जैसा—

(३) मित्रेण, मित्राभ्यां, मित्रैः । (४) मित्राय, मित्राभ्यां, मित्रेभ्यः । (५) मित्रात्, मित्राभ्यां, मित्रेभ्यः । (६) मित्रस्य, मित्रयोः, मित्राणां । (७) मित्रे, मित्रयोः, मित्रेषु ।

मित्र, शब्दमें रकार होनेके कारण “ मित्राणि, मित्रेण, मित्राणां ” इन रूपोंमें नकारको ण हुआ है । इसका नियम तृतीय पाठमें दिया ही है ।

शब्द

हृदयं = हृदय	आननं = मुख
क्षत्रं = क्षात्रतेज	भेषजं = औषध
दारिद्र्यं = दरिद्रता	क्षेत्रं = खेत
शरीरं = शरीर	श्रोत्रं = कान
वदनं = मुख	रत्नं = रत्न
मुखं = „	वसनं = वस्त्र
कुंडलं = कर्णका भूषण	अंशुकं = „
कंकणं = कंकण	सुवर्णं = सोना

क्षौमं = रेशमका वस्त्र	ताम्रं = तांबा
कौशेयं = ,,	चंदनं = चंदन
दुकूलं = ,,	सख्यं = मित्रता
आसनं = आसन	तर्पणं = तृप्ति
ब्राह्मण्यं = ब्राह्मणत्व	चातुर्वर्ण्यं = चार वर्णों-की व्यवस्था
कुलं = कुल	
वनं = अरण्य	उद्यानं = बाग
विपिनं = ,,	यानं = रथ
काननं = ,,	वेतनं = तनख्वाह

इन अकारान्त नपुंसकलिंग शब्दोंके सातों विभक्तियोंके रूप बनाकर आप विविध वाक्य अब बना सकते हैं—

संस्कृत--वाक्यानि।

१ मम हृदयं कंपते। २ रामचंद्रस्य क्षात्रं प्रशंसनीयं। ३ तस्य मुखे शोभनं भाषणं भवति। ४ रोगस्य निवारकं औषधं देहि। ५ तस्य क्षेत्रे एकः तडागः अस्ति।

भाषा--वाक्य।

१ मेरा हृदय कांपता है। २ रामचंद्रका क्षात्रतेज प्रशंसाके योग्य है। ३ उसके मुखमें सुन्दर भाषण होता है। ४ रोगका निवारण करनेवाला औषध दे। ५ उसके खेतमें एक तालाब है।

संस्कृत-वाक्यानि ।

६ त्वं विविधैः रत्नैः कंठं किं न भूषयसि ? ७ मम कंकणं कौशेयं वस्त्रं च कुत्र रक्षित इति न स्मरामि । ८ सुवर्णस्य कंकणं भवति । ९ तस्य कंकणानि बहूनि सन्ति । १० सः अनेकानि यानानि गृहीत्वा उद्याने भ्रमति । ११ जनानां हितार्थाय चातुर्वर्ण्यं कृतम् ।

भाषा-वाक्य ।

६ तू विविध रत्नोंसे कंठको क्यों नहीं भूषित करता है ? ७ मेरा कंकण और रेशमी वस्त्र कहां रखा, यह स्मरण नहीं आता । ८ सोनेका कंकण होता है । ९ उसके पास कंकण बहुत हैं । १० वह अनेक गाडियां लेकर बागमें भ्रमण करता है । ११ लोगोंके हितके लिये चातुर्वर्ण्य किया ।

पाठक इस रीतिसे अनेकानेक छोटे मोटे वाक्य बनावें और शब्दोंका उपयोग करनेका अभ्यास दृढ करें । इतने साधनोंसे पाठक बहुत ही वाक्य बना सकते हैं ।

संधि किये हुए वाक्य ।

१ त्वं विविधै रत्नैः कण्ठं किं न भूषयसि ?

२ मम कंकणं कौशेयं च वस्त्रं कुत्र रक्षितमिति न स्मरामि ।

३ सोऽनेकानि यानानि गृहीत्वोद्याने भ्रमति ।

पाठ ११

इस पाठमें इकारान्त नपुंसकलिंग शब्दोंके रूप देखिये

वारि (जल)

१	वारि	वारिणी	वारीणि
सं०	हे वारे, हे वारि !	हे ,,	हे ,,
२	वारि	,,	,,
३	वारिणा	वारिभ्यां	वारिभिः
४	वारिणे	,,	वारिभ्यः
५	वारिणः	,,	,,
६	,,	वारिणोः	वारीणाम्
७	वारिणि	,,	वारिषु

इस शब्दके रूपोंके समान इकारान्त नपुंसकलिंग शब्दोंके रूप पाठक बनावें। प्रायः संस्कृतमें विशेषणके प्रसंगमें इकारान्त नपुंसकलिंग शब्दोंके रूप करनेकी आवश्यकता होती है। क्योंकि स्वतंत्र शब्द बहुत ही थोडे हैं और कई शब्द ऐसे हैं कि जिनके रूप कुछ भिन्नताके साथ ही चलते हैं।

दधि (दही)

१	दधि	दधिनी	दधीनि
सं०	हे दधे, हे दधि !	हे दधिनी	हे दधीनि
२	दधि	,,	,,

३	दध्ना	दधिभ्याम्	दधिभिः
४	दध्ने	,,	दधिभ्यः
५	दध्नः	,,	दधिभ्यः
६	दध्नः	दध्नोः	दध्नाम्
७	दध्नि, दधनि	,,	दधिषु

पाठक इसमें एकवचनके रूपोंमें जो विशेष भेद है उसका स्मरण रखें। इसी प्रकार निम्नलिखित शब्दोंके रूप होते हैं।

इकारान्त नपुंसकलिंग शब्द—

अस्थि = हड्डी सक्थि—जांघ	अक्षि— आंख

सः पुरुषः सक्थ्ना तं ताडयति— वह पुरुष जंघासे उसे ताडन करता है।

अस्थ्ना अस्थि रोहतु— हड्डीसे हड्डी बढे।

जंतुः अक्षिभ्यां पश्यति— प्राणी आंखोंसे देखता है।

सः दध्ना सह ओदनं भक्षयति— वह दहीके साथ चावल खाता है।

अब इस पाठमें पूर्व पाठमें दिये हुए रामायणके वाक्यों-के संयुक्त वाक्य बनाकर देते हैं—

राम उवाच, मातः! एवमस्तु। अहमितो वनं गमिष्यामि। राज्ञः प्रतिज्ञामनुपालयन् जटाचीरधरश्च भवामि। इदं तु ज्ञातुमिच्छामि, किमर्थं महीपतिर्यथा-

पूर्वं मामिदानीं नाभिनन्दति । हितेन गुरुणा कृतज्ञेन नृपेण पित्रा नियुज्यमानोऽहं किं प्रियं न कुर्याम्? एतदेकमेव मे हृदयं दहति यद्राजा मां स्वयमेव भरतस्याभिषेचनं नाऽऽह । तथापि राजानमाश्वासय। दूता गच्छन्तु भरतं मातुलकुलादानायितुम् । एष अहमपि गच्छामि दण्डकारण्यं चतुर्दशसमा वस्तुम् ।

एतच्छ्रुत्वा हृष्टा कैकेयी त्वरयामास राघवं प्रस्थानार्थम् । कैकेय्युवाच– व्रीडान्वितो नृपः स्वयं नाभिभाषते त्वाम् । यावत्त्वं न यातोऽसि न तावत्तव पिता स्नास्यते भोक्ष्यतेऽपि ।

राजा दशरथ एतद्वचनं श्रुत्वा दीर्घं निःश्वस्य 'धिक्कष्टं' इत्युक्त्वा मूर्च्छितो न्यपतत् । कशया हतो वाजीव रामोऽपि वनं गन्तुं कृतत्वरो बभूव । स राजानमुत्थाप्योवाच ।

देवि ! नाहमर्थपरः । मां धर्ममास्थितं विद्धि । पितृशुश्रूषाया महत्तरं किंचिद्धर्माचरणं नास्ति । भवतु मातरमापृच्छे तावत्, सीतां चानुनयामि । ततोऽद्यैव महद्वनं गमिष्यामि । भवत्या तथा कर्तव्यं यथा भरतो राज्यं पालयेत् पितरं च शुश्रूषेत्, नः स एव हि धर्मः ।

विसंज्ञस्यापि राज्ञस्तथा कैकेय्या अपि चरणौ रामो निष्पपात। निष्क्रम्य चान्तःपुरात्स्वं सुहृज्जनं च ददर्श। क्रुद्धो लक्ष्मणो बाष्पपूरितलोचनस्तमनुजगाम। तदा माता कौसल्या तमाह– हे राम! राजर्षीणां वृद्धानां धर्मशीलानां कुलोचितं धर्मं कीर्तिमायुश्चाप्नुहि।

पाठक इस पाठको वारंवार पढें और बहुत अभ्यास करें। किसी वाक्यमें कोई कठिनता हुई तो इसी पुस्तकके पाठ ७ में वह वाक्य देखें। वहां पदच्छेदपूर्वक यही वाक्य हैं, उन्हें देखनेसे सब संदेह दूर हो सकते हैं।

संधि किये हुये वाक्य।

१ विसंज्ञस्यापि राज्ञस्तथा कैकेय्या अपि चरणौ रामो निष्पपात। २ रामश्चरणौ कैकेय्यास्तथा विसंज्ञस्य राज्ञोऽपि निष्पपात। ३ निष्पपात रामः कैकेय्याश्चरणौ तथा विसंज्ञस्य राज्ञोऽपि। ४ निष्क्रम्य चान्तःपुरात्स्वं सुहृज्जनं च ददर्श। ५ ददर्श च स्वं सुहृज्जनमन्तःपुरान्निष्क्रम्य। ६ लक्ष्मणः क्रुद्धो बाष्पपूरितलोचनस्तमनुजगाम। ७ अनुजगाम तं क्रुद्धो लक्ष्मणो बाष्पपूरितलोचनः। ८ बाष्पपूरितलोचनो लक्ष्मणस्तमनुजगाम। ९ तमनुजगाम बाष्पपूरितलोचनो लक्ष्मणः।

पाठ १२

इस पाठमें उकारान्त नपुंसकलिंग शब्दोंके रूपोंका अभ्यास कीजिये—

मधु शब्दः ।

१ मधु	मधुनी	मधूनि
सं० हे मधो, हे मधु !	हे ,,	हे ,,
२ मधु	,,	,,
३ मधुना	मधुभ्यां	मधुभिः
४ मधुने	,,	मधुभ्यः
५ मधुनः	,,	,,
६ ,,	मधुनोः	मधूनां
७ मधुनि	,,	मधुषु

इस प्रकार उकारान्त नपुंसकलिंग शब्दोंके रूप पाठक बना सकते हैं ।

शब्द

वस्तु = पदार्थ	अश्रु = आंसु
मधु = शहद	दारु = लकडी
श्मश्रु = डाढी	तालु = तालु
जानु = घुटना	जतु = लाख
त्रपु = टीन, रांगा, सीसा	सानु = पर्वतशिखर

इन शब्दोंके रूप बनाकर पूर्वोक्त प्रकारसे वाक्योंमें उनका प्रयोग करनेका अभ्यास कीजिये—

संस्कृत-वाक्यानि ।

१ तत्र तव पेटिकायां कानि वस्तूनि सन्ति ? २ अस्य मधुनः मधुरः गन्धः भवन्ति । ३ सः इदानीं अश्रूणि मोचयति । ४ अत्र दारूणां भवनं त्वया किं न निर्मितं ? ५ त्वं स्वयं एव श्मश्रु मुंडासि न वा ? ६ तव तालुनि का व्यथा अस्ति ? ७ सानूनि गंधः सुगंधीकरोति । ८ इदानीं तव जानुनी कथं स्तः ?

भाषा--वाक्य ।

१ वहां तेरी पेटीमें कौनसे पदार्थ हैं ? २ इस शहदकी मीठी महक होती है । ३ वह अब आंसु छोड रहा है । ४ यहां लकडियोंका घर तूने क्यों नहीं बनाया ? ५ तू स्वयं ही डाढी मुंडता है वा नहीं ? ६ तेरे तालुमें क्या व्यथा है ? ७ शिखरोंको सुवास सुगंधित करती है । ८ अब तेरे दोनों घुटने कैसे हैं ?

अब इस पाठमें कुछ श्लोकोंका अर्थ देखिये—

श्लोक

आत्मोपभोगलिप्सार्थं नेयमर्थेप्सुता मम ।
भरणार्थं तु विप्राणां ब्रह्मन्कांक्षे न लोभतः ॥
(म० भा० वन० अ. २।५२)

अन्वयः- हे ब्रह्मन्! इयं मम अर्थेप्सुता आत्मोपभोगलिप्सार्थं न। विप्राणां भरणार्थं तु कांक्षे, न लोभतः।

संस्कृत-टीका--हे (ब्रह्मन्)! हे ब्राह्मण! इयं मम (अर्थेप्सुता) अर्थस्य धनस्य ईप्सुता इच्छा (आत्मोपभोगलिप्सार्थं) आत्मनः उपभोगः आत्मोपभोगः आत्मोपभोगस्य लिप्सा इच्छा आत्मोपभोगलिप्सा। आत्मोपभोगलिप्सार्थं स्वकीयोपभोगस्य इच्छार्थं न नास्ति। विप्राणां ब्राह्मणानां भरणार्थं पोषणार्थं तु एव कांक्षे इच्छामि। न तु लोभतः, लोभेन न कांक्षे।

अर्थ-- हे ब्राह्मण! यह मेरी धनप्राप्तिकी इच्छा अपने भोगके लिये नहीं है। किंतु ब्राह्मणोंके पोषणके लिये ही मैं धनकी इच्छा करता हूं, लोभसे नहीं।

कथमस्मद्विधो ब्रह्मन्वर्तमानो गृहाश्रमे।
भरणं पालनं चापि न कुर्यादनुयायिनाम्।
(म० भारत वन० २।५३)

अन्वयः— हे ब्रह्मन्! गृहाश्रमे वर्तमानः अस्मद्विधः अनुयायिनां अपि भरणं पालनं च कथं न कुर्यात्?

संस्कृत-टीका- हे ब्रह्मन्! हे विप्र! गृहाश्रमे गृहस्थाश्रमे वर्तमानः वसन् अस्मद्विधः अस्मत्सदृशः

क्षत्रियः अनुयायिनां अनुगामिनां जनानां अपि भरणं पोषणं, पालनं रक्षणं च कथं न कुर्यात् ? अस्मत्सदृशेन क्षत्रियेण अवश्यं कर्तव्यम् इति भावः।

अर्थ—हे ब्राह्मण! गृहस्थाश्रममें रहनेवाले हमारे सदृश क्षत्रियोंसे अपने अनुगामी जनोंका भी पालनपोषण कैसे न किया जावे ?

पाठक इस प्रकार श्लोकोंका पाठ करें। ये श्लोक कंठस्थ करनेयोग्य हैं। अतः श्लोकोंको कंठस्थ करके उनका अर्थ संस्कृतमें ही प्रथम पढनेका यत्न पाठक करें। अन्वय और संस्कृतमें टीका देखनेके पश्चात् भी यदि कोई कठिनता रह जाय, तभी भाषाका अर्थ देखना उचित है। अन्यथा कोई आवश्यकता नहीं है। इससे पाठकोंको संस्कृतके साथ परिचय अधिकाधिक होता जायगा। इसलिये इस सूचनाका विचार पाठक करें और तदनुसार उत्तम अभ्यास करें।

संधि किये हुए वाक्य।

अस्मादृशः क्षत्रियोऽनुयायिनामनुगामिनां जनानामपि भरणं पोषणं पालनं रक्षणं च कथं न कुर्यात् ? अस्मत्सदृशेन क्षत्रियेणानुयायिनां पालनं अवश्यं कर्तव्यमिति भावः।

पाठ १६

इस पाठमें ऋकारान्त नपुंसकलिंग शब्दोंके रूप देखिये-

कर्तृ (करनेवाला)

१	कर्तृ	कर्तृणी	कर्तृणि
सं.	हे कर्तृ	हे ,,	हे ,,
२	कर्तृ	,,	,,
३ कर्त्रा,	कर्तृणा	कर्तृभ्यां	कर्तृभिः
४ कर्त्रे,	कर्तृणे	,,	कर्तृभ्यः
५ कर्तुः,	कर्तृणः	,,	,,
६ ,,	,,	कर्तृणोः	कर्तॄणां
७ कर्तरि,	कर्तृणि	,,	कर्तृषु

इन रूपोंमें पाठक देख सकते हैं कि एकवचनके रूपोंमें एक रूप पुल्लिंग ऋकारान्त शब्दके रूपोंके समान है और दूसरा नपुंसक शब्दके समान है। पाठक इस विशेषताका स्मरण रखें।

"कर्तृ" शब्दका अर्थ "कर्ता, करनेवाला" है, अतः यह विशेषण है। जब इसके रूप पुल्लिंगके कार्यमें प्रयुक्त होंगे तब पुल्लिंग प्रकरणमें दिये हुए रूपोंके समान करने चाहिये; परंतु जहां इसका उपयोग नपुंसकलिंगके शब्दोंके साथ करना हो, वहां नपुंसकलिंगके रूपोंकी रीतिके अनुसार रूप

प्रयुक्त करने चाहिये। इतना नियम इन शब्दोंके उपयोगके समय अवश्य ध्यानमें रखना चाहिये।

शब्द

ज्ञातृ = जाननेवाला	गृहीतृ = लेनेवाला
कर्तृ = करनेवाला	वक्तृ = बोलनेवाला
दातृ = देनेवाला	ईशितृ = स्वामी होनेवाला
भोक्तृ = भोगनेवाला	धातृ = धारण करनेवाला
नेतृ = चलानेवाला	भावितृ = होनेवाला

इन शब्दोंके पुल्लिंगके समय पुल्लिंगकी रीतिसे रूप बनाते हैं और नपुंसकलिंगके प्रयोगके समय नपुंसकलिंगकी रीतिसे रूप बनाते हैं।

वाक्य।

ज्ञानं एव सर्वस्य कर्तृ अस्ति--ज्ञान ही सबका कर्ता है।

नेत्रं जन्तोः नेतृ भवति— नेत्र प्राणीका चलानेवाला होता है।

ब्रह्म सर्वस्य ईशितृ अस्ति-- ब्रह्म सबका स्वामी है।

इस रीतिसे वाक्य बनानेका अभ्यास पाठक करें। इस प्रकारके प्रयोग थोडे ही होते हैं, इसलिये यहां बहुत वाक्य नहीं दिये। अब कुछ श्लोक दिये जाते हैं—

श्लोकः ।

तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता ।
सतामेतानि गेहेषु नोच्छिद्यन्ते कदाचन ॥

(म० भारत वन० २।५५)

अन्वयः— तृणानि भूमिः उदकं, चतुर्थी सूनृता वाक्, एतानि सतां गेहेषु कदाचन न उच्छिद्यन्ते ।

संस्कृतटीका- तृणानि तृणमयानि आसनानि, भूमिः पृथिवीस्थानं, उदकं जलं, चतुर्थी सूनृता सत्या वाक् वाणी, एतानि सतां सज्जनानां गेहेषु गृहेषु कदाचन कदा अपि न उच्छिद्यन्ते छिन्नानि न भवन्ति ।

अर्थ— घासके आसन, भूमि अर्थात् स्थान, जल और सीधा सत्य भाषण ये सज्जनोंके घरोंसे कभी कम नहीं होते । (अर्थात् अतिथि आनेपर उसकी सेवाके लिये इतने पदार्थ तो अवश्य रहते ही हैं ।)

देयमार्तस्य शयनं स्थितश्रान्तस्य चासनम् ।
तृषितस्य च पानीयं क्षुधितस्य च भोजनम् ॥

(म० भारत वन० २।५६)

अन्वयः—आर्तस्य शयनं देयं स्थितश्रान्तस्य च आसनं देयं, तृषितस्य च पानीयं, क्षुधितस्य च भोजनम् ।

संस्कृतटीका— आर्तस्य रोगार्तस्य शयनं देयं,

स्थितश्रान्तस्य स्थितः ऊर्ध्वं स्थितः तत्सहितस्य श्रांतस्य च आसनं देयं, तृषितस्य तृषया क्लिष्टस्य पानीयं जलं देयं, क्षुधितस्य च भोजनं दातव्यम्।

अर्थ— रोगीके लिये शय्या, थक मांदेके लिये आसन, प्यासेको जल और भूखेको अन्न देना चाहिये।

अतिथिसत्कार

चक्षुर्दद्यान्मनो दद्याद्वाचं दद्यात्सुभाषिणीम्।
उत्थाय चासनं दद्यादेष धर्मः सनातनः॥
(म० भारत, वन० २।५७)

अन्वयः—चक्षुः दद्यात्, मनः दद्यात्, सुभाषिणीं वाचं दद्यात्, उत्थाय च आसनं दद्यात्, एषः सनातनः धर्मः।

अर्थ—(अतिथिके अपने घरमें आनेपर उसके लिये) अपनी आंख देना, मन देना, मीठा भाषण देना, उठकर आसन देना, यह सनातन धर्म है।

अतिथिके कार्यके लिये आंख, मन आदि अपने अवयव अर्पण करने चाहिये, यह तात्पर्य है।

सूचना।

पाठक इन श्लोकोंका अच्छी तरह पाठ करें और अन्वयादिकी ओर भी अच्छी तरह ध्यान दें, ताकि उनके समझनेमें कोई दोष न रहे।

पाठ १४

इस पाठमें निम्नलिखित श्लोकोंका अध्ययन कीजिये—

आत्मार्थं पाचयेन्नान्नं न वृथा घातयेत्पशून् ।
न च तत्स्वयमश्नीयाद्विधिवद्यन्न निर्वपेत् ॥
(म० भारत, वन० २।५९)

अन्वयः— आत्मार्थं अन्नं न पाचयेत् । पशून् वृथा न घातयेत् । तत् स्वयं न अश्नीयात् यत् विधिवत् न निर्वपेत् ।

संस्कृतटीका— आत्मार्थं आत्मनः स्वस्य अर्थं स्वार्थाय एव अन्नं भोजनादिकं न पाचयेत् न पक्तव्यम् । पशून् चतुष्पदान् वृथा व्यर्थं न घातयेत । तत अन्नादिकं स्वयं न अश्नीयात् भुंजीयात् यत विधिवत् विधिं अनुसृत्य न निर्वपेत ॥

अर्थ— अपने लिये ही भोजन नहीं पकाना चाहिये । पशुओंका व्यर्थ हनन करना योग्य नहीं है । वह अन्न स्वयं नहीं खाना चाहिये, जो विधिपूर्वक दिया नहीं जावे ।

श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यश्चाऽऽवपेद्भुवि ।
वैश्वदेवं हि नामैतत्सायं प्रातश्च दीयते ।
(म० भारत, वन० २।६०)

अन्वयः— श्वभ्यः च श्वपचेभ्यः च वयोभ्यः च भुवि आवपेत् । एतत् वैश्वदेवं नाम सायं प्रातः च दीयते ।

❀

संस्कृतटीका— श्वभ्यः श्वानेभ्यः, श्वपचेभ्यः चाण्डालेभ्यः, वयोभ्यः वायसेभ्यः भुवि भूमौ पृथिव्यां आवपेत् निर्वपेत्। एतत् वैश्वदेवनामकं अन्नदानं सायं सायंकाले तथा प्रातःकाले अपि दीयते।

अर्थ— कुत्ते, चांडाल, कौवे आदिके लिये भूमिपर अन्न रखे। यह वैश्वदेव नामक अन्नदान सायंकाल और प्रातः-काल दिया जाता है।

विघसाशो भवेत्तस्मान्नित्यं चामृतभोजनः।
विघसो भुक्तशेषं तु यज्ञशेषं तथाऽमृतम्॥

(म० भा० वन० २।६१)

अन्वयः— तस्मात् नित्यं विघसाशः अमृतभोजनः च भवेत्। भुक्तशेषं तु विघसः, यज्ञशेषं तथा अमृतम्।

संस्कृतटीका— तस्मात् पूर्वोक्तकारणात् एव नित्यं प्रतिदिनं विघसाशः विघसं भुक्तशेषं अन्नं अश्नाति इति विघसाशः तथा जनः अमृतं यज्ञशेषं अन्नं भोजनं यस्य सः अमृतभोजनः भवेत्। भुक्तशेषं सर्वेषां अतिथीनां भोजनानन्तरं यद् अवशिष्टं तत् अन्नं भुक्तशेषं तद् एव भक्षणीयं अथवा यज्ञशेषं यज्ञस्य शिष्टं अवशिष्टं अन्नं तत् अमृतरूपमेव भवति तत् भक्षणीयम्।

अर्थ— इसलिये प्रतिदिन अतिथिभोजनसे बचा हुआ

अन्न तथा यज्ञका प्रसादरूप अन्न ही खाना योग्य है। अतिथिभोजनके पश्चात् जो बचता है, उस अन्नका नाम विघस है और यज्ञका अवशेष जो अन्न है, वह अमृत कहलाता है।

चक्षुर्दद्यान्मनो दद्याद्वाचं दद्याच्च सूनृताम्।
अनुव्रजेदुपासीत स यज्ञः पञ्चदक्षिणः॥

(म० भारत, वन० २।६२)

अन्वयः— चक्षुः दद्यात्, मनः दद्यात्, सूनृतां वाचं दद्यात्, अनुव्रजेत्, उपासीत, सः पञ्चदक्षिणः यज्ञः।

अर्थ— [अतिथिके लिये] अपनी आंख दे, मन दे, उत्तम मीठा भाषण दे, उसके पीछे चल, उसके पास बैठे; यह पांच दक्षिणाओंसे युक्त यज्ञ कहलाता है।

एवं यो वर्तते वृत्तिं वर्तमानो गृहाश्रमे।
तस्य धर्मं परं प्राहुः कथं वा विप्र मन्यसे॥

(म० भारत, वन० २।६४)

अन्वयः— यः गृहाश्रमे वर्तमानः एवं वृत्तिं वर्तते, तस्य परं धर्मं प्राहुः। हे विप्र! कथं वा मन्यसे?

संस्कृतटीका— यः मनुष्यः गृहाश्रमे गृहस्थाश्रमे वर्तमानः स्थितः एवं ईदृशीं वृत्तिं वर्तते, ईदृशं आचरणं करोति, तस्य मानवस्य धर्मं परं श्रेष्ठं प्राहुः विशेषेण आहुः। हे विप्र! कथं वा मन्यसे? तव मतं कीदृक् आस्ति?

अर्थ--- जो गृहस्थाश्रममें रहनेवाला मनुष्य इस प्रकार-का वर्तन करता है, उसका धर्म श्रेष्ठ कहा जाता है। हे ब्राह्मण! तुम्हारा मत क्या है?

पाठक इन श्लोकोंका अच्छी तरहसे अभ्यास करें। श्लोक, अन्वय और संस्कृत--टीकाका खूब पठन और मनन करनेसे पाठकोंको बडा लाभ हो सकता है। इतने श्लोक पढनेके बाद पाठकोंकी प्रगति बहुत हो जायगी।

संधि किये हुए वाक्य।

१ रविः प्रातःसमये आगच्छति। आगच्छति प्रातःसमये रविः। रविरागच्छति प्रातःसमये।

२ स तस्योदयकाल इत्युच्यते। तस्योदयकालः स इत्युच्यते। उच्यते स तस्योदयकाल इति। उदय-कालस्तस्य स इत्युच्यते।

३ स सायंकालेऽस्तं गच्छति। अस्तं गच्छति स सायंकाले। सोऽस्तं गच्छाति सायंकाले। सायंकालेऽस्तं गच्छति सः। गच्छत्यस्तं स सायंकाले।

४ त्वयोदधिर्दृष्टो न वा? उदधिर्दृष्टस्त्वया न वा? दृष्टस्त्वयोदधिर्न वा? उदधिस्त्वया दृष्टो न वा?

५ भूपतिर्भूमिं रक्षति। भूमिं रक्षति भूपतिः। रक्षति भूपतिर्भूमिम्।

पाठ १५

तौ महात्मानौ वरायुधधरौ वीरौ भ्रातरौ रामलक्ष्मणौ दृष्ट्वा सुग्रीवः शङ्कितः अभवत् । ततः भयसंत्रस्तं तं सुग्रीवं हनुमान्वाक्यकोविदः वाक्यं उवाच । एषः वालिकृते महान् संभ्रमः त्यज्यताम् । मलयः अयं गिरिवरः । इह वालिनः भयं नास्ति । सुग्रीवः तु हनुमतः शुभं वाक्यं श्रुत्वा, ततः शुभतरं वाक्यं हनुमन्तं उवाच--एतौ दीर्घबाहू विशालाक्षौ शरचापासिधारिणौ सुरसुतोपमौ दृष्ट्वा कस्य न भयं स्यात् ।

सुग्रीवका मिलाप

उन दोनों महात्मा श्रेष्ठ शस्त्रोंको धारण करनेवाले वीर भाई राम और लक्ष्मणको देखकर सुग्रीवको शंका हुई । तब भयसे डरे हुए उस सुग्रीवको वाणी बोलनेमें पंडित हनुमान् वचन बोला--‘ इस वालीविषयक बडी भारी घबराहटका त्याग करो । यह पर्वतोंमें श्रेष्ठ मलय पर्वत है । यहां वालीका भय नहीं है ।’ सुग्रीव हनुमान्के शुभ वचनको सुनकर, उससे भी अधिक शुभ वाक्य हनुमान्से बोला । ‘ लम्बी लम्बी बाहुओंवाले, बडी बडी आंखोंवाले, बाण, धनुष तथा तलवारको धारण करते हुए देवके पुत्रोंके सदृश इन दोनोंको देखकर किसको डर न लगे !

राजानः हि बहुमित्राः भवन्ति। तस्मात् अत्र विश्वासः न क्षमः। यदि तु एतौ शुद्धात्मानौ, तर्हि जानीहि त्वम्। सुग्रीवस्य महात्मनः वचो निशम्य हनुमान् ऋष्यमूकात् पर्वतात् रामलक्ष्मणौ प्राप्तवान् । मारुतात्मजः हनुमान् ततः कपिरूपं परित्यज्य भिक्षुरूपं भेजे। ततः हनुमान् विनीतवत् उपागम्य राघवौ प्रणिपत्य श्लक्ष्णया सुमनोज्ञया वाचा मृदु वाक्यं उवाच- 'भवन्तौ राजर्षिदेवप्रतिमौ तापसौ वरवर्णिनौ संशितव्रतौ इमं देशं कथं प्राप्तौ ? सुग्रीवः नाम धर्मात्मा कश्चित् वीरः वानरपुङ्गवः भ्रात्रा विनिकृतः दुःखितः जगत् भ्रमति। तेन

'राजाओंके बहुत मित्र होते हैं। इसलिए इसमें विश्वास करना ठीक नहीं। यदि तो ये दोनो शुद्ध आत्मावाले हैं, तो इनका तू पता कर।' महात्मा सुग्रीवकी बात सुनकर हनुमान् ऋष्यमूक पर्वतसे रामलक्ष्मणको प्राप्त हुआ। पवनके पुत्र हनुमान्ने तब बन्दरके रूपका त्याग करके भिक्षुका रूप धारण किया। तब हनुमान् विनीतकी तरह पास जाकर रामलक्ष्मण को प्रणाम करके चिकनी और सुन्दर वाणीसे कोमल वाक्य बोला- ' राजर्षि देवके सदृश तपस्वी, सुन्दर वर्णवाले, व्रत धारण किये हुए, आप दोनों इस देशमें कैसे आगए ? सुग्रीव नामवाला धर्मात्मा, वानरोंमें श्रेष्ठ वीर, भाईद्वारा तिरस्कार किया हुआ

सुग्रीवेण महात्मना प्रेषितः हनुमान् नाम वानरः अहं प्राप्तः। स हि युवाभ्यां सख्यं इच्छति। सुग्रीवप्रियकारणात् भिक्षुरूपप्रतिच्छन्नं ऋष्यमूकात् इह प्राप्तं मां तस्य सचिवं विद्धि।' एतत् तस्य वचः श्रुत्वा प्रहृष्टवदनः रामः पार्श्वतः स्थितं भ्रातरं लक्ष्मणं अब्रवीत्। 'अयं कपीन्द्रस्य महात्मनः सुग्रीवस्य सचिवः इह ममान्तिकं आगतः। नून अनेन कृत्स्नं व्याकरणं बहुधा श्रुतं यतः बहु व्याहरता तेन न किञ्चित् अपि अपशब्दितम्। अनया चित्रया वाचा कस्य उद्यतासेः अरेः अपि चित्तं नाराध्यते?'

दुःखित होकर संसारमें घूम रहा है। उस सुग्रीव महात्माद्वारा भेजा हुआ मैं हनुमान् नामवाला वानर आपके पास आया हूं। वह आप दोनोंसे मित्रता करना चाहता है। सुग्रीवके प्रिय करनेके कारणसे भिक्षुके रूपमें छिपे हुए ऋष्यमूकसे यहां आए हुए मुझे उसका मन्त्री जान।' यह उसका वचन सुनकर प्रसन्नमुख राम एक तरफ पार्श्वमें खडे हुए भाई लक्ष्मणसे बोला—'यह महात्मा कपियोंके स्वामी सुग्रीवका सचिव यहां मेरे पास आया है। निश्चयसे इसने सारा व्याकरण अनेक वार सुना है। क्योंकि बहुत बोलते हुए भी उसने कोई भी अपशब्द नहीं कहा। इस आश्चर्यकारक वाणीसे किस तलवारको ऊठाये हुए शत्रुका भी चित्त प्रसन्न न हो?

'यस्य पार्थिवस्य एवंविधाः दूताः न भवेयुः, तस्य कार्याणि कथं सिद्ध्येयुः ?' एवं उक्तः वाक्यज्ञः सौमित्रिः वाक्यज्ञं सुग्रीवसाचिवं पवनात्मजं अभ्यभाषत-- 'विद्वन्! सुग्रीवस्य गुणाः विदिताः। सुग्रीववचनाद् यथा त्वं ब्रवीषि तत्तथा आवां करिष्यावः, ततः परमसंहृष्टः प्लवगोत्तमः हनुमान् वाक्यविशारदं रामं प्रत्युवाच--'पंपामण्डितकाननं नानाव्यालमृगैः युतं घोरं वनं सानुजः श्रीमान् किमर्थं आगतः?' तस्य तद्वचनं श्रुत्वा रामचोदितः लक्ष्मणः आचचक्षे-- 'द्युतिमान् धर्मवत्सलः दशरथः नाम राजा।'

'जिस राजाके इस प्रकारके दूत न हों उसके कार्य कैसे सिद्ध होंगे? इस प्रकार कहा हुआ, बातको समझनेवाला लक्ष्मण वाक्यको जाननेवाले सुग्रीवके साचिव, पवनके पुत्रसे बोला-- 'हे विद्वान्! सुग्रीवके गुण हमने जान लिये। सुग्रीवके कथनसे जैसा तू कहता है वैसा हम करेंगे।' तब अत्यन्त प्रसन्न हुआ बन्दरोंमें श्रेष्ठ हनुमान् वाक्य बोलनेमें होशियार रामसे बोला--'पंपानामक सरोवरसे शोभित, जो नाना सर्प पशु आदियोंसे युक्त है, ऐसे भयंकर वनमें भाईसहित आप क्यों आये हैं?' उसकी वह बात सुनकर रामसे प्रेरणा किया हुआ लक्ष्मण कहने लगा--'तेजस्वी, धर्म जिसको प्यारा है, ऐसा दशरथ नामका राजा है।'

'तस्य अयं जनः श्रुतः रामः नाम पूर्वजः पुत्रः। राजलक्षणसंयुक्तः राज्यसंपदा च संयुक्तः राज्यात् भ्रष्टः मया सार्धं, हे महाभाग! सीतया भार्यया अनुगतः वने वस्तुं इह आगतः। अहं गुणैः दास्यं उपागतः अस्य नामतः लक्ष्मणः नाम अवरः भ्राता। अस्य भार्या रक्षसा अपहृता। केन कुत्र हृता इति न ज्ञायते। यस्य सीता स्नुषा आसीत्, यश्च धर्मवत्सलः शरण्यः आसीत्, तस्य शरण्यस्य पुत्रः सुग्रीवं शरणं गच्छति। यस्य प्रसादे सततं इमाः प्रजाः प्रसीदेयुः स रामः वानरेन्द्रस्य प्रसादं अभिकांक्षते।'

'उसका यह प्रसिद्ध राम नामका सबसे बडा लडका है। हे बडे भाग्यवाले! राजचिह्नोंसे युक्त होता हुआ और राज्य-संपत्तिसे युक्त होता हुआ यह राज्यसे भ्रष्ट होकर मेरे साथ और सीतानामक अपनी पत्नीके साथ वनमें रहनेके लिए यहां आया है। म गुणोंके कारण इसका दास हूं। मैं नामसे लक्ष्मण ऐसा प्रसिद्ध इसका छोटा भाई हूं। इसकी स्त्री राक्षसने हरण कर ली है। कौन कहां हर ले गया, यह ज्ञात नहीं है। जिसकी सीता पुत्रवधू थी और जो धर्मवत्सल सबको शरण देनेवाला था, उस शरण्यका पुत्र आज सुग्रीव की शरणमें जाता है! जिसकी कृपामें निरन्तर ये प्रजाएं प्रसन्न होती हैं, वह राम वानरोंके राजाकी कृपाकी अभि-लाषा करता है!'

एवं करुणं साश्रुपातं ब्रुवाणं सौमित्रिं हनुमान् प्रत्युवाच । 'स हि राज्यात् विभ्रष्टः वालिना कृतवैरः, हृतदारः, भ्रात्रा विनिकृतः, भास्करात्मजः सुग्रीवः अस्माभिः सह सीतायाः परिमार्गणे युवयोः साहाय्य करिष्यति ।' ततः भिक्षुरूपं परित्यज्य वानरं रूपं आस्थितः तौ वीरौ पृष्ठं आरोप्य कपिकुञ्जरः ऋष्यमूकात् मलयं गिरिं जगाम । तदा च सः कपिराजाय राघवौ वीरौ आचचक्षे । वानराधिपः सुग्रीवः हनुमतो वाक्यं श्रुत्वा दर्शनीयतमो भूत्वा राघवं प्रीत्या उवाच ।

इस प्रकार करुणापूर्ण आंसुओंको बहाते हुए बोलते हुए लक्ष्मणको हनुमान् उत्तर देने लगा- 'राज्यसे गिराया हुआ, वालीसे जिसने वैर किया है, जिसकी स्त्री हरी गई है, जो भाईसे निकाला गया है, ऐसा वह सूर्यका पुत्र सुग्रीव हमारे साथ मिलकर सीताकी खोजमें तुम दोनोंकी सहायता करेगा। ' तब भिखारीके रूपका त्याग करके वानरके रूपमें आया हुआ उन दोनों वीरोंको पीठपर बैठाकर वह कपियोंमें श्रेष्ठ ऋष्यमूकसे उस मलय पर्वतको गया। और तब कपिराजसे उन दोनों वीर रामलक्ष्मणके विषयमें कहा। वानरोंका राजा सुग्रीव हनुमान्‌की बात सुनकर अपने आपको देखने योग्य बनाकर रामसे प्रीतिपूर्वक बोला।

पाठ १९

'यदि मे सख्यं रोचते तर्हि एषः बाहुः प्रसारितः। पाणिना पाणिः गृह्यतां, ध्रुवा मर्यादा च बध्यताम्।' सुग्रीवस्य एतत् सुभाषितं वचनं श्रुत्वा संप्रहृष्टमना रामः पाणिना हस्तं पीडयामास। ततः तौ दीप्यमानं अग्निं प्रदक्षिणां चक्रतुः। सुग्रीवः राघवः च वयस्यत्व उपागतौ। सुग्रीवः राघवं उवाच--'त्वं मे हृद्यः वयस्यः असि। नौ एकं दुःखं सुखं च अस्ति। हे राम! सेवकः मन्त्रिसत्तमः अयं ते आख्याति यत् त्वया धीमता लक्ष्मणेन च वियुक्ता रुदती जनकात्मजा रक्षसा अपहृता।'

'यदि मेरी दोस्ती अच्छी लगती है तो यह हाथ मैं फैलाता हूं। हाथसे हाथ पकडकर निश्चित सीमाको बांधो, अर्थात् प्रतिज्ञा करो।' सुग्रीवकी इस अच्छी बातको सुनकर प्रसन्नमन राम हाथसे हाथको दबाने लगा। तब उन दोनोंने प्रकाशित अग्निकी प्रदाक्षिणा की। सुग्रीव और राम मित्रताको प्राप्त हुए। सुग्रीव रामसे बोला-'तू मेरा अति प्यारा मित्र है, हम दोनोंका सुख दुःख समान है। हे राम! सेवक, मन्त्रियोंमें श्रेष्ठ यह कहता है कि तुझ धीमान तथा लक्ष्मणसे बिछुडी हुई, रोती हुई, जनककी पुत्री राक्षसद्वारा हरी गई है।'

'रक्षसा रौद्रकर्मणा ह्रियमाणा, राम राम इति लक्ष्मण इति च विस्वरं क्रोशन्ती सा मया दृष्टा। 'शैलतले स्थितं मां दृष्ट्वा शुभानि आभरणानि उत्तरीयं च तया त्यक्तम्। तानि अस्माभिः गृहीतानि निहितानि च। तानि अहं आनयिष्यामि।' एवं उक्त्वा सः सुग्रीवः शैलस्य गहनां गुहां प्रविवेश। तानि आभरणानि उत्तरीयं च गृहीत्वा 'पश्य इदं' इति उक्त्वा दर्शयामास। ततः वासः आभरणानि च गृहीत्वा नीहारेण चन्द्रमाः इव बाष्पसंरुद्धो अभवत्। स तं अलङ्कारं उत्तमं बहुशः हृदि कृत्वा बिलस्थः रोषितः सर्पः इव भृशं निशश्वास।

'भयानक कर्मवाले राक्षससे हरी जाती हुई' 'राम! राम! लक्ष्मण!' इस प्रकार ऊंचेसे चिल्ला चिल्ला कर रोती हुई वह मैंने देखी। शिलापर बैठे हुए मुझे देखकर उसने सुन्दर आभूषण और उत्तरीय वस्त्र छोडा। वे हमने लेलिये और रख दिये। उन्हे मैं लाऊंगा।' यह कहकर वह सुग्रीव पर्वतकी गहन गुफामें घुसा। उन आभूषणोंको तथा उत्तरीय वस्त्रको लाकर 'यह देख' ऐसा कहकर दिखाने लगा। तब वस्त्र तथा आभूषणोंको लेकर कुहरेसे ढके हुए चन्द्रमाकी तरह वह (राम) आंसुओंसे ढक गया। वह उस उत्तम आभूषणको वारवार हृदयसे लगाकर, बिलमें स्थित क्रुद्ध सर्पकी तरह वारवार लम्बे लम्बे श्वास लेने लगा।

'लक्ष्मण ! ह्रियमाणया वैदेह्या संत्यक्तं शरीरात् उत्तरीयं इदं भूषणानि च पश्य ।' एवं रामेण उक्तः लक्ष्मणः तु 'नाहं जानामि केयूरे नाहं जानामि कुण्डले, नूपुरे तु अभिजानामि नित्यं पादाभिवन्दनात्' इति अगादीत् । ततः राघवः सुग्रीवं इदं अब्रवीत्— 'हे सुग्रीव ! कं देशं रौद्ररूपेण रक्षसा ह्रियन्ती मम प्राणप्रिया त्वया लक्षिता ? महत् व्यसनदं तत् रक्षः क्व वा वसति ? यत् निमित्तं अहं सर्वान् राक्षसान् नाशयिष्यामि ।' एवं आर्तेण रामेण उक्तः सुग्रीवः बाष्पगद्गदः सन् सबाष्पं प्राञ्जलिः उवाच ।

'हे लक्ष्मण ! हरण की जाती हुई वैदेहीद्वारा शरीरसे त्यागे हुए उस उत्तरीय वस्त्र तथा आभूषणोंको देख ।' इस प्रकार रामसे कहा हुआ लक्ष्मण 'इन दोनों केयूरोंको मैं नहीं जानता और नहीं इन दोनों कुण्डलों को ही पहिचानता हूं । हाँ, इन दोनों नूपुरोंको नित्य पैरोंमें प्रणाम करनेके कारण जानता हूं' यह बोला । तब राम सुग्रीवसे यह कहने लगा— 'हे सुग्रीव ! किस देशकी ओर भयानक रूपवाले राक्षसद्वारा हरी जाती हुई मेरी प्राणप्रियाको तूने देखा था ? मुझे अत्यन्त कष्ट देनेवाला वह राक्षस कहां रहता है ? जिसके कि कारण मैं सब राक्षसोंका नाश कर डालूंगा' इस प्रकार दुःखी रामसे कहा हुआ सुग्रीव आंसुओंसे गद्गद हुआ हुआ अश्रुपूर्ण, हाथ जोडकर बोला ।

'तस्य पापरक्षसः निलयं सर्वथा न जाने। तस्य सामर्थ्यं विक्रमं कुलं वा न जानामि। तथापि अरिन्दम! शोकं त्यज। सत्यं प्रतिजानामि यत् तथा करिष्यामि यथा मैथिलीं प्राप्स्यासि। सगणं रावणं हत्वा आत्म-पौरुषं परितोष्य तथा कर्ता अस्मि, यथा न चिरात् प्रीतः भाविष्यासि। मया अपि भार्याविरहजं व्यसनं प्राप्तं, न च अहं एवं शोचामि, न च धैर्यं परित्यजे, तस्मात् वैक्लव्यं मा स्म गमः, आत्मगतं धैर्यं स्मर। ये शोकं अनुवर्तन्ते तेषां सुखं न विद्यते, तेषां तेजः क्षयते।'

'उस पापी राक्षसके निवासस्थानको सर्वथा नहीं जानता, उसके सामर्थ्य पराक्रम और कुलको नहीं जानता। तो भी हे शत्रुओंके दमन करनेवाले! शोकको छोड। मैं सत्य प्रतिज्ञा करता हूं कि मैं वैसा करूंगा जिससे कि तू मैथिलीको प्राप्त करेगा। रावणको उसके समूहसहित मारकर अपने पौरुषको सन्तुष्ट करके वैसा करूंगा जिससे कि तू शीघ्र ही प्रसन्न हो जायगा। मुझे भी स्त्रीवियोगसे होनेवाला कष्ट प्राप्त है तो भी मैं वैसा शोक नहीं करता और नहीं धैर्यका त्याग करता हूं। अतः अत्यन्त दुःखी मत हो। अपने अन्दर वर्तमान धैर्यका स्मरण कर। जो शोकके पीछे पडे रहते हैं उन्हें सुख प्राप्त नहीं होता, उनका तेज क्षीण होता है।'

वेद-प्रवेश

(मरुद्देवताका मन्त्रसंग्रह)

'वेदप्रवेश' परीक्षाकी पाठविधि, ७५० मन्त्रोंकी पढाई। इसमें भी उपर्युक्त प्रकार मंत्र, अन्वय, अर्थ, भावार्थ और टिप्पणी है। मू. ५) रु. डा. व्य. ॥) रु.

अश्विनौ-देवताका मंत्रसंग्रह

इसमें भी मंत्र, पद, अन्वय, अर्थ, भावार्थ और टिप्पणी आदि है। इसमें ६८९ मंत्र हैं। मूल्य ५) रु. डा. व्य. १) रु.

वेदपरिचय

(भाग १-२-३)

'वेदपरिचय' परीक्षाके लिये ये पुस्तक तैयार किये हैं। ये ग्रन्थ इतने सुबोध, सुपाठ्य और आसान बनाये हैं कि इनसे अधिक सुबोध पाठविधि होही नहीं सकती। सर्वसाधारण स्त्रीपुरुष भी अपना थोडासा नियत समय इस कार्यके लिये प्रतिदिन देंगे, तो ४-५ वर्षोंमें वे वेदज्ञ हो सकते है। इन तीन भागोंमें ३०० वेद-मंत्र हैं।

इनमें मंत्र, उसके पद, अन्वय, अर्थ, प्रत्येक पदका अर्थ, भावार्थ, मन्त्रका बोध, प्रत्येक पदके विशेष अर्थ, मन्त्रके पाठभेद, उनका अर्थ यह दिया है। प्रथम भाग मू. १॥); द्वितीय भाग मू. १॥); तृतीय भाग मू. २) रु.

वेदका स्वयं-शिक्षक, भाग १-२

जो पाठक प्रतिदिन आधा घंटा इसके अध्ययनके लिये देंगे, उनका प्रवेश वेदके मंदिरमें सुगमतासे हो सकता है। इसके दो भाग हैं। प्रत्येक भागका मू. १॥ रु. तथा डा. व्य. ।)

मन्त्री- स्वाध्याय-मण्डल, 'आनंदाश्रम' किल्ला-पारडी, (सूरत)

१

ॐ

संस्कृत-पाठ-माला ।

[संस्कृत भाषाका अध्ययन करनेका सुगम उपाय]

नवम भाग

लेखक

पं. श्रीपाद दामोदर सातवलेकर

अध्यक्ष- स्वाध्याय-मण्डल, साहित्य-वाचस्पति, गीतालंकार

स्वाध्याय मण्डल, पारडी (जि. सूरत)

मूल्य ५० नये पैसे

अंक ९

ॐ

संस्कृत-पाठ-माला।

[संस्कृत भाषाका अध्ययन करनेका सुगम उपाय]

नवमो भागः।

लेखक

पं. श्रीपाद दामोदर सातवलेकर

अध्यक्ष- स्वाध्याय-मण्डल, साहित्य-वाचस्पति, गीतालंकार

अष्टम आवृत्ति

संवत् २०१५, शक १८८०, सन १९५८

मूल्य ५० नये पैसे

व्यञ्जनान्त शब्दोंके रूप ।

इस पुस्तकमें व्यञ्जनान्त पुल्लिङ्ग शब्दोंके रूप बताये हैं । यदि पाठक इन शब्दोंकी विशेषताका स्मरण रखेंगे, तो उनको प्रायः सभी व्यञ्जनान्त शब्दोंके सब विभक्तियोंके रूप बनानेका ज्ञान प्राप्त हो सकता है ।

ये रूप कण्ठ करनेकी आवश्यकता नहीं है, प्रत्युत किस विभक्तिके किस रूपमें क्या विशेषता है, यही ध्यानपूर्वक देखना चाहिये ।

यदि पाठक इतनी ही विशेषता ध्यानपूर्वक देखेंगे और स्मरण रखेंगे, तो उनका प्रवेश आगे अति सुगमतासे हो सकता है । आशा है कि पाठक इस बातकी ओर विशेष ध्यान देंगे ।

लेखक
श्रीपाद दामोदर सातवलेकर

प्रकाशक और मुद्रक :
व. श्री. सातवलेकर, बी. ए.,
भारत-मुद्रणालय, स्वाध्याय-मण्डल,
पोस्ट- ' स्वाध्याय-मण्डल (पारडी) ' पारडी [जि० सूरत]

ॐ

संस्कृत-पाठ-माला।

नवमो भागः

पाठ १

इस पाठमें निम्नलिखित श्लोकोंका पाठ कीजिये—

विवस्वानुवाच ।

यत्तेऽभिलषितं किञ्चित्तत्त्वं सर्वमवाप्स्यसि ।
अहमन्नं प्रदास्यामि सप्त पञ्च च ते समाः ॥

(म. भारत वन. ३।७१)

अन्वयः— यत् किंचित् ते अभिलषितं तत् सर्वं त्वं अवाप्स्यसि। सप्त पञ्च च समाः अहं ते अन्नं प्रदास्यामि ।

संस्कृत-टीका— यत् किंचित् ते तव अभिलषितं अभीष्टं अस्ति तत् सर्वं त्वं अवाप्स्यसि प्राप्स्यसि । सप्त पञ्च च द्वादश समाः वर्षाणि पर्यन्तं अहं ते तुभ्यं अन्नं प्रदास्यामि दास्यामि ।

अर्थ— जो कुछ तेरा इच्छित हो वह सब तू प्राप्त करेगा । बारह वर्ष-पर्यंत मैं तुझे अन्न दूंगा ।

गृहाणेष्व पिठरं ताम्रं मया दत्तं नराधिप ।
यावद्वर्त्स्यति पाञ्चाली पात्रेणानेन सुव्रत ॥
फलमूलामिषं शाकं संस्कृतं यन्महानसे ।
चतुर्विधं तदन्नाद्यमक्षय्यं ते भविष्यति ॥

(म० भारत वन० ३।७२-७३)

अन्वयः— हे नराधिप ! मया दत्तं ताम्रं पिठरं गृह्णीष्व । हे सुव्रत ! अनेन पात्रेण यावत् पाञ्चाली वत्स्यति तावत् यत् महानसे संस्कृतं फलमूलामिषं शाकं चतुर्विधं तत् ते अन्नाद्यं अक्षय्यं भविष्यति ।

संस्कृत-टीका— हे नराधिप ! नराणां मनुष्याणां अधिप राजन् ! मया दत्तं ताम्रं ताम्रनिर्मितं पिठरं पात्रं गृह्णीष्व गृहाण । हे सुव्रत ! हे उत्तमव्रतचारिन् ! अनेन पात्रेण पिठरेण यावत् पाञ्चाली द्रौपदी वत्स्यति वृत्तिं जनजीविकारूपां करिष्यति तावत्कालपर्यन्तं यत् तव महानसे पाकगृहे संस्कृतं कृतं फलमूलामिषं फलं च मूलं च आमिषं च शाकं च चतुर्विधं अन्नं तत् ते तव अन्नाद्यं अन्नादिकं अक्षय्यं क्षयरहितं भविष्यति ।

अर्थ— हे राजा ! मेरा दिया हुआ तांबेका पात्र लो । हे उत्तम नियमोंका पालन करनेवाले ! इस पात्रसे जबतक द्रौपदी परोसती रहेगी, तबतक तेरे पाकगृहमें बना हुआ फल, मूल, आमिष सब अन्न अक्षय्य होगा ।

लब्ध्वा वरं तु कौन्तेयो जलादुत्तीर्य धर्मवित् ।
जग्राह पादौ धौम्यस्य भ्रातॄंश्च परिषस्वजे ॥

(म० भारत वन० ३।८१)

अन्वयः— धर्मवित् कौन्तेयः तु वरं लब्ध्वा, जलात् उत्तीर्य, धौम्यस्य पादौ जग्राह, भ्रातॄन् च परिषस्वजे ।

संस्कृत-टीका— धर्मवित् धर्मं वेत्ति जानाति इति धर्मवित् धर्मज्ञानी कौन्तेयः कुन्तीपुत्रः धर्मराजः तु वरं लब्ध्वा प्राप्य जलात् सलिलात् उत्तीर्य निष्क्रम्य धौम्यस्य धौम्यनामकस्य आचार्यस्य पादौ चरणौ जग्राह गृहीतवान् । भ्रातॄन् बंधून् च परिषस्वजे आलिलिंग ।

अर्थ— धर्म जाननेवाले कुंतीपुत्र धर्मराजने वर प्राप्त कर जलसे उतरकर धौम्यके पांव पकडे और भाइयोंको आलिंगन दिया ।

द्रौपद्या सह संगम्य वन्द्यमानस्तया प्रभुः ।
महानसे तदानीं तु साधयामास पाण्डवः ॥

(म० भारत वन० ३।८२)

अन्वयः— द्रौपद्या सह संगम्य, तया वन्द्यमानः, प्रभुः पाण्डवः तदानीं महानसे साधयामास ।

संस्कृत-टीका— द्रौपद्या पाञ्चाल्या सह संगम्य मिलित्वा, तया द्रौपद्या वन्द्यमानः नमस्क्रियमाणः प्रभुः राजा पांडवः धर्मराजः तदानीं तदा एव महानसे पाकगृहे साधयामास पाकक्रियां आरब्धवान् ।

अर्थ— द्रौपदीको मिलकर, उससे नमन किया हुआ राजा धर्मराज तब पाकगृहमें पाककर्मको आरम्भ करने लगा ।

संधि ।

यत्तेऽभिलषितं	- यत् ते अभिलषितं ।
यावद्वत्स्यति	- यावत् वत्स्यति ।
यन्महानसे	- यत् महानसे
तदन्नाद्यं	- तत् अन्नाद्यं ।
कौन्तेयो जलात्	- कौन्तेयः जलात् ।
जलादुत्तीर्य	- जलात् उत्तीर्य ।
भ्रातॄंश्च	- भ्रातॄन् च ।

पाठक इस पाठके श्लोकोंका बहुत अच्छा अभ्यास करें ।

संधि किये हुए वाक्य ।

यत्किंचित्तेऽभिलषितं तत्सर्वं त्वमवाप्स्यसि । हे नराधिप ! मया दत्तं ताम्रं पिठरं गृहाण । हे सुव्रत ! अनेन पात्रेण यावत्पाञ्चाली वत्स्यति तावद्यन्महानसे संस्कृतं फलमूलामिषं शाकं चतुर्विधं यत्तेऽन्नाद्यमक्षय्यं भविष्यति ।

पाठ २

इस पाठमें निम्नलिखित शब्दके रूप देखिये—

चकारान्तः पुल्लिंगः 'सुवाच्' शब्दः ।

(सुवाच् = उत्तम भाषण करनेवाला)

१	सुवाक्, सुवाग्	सुवाचौ	सुवाचः
सं०	सुवाक्, सुवाग्	सुवाचौ	सुवाचः
२	सुवाचम्	सुवाचौ	सुवाचः
३	सुवाचा	सुवाग्भ्याम्	सुवाग्भिः
४	सुवाचे	सुवाग्भ्याम्	सुवाग्भ्यः
५	सुवाचः	सुवाग्भ्याम्	सुवाग्भ्यः
६	सुवाचः	सुवाचोः	सुवाचाम्
७	सुवाचि	सुवाचोः	सुवाक्षु

इसी रीतिसे निम्नलिखित शब्दोंके रूप बनते हैं—

शब्द ।

पयोमुच् = जल देनेवाला, मेघ
पर्णमुच् = पत्ते गिरानेवाला
विवाच् = विविध भाषा बोलनेवाला ।
कुवाच् = बुरे शब्द बोलनेवाला
दुर्वाच् = बुरे शब्द बोलनेवाला
प्रवाच् = वक्ता, उत्तम भाषण करनेवाला ।

संस्कृत--वाक्यानि ।

१ पयोमुचा जलं वर्षितम् । २ स दुर्वाचं पुरुषं निंदति । ३ सुवाचे मनुष्याय पारितोषिकं देहि ।

भाषा--वाक्य ।

१ मेघने जलकी वृष्टि की । २ वह बुरे शब्द बोलनेवाले पुरुषकी निंदा करता है । ३ उत्तम शब्द बोलनेवाले मनुष्यको इनाम दो ।

अकारान्तः पुल्लिंगो 'राज्' शब्दः ।

(राज् = राजा)

१	राट्, राड्	राजौ	राजः
सं०	राट्, राड्	राजौ	राजः
२	राजम्	राजौ	राजः
३	राजा	राड्भ्याम्	राड्भिः
४	राजे	राड्भ्याम्	राड्भ्यः
५	राजः	राड्भ्याम्	राड्भ्यः
६	राजः	राजोः	राजाम्
७	राजि	राजोः	राट्सु

इसी प्रकार निम्नलिखित शब्दोंके रूप होते हैं—

शब्द

परेतराज् = यम	सम्राज् = सार्वभौम राजा
यमराज् = यम	विभ्राज् = तेजस्वी
यक्षराज् = यक्षोंका राजा	विश्वसृज् = विश्व उत्पन्न करनेवाला
परिव्राज् = संन्यासी	जनराज् = लोगोंका राजा
विराज् = उत्तम क्षत्रिय	पक्षिराज् = गरुड, पक्षियोंका राजा

संस्कृत--वाक्यानि ।

१ अस्य देशस्य सम्राजं नमस्कुरु । २ ज्योतिषा विभ्राजं सूर्यं पश्य । ३ इदानीं जनराड् अत्र न आगमिष्यति । ४ यक्षराड्भिः किं कृतम् ? ५ परिव्राजः कदा तत्र गमिष्यन्ति ? ६ विश्वसृजं देवाधिदेवं ईश्वरं भज । ७ यथा पक्षिराड् आकाशे भ्रमति, तथा न कः अपि अन्यः भ्रमितुं शक्नोति ।

भाषा–वाक्य ।

१ इस देशके सम्राट्को नमन कर । २ ज्योतिसे तेजस्वी सूर्यको देख । ३ अब जनोंका राजा यहाँ नहीं आवेगा । ४ यक्षोंके राजाओंने क्या किया ? ५ संन्यासी लोग कब वहाँ जावेंगे ? ६ विश्व उत्पन्न करनेवाले देवोंके अधि-देव ईश्वरका भजन कर । ७ जिस प्रकार पक्षियोंका राजा गरुड आकाशमें घूमता है, उस प्रकार कोई भी दूसरा भ्रमण करनेको समर्थ नहीं है ।

जकारान्तः पुल्लिंगो ' हुतभुज् ' शब्दः ।

(हुतभुज् = अग्नि)

१	हुतभुग्, हुतभुज्	हुतभुजौ	हुतभुजः
सं०	हुतभुज्, हुतभुग्	हुतभुजौ	हुतभुजः
२	हुतभुजम्	हुतभुजौ	हुतभुजः
३	हुतभुजा	हुतभुग्भ्याम्	हुतभुग्भिः
४	हुतभुजे	हुतभुग्भ्याम्	हुतभुग्भ्यः
५	हुतभुजः	हुतभुग्भ्याम्	हुतभुग्भ्यः
६	हुतभुजः	हुतभुजोः	हुतभुजाम्
७	हुतभुजि	हुतभुजोः	हुतभुक्षु

इस पद्धतिसे निम्नलिखित शब्दोंके रूप होते हैं ।

शब्द

फलभुज् = फल खानेवाला
महीभुज् = राजा
भूभुज् = राजा
अन्नभुज् = अन्न खानेवाला

ऋत्विज् = यज्ञ करनेवाला, याजक
भिषज् = वैद्य
वणिज् = व्यापारी, बनिया

संस्कृत--वाक्यानि ।

१ महीभुजा किं न कृतम् ? २ ऋत्विग्भिः यज्ञः कृतः । ३ यज्ञ-समये हुतभुजे हव्यं देहि । ४ वणिग्भिः अस्मिन् वर्षे बहु धनं

संपादितम् । ५ अन्नभुजः मनुष्याः प्रायः विविधं अन्नं प्रातः सायं भक्षयन्ति । ६ यत्र तौ वणिजौ संस्थितौ तत्रैव अहं हुतभुजं नयामि । ७ ऋत्विजां यागविषयकं ज्ञानं अतीव शोभनं अस्ति ।

भाषा--भाषा

१ राजाने क्या नहीं किया ? २ ऋत्विजोंने यज्ञ किया । ३ यज्ञके समय अग्निके लिये हवनीय पदार्थ दो । ४ बनियोंने इस वर्षमें बहुत धन प्राप्त किया । ५ अन्न खानेवाले मनुष्य अनेक प्रकारका अन्न सबेरे और शामको भक्षण करते हैं । ६ जहां वे दो बनिये हैं, वहीं मैं अग्नि ले जाता हूं । ७ ऋत्विजोंका यज्ञविषयक ज्ञान अत्यंत उत्तम है ।

पाठक इस रीतिसे इस प्रकारके शब्दोंके रूप बनाकर वाक्य करें और अपना अभ्यास बढावें ।

संधि किये हुए वाक्य।

वणिग्भिरस्मिन्वर्षे बहु धनं संपादितम् । बहु धनं संपादितं वणिग्भिरस्मिन्वर्षे । वर्षेऽस्मिन्संपादितं वणिग्भिर्बहु धनम् । अन्नभुजो मनुष्या विविधमन्नं प्रातः सायं भक्षयन्ति । विविधमन्नं सायं प्रातर्भक्षयन्त्यन्नभुजो मनुष्याः । मनुष्या अन्नभुजो भक्षयन्त्यन्नं विविधं सायं प्रातः । अन्नं विविधं भक्षयन्त्यन्नभुजो मनुष्याः सायं प्रातः । ऋत्विजां यागविषयकं ज्ञानमतीव शोभनमस्ति । यागविषयकमृत्विजां ज्ञानमतीवास्ति शोभनम् । शोभनमतीवास्ति ज्ञानमृत्विजां यागविषयकम् ।

पाठ ३

रामायणम् ।

१ विलपतीं जननीं कौसल्यां धर्मसहितं वचः धर्मात्मा रामः उवाच । नास्ति मे शक्तिः पितुः वाक्यं समतिक्रमितुम् । प्रसादये त्वां शिरसा । २ अस्माकं एव कुले पितुः सगरस्य आज्ञया भूमिं खनद्भिः सगरपुत्रैः सुमहान् वधः प्राप्तः । जामदग्न्येन रामेण स्वयं जननी अपि पितुर्वचनकारणात् कृत्ता । ३ धर्मो हि लोके परमः । धर्मे सत्यं प्रतिष्ठितम् । सनातनः अयं धर्मः, पितुः नियोगे स्थातव्यं इति । तत् अनुमन्यस्व वनं गमिष्यन्तं माम् । ४ पितुः निदेशपालने एवं व्यवसितं तं रामं समीक्ष्य बाष्पसंरुद्धनयना कौसल्या अब्रवीत् । पुत्र ! गच्छ त्वं एकाग्रेण मनसा । भद्रं ते अस्तु । अभिरक्षतु त्वां स एव धर्मो यं त्वं पालयसि । सत्येन धर्मेण अभिरक्षितः चिरं जीव इति । ५ रामः पुनः मातुः चरणौ अभिवाद्य सीतानिलयं जगाम । ६ तत् सर्वं अजानती तपस्विनी वैदेही यौवराज्याभिषेचनं एव प्रतीक्षती तस्थौ । अवाङ्मुखे पत्यौ प्रविष्टे शोकसंतप्ते च वेपमाना उदपतत् सीता । दृष्ट्वा तां सीतां धर्मात्मा रामः मनोगतं शोकं सोढुं न शशाक । ७ विवृततां च गतः स शोकः । दृष्ट्वा च तत् सा अपि दुःखाभिसंतप्ता अपृच्छत् । किमिदं प्रभो ! केन असि दुर्मनाः ? न विराजते छत्रं तव उपरि । नापि व्यजने । अहो अपूर्वश्च मुखवर्णः । ८ इति विलपतीं तां सीतां प्रोवाच राघवः । प्रव्राजयति मां तत्र भवान् तातः । चतुर्दश हि वर्षाणि वस्तव्यं मया दण्डके । सोऽहं विजनं वनं प्रस्थितो त्वां द्रष्टुं इदानीं आगतोऽस्मि ।

भाषा--वाक्य ।

१ रोनेवाली माता कौसल्याको धर्मयुक्त भाषण धर्मात्मा रामने कहा । नहीं है मेरी शक्ति पिताके वाक्यका उल्लंघन करनेके लिये । प्रसन्न करता हूं तुझे सिरसे (अर्थात् सिर नम्र करके) २ हमारे कुलमें पिता सगरकी

आज्ञासे भूमिको खोदनेवाले सगरके पुत्रोंने बड़ा वध (अपना ही मृत्यु) प्राप्त किया। जमदग्निपुत्र परशुरामने स्वयं अपनी माताको भी पिताके वचनके कारण काट डाला। ३ धर्म ही लोकमें श्रेष्ठ है। धर्ममें सत्य ठहरा है। सनातन यही धर्म है कि पिताकी आज्ञामें ठहरना। इसलिये अनुमति दो वनको जानेवाले मुझको। ४ पिताकी आज्ञाका पालन करनेमें इस प्रकार तैयार उस रामको देखकर आंसुओंसे भरे हुए आंखवाली कौसल्या बोली। हे पुत्र! जा तू एकाग्र मनसे। कल्याण तेरा हो। रक्षा करे तेरी वही धर्म जिसका तू पालन करता है। सत्य धर्मसे रक्षित होता हुआ तू चिरकाल जीवित रह। ५ राम फिर माताके चरणोंका अभिवन्दन कर सीताके निवासस्थानको गये। ६ यह सब न जाननेवाली तपस्विनी सीता यौवराज्यके अभिषेककी ही प्रतीक्षा करती हुई ठहरी थी। नीचे मुख करते पति प्रविष्ट हुआ और शोकसे संतप्त (है यह देखकर) कांपती हुई सीता उठ खड़ी हुई। देखकर उस सीताको धर्मात्मा राम मनके शोकको सहन करनेको समर्थ नहीं हुआ। ७ व्यक्तताको प्राप्त हुआ वह शोक। देखकर वह भी दुःखसे संतप्त होकर पूछने लगी। क्या है यह प्रभो! किससे हो तुम दुखी-मनवाले? नहीं शोभता है छत्र तेरे ऊपर। नहीं पंखे। अजी, कभी नहीं हुआ ऐसा मुखका वर्ण बना है! ८ इस प्रकार विलाप करनेवाली उस सीतासे राम बोले। वनमें भेजता है मुझे पूज्य पिता। चौदह वर्ष रहना है मैंने दण्डकारण्यमें। वह मैं निर्जन वनको चला हूं। तुझे देखनेके लिये अब मैं आया हूं।

समास।

१ सगरपुत्रः— सगरस्य पुत्रः (सगरका लड़का)

२ निदेशपालनं— निदेशस्य पालनं (आज्ञाका पालन)

३ बाष्पसंरुद्धनयना— बाष्पैः संरुद्धः बाष्पसंरुद्धः। बाष्पसंरुद्धे नयने यस्याः सा बाष्पसंरुद्धनयना। (आंसुओंसे रुके नेत्रवाली)

४ सीतानिलयं— सीतायाः निलयं (सीताका घर)

५ अजानती— न जानती (न जाननेवाली)

६ यौवराज्याभिषेचनं— यौवराज्यस्य अभिषेचनं (यौवराज्यका अभिषेक)

७ शोकसंतप्तः— शोकेन संतप्तः (शोकसे संतप्त)

८ दुःखाभिसंतप्ता— दुःखेन अभिसंतप्ता (दुःखसे संतप्त)

९ मुखवर्णः— मुखस्य वर्णः (मुखका रंग)

१० विजनं— विगताः जनाः यस्मात् (जिससे लोग बाहर गये हैं, जनोंसे विहीन)

संधि किये हुए वाक्य ।

धर्मो हि लोके परमोऽस्ति । सनातनोऽयं धर्मः यः परमोऽस्ति । पितुर्नियोगे स्थातव्यमिति । तदनुमन्यस्व वनं गमिष्यन्तं माम् । पितुर्निदेशपालन एवं व्यवस्थितं तं रामं समीक्ष्य बाष्पसंरुद्धनयना कौसल्याऽब्रवीत् ।

पाठ ४

इस पाठमें तकारान्त शब्दोंके रूप बताते हैं—

तकारान्तः पुल्लिंगो 'भूभृत्' शब्दः ।

(भूभृत् = राजा)

१	भूभृत्	भूभृतौ	भूभृतः
स०	भूभृत्	भूभृतौ	भूभृतः
२	भूभृतम्	भूभृतौ	भूभृतः
३	भूभृता	भूभृद्भ्याम्	भूभृद्भिः
४	भूभृते	भूभृद्भ्याम्	भूभृद्भ्यः
५	भूभृतः	भूभृद्भ्याम्	भूभृद्भ्यः
६	भूभृतः	भूभृतोः	भूभृताम्
७	भूभृति	भूभृतोः	भूभृत्सु

इसी रीतिसे निम्नलिखित शब्दोंके रूप बनते हैं—

शब्द।

मरुत्	= मरुत् देवता, वायु	महीक्षित्	= राजा
विपश्चित्	= ज्ञानी, विद्वान्	कपालभृत्	= कटोरी धारण करनेवाला
अग्निचित्	= अग्निको प्रज्वलित करनेवाला	क्ष्माभृत्	= राजा

संस्कृत-वाक्यानि।

१ हे अग्ने ! त्व मरुद्भिः सह आगच्छ। २ भूभृतां संगमेन किं फलं भवति ? ३ यत्र सर्वे विपश्चितः भवन्ति तत्र धर्मस्य निर्णयः भवति। ४ मरुद्भ्यः हव्यं देहि। ५ क्ष्माभृतौ यत्र गच्छतः तत्र विपश्चितौ न भवतः। ६ एतत् भवनं पूर्वेण महीक्षिता निर्मितं आस्ति। ७ विपश्चिद्भूभृतोः कः श्रेष्ठतरः ? ८ स्वदेशे राजा पूज्यते, परन्तु विपश्चित् सर्वत्र पूज्यते।

भाषा-वाक्य।

१ हे अग्ने ! तू मरुतोंके साथ आ। २ राजाओंकी संगतिसे क्या फल होता है ? ३ जहां सब ज्ञानी होते हैं, वहां धर्मका निर्णय होता है। ४ मरुतोंके लिये हव्य पदार्थ दो। ५ दो राजे जहां जाते हैं वहां दो ज्ञानी नहीं होते। ६ यह गृह पहिले राजाने बनाया है। ७ ज्ञानी और राजा इनमें श्रेष्ठ कौन है ? ८ अपने देशमें राजाका सत्कार होता है, परन्तु ज्ञानीका सत्कार सर्वत्र होता है।

तान्तः पुल्लिंगो 'महत्' शब्दः।

(महत् = बड़ा)

१	महान्	महान्तौ	महान्तः
सं०	हे महन्	हे महान्तौ	हे महान्तः
२	महान्तम्	महान्तौ	महतः

३	महता	महद्भ्याम्	महद्भिः
४	महते	महद्भ्याम्	महद्भ्यः
५	महतः	महद्भ्याम्	महद्भ्यः
६	महतः	महतोः	महताम्
७	महति	महतोः	महत्सु

'महत्' शब्द वास्तविक विशेषण है और इस कारण इसका कोई लिङ्ग नहीं है, तथापि जिस समय यह किसी पुल्लिंगी विशेष्यका गुण बतानेके लिये उसके विशेषणके स्थानमें आता है, तो उस समय इसके रूप पुल्लिंगके समान होते हैं। इसलिये ये रूप यहां दिये हैं।

वाक्य।

महद्भ्यः रुद्रेभ्यः नमो नमः। यथा पशुषु सिंहः महान्तं शब्दं करोति न तथा अन्यः कः अपि पशुः महान्तं शब्दं कर्तुं शक्तः।

बड़े रुद्रोंके लिये नमस्कार है। जैसा पशुओंमें सिंह बड़ा शब्द करता है वैसा कोई भी अन्य पशु शब्द करनेमें समर्थ नहीं है।

तकारान्तः पुल्लिंगो 'भगवत्' शब्दः।

(भगवत् = भगवान्)

१	भगवान्	भगवन्तौ	भगवन्तः
सं०	हे भगवन्	हे भगवन्तौ	हे भगवन्तः
२	भगवन्तम्	भगवन्तौ	भगवतः
३	भगवता	भगवद्भ्याम्	भगवद्भिः
४	भगवते	भगवद्भ्याम्	भगवद्भ्यः
५	भगवतः	भगवद्भ्याम्	भगवद्भ्यः
६	भगवतः	भगवतोः	भगवताम्
७	भगवति	भगवतोः	भगवत्सु

इसी रीतिसे निम्नलिखित शब्दोंके रूप होते हैं—

शब्द ।

नभस्वत् = वायु	राजन्वत् = उत्तम राजासे चलाया हुआ राज्य
धीमत् = बुद्धिमान्	बुद्धिमत् = बुद्धिवाला
ज्ञानवत् = ज्ञानी	उदन्वत् = समुद्र
क्रियावत् = पुरुषार्थी	आत्मवत् = आत्मिक बलसे युक्त, ज्ञानी
विवस्वत् = सूर्य	
गरुत्मत् = गरुड	

संस्कृत--वाक्यानि ।

१ भगवान् अत्र आगच्छतु । २ धीमता पुरुषेण एव ग्रन्थस्य रचना कर्तुं योग्या । ३ क्रियावतां मनुष्याणां मध्ये आत्मवान् एव श्रेष्ठतरः । ४ विवस्वान् आकाशे तपति । ५ बुद्धिमता वीरेण एव स्वदेशस्य हिताय युद्धं कर्तव्यम् । ६ गरुत्मतः अन्यत् नाम गरुडः इति अस्ति ।

भाषा--वाक्य ।

१ भगवान् यहां आवे । २ बुद्धिमान् मनुष्यने ही ग्रंथकी रचना करना योग्य है । ३ पुरुषार्थी मनुष्योंके मध्यमें आत्मिक बलवाला पुरुष श्रेष्ठ है । ४ सूर्य आकाशमें तपता है । ५ बुद्धियुक्त शूर पुरुषने ही अपने देशके हितके लिये युद्ध करना चाहिये । ६ गरुत्मत्का दूसरा नाम गरुड ऐसा है ।

पाठक इस रीतिसे अन्यान्य तकारान्त शब्दोंके रूप बनाकर उनका उपयोग विविध वाक्योंमें करें और प्रत्येक रूपका उपयोग करके वाक्य अवश्य बनावें । इसीसे उनका अभ्यास अच्छी प्रकार बढ सकता है ।

संधि किये हुए वाक्य ।

१ भगवानत्रागच्छतु । आगच्छत्वत्र भगवान् । अत्रागच्छतु भगवान् । भगवानागच्छत्वत्र ।

१ धीमता पुरुषेणैव ग्रन्थस्य रचना कर्तुं योग्या। ग्रन्थस्य रचना धीमता पुरुषेणैव कर्तुं योग्या।

३ यथा पशुषु सिंहो महान्तं शब्दं करोति, न तथाऽन्यः कोऽपि पशुर्महान्तं शब्दं कर्तुं शक्तः। यथा महान्तं शब्दं पशुषु सिंहः करोति, तथा न कोऽप्यन्यः पशुर्महान्तं शब्दं कर्तुं शक्तः।

४ महद्भ्यो रुद्रेभ्यो नमो नमः। नमो नमो महद्भ्यो रुद्रेभ्यः।

पाठ ५

रामायणम्।

१ एवं उक्ता तु वैदेही प्रणयात् एव संक्रुद्धा भर्तारं इदं अब्रवीत्। शस्त्रास्त्रविदुषां वीराणां राजपुत्राणां अनर्हं त्वया उदितम्। न श्रोतव्यं तत्। २ आर्यपुत्र ! पिता माता तथा च पुत्रः पुण्यानि भुञ्जानाः स्वं स्वं भाग्यं उपासते। नारी तु एका भर्तुः भाग्यं प्राप्नोति। अतः अहं अपि आदिष्टा एव अस्मिन्वने वस्तव्यं इति। इह प्रेत्य च नारीणां सदा एकः पतिः एव गतिः। हे राघव ! यदि त्वं दुर्गमं वनं प्रस्थितः तर्हि अहमपि कुशकण्टकान् मृद्नन्ती ते अग्रतः गमिष्यामि। ३ भुक्तवति त्वयि अहं भोक्ष्ये। वनेऽपि त्वं मम परिपालनं कर्तुं शक्तः। त्वया वियुक्ता अहं मरणे निश्चिता अस्मि। ४ सान्त्वयित्वा तु तां सीतां धर्मात्मा रामः उवाच। सीते ! त्वं कुलीना धर्मनिरता च सदा असि। अतः त्वं इहैव स्वधर्मं समाचर। येन मम मनसः सुखं भवेत्। ५ बहुदोषं हि वनं। तत्र सिंहानां व्याघ्राणां च दुःखदाः निनादाः, सरितः सग्राहाः, मत्ताः गजाः, कण्टकिताः लताश्च। मार्गा अपि निरपाः सुदुःखाश्च। अतः सीते दुःखं वनम्। तत्र च अतीव तिमिरं, महान् वातः,

नित्या बुभुक्षा, महान्ति च भयानि सन्ति। ६ एतत् श्रुत्वा दुःखिता सीता रामं उवाच। ये त्वया वने वस्तव्यतां प्रति दोषत्वेन परिकीर्तिताः तान् तव स्नेहेन पुरस्कृतान् गुणान् एव विद्धि। अदृष्टपूर्वं तव रूपं दृष्ट्वा सर्वे वनचारिणः दूरं अपसर्पेयुः। गुरुजनाज्ञया मया त्वया सह वनं अवश्यं गन्तव्यं एव। हे राम! त्वद्वियोगेन तु मया जीवितमेव त्यक्तव्यम्।

भाषा--वाक्य।

१ इस प्रकार कही गई सीता प्रीतिसे ही क्रोधित होकर पतिसे यह बोली। शस्त्र और अस्त्र जाननेवाले वीर राजपुत्रोंके अयोग्य तूने कहा। नहीं सुनने योग्य है वह। २ हे आर्यपुत्र! पिता, माता तथा पुत्र अपने पुण्योंका भोग करते हुए अपने अपने भाग्यको ही प्राप्त करते हैं। पत्नी ही केवल अकेली पतिके भाग्यको प्राप्त करती है। इसलिये मुझे भी आज्ञा हुई ही है वनमें बसनेके लिये। यहां तथा परलोकमें पत्नियोंके लिये पति ही गति है। हे राम! यदि तू दुर्गम वनको जाता है; तो मैं भी दर्भ और कांटोंको हटाती हुई तेरे आगे चलूँगी। ३ तेरे भोजन करनेपर मैं भोजन करूंगी। वनमें भी तू मेरा पालन करनेको समर्थ है। तेरेसे वियुक्त हुई मैं मरनेमें निश्चित हूं। ४ शांत करके उस सीताको धर्मात्मा राम बोले। हे सीते! तू कुलीन और धर्ममें रत सदासे हो। इसलिये तू यहां ही स्वधर्मका आचरण कर जिससे मेरे मनको सुख होगा। ५ बहुत दोष हैं वनमें। वहां सिंह और बाघोंके दुःखदायी शब्द, मगरमच्छोंसे युक्त नदियां, मतवाले हाथी, कांटोंसे युक्त लताएँ होती हैं। मार्ग भी (निः-अपाः) जलरहित और बडे दुःखदायी हैं। इसलिये हे सीते! दुःखदायी वन है। वहां बडा अन्धेरा, बडा वायु, हमेशा भूख और बडे भय हैं। ६ यह सुनकर दुःखी सीता रामसे बोली। जो तूने वनके निवासके प्रति दोष करके कहे, वे तेरे स्नेहसे युक्त होकर गुण ही हैं ऐसा समझ। पहिले न देखा हुआ तेरा

रूप देखकर सब वनचारी दूर भागेंगे। गुरुजनोंकी आज्ञा लेकर तेरे साथ मैंने भी अवश्य वनमें जाना ही हैं। हे राम! तेरे वियोगसे तो मैंने जीवन भी छोडना है।

समास।

१ शस्त्रास्त्रविद्वान्- शस्त्राणि च अस्त्राणि च शस्त्रास्त्राणि। शस्त्रास्त्राणि वेत्तीति शस्त्रास्त्रविद्वान्। (शस्त्रास्त्र जाननेवाला)

२ राजपुत्रः- राज्ञः पुत्रः (राजाका बेटा)

३ अनर्हं- न अर्हं (योग्य नहीं)

४ कुशाकण्टकाः- कुशाः च कण्टकाः च (दर्भ और कांटे)

५ धर्मनिरतः- धर्मे निरतः (धर्ममें रत)

६ स्वधर्मः- स्वस्य धर्मः (अपना धर्म)

७ बहुदोषं- बहवः दोषाः यस्मिन् तत् (बहुत हैं; दोष; जिसमें वह)

८ दुःखदः- दुःखं ददाति इति (दुःख देता है जो)

९ सग्राहा- ग्राहैः सहिता (मगरोंसे युक्त)

१० निरपाः- अद्भिः रहिताः (जलसे रहित)

११ दोषत्वं- दोषस्य भावः (दोषका भाव)

१२ वनचारिन्- वने चरतीति वनचारी (वनमें संचार करनेवाला)

संधि किये हुए वाक्य।

एवमुक्ता तु वैदेही प्रणयादेव संक्रुद्धा भर्तारमिदमब्रवीत्। शस्त्रास्त्रविदुषां वीराणां राजपुत्राणामनर्हं त्वयोदितं, न श्रोतव्यं तत्। आर्यपुत्र! पिता माता तथा च पुत्रः पुण्यानि भुञ्जानाः स्वं स्वं भाग्यमुपासते। नारी त्वेका भर्तुर्भाग्यं प्राप्नोति।

पाठ ६

अब यहां दकारान्त शब्दोंके रूप बताते हैं—

दकारान्तः पुल्लिंगः 'क्रव्याद्' शब्दः।

(क्रव्याद् = मांस खानेवाला)

१	क्रव्यात्, क्रव्याद्	क्रव्यादौ	क्रव्यादः
सं०	क्रव्यात्, क्रव्याद्	क्रव्यादौ	क्रव्यादः
२	क्रव्यादम्	क्रव्यादौ	क्रव्यादः
३	क्रव्यादा	क्रव्याद्भ्याम्	क्रव्याद्भिः
४	क्रव्यादे	क्रव्याद्भ्याम्	क्रव्याद्भ्यः
५	क्रव्यादः	क्रव्याद्भ्याम्	क्रव्याद्भ्यः
६	क्रव्यादः	क्रव्यादोः	क्रव्यादाम्
७	क्रव्यादि	क्रव्यादोः	क्रव्यात्सु

इस रीतिसे निम्नलिखित शब्दोंके रूप बनते हैं।

शब्द।

सुहृद् = मित्र, उत्तम दिलवाला	तमोनुद्=अंधकारका नाश करनेवाला
दुर्हृद् = शत्रु, दुष्ट दिलवाला	अन्नाद् = अन्न खानेवाला

वाक्य।

१ प्राज्ञेन सुहृदा एव मित्रता कर्तव्या— ज्ञानीको उत्तम दिलवाले मनुष्यसे ही मित्रता करनी योग्य है।

२ दुर्हृदां शत्रूणां सर्वैः अवश्यं निवारणं कर्तव्यं— दुष्ट हृदयवाले शत्रुओंका सबको अवश्य निवारण करना योग्य है।

दकारान्तः पुल्लिंगः 'सुपाद्' शब्दः।

(सुपाद् = उत्तम पांववाला)

१	सुपात्, सुपाद्	सुपादौ	सुपादः
सं०	हे सुपात्, सुपाद्	हे सुपादौ	हे सुपादः

२	सुपादम्	सुपादौ	सुपदः
३	सुपदा	सुपद्भ्याम्	सुपद्भिः
४	सुपदे	सुपद्भ्याम्	सुपद्भ्यः
५	सुपदः	सुपद्भ्याम्	सुपद्भ्यः
६	सुपदः	सुपदोः	सुपदाम्
७	सुपदि	सुपदोः	सुपात्सु

मूल 'पाद्' शब्द होते हुए भी द्वितीया विभक्तिके बहुवचनके पश्चात्के रूपोंमें 'पाद्' के स्थानपर 'पद्' हुआ है। यह पाठक यहां देखें। केवल सप्तमीके बहुवचनमें ही 'सुपात्सु' रहा है। शेष रूपोंमें 'पद्' ही है। यह विशेषता पाठक देखें।

वाक्य।

१ सुपात् पुरुषः महता वेगेन चलति— उत्तम पांववाला मनुष्य बडे वेगके साथ चलता है।

२ सुपदां मानवानां यथा गतिः अस्ति तथा तव गमनं भवतु- उत्तम पांववाले मनुष्योंकी जैसी गति है वैसा तेरा गमन होवे।

धकारान्तः पुल्लिंगो 'बुध्' शब्दः।

(बुध् = ज्ञानी)

१	भुत्, भुद्	बुधौ	बुधः
सं०	हे भुत्, भुद्	हे बुधौ	हे बुधः
२	बुधम्	बुधौ	बुधः
३	बुधा	भुद्भ्याम्	भुद्भिः
४	बुधे	भुद्भ्याम्	भुद्भ्यः
५	बुधः	भुद्भ्याम्	भुद्भ्यः
६	बुधः	बुधोः	बुधाम्
७	बुधि	बुधोः	भुत्सु

एक अकारान्त पुल्लिंग 'बुधः' शब्द है वह और है, उसके रूप 'देव' शब्दके समान होते हैं। उस शब्दके साथ पाठकोंका परिचय है ही। इस स्थानपर (अन्तमें अकाररहित) धकारान्त 'बुध्' शब्दके रूप बताये

हैं। इन रूपोंमें 'बु' के स्थानपर कई रूपोंमें 'भु' हुआ है, यही विशेषता इसमें है।

वाक्य।

१ बुधा तुभ्यं किं पाठितम्?— ज्ञानी मनुष्यने तुझे क्या पढाया?

२ बुधे एव दक्षिणां देहि— ज्ञानीको ही दक्षिणा दो।

३ भुत्सु विशेषं ज्ञानं भवति— ज्ञानियोंमें विशेष ज्ञान होता है।

४ बुधां समूहे एव सर्वं धर्मतत्त्वं निश्चितं भवति— ज्ञानियोंके समाजमें ही सब धर्मका तत्त्व निश्चित होता है।

नकारान्तः पुल्लिंगः 'राजन्' शब्दः।

(राजन् = राजा)

१	राजा	राजानौ	राजानः
सं०	हे राजन्	हे राजानौ	हे राजानः
२	राजानम्	राजानौ	राज्ञः
३	राज्ञा	राजभ्याम्	राजभिः
४	राज्ञे	राजभ्याम्	राजभ्यः
५	राज्ञः	राजभ्याम्	राजभ्यः
६	राज्ञः	राज्ञोः	राज्ञाम्
७	राज्ञि, राजनि	राज्ञोः	राजसु

शब्द।

मूर्धन् = सिर
ग्रावन् = पत्थर
तक्षन् = तर्खाण
पूषन् = पूषा देव
उक्षन् = बैल

प्लीहन् = प्लीहा, पानथरी
मज्जन् = मज्जा
अर्यमन् = अर्यमा
परिज्मन् = चंद्र, अग्नि
सुत्रामन् = रक्षक, इन्द्र

संस्कृत-वाक्यानि।

१ अराजकः राजानं न नमति। २ मार्गे ग्रावाणः पथिकस्य जनस्य दुःखाय एव भवन्ति। ३ उक्षाणः कृषिं कुर्वन्ति, अन्नं

च उत्पादयन्ति । ४ तक्षा काष्ठस्य गृहं निर्माति । ५ अस्माकं गृहं तक्षभिः निर्मितम् । ६ राज्ञः पदं सर्वेषां मूर्ध्नि भवति किम् ? ७ राज्ञां अपि राजा ईश्वरः । ८ राज्ञां पूजा राष्ट्रे भवति । ९ सुत्रामा इन्द्रः सर्वस्य रक्षकः ।

भाषा-वाक्य ।

१ अराजक राजाको नमस्कार नहीं करता । २ मार्गमें पत्थर पथिक मनुष्यके दुःखके लिये ही होते हैं । ३ बैल खेती करते और अन्न उत्पन्न करते हैं । ४ तर्खाण लकडीका घर निर्माण करता है । ५ हमारा घर तर्खाणोंने निर्माण किया । ६ राजाका पांव सबके सिरपर होता है क्या ? ७ राजाओंका राजा ईश्वर है । ८ राजाओंकी पूजा राष्ट्रमें होती है । ९ रक्षक इन्द्र सबका पालक है ।

संधि ।

प्राज्ञेन सुहृदैव मित्रता कर्तव्या ।
दुर्हृदां शत्रूणां निवारणं सर्वैरवश्यं कर्तव्यम् ।
सुपात्पुरुषो महता वेगेन चलति ।
सुपदां मानवानां यथा गतिरस्ति तथा तव गमनं भवतु ।
बुध एव दक्षिणां देहि ।
बुधां समूह एव सर्वं धर्मतत्त्वं निश्चितं भवति ।
अराजको राजानं न नमति ।
मार्गे ग्रावाणः पथिकस्य जनस्य दुःखायैव भवन्ति ।
उक्षाण कृषिं कुर्वन्त्यन्नं चोत्पादयन्ति ।
अस्माकं गृहं तक्षभिर्निर्मितम् ।
राज्ञामपि राजेश्वरः ।
सुत्रामेन्द्रः सर्वस्य रक्षकः ।

सूचना

इस तरह पाठक इन शब्दोंके रूप बनाकर उनके ऐसे वाक्य बनावें ।

पाठ ७

अब इस पाठमें आये हुए ही वाक्योंका संधियुक्त संस्कृत देते हैं—

(१)

महाभारतम् ।

यत्किञ्चित्तेऽभिलषितं तत्सर्वं त्वमवाप्स्यसि । सप्त पञ्च च समा अहं तेऽन्नं प्रदास्यामि । हे नराधिप ! मया दत्तं ताम्रं पिठरं गृहाण । हे सुव्रत ! अनेन पात्रेण यावत्पाञ्चाली वर्त्स्यति तावद्य-न्महानसे संस्कृतं फलमूलामिषं शाकं चतुर्विधं तत्तेऽन्नाद्यमक्षय्यं भविष्यति । धर्मवित् कौन्तेयस्तु वरं लब्ध्वा जलादुत्तीर्य धौम्य-स्य पादौ जग्राह । भ्रातॄंश्च परिषस्वजे । द्रौपद्या सह संगम्य तया वन्द्यमानः प्रभुः पाण्डवस्तदानीं महानसे साधयामास पाकक्रियां च आरब्धवान् ।

सूचना

इसमें कुछ कठिनता समझनेमें हुई तो इसी पुस्तकका प्रथम और द्वितीय पाठ देखें, वहां ये ही वाक्य अर्थके साथ दिये हैं । अब कुछ रामायणकी कथा दी जाती है—

(२)

रामायणम् ।

विलपन्तीं जननीं कौसल्यां धर्मसहितं वचो धर्मात्मा राम उवाच । नास्ति मे शक्तिः पितुर्वाक्यं समतिक्रमितुम् । प्रसादये त्वां शिरसा । अस्माकमेव कुले पितुः सागरस्याज्ञया भूमिं खनद्भिः सगरपुत्रैः सुमहान्वधः प्राप्तः । जामदग्न्येन रामेण स्वयं जनन्यपि पितुर्वचनकारणात्कृत्ता । धर्मो हि लोके परमः । धर्मे सत्यं प्रति-ष्ठितम् । सनातनोऽयं धर्मः पितुर्नियोगे स्थातव्यमिति । तदनुम-न्यस्व वनं गमिष्यन्तं माम् ।

पितुर्निदेशपालने एवं व्यवसितं तं रामं समीक्ष्य बाष्पसंरुद्धनयना कौसल्याऽब्रवीत् । पुत्र ! गच्छ त्वमेकाग्रेण मनसा । भद्रं तेऽस्तु । अभिरक्षतु त्वां स एव धर्मो यं त्वं पालयसि । सत्येन धर्मेणाभिरक्षितश्चिरं जीवेति ।

रामः पुनर्मातुश्चरणावभिवाद्य सीतानिलयं जगाम । तत्सर्वमजानती तपस्विनी वैदेही यौवराज्याभिषेचनमेव प्रतीक्षती तस्थौ । अवाङ्मुखे पत्यौ प्रविष्टे शोकसंतप्ते च वेपमानोदपतत्सीता । दृष्ट्वा तां सीतां धर्मात्मा रामो मनोगतं सोढुं न शशाक । विवृततां च गतः स शोकः । दृष्ट्वा च तत्साऽपि दुःखाभिसन्तप्ताऽपृच्छत् । किमिदं प्रभो ! केनासि दुर्मनाः ? न विराजते छत्रं तवोपरि । नापि व्यजने । अहो ! अपूर्वश्च मुखवर्णः ।

इति विलपन्तीं तां सीतां प्रोवाच राघवः । प्रव्राजयति मां तत्रभवान्तातः । चतुर्दश हि वर्षाणि वस्तव्यं मया दण्डके । सोऽहं विजनं वनं प्रस्थितः । त्वां द्रष्टुमिदानीमागतोऽस्मि ।

सूचना

इसके समझनेमें कुछ कठिनता हुई तो पाठक पाठ ६ और ७ में देखें, वहां ये ही वाक्य पदच्छेदपूर्वक अर्थके साथ दिये हैं । अब इसीका उत्तरार्ध देखिये—

(३)

एवमुक्ता तु वैदेही प्रणयादेव संक्रुद्धा भर्तारमिदमब्रवीत् । शस्त्राऽस्त्रविदुषां वीराणामनर्हं त्वयोदितम् । न श्रोतव्यं तत् । आर्यपुत्र ! पिता माता तथा च पुत्रः पुण्यानि भुञ्जानाः स्वं स्वं भाग्यमुपासते । नारी त्वेका भर्तुर्भाग्यं प्राप्नोति । ततोऽहमप्यादिष्टास्मि वने वास्तव्यमिति । इह प्रेत्य च नारीणां सदैकः पतिरेव गतिः । हे राघव ! यदि त्वं दुर्गमं वनं प्रस्थितस्तर्ह्यहमपि कुशकण्टकान्मृद्नती तेऽग्रतो गमिष्यामि । भुक्तवति त्वय्यहं भोक्ष्ये । वनेऽपि त्वं मम परिपालनं कर्तुं शक्तः । त्वया वियुक्ताऽहं मरणे निश्चिताऽस्मि ।

सान्त्वयित्वा तु तां सीतां धर्मात्मा राम उवाच । सीते ! त्वं कुलीना धर्मनिरता च सदाऽसि । अतस्त्वमिहैव स्वधर्मं समाचर । येन मम मनसः सुखं भवेत् । बहुदोषं हि वनम् । तत्र सिंहानां व्याघ्राणां च दुःखदा निनादाः, सरितः सग्राहाः, मत्ता गजाः, कण्टकिताः लताः, मार्गाः अपि निरपाः सुदुःखाश्च । अतः सीते ! दुःखं वनम् । तत्र चातीव तिमिरं, महान्वातः, नित्या बुभुक्षा, महान्ति च भयानि सन्ति ।

एतच्छ्रुत्वा दुःखिता सीता राममुवाच । ये त्वया वने वस्तव्यतां प्रति दोषत्वेन परिकीर्तितास्तांस्तव स्नेहेन पुरस्कृतान् गुणानेव विद्धि । अदृष्टपूर्वं तव रूपं दृष्ट्वा सर्वे वनचारिणो दूरमपसर्पेयुः । गुरुजनाज्ञया मया त्वया सह वनमवश्यं गन्तव्यमेव । हे राम ! त्वद्वियोगेन तु मया जीवितमेव त्यक्तव्यम् ।

सूचना

इसके समझनेमें कुछ कठिनता हुई तो पाठ ९-१० देखिये । वहां ये ही वाक्य अर्थके साथ दिये हैं ।

समासाः ।

१ धर्मसंहितं— धर्मेण सहितं (धर्मसे युक्त)
२ सगरपुत्रः— सगरस्य पुत्रः (सगरका पुत्र)
३ बाष्पसंरुद्धः— बाष्पैः संरुद्धः (आंसुओंसे बंद)
४ सीतानिलयं— सीतायाः निलयं (सीताजीका घर)
५ अजानती— न जानती (न जाननेवाली)
६ यौवराज्याभिषेचनं— यौवराज्यस्य अभिषेचनं (यौवराज्यका अभिषेक)
७ शोकसंतप्ता— शोकेन संतप्ता (शोकसे संतप्त)
८ मनोगतं— मनसि गतं (मनमें आया)
९ दुःखाभिसंतप्ता— दुःखेन अभिसंतप्ता (दुःखसे त्रस्त)

पाठ ८

अब इस पाठमें और नकारान्त शब्दोंके रूप देखिये—

नकारान्तः पुल्लिंगो 'ब्रह्मन्' शब्दः ।

(ब्रह्मन् = ब्रह्मा)

१	ब्रह्मा	ब्रह्माणौ	ब्रह्माणः
सं०	हे ब्रह्मन्	हे ब्रह्माणौ	हे ब्रह्माणः
२	ब्रह्माणम्	ब्रह्माणौ	ब्रह्मणः
३	ब्रह्मणा	ब्रह्मभ्याम्	ब्रह्मभिः
४	ब्रह्मणे	ब्रह्मभ्याम्	ब्रह्मभ्यः
५	ब्रह्मणः	ब्रह्मभ्याम्	ब्रह्मभ्यः
६	ब्रह्मणः	ब्रह्मणोः	ब्रह्मणाम्
७	ब्रह्मणि	ब्रह्मणोः	ब्रह्मसु

इसी शब्दके रूपोंके समान निम्नलिखित शब्दोंके रूप होते हैं—

शब्द

आत्मन्	= आत्मा	अग्रजन्मन्	= ब्राह्मण, बड़ा भाई
अध्वन्	= मार्ग	पाप्मन्	= पापी, पाप
अश्मन्	= पत्थर	जित्वन्	= विजयी
मातरिश्वन्	= वायु	सुत्वन्	= सोमयाग करनेवाला, रस निकालनेवाला ।
यज्वन्	= याजक		
अर्वन्	= घोड़ा	धन्वन्	= रेतीला प्रदेश
सुपर्वन्	= देव		

संस्कृत--वाक्यानि ।

१ यज्ञे ब्रह्मा सर्वेषु ऋत्विक्षु मुख्यः अथर्ववेदं पठति । २ एते सर्वे अपि अध्वानः एकं एव स्थानं प्रति गच्छन्ति । ३ आकाशे मातरिश्वा सर्वत्र संचरति । ४ अर्वा अर्वदेशात् अस्मिन् देशे

आनीयते । ५ यज्वभिः यज्ञे यजनं क्रियते । ६ धन्वनि वृक्षाः न भवन्ति । ७ अध्वनि शीतस्य निवारणार्थं वस्त्रं ग्रहाण । ८ सैनिकाः युद्धे श्रान्ताः अध्वनि एव निद्रिताः ।

भाषा–वाक्य ।

१ यज्ञमें सब ऋत्विजोंमें मुख्य ब्रह्मा अथर्ववेद पढता है । २ ये सब ही मार्ग एक ही स्थानके प्रति जाते हैं । ३ आकाशमें वायु सर्वत्र संचार करता है । ४ घोडा अरबदेशसे इस देशमें लाया जाताहै । ५ याजकोंके द्वारा यज्ञमें यजन किया जाता है । ६ रेतीले मरुदेशमें वृक्ष नहीं होते हैं । ७ मार्गमें शीतनिवारणके लिये वस्त्र लो । ८ सैनिक सिपाही युद्धमें थके हुए मार्गमें ही सोये हैं ।

नकारान्तः पुल्लिंगो 'वृत्रहन्' शब्दः ।
(वृत्रहन् = वृत्रको मारनेवाला)

१	वृत्रहा	वृत्रहणौ	वृत्रहणः
सं०	हे वृत्रहन्	हे वृत्रहणौ	हे वृत्रहणः
२	वृत्रहणम्	वृत्रहणौ	वृत्रघ्नः
३	वृत्रघ्ना	वृत्रहभ्याम्	वृत्रहभिः
४	वृत्रघ्ने	वृत्रहभ्याम्	वृत्रहभ्यः
५	वृत्रघ्नः	वृत्रहभ्याम्	वृत्रहभ्यः
६	वृत्रघ्नः	वृत्रघ्नोः	वृत्रघ्नाम्
७	वृत्रघ्नि, वृत्रहणि	वृत्रघ्नोः	वृत्रहसु

इसी प्रकार निम्नलिखित शब्दोंके रूप बनते हैं—

मातृहन् = माताका वध करनेवाला	पितृहन् = पिताका वध करनेवाला
गुरुहन् = गुरुका वध करनेवाला	ब्रह्महन् = ब्राह्मणका वध करनेवाला

संस्कृत--वाक्यानि ।

१ पितृहभिः अस्मिन् यज्ञे न आगन्तव्यम्— पितृका वध करनेवालोंने इस यज्ञमें नहीं आना चाहिये ।

२ गुरुघ्ने उचितं दण्डं देहि— गुरुका वध करनेवालेको योग्य दंड दे ।

नकारान्तः पुल्लिंगो 'श्वन्' शब्दः ।

(श्वन् = कुत्ता)

१	श्वा	श्वानौ	श्वानः
सं०	हे श्वन्	हे श्वानौ	हे श्वानः
२	श्वानम्	श्वानौ	शुनः
३	शुना	श्वभ्याम्	श्वभिः
४	शुने	श्वभ्याम्	श्वभ्यः
५	शुनः	श्वभ्याम्	श्वभ्यः
६	शुनः	शुनोः	शुनाम्
७	शुनि	शुनोः	श्वसु

'श्वन्' शब्दके 'श्व' के स्थानपर कई रूपोंमें 'शु' होता है और कइयोंमें 'श्व' ही रहता है । पाठक इस विशेषताको स्मरणमें रखें ।

संस्कृत--वाक्यानि ।

१ त्वया स्वकीयः श्वा कुत्र स्थापितः ? — तूने अपना कुत्ता कहां रखा ?

२ अहं मदीयं श्वानं पुनः अत्र न आनेष्यामि— मैं अपने कुत्तेको फिर यहां नहीं लाऊंगा ।

३ श्वभिः एव एष कोलाहलः कृतः— कुत्तोंने ही यह कोलाहल मचाया है ।

४ श्वभ्यः पक्षिभ्यः च अन्नं देहि-- कुत्तों और पक्षियोंके लिये अन्न दो ।

नकारान्तः पुल्लिंगो 'युवन्' शब्दः ।

(युवन् = तरुण)

१	युवा	युवानौ	युवानः
सं०	हे युवन्	हे युवानौ	हे युवानः

२	युवानम्	युवानौ	यूनः
३	यूना	युवभ्याम्	युवभिः
४	यूने	युवभ्याम्	युवभ्यः
५	यूनः	युवभ्याम्	युवभ्यः
६	यूनः	यूनोः	यूनाम्
७	यूनि	यूनोः	युवसु

यहां भी कई रूपोंमें 'युव' रहा है और कई रूपोंमें 'युव' के स्थानपर 'यू' हो गया है। इस विशेषताका स्मरण रखिये।

संस्कृत-वाक्यानि।

१ युवा पुरुषः ब्रह्मचारी भवितुं अर्हति— तरुण पुरुष ब्रह्मचारी होने योग्य है।

२ युवभिः मनुष्यैः एव स्वदेशार्थं युद्धं कर्तव्यम्— तरुण मनुष्योंने ही अपने देशके लिये युद्ध करना चाहिये।

३ युवसु अविचारः मदः च भवति— तरुणोंमें अविचार और घमंड होती है।

४ युवभ्यः नरेभ्यः वसुं देहि— तरुण मनुष्योंके लिये धन दे।

संधि किये हुए वाक्य।

(१) युवा पुरुषो ब्रह्मचारी भवितुमर्हति। ब्रह्मचारी भवितुमर्हति युवा पुरुषः। (२) युवभिर्मनुष्यैरेव स्वदेशार्थं युद्धं कर्तव्यम्। युद्धं स्वदेशार्थं युवभिर्मनुष्यैरेव कर्तव्यम्। (३) युवस्वविचारो मदश्च भवति। भवति मदश्चाविचारश्च युवसु। अविचारो मदश्च युवसु भवति।

पाठ ९

इस पाठमें निम्नलिखित श्लोकोंका अध्ययन कीजिये—

न श्रेयः सततं तेजो न नित्यं श्रेयसी क्षमा ।
इति तात विजानीहि द्वयमेतदसंशयम् ॥ ५ ॥

(म० भारत वन० अ० ५८)

अन्वयः— तेजः सततं श्रेयः न, नित्यं क्षमा श्रेयसी न । हे तात ! इति एतत् द्वयं असंशयं विजानीहि ।

संस्कृत-टीका— तेजः तेजस्विता सततं नित्यं सदा श्रेयः न, कल्याणकारिणी न भवति । तथा च नित्यं सततं क्षमा अपि श्रेयसी श्रेयस्करी न भवति । हे तात ! हे प्रिय ! इति एवं प्रकारेण एतत् द्वयं असंशयं संशयरहितं विजानीहि जानीहि ।

अर्थ— स्वभावकी तेजी भी सदा कल्याणकारक नहीं होती और स्वभावका क्षमाभाव भी हमेशा लाभदायक नहीं होता । हे प्रिय ! यह दोनों बातें तुम संशय छोड़कर जान लो ।

यो नित्यं क्षमते तात बहून्दोषान्स विन्दति ।
भृत्याः परिभवन्त्येनमुदासीनास्तथाऽरयः ॥ ३ ॥

(म० भारत, वन० अ० २८)

अन्वयः— हे तात ! यः नित्यं क्षमते सः बहून् दोषान् विन्दति । एनं भृत्याः परिभवन्ति तथा अरयः उदासीनाः ।

संस्कृत-टीका— हे तात ! हे प्रिय ! यः पुरुषः नित्यं सदा एव क्षमते क्षमां करोति सः पुरुषः बहून् अनेकान् दोषान् अगुणान् विन्दति प्राप्नोति । के ते दोषाः ? एनं क्षमावन्तं पुरुषं तस्य एव भृत्याः दासाः परिचारकाः परिभवन्ति अपमानयन्ति । तथा च तस्य अरयः शत्रवः उदासीनाः भवन्ति । शत्रवः अपि तं न गणयन्ति इत्यर्थः ।

अर्थ— हे प्रिय ! जो नित्य क्षमा करता है उसको बहुत दोष प्राप्त होते हैं। नौकर भी उसका अपमान करते हैं और उसके शत्रु भी उदासीन हो जाते हैं। अर्थात् उसका कोई सन्मान नहीं करता।

सर्वभूतानि चाप्यस्य न नमन्ते कदाचन।
तस्मान्नित्यं क्षमा तात पण्डितैरपवादिता ॥ ८ ॥

अन्वयः— च अपि अस्य सर्वभूतानि कदाचन न नमन्ते। तस्मात् हे तात ! नित्यं क्षमा पण्डितैः अपवादिता।

संस्कृत-टीका— च अपि अस्य क्षमायुक्तस्य पुरुषस्य सर्वभूतानि सर्वाणि प्राणिजातानि, सर्वे मनुष्याः कदाचन कदापि न नमन्ते न नम्रीभवन्ति। हे तात ! हे प्रिय ! तस्मात् कारणात् नित्यं क्षमा पण्डितैः विबुधैः जनैः अपवादिता अपवादेन दोषेण युक्ता अस्ति इति ज्ञाता।

अर्थ— और इसके सामने सब लोग कदापि नम्र नहीं होते। इसलिये हे प्रिय ! नित्य क्षमा करना दोषयुक्त है, ऐसा पंडितोंका मत है।

अवज्ञाय हि तं भृत्याः भजन्ते बहुदोषताम्।
आदातुं चास्य वित्तानि प्रार्थयन्तेऽल्पचेतसः ॥ ९ ॥
(म० भारत, वन० अ० २८)

अन्वयः— हि तं भृत्याः अवज्ञाय बहुदोषतां भजन्ते। च अस्य वित्तानि आदातुं अल्पचेतसः प्रार्थयन्ते।

संस्कृत-टीका— हि तं क्षमाशीलं पुरुषं भृत्याः तस्य एव परिचारकाः अवज्ञाय तस्य अपमानं कृत्वा, बहुदोषतां बहून् दोषान् भजन्ते सेवन्ते। च अस्य क्षमाशीलस्य पुरुषस्य वित्तानि धनानि आदातुं स्वीकर्तुं अल्पचेतसः अल्पमतयः जनाः प्रार्थयन्ते इच्छन्ति।

अर्थ— क्योंकि नौकर उसका अपमान करके बहुत दोषोंसे युक्त होते हैं और इसके धनको मंदबुद्धि लोग छीनना चाहते हैं।

यानं वस्त्राण्यलंकाराञ्छयनान्यासनानि च ।
भोजनान्यथ पानानि सर्वोपकरणानि च ॥ १० ॥
आददीरन्नधिकृता यथाकाममचेतसः ।
प्रदिष्टानि च देयानि न दद्युर्भर्तृशासनात् ॥ ११ ॥

अन्वयः— यानं, वस्त्राणि, अलंकारान्, शयनानि, आसनानि च भोजनानि अथ पानानि सर्वोपकरणानि च अचेतसः अधिकृताः यथाकामं आददीरन् । भर्तृशासनात् प्रदिष्टानि देयानि च न दद्युः ॥

अर्थ— गाडी, वस्त्र, अलंकार, बिछोने, आसन, भोजन और पीनेके रस तथा सब साधन अल्पबुद्धिवाले अधिकारी अपनी इच्छाके अनुसार ले लेते हैं । स्वामीकी आज्ञासे जिसको आज्ञा हुई है वह देनेयोग्य पदार्थ भी नहीं देंगे (अर्थात् सदा क्षमा करनेवालेके व्यवहारमें ऐसी दुर्दशा होती है ।)

सूचना ।

पाठक इस पाठको अच्छी प्रकार तैयार करें और संभव हुआ तो इन श्लोकोंको कण्ठस्थ करें तथा स्वयं संस्कृत अर्थ लिखनेका यत्न करें ।

समास ।

१ असंशयं- संशयः न भवति तथा (संशयरहित)
२ सर्वभूतानि- सर्वाणि च तानि भूतानि (सब प्राणी)
३ अल्पचेतसः- अल्पं चेतः यस्य (जिसका चित्त छोटा है)
४ सर्वोपकरणानि- सर्वाणि च तानि उपकरणानि । (सब साधन)
५ यथाकामं- कामं अनतिक्रम्य यथा भवति तथा (इच्छाका अतिक्रमण करनेके विना, इच्छानुकूल)
६ भर्तृशासनं- भर्तुः शासनं (स्वामीकी आज्ञा)

पाठ १०

अब नकारान्त शब्दोंके रूप देखिये—

नकारान्तः पुल्लिंगो 'ज्ञानिन्' शब्दः।

(ज्ञानिन् = ज्ञानी)

१	ज्ञानी	ज्ञानिनौ	ज्ञानिनः
सं०	हे ज्ञानिन्	हे ज्ञानिनौ	हे ज्ञानिनः
२	ज्ञानिनम्	ज्ञानिनौ	ज्ञानिनः
३	ज्ञानिना	ज्ञानिभ्याम्	ज्ञानिभिः
४	ज्ञानिने	ज्ञानिभ्याम्	ज्ञानिभ्यः
५	ज्ञानिनः	ज्ञानिभ्याम्	ज्ञानिभ्यः
६	ज्ञानिनः	ज्ञानिनोः	ज्ञानिनाम्
७	ज्ञानिनि	ज्ञानिनोः	ज्ञानिषु

इसी रीतिसे निम्नलिखित शब्दोंके रूप बनते हैं—

शब्द।

ब्रह्मचारिन्	= ब्रह्मचारी	वाग्मिन्	= वक्ता
दन्तिन्	= हाथी	अतिचारिन्	= अत्याचारी
शशिन्	= चांद, चंद्रमा	शिखरिन्	= शिखरवाला
योगिन्	= योगी	दूरदर्शिन्	= दूरदर्शी
त्यागिन्	= त्यागी	गृहिन्	= गृहस्थी

संस्कृत-वाक्यानि।

१ ज्ञानिनं पुरुषं राज्ञः समीपं नय। २ ब्रह्मचारी विद्यां समाप्य गृही भवति। ३ दन्तिना विष्णुदत्तस्य पुत्रः हतः। ४ पूर्णिमायां शशिनः प्रकाशः वर्णनीयः भवति। ५ योगिनां अचिन्त्या शक्तिः भवति। ६ अस्मिन् संभाषणे तेन वाग्मिना किं प्रतिपादितम्? ७ दूरदर्शिना पुरुषेण प्रथमे वयसि ब्रह्मचर्यं अवश्यं पालनीयम्। ८ गृहिभिः पञ्चमहायज्ञाः अवश्यं करणीयाः।

भाषा--वाक्य ।

१ ज्ञानी पुरुषको राजाके पास ले जा । २ ब्रह्मचारी विद्या समाप्त कर गृहस्थी होता है । ३ हाथीने विष्णुदत्तका पुत्र मारा । ४ पूर्णिमामें चांदका प्रकाश वर्णन करनेयोग्य होता है । ५ योगियोंकी अचिन्त्य शक्ति होती है । ६ इस भाषणमें उस वक्ताने क्या प्रतिपादन किया ? ७ दूरदर्शी पुरुषने पहिली आयुमें ब्रह्मचर्यका पालन अवश्य करना चाहिये । ८ गृहस्थियोंने पञ्चमहायज्ञ अवश्य करने योग्य हैं ।

उक्त रीतिको छोडकर अन्य प्रकारसे निम्नलिखित नकारान्त शब्दके रूप होते हैं—

नकारान्तः पुंल्लिंगः ' पथिन् ' शब्दः ।

(पथिन् = मार्ग)

१	पन्थाः	पन्थानौ	पन्थानः
सं०	हे पन्थाः	हे पन्थानौ	हे पन्थानः
२	पन्थानम्	पन्था	पथः
३	पथा	पथिभ्याम्	पथिभिः
४	पथे	पथिभ्याम्	पथिभ्यः
५	पथः	पथिभ्याम्	पथिभ्यः
६	पथः	पथोः	पथाम्
७	पथि	पथोः	पथिषु

पूर्वोक्त नकारान्त शब्दके रूपोंसे जो भिन्नता इस शब्दके रूपोंमें है, वह पाठक देखें ।

इसी प्रकार निम्नलिखित शब्दोंके रूप होते हैं—

शब्द ।

मथिन्— मंथन करनेका दंड । ऋभुक्षिन्— इंद्र, मरुत् ।

वाक्य ।

१ मम ग्रामस्य कः पंथाः-- मेरे ग्रामका कौनसा मार्ग है ?

२ तं मंथानं अत्र आनय — उस मंथन-दण्डको यहां ला ।
३ ऋभुक्षा ऋभूणां राजा भवति— ऋभुक्षा ऋभुओंका राजा होता है ।
४ अनेन एव पथा तं नगरं गच्छ— इसी मार्गसे उस नगरको जा ।
५ दिव्यैः पथिभिः देवाः ऊर्ध्वं गच्छन्ति— दिव्य मार्गोंसे देव ऊपर जाते हैं ।

अब शकारान्त शब्दोंके रूपोंकी विधि बताते हैं—

शकारान्तः पुल्लिंगो 'विश्' शब्दः ।

(विश् = प्रजा)

१	विट्, विड्	विशौ	विशः
सं० हे	विट्, विड्	विशौ	विशः
२	विशम्	विशौ	विशः
३	विशा	विड्भ्याम्	विड्भिः
४	विशे	विड्भ्याम्	विड्भ्यः
५	विशः	विड्भ्याम्	विड्भ्यः
६	विशः	विशोः	विशाम्
७	विशि	विशोः	विट्त्सु, विट्सु

इस रीतिसे शकारान्त पुल्लिंग शब्दोंके रूप होते हैं । अब इनका वाक्योंमें उपयोग देखिये—

वाक्य ।

१ विड्भिः राजा नमस्कृतः सत्कारितः च— प्रजाओंने राजाको नमस्कार किया और उसका सत्कार किया ।
२ विशि राजा प्रतिष्ठितः— प्रजाओंमें राजा प्रतिष्ठित है ।
३ विशां राजानं पश्य— प्रजाओंके राजाको देख ।
४ विड्भ्यः धनं राजा गृह्णाति— प्रजाओंसे धन राजा लेता है ।

अब सकारान्त शब्दोंके रूप बनानेकी विधि बताई जाती है—

सकारान्तः पुल्लिंगो ' विद्वस् ' शब्दः ।

(विद्वस् = विद्वान्)

१	विद्वान्	विद्वांसौ	विद्वांसः
सं०	हे विद्वान्	हे विद्वांसौ	हे विद्वांसः
२	विद्वांसम्	विद्वांसौ	विदुषः
३	विदुषा	विद्वद्भ्याम्	विद्वद्भिः
४	विदुषे	विद्वद्भ्याम्	विद्वद्भ्यः
५	विदुषः	विद्वद्भ्याम्	विद्वद्भ्यः
६	विदुषः	विदुषोः	विदुषाम्
७	विदुषि	विदुषोः	विद्वत्सु

इसी प्रकार ' वस् ' प्रत्ययान्त सकारान्त शब्दोंके रूप होते हैं ।

वाक्य ।

१ तौ विद्वांसौ पुरुषौ कस्मात् देशात् आगतौ = वे दो विद्वान् पुरुष किस देशसे आगये ?

२ विदुषां सकाशात् एव विद्या प्राप्यते = विद्वानोंके पाससे ही विद्या प्राप्त की जाती है ।

३ विद्वद्भिः एव सर्वं जगत् याथातथ्येन ज्ञायते = विद्वानोंने ही सब जगत् यथायोग्य रीतिसे जाना जाता है ।

४ एतत्पुस्तकं तेन एव विदुषा रचितं = यह पुस्तक उसी ज्ञानीने रचा है ।

पाठ ११

नावमन्ये न गर्हे च धर्मं पार्थ कथंचन ।
ईश्वरं कुत एवाहमवमंस्ये प्रजापतिम् ॥ १ ॥

(म० भारत वन० अ० ३२)

अन्वयः— हे पार्थ ! अहं धर्मं न अवमन्ये च कथंचन गर्हे । कुतः प्रजापतिं ईश्वरं एव अहं अवमंस्ये ?

संस्कृत-टीका— हे पार्थ ! हे पृथानंदन ! अहं धर्मं न अवमन्ये धर्मस्य अपमानं न करोमि । न च कथंचन धर्मं गर्हे निंदयामि । कुतः कथं प्रजापतिं प्रजापालकं ईश्वरं च अहं अवमंस्ये ? अहं कथमपि तस्य अपमानं न करोमि ।

अर्थ— हे पृथापुत्र ! मैं धर्मका अपमान नहीं करती और न उसकी निंदा करती हूं । तो कैसे प्रजापालक ईश्वरकी निंदा करूंगी ?

आर्ताऽहं प्रलपामीदमिति मां विद्धि भारत ।
भूयश्च विलपिष्यामि सुमनास्त्वं निबोध मे ॥ २ ॥

(म० भारत, वन० अ० ३२)

अन्वयः— हे भारत ! अहं आर्ता प्रलपामि इति मां विद्धि । भूयः च विलपिष्यामि । त्वं सुमनाः मे निबोध ।

संस्कृत-टीका— हे भारत ! हे भारतकुलोत्पन्न ! अहं आर्ता दुःखिता अस्मि इति अतः एवं प्रलपामि वदामि इति मां त्वं विद्धि जानीहि । इतः अस्मादपि भूयः अधिकं विलपिष्यामि वदिष्यामि । त्वं सुमनाः शोभनमनोयुक्तः भूत्वा मे मम भाषणं निबोध जानीहि ।

अर्थ— हे भरतकुलोत्पन्न ! मैं दुःखी हूं अतएव ऐसा बोलती हूं यह तू समझ । और भी अधिक बोलूंगी । तू उत्तम मन लगाकर सुन ।

कर्म खल्विह कर्तव्यं जानताऽमित्रकर्शन ।
अकर्माणो हि जीवन्ति स्थावरा नेतरे जनाः ॥ ३ ॥

(म० भारत, वन० अ० ३२)

अन्वयः— हे अमित्रकर्शन ! जानता इह खलु कर्म कर्तव्यम् । अकर्माणः स्थावराः हि जीवन्ति इतरे जनाः न ।

संस्कृत-टीका— हे अमित्रकर्शन ! न मित्रः अमित्रः शत्रुः तस्य अमित्रस्य शत्रोः कर्शनः नाशकः अमित्रकर्शनः तस्य संबुद्धौ अमित्रकर्शन शत्रुनाशक वीर ! जानता प्राज्ञेन विदुषा बुद्धिमता पुरुषेण इह अस्मिन्

जगति खलु निश्चयेन कर्म पुरुषार्थः कर्तव्यः अवश्यं करणीयः एव । अकर्माणः कर्महीनाः पुरुषार्थहीनाः स्थावराः वृक्षादयः एव जीवन्ति इतरे जनाः वृक्षपाषाणादिभ्यः अन्ये जनाः पशवः पक्षिणः च न जीवन्ति । एते प्राणिनः कर्म कृत्वा एव जीवितुं समर्थाः भवन्ति ।

अर्थ— हे शत्रुनाशक वीर ! विद्वान् पुरुषने इस जगत्में निश्चयसे कर्म करना ही चाहिये । कर्म न करनेसे स्थावर ही- वृक्षादि पदार्थ- केवल जीवित रहते हैं । दूसरे नहीं ।

जङ्गमेषु विशेषेण मनुष्या भरतर्षभ ।
इच्छन्ति कर्मणा वृत्तिमवाप्तुं प्रेत्य चेह च ॥ २ ॥

(म० भारत, वन० अ० ३२)

अन्वयः— हे भरतर्षभ ! जङ्गमेषु विशेषेण मनुष्याः इह च प्रेत्य च कर्मणा वृत्तिं अवाप्तुं इच्छन्ति ।

संस्कृत-टीका— हे भरतर्षभ ! हे भरतश्रेष्ठ ! जंगमेषु गतिमत्सु भूतेषु विशेषेण विशेषतः मनुष्याः मानवाः इह अस्मिन् जगति प्रेत्य परलोके च कर्मणा पुरुषार्थेन एव वृत्तिं आजीविकां अवाप्तुं प्राप्तुं इच्छन्ति ।

अर्थ— हे भरतोंमें श्रेष्ठ ! जंगम अर्थात् चलने फिरनेवाले प्राणियों अर्थात् मनुष्योंमें यहां और मरनेके पश्चात् कर्मसे ही आजीविकाको प्राप्ति करनेकी इच्छा करते हैं ।

उत्थानमभिजानन्ति सर्वभूतानि भारत ।
प्रत्यक्षं फलमश्नन्ति कर्मणां लोकसाक्षिकम् ॥

(म० भारत, वन० अ० ३२)

अन्वयः— हे भारत ! सर्वभूतानि उत्थानं अभिजानन्ति । कर्मणां लोकसाक्षिकं प्रत्यक्षं फलं अश्नन्ति ।

संस्कृत-टीका— हे भारत ! हे भरतकुलोत्पन्न ! सर्वभूतानि सर्वाणि भूतानि सर्वे प्राणिनः उत्थानं अभ्युत्थानं जानन्ति । तथा च कर्मणां स्वकीयानां पुरुषार्थानां लोकसाक्षिकं जनसाक्षिकं प्रत्यक्षं साक्षात् फलं अश्नन्ति भक्षयन्ति ।

अर्थ— हे भारत ! सब प्राणी उठना जानते हैं (अर्थात् अपने उद्धारके लिये उठकर कार्य करना जानते हैं ।) क्योंकि कर्मोंका लोकोंकी साक्षीमें प्रत्यक्ष (फल वे प्राप्त करते हैं किंवा) फल खाते हैं ।

सूचना

पाठक इन श्लोकोंका अच्छी प्रकार अध्ययन करें । पद, अन्वय और अर्थ स्वयं करनेका प्रयत्न करें और सम्भव हुआ तो एक बार पढनेके पश्चात् संस्कृत-टीका स्वयं मनसे ही लिखनेका यत्न करें । ऐसा प्रयत्न करनेसे ही बड़ा लाभ हो सकता है ।

संधि किये हुए वाक्य।

हे पार्थ ! नाहं धर्ममवमन्ये न च कथंचन धर्मं गर्हे । कुतः प्रजापतिमीश्वरमेवाहमवमंस्ये ? हे भारत ! अहमार्तां प्रलपामीति मां विद्धि । भूयश्च विलपिष्यामि । त्वं सुमना मे निबोध । हे अमित्रकर्शन ! जानतेह खलु कर्म कर्तव्यम् । अकर्माणः स्थावराः हि जीवन्ति, नेतरे जनाः । हे भरतर्षभ ! जङ्गमेषु विशेषेण मनुष्या इह च प्रेत्य च कर्मणा वृत्तिमवाप्तुमिच्छन्ति ।

पाठ १२

अब सर्वसाधारण सकारान्त शब्दोंके रूप बनानेकी विधि बताते हैं ।

सकारान्तः पुल्लिंगः 'चन्द्रमस्' शब्दः ।

(चन्द्रमस् = चन्द्रमा)

१	चन्द्रमाः	चन्द्रमसौ	चन्द्रमसः
सं०	हे चन्द्रमः	हे चन्द्रमसौ	हे चन्द्रमसः
२	चन्द्रमसम्	चन्द्रमसौ	चन्द्रमसः
३	चन्द्रमसा	चन्द्रमोभ्याम्	चन्द्रमोभिः
४	चन्द्रमसे	चन्द्रमोभ्याम्	चन्द्रमोभ्यः
५	चन्द्रमसः	चन्द्रमोभ्याम्	चन्द्रमोभ्यः
६	चन्द्रमसः	चन्द्रमसोः	चन्द्रमसाम्
७	चन्द्रमसि	चन्द्रमसोः	चन्द्रमस्सु

साधारण रीतिसे इस शब्दके समान सकारान्त शब्दोंके रूप होते हैं। इसी प्रकार निम्नलिखित शब्दोंके रूप बनते हैं—

वेधस्	= विश्व बनानेवाला	उशनस्	= शुक्र
सुमनस्	= उत्तम मनवाला	सुतपस्	= उत्तम तपवाला
जातवेदस्	= अग्नि	वयोधस्	= तरुण मनुष्य
प्रचेतस्	= ज्ञानी, वरुण	पुरोधस्	= पुरोहित
कृत्तिवासस्	= महादेव	पुरूरवस्	= राजा पुरूरवा
अंगिरस्	= अंगिरा ऋषि	नृचक्षस्	= मनुष्योंका नेता
विश्ववेदस्	= सब धनसे युक्त, सब ज्ञानसे युक्त	अनेहस्	= पापरहित

वाक्य।

१ आकाशे प्रकाशमानं चन्द्रमसं बालकः पश्यति = आकाशमें प्रकाशमान चांदको बालक देखता है।

२ रात्रौ सर्वं जगत् चन्द्रमसा एव प्रकाशितम् = रात्रिके समय सब जगत् चांदसे ही प्रकाशित होता है।

३ जातवेदसा काष्ठानि दग्धानि = अग्निने लकडियां जला दीं।

४ अंगिरसा ऋषिणा एतत्स्तोत्रं निर्मितम् = अंगिरा ऋषिने यह स्तोत्र बनाया।

५ उशनाः राक्षसानां पुरोहितः = शुक्र राक्षसोंका पुरोहित।

६ पुरूरवा स्वर्गं गतः = पुरूरवा स्वर्गको गया।

पूर्वोक्त शब्दकी अपेक्षा निम्नलिखित शब्दके रूपोंमें थोडीसी विशेषता है, देखिये—

सकारान्तः पुल्लिंगः 'पुंस्' शब्दः।

(पुंस् = पुरुष)

१	पुमान्	पुमांसौ	पुमांसः
सं०	हे पुमान्	हे पुमांसौ	हे पुमांसः
२	पुमांसम्	पुमांसौ	पुंसः
३	पुंसा	पुंभ्याम्	पुंभिः

४	पुंसे	पुंभ्याम्	पुंभ्यः
५	पुंसः	पुंभ्याम्	पुंभ्यः
६	पुंसः	पुंसोः	पुंसाम्
७	पुंसि	पुंसोः	पुंसु

१ यत्र पुमान् भवति तत्र स्त्री अपि भवति— जहां पुरुष होता है, वहां स्त्री भी होती है।

२ पुंसा यत् कर्तुं शक्यते तत् त्वं कुरु— पुरुषने जो करना होता है वह तू कर।

३ पुंसु पौरुषं भवतु— पुरुषोंमें पौरुष रहे।

४ नगरेषु पुंसां निवासः भवति- नगरोंमें पुरुषोंका निवास होता है।

अब हकारान्त शब्दोंके रूप बताते हैं—

हकारान्तः पुल्लिंगः 'अनडुह्' शब्दः।

(अनड्वान् = बैल)

१	अनड्वान्	अनड्वाहौ	अनड्वाहः
सं०	हे अनड्वन्	हे अनड्वाहौ	हे अनड्वाहः
२	अनड्वाहम्	अनड्वाहौ	अनडुहः
३	अनडुहा	अनडुद्भ्याम्	अनडुद्भिः
४	अनडुहे	अनडुद्भ्याम्	अनडुद्भ्यः
५	अनडुहः	अनडुद्भ्याम्	अनडुद्भ्यः
६	अनडुहः	अनडुहोः	अनडुहाम्
७	अनडुहि	अनडुहोः	अनडुत्सु

वाक्य।

१ अनड्वान् यवसं भक्षयति = बैल जौ खाता है।

२ अनडुहा जलं किं न पीतं ? = बैलने जल क्यों नहीं पिया ?

३ तत्र अनडुद्भिः क्षेत्रस्य विनाशः कृतः = वहां बैलोंने खेतका विनाश किया।

४ अनडुहां चर्मणा चर्मकारैः पादत्राणं क्रियते = बैलोंके चमड़ेसे चमारों द्वारा जूता किया जाता है।

पाठ १३

पूर्व पाठोंमें दिये श्लोकोंका सरल संस्कृत संधिपूर्वक इस पाठमें दिया जाता है। अब इसका अध्ययन पाठक करें—

संस्कृत-वाचन-पाठः।

सततं तेजो न श्रेयः, नित्यं क्षमाऽपि न श्रेयसी, हे तात! इत्येतद् द्वयमसंशयं विजानीहि।

हे तात! यो नित्यं क्षमते स बहून्दोषान् विन्दति! एनं भृत्याः परिभवन्ति तथाऽस्य उदासीना भवन्ति।

अपि चास्य सर्वभूतानि कदाचन न नमन्ते। तस्माद्धे तात! नित्यं क्षमा पण्डितैरपवादिता।

ते हि भृत्या अवज्ञाय बहुदोषतां भजन्ते। अस्य च वित्तान्यादातुमल्पचेतसः प्रार्थयन्ते।

यानं वस्त्राण्यलंकाराञ्छयनान्यासनानि च भोजनान्यथ पानानि सर्वोपकरणानि चाचेतसोऽधिकृता यथाकाममाददीरन्। भर्तृशासनात् प्रविष्टानि देयानि च न दद्युः।

हे पार्थ! धर्मं नावमन्ये, न च कथंचन गर्हे। कुतः जापतिमीश्वरमेवाहमवमंस्ये?

हे भारत! अहमार्ता प्रलपामीति मां विद्धि। भूयश्च विलपिष्यामि। त्वं सुमना मे निबोध।

हे अमित्रकर्शन! जानतेह खलु कर्म कर्तव्यम्। अकर्माणः स्थावरा हि जीवन्ति, नेतरे जनाः।

हे भरतर्षभ! जङ्गमेषु विशेषेण मनुष्या इह च प्रेत्य च कर्मणा वृत्तिमवाप्तुमिच्छन्ति।

हे भारत! सर्वभूतान्युत्थानमभिजानन्ति। कर्मणां लोकसाक्षिकं प्रत्यक्षं फलमश्नन्ति।

सूचना।

पाठक इन वाक्योंको बार बार पढें और उनका अर्थ जाननेका यत्न

करें। यदि प्रयत्न करनेपर भी किसी वाक्यका अर्थ न समझा तो पूर्व पाठोंमें उस वाक्यका अर्थ देखें और समझें। वहां इन वाक्योंके पूर्ण अर्थ दिये हैं। अब इस पाठमें इन वाक्योंके समास दिये जाते हैं, उनका अच्छी प्रकार अभ्यास करें—

समासाः।

१ असंशयं— न विद्यते संशयः यत्र तद् असंशयं (संशयरहित)
२ सर्वभूतानि— सर्वाणि च तानि भूतानि। (सब भूत)
३ बहुदोषता— बहवः दोषाः बहुदोषाः। बहुदोषाणां भावः बहुदोषता। (बहुत दोष होना)
४ अल्पचेताः— अल्पं चेतः यस्य सः अल्पचेताः (छोटे दिलवाला)
५ सर्वोपकरणानि— सर्वाणि च तानि उपकरणानि सर्वोपकरणानि। (सब साधन)
६ अचेतसः— न अस्ति चेतः अस्य सः अचेताः। (बुद्धिहीन)
७ यथाकामं— कामं अनतिक्रम्य इति यथाकामं। (इच्छानुकूल)
८ भर्तृशासनं— भर्तुः शासनं भर्तृशासनं। (स्वामीकी आज्ञा)
९ प्रजापतिः— प्रजायाः पतिः। (प्रजाका पालक)
१० ईश्वरः— ईशेषु वरः। (ईशोंमें श्रेष्ठ)
११ सुमनाः— सुष्ठु मनः यस्य सः। (उत्तम है मन जिसका)
१२ अमित्रकर्शनः— न मित्रः अमित्रः अमित्राणां कर्शनः। (शत्रुओंका नाशक)
१३ भरतर्षभः— भरतेषु ऋषभः (भरतोंमें श्रेष्ठ)

सूचना।

पाठक इन समासोंका उत्तम अभ्यास करें। यह अभ्यास अत्यावश्यक है, इसीलिये दिया जाता है। किस सामासिक पदका किस ढंगसे विवरण किया जाता है, यह ध्यानपूर्वक देखकर उसको ठीक स्मरण रखें।

संस्कृतमें स्थानस्थानपर सामासिक पद आते हैं, इस कारण इस अभ्यासकी अत्यंत आवश्यकता है। इस अभ्याससे पाठक यह जान सकेंगे कि समासोंका अर्थ किस प्रकार होता है और उसको खोलना कैसा चाहिये।

अब वाक्योंमेंसे शब्द आगे पीछे करते हुए संधि कैसे बनते हैं ये देखिये पाठक इन संधिका अभ्यास ध्यानपूर्वक करें—

तौ विद्वांसौ पुरुषौ कस्माद्देशादागतौ ? तौ विद्वांसौ पुरुषावागतौ कस्माद्देशात् ? कस्माद्देशादागतौ तौ विद्वांसौ पुरुषौ ? विद्वांसौ तौ पुरुषावागतौ कस्माद्देशात् ?

जानतेह खलु कर्म कर्तव्यम् । इह खलु जानता कर्म कर्तव्यम् । इह जानता खलु कर्तव्यं कर्म । कर्तव्यमिह खलु जानता कर्म । कर्मेह खलु जानता कर्तव्यम् ।

सर्वभूतान्युत्थानमभिजानन्ति । उत्थानमभिजानन्ति सर्वभूतानि । अभिजानन्ति सर्वभूतान्युत्थानम् ।

यो नित्यं क्षमते स बहून् दोषान् विन्दति । स बहून्दोषान् विन्दति यो नित्यं क्षमते । क्षमते यो नित्यं स विन्दति बहून्दोषान् । बहून्दोषान्विन्दति स यो नित्यं क्षमते ।

अहं धर्मं नाऽवमन्ये । नाऽवमन्येऽहं धर्मं । धर्ममहं नाऽवमन्ये ।

पाठ १४

रामायणम् ।

तस्मात् न त्वं एव शोचितुं अर्हसि । वयस्यभावेन ते हितं ब्रवीमि, न उपदिशामि । स राघवः एवं मधुरं सान्त्वितः सुग्रीवेण, अश्रुपरिक्लिन्नं मुखं वस्त्रान्तेन प्रमार्जयत् । तदा सुग्रीववचनात् प्रकृतिस्थः काकुत्स्थः सुग्रीवं संपरिष्वज्य इदं अब्रवीत् । हे सुग्रीव ! स्निग्धेन हितेन वयस्येन यत् कर्तव्यं तत् अनुरूपं युक्तं च त्वया कृतम् । एषः अहं च त्वया प्रकृतिस्थः नीतः । किन्तु मैथिल्याः परिमार्गणे त्वया यत्नः कार्यः । मया च त्वत्प्रियार्थं यत् कर्तव्यं तत् विस्रब्धेन उच्यताम् । ततः प्रहृष्टः सुग्रीवः शुभया गिरया उवाच । अहं भ्रात्रा विनिकृतः हृतभार्यः ऋष्यमूकं चरामि । ततः अनाथस्य

मम अपि त्वं प्रसादं कर्तुं अर्हसि । ततः काकुत्स्थः प्रहसमानः 'अद्य एव तव भार्यापहारिणं आत्मशरैः वधिष्यामि ' इति सुग्रीवं सान्त्वयन् प्राह ।

भाषा--वाक्य ।

अतः तुझे इस प्रकार शोक नहीं करना चाहिये । मित्रताके भावसे तेरे हितकी बात करता हूं । उपदेश नहीं दे रहा । इस प्रकार सुग्रीवसे मिठासपूर्वक सान्त्वन दिये हुए उस राघवने आंसुओंसे भीगे हुए मुखको वस्त्रके किनारेसे पोंछा । तब सुग्रीवके वचनसे अपने स्वभावको प्राप्त हुआ हुआ राम सुग्रीवको आलिङ्गन करके यह बोला । हे सुग्रीव ! प्रिय हितकारी मित्रको जो करना चाहिये उसके लायक तूने किया । यह मैं तेरे द्वारा अपनी प्रकृति अर्थात् स्वभावको–वास्तविक स्थितिको–लाया गया हूं । परन्तु सीताकी खोजमें तुझे प्रयत्न करना चाहिये । और मुझे जो तेरा प्रिय करना चाहिए, वह तू विना संकोचसे कह । तब प्रसन्न हुआ हुआ सुग्रीव शुभ वाणीसे बोला– 'मैं भाईसे निकाला हुआ, जिसकी स्त्री हरण कर ली गई है ऐसा ऋष्यमूकपर विचर रहा हूं । इसलिए अनाथ मुझपर तू कृपा करनेयोग्य है । ' तब राम हंसता हुआ ' आज ही तेरी स्त्रीके हरनेवालेको अपने बाणोंसे मार डालूंगा ' इस प्रकार सुग्रीवको सान्त्वना देता हुआ बोला ।

संधि किये हुए वाक्य ।

१ गृहिभिः पञ्चमहायज्ञा अवश्यं करणीयाः । गृहिभिरवश्यं करणीयाः पञ्चमहायज्ञाः । पञ्चमहायज्ञा गृहिभिरवश्यं करणीयाः । २ पूर्णिमायां शशिनः प्रकाशो वर्णनीयो भवति । शशिनः प्रकाशो वर्णनीयो भवति पूर्णिमायाम् । भवति पूर्णिमायां वर्णनीयः प्रकाशः शशिनः ।

शूर्पणखायाः पञ्चवट्यां आगमनम् ।

ततः पञ्चवटीं गत्वा रामः दीप्ततेजसं भ्रातरं उवाच । अयं देशः समः पुष्पितैः तरुभिः वृतः । इह रम्यं आश्रमपदं कर्तुं अर्हसि । इयं गोदावरी पुष्पितैः तरुभिः वृता रम्या हंसकारण्डवाकीर्णा

चक्रवाकोपशोभिता नातिदूरे दृश्यते । मयूरनादिताः रम्याः प्रांशवः बहुकन्दराः सौम्याः फुल्लैः तरुभिः आवृताः गिरयः अदूरे दृश्यन्ते । एवं रामेण उक्तः सुमहाबलः लक्ष्मणः अचिरेण भ्रातुः आश्रमं चकार । तस्मिन् बहुफले देशे स धर्मात्मा सुखी सीतया लक्ष्मणेन च सह कंचित् कालं न्यवसत् । अथ एकदा दशग्रीवस्य रक्षसः भगिनी शूर्पणखा नाम तं देशं आसाद्य, महाबाहुं, पद्मपत्रायतेक्षणं, गजविक्रान्तगमनं, जटामण्डलधारिणं, सुकुमारं, महासत्त्वं, इन्दीवरश्यामं, इन्द्रोपमं रामं दृष्ट्वा काममोहिता बभूव। तां तु शूर्पणखां रामः अवगतान्तर्भावः स्मितपूर्वं श्लक्ष्णया वाचा इदं अब्रवीत्—

शूर्पणखाका पञ्चवटीमें आना ।

तब पञ्चवटीको आकर राम तेजस्वी भाईसे बोला । यह भूमि ऊंची नीची न होकर एकसी खिले हुए पुष्पोंवाले वृक्षोंसे युक्त है । यहां सुन्दर आश्रमस्थान बनाना चाहिए । यह गोदावरी नदी खिले हुए फूलोंवाले वृक्षोंसे युक्त, सुन्दर, हंसकारण्डव पक्षियोंसे व्याप्त, चक्रवाकसे शोभित, पासहीमें दिखाई देती है । मयूर जिनमें बोल रहे हैं, जो रम्य हैं, ऐसे ऊंचे ऊंचे तथा जिनमें बहुतसी गुफायें हैं, तथा जो सुन्दर हैं, जो खिले हुए फूलोंसे युक्त वृक्षोंसे ढके हुए हैं, ऐसे पहाड पासहीमें दिखाई देते हैं । इस प्रकार रामद्वारा कहे गये बहुत बलवाले लक्ष्मणने शीघ्र ही भाईका आश्रम बना दिया । उस बहुत फलवाले देशमें धर्मात्मा, सुखी, सीता और लक्ष्मणके साथ कुछ समयतक रहा । इसके बाद एक दिन राक्षस दशग्रीवकी शूर्पणखा नामवाली बहिन उस देशको प्राप्त होकर, लम्बी लम्बी भुजाओंवाले, कमलके पत्तेके समान बडी बडी आंखोंवाले, हाथीकी चालके समान गतिवाले, जटासमूहको धारण किए हुए, छोटी कमरवाले, बहुत पराक्रमवाले, नील कमलके सदृश श्याम, इन्द्रकी उपमाके योग्य रामको देखकर काममोहित हो गई । जिसने अन्दरका भाव जान लिया है ऐसा राम उस शूर्पणखाको मुस्कराकर चिकनी वाणीसे यह बोला—

पाठ १५

रामायणम् ।

'कृतदारः अस्मि । इयं दयिता मम भार्या भवति । अतः हे विशालाक्षि ! एनं भ्रातरं भर्तारं भज ।' इति रामेण सा काममोहिता राक्षसी प्रोक्ता रामं विसृज्य सहसा लक्ष्मणं अब्रवीत् । 'ते अस्य रूपस्य अहं वरवर्णिनी भार्या युक्ता । मया सह सुखं सर्वान् दण्डकान् विचरिष्यसि ।' वाक्यकोविदः सौमित्रिः ततः शूर्पणखां स्मित्वा युक्तं उवाच- 'कथं मे दासस्य त्वं दासी भार्या भवितुं इच्छसि ?' इति । सा लक्ष्मणेन उक्ता परिहासविचक्षणा तद्वचः सत्यं मेने । पर्णशालायां उपविष्टं रामं च गत्वा उवाच— 'इमां विरूपां असतीं करालां भार्यां वहन् न मां त्वं बहुमन्यसे, तस्मात् अद्य इमां मानुषीं तव पश्यतः एव भक्षयिष्यामि । ततः निःसपत्ना त्वया सह यथासुखं विचरिष्यामि ।' इत्युक्त्वा सुसंक्रुद्धा सा अभ्यधावत् । तां मृत्युपाशप्रतिमां आपतन्तीं महाबलः रामः निगृह्य कुपितः लक्ष्मणं अब्रवीत् । 'सौमित्रे ! क्रूरैः अनार्यैः कथंचन अपि परिहासः न कार्यः । पुरुषव्याघ्र ! इमां राक्षसीं विरूपयितुं अर्हसि ।' इत्युक्तः लक्ष्मणः क्रुद्धस्य रामस्य पश्यतः खड्गं उद्धृत्य तस्याः कर्णनासे चिच्छेद । निकृत्तकर्णनासा घोरा सा विस्वरं विनद्य यथागतं प्रदुद्राव ।

भाषा-वाक्य ।

'मैंने स्त्री की हुई है । यह प्यारी मेरी स्त्री है । अतः हे विशाल आखोंवाली ! इस भाईको भर्ता प्राप्त कर ।' इस प्रकार वह काममोहित राक्षसी रामद्वारा कही गई उसे छोडकर एकदम लक्ष्मणसे बोली- 'तेरे इस रूपके लायक मैं सुन्दर वर्णवाली भार्या होनेयोग्य हूं । मेरे साथ तू सुखपूर्वक सारे दण्डकारण्यमें विचरण कर सकेगा ।' वाणी बोलनेमें पंडित सुमित्राका पुत्र तब हंसकर शूर्पणखाको उचित बोला- 'क्यों मुझ दासकी

स्त्री बनकर दासी बनना चाहती है ?' इस प्रकार वह हंसीको न समझने-वाली लक्ष्मणसे कही गई, उसके वचनको सत्य मानने लगी। और पर्ण-शालामें बैठे हुए रामके पास आकर बोली- 'कुरूप, जो सती नहीं है, भयंकर है, ऐसी इस भार्याके होते हुए तू मेरा आदर नहीं करता, इसलिये इस मानुषीको आज तेरे देखते देखते ही खा जाऊंगी। तब सपत्नीसे रहित हुई हुई तेरे साथ सुखपूर्वक विचरण करूंगी। ' यह कहकर बहुत क्रोधमें आई हुई वह दौडी। उस मृत्युके जालके सदृश आ पडती हुईको अति बलवान् रामने पकडकर क्रोधमें आकर लक्ष्मणसे कहा- 'हे सौमित्रे ! क्रूर अनार्योंसे किसी प्रकारसे भी हंसी नहीं करनी चाहिये। हे पुरुषव्याघ्र! इस राक्षसीको विरूप कर दे। ' इस प्रकार कहे गये लक्ष्मणने क्रोधित रामके देखते हुए तलवार उठाकर उसके नाक कान, काट डाले। नाक कान, जिसके कट गए हैं ऐसी भयानक वह बुरी तरह चिल्लाती हुई जहांसे आई थी वहां दौड गई।

समासाः।

१ दीप्ततेजाः— दीप्तं तेजः यस्य सः। (अति तेजस्वी)

२ हंसकारण्डवाकीर्णा— हंसाश्च कारंडवाश्च हंसकारंडवाः। हंस-कारंडवैः अवकीर्णा (हंस-कारंडवसे व्याप्त)

३ चक्रवाकोपशोभिता— चक्रवाकैः उपशोभिता (चक्रवाक पक्षियोंसे सुशोभित)

४ मयूरनादिताः— मयूरैः नादिताः (मोरोंके शब्दोंसे युक्त)

५ बहुफले— बहूनि फलानि यस्मिन् (बहुत फलवाले)

६ दशग्रीवः— दश ग्रीवा यस्य सः (दश मुखवाला)

७ महाबाहुं— महान्तौ बाहू यस्य (लम्बी भुजाओंवाला)

८ पद्मपत्रायतेक्षणं— पद्मपत्रमिव आयते अक्षिणी यस्य (कमलके पत्तेके समान बडी आंखोंवाला)

संस्कृत-पाठ-माला

(चोवीस भाग)

[संस्कृत-भाषाका अध्ययन करनेका सुगम उपाय]

संस्कृत-पाठ-मालाके अध्ययनसे लाभ—

१- अपना काम-धन्धा करते हुए फुरसदके समय आप किसी दूसरेकी सहायताके विना इन पुस्तकोंको पढकर अपना संस्कृतका ज्ञान बढा सकते हैं।

२- प्रतिदिन एक घंटा पढनेसे एक वर्षके अन्दर आप रामायण-महाभारत समझनेकी योग्यता प्राप्त कर सकते हैं।

३- पाठशालामें जानेवाले विद्यार्थी भी इन पुस्तकोंसे बडा लाभ प्राप्त कर सकते हैं।

इस पद्धतिकी विशेषता यह है—

भाग १-३	इनमें संस्कृतके साथ साधारण परिचय करा दिया गया है।
भाग ४	इसमें संधिविचार बताया है।
भाग ५-६	इनमें संस्कृतके साथ विशेष परिचय कराया है।
भाग ७-१०	इनमें पुल्लिंग, स्त्रीलिंग और नपुसकलिंगी नामोंके रूप बनानेकी विधि बताई है।
भाग ११	इसमें " सर्वनाम " के रूप बताये हैं।
भाग १२	इसमें समासोंका विचार किया है।
भाग १३-१८	इनमें क्रियापद-विचारकी पाठविधि बताई है।
भाग १९-२४	इनमें वेदके साथ परिचय कराया है।

प्रत्येक पुस्तकका	मूल्य ॥)	और डा. व्य. ≈)
२४ पुस्तकोंका	मूल्य १२)	और डा. व्य. १।)

मंत्री— स्वाध्याय मण्डल,

पोस्ट- ' स्वाध्याय मण्डल (पारडी)', पारडी [जि. सूरत]

मुद्रक और प्रकाशक- व. श्री. सातवळेकर, भारत मुद्रणालय, पारडी (जि. सूरत)

१०

ॐ

संस्कृत-पाठ-माला ।

[संस्कृत भाषाका अध्ययन करनेका सुगम उपाय]

दशम भाग ।

लेखक

पं. श्रीपाद दामोदर सातवलेकर

अध्यक्ष- स्वाध्याय-मण्डल, साहित्य-वाचस्पति, गीतालंकार

स्वाध्याय मंडल, पारडी (जि. सूरत)

मूल्य ५० नये पैसे

अंक १०

संस्कृत-पाठ-माला

[संस्कृत-भाषाका अध्ययन करनेका सुगम उपाय]

दशम भाग ।

लेखक

पं. श्रीपाद दामोदर सातवलेकर

अध्यक्ष- स्वाध्याय-मण्डल, साहित्य-वाचस्पति, गीतालंकार

नवम आवृत्ति

संवत् २०१५, शक १८८०, सन १९५९

मूल्य ५० नये पैसे

स्त्रीलिंगी शब्दोंके रूप ।

इस पुस्तकमें स्त्रीलिंगी शब्दोंके रूप बनानेकी विधि बताई है ।

शब्दोंके रूप कंठ करनेकी बहुतसी आवश्यकता नहीं है; परंतु विविध रूपोंकी तुलना करके उनमें जो विशेषता है, उसका स्मरण करनेकी आवश्यकता है ।

यह कार्य रूपोंको बारबार देखनेसे भी हो सकता है । पाठक यदि इस पुस्तकका अध्ययन उत्तम रीतिसे करेंगे तो उनको स्त्रीलिंगी शब्दोंके रूप बनाना अत्यंत सुगम होगा ।

लेखक
श्रीपाद दामोदर सातवलेकर

प्रकाशक और मुद्रक :
व. श्री. सातवलेकर, बी. ए.
भारत-मुद्रणालय, स्वाध्याय-मंडल,
पोस्ट- ' स्वाध्याय-मंडल (पारडी) ' पारडी [जि० सूरत]

ॐ

संस्कृत-पाठ-माला।

दशम भाग

पाठ १

अब इस पुस्तकमें स्त्रीलिंगी नामोंके रूप दिये जाते हैं—

आकारान्तः स्त्रीलिंगो 'रमा' शब्दः।

१	रमा	रमे	रमाः
सं०	हे रमे	हे रमे	हे रमाः
२	रमाम्	रमे	रमाः
३	रमया	रमाभ्याम्	रमाभिः
४	रमायै	रमाभ्याम्	रमाभ्यः
५	रमायाः	रमाभ्याम्	रमाभ्यः
६	रमायाः	रमयोः	रमाणाम्
७	रमायाम्	रमयोः	रमासु

इसी रीतिसे निम्नलिखित शब्दोंके रूप बनते हैं—

*

शब्द ।

विद्या	= विद्या	लता	= बेल
देवता	= देवी	अबला	= स्त्री, बलहीन
वनिता	= स्त्री	चपला	= चंचल, बिजली
कान्ता	= पत्नी	महिला	= स्त्री
तारा	= तारका	प्रपा	= प्याऊ
ज्योत्स्ना	= चांदनी	याञ्चा	= याचना
पाठशाला	= पाठशाला	शाला	= घर

वाक्यानि ।

१ विद्यया मनुष्याः शोभन्ते— विद्यासे मनुष्य शोभते हैं ।

२ लताभिः वृक्षः आच्छादितः— बेलियोंसे वृक्ष आच्छादित हुआ है ।

३ महिलाभिः विद्याध्ययनं अवश्यं कर्तव्यम्— स्त्रियोंको विद्याका अध्ययन अवश्य करना चाहिये ।

४ तां प्रपां गत्वा यथेच्छं जलं पिब— उस प्याऊमें जाकर इच्छाके अनुसार जल पीओ ।

५ महिला विद्यया शोभते — स्त्री विद्यासे शोभती है ।

६ याञ्चया मनुष्यः पतति— याचनासे मनुष्य गिरता है ।

७ कथं आकाशे ताराः सन्ति— कैसे आकाशमें ताराएं होती हैं ।

८ तासु लतासु व्याघ्रः वसति— इन लताओंमें बाघ है ।

९ रात्रौ ज्योत्स्ना भवति तथा दिने सूर्यप्रकाशः भवति— जिस प्रकार रातमें चांदनी रहती है इस प्रकार दिनमें सूर्य प्रकाशता है ।

१० यौवने कान्ता प्रिया भवति— युवावस्थामें स्त्री प्रिय होती है ।

आकारान्तः स्त्रीलिंगो 'नासिका' शब्दः ।

१	नासिका	नासिके	नासिकाः
सं०	हे नासिके	हे नासिके	हे नासिकाः
२	नासिकाम्	नासिके	नासिकाः, नसः

३	नासिकया,	नासिकाभ्यां,	नासिकाभिः
	नसा	नोभ्यां	नोभिः
४	नासिकायै,	नासिकाभ्यां,	नासिकाभ्यः
	नसे	नोभ्यां	नोभ्यः
५	नासिकायाः,	नासिकाभ्यां,	नासिकाभ्यः
	नसः	नोभ्यां	नोभ्यः
६	नासिकायाः,	नासिकयोः,	नासिकानाम्
	नसः	नसोः	नसाम्
७	नासिकायां,	नासिकयोः,	नासिकासु
	नसि	नसोः	नस्सु

वास्तविक ' रमा ' शब्दके समान ही यह नासिका शब्द आकारान्त है। परंतु इसके रूप द्वितीयाके बहुवचनके बाद जैसे होते हैं वे ऊपर दिये हैं। इन रूपोंमें एक ' रमा ' शब्दके समान है और दूसरा भिन्न है। पाठक इसका अवश्य ध्यान रखें।

वाक्यानि।

१ नासिकया प्राणः संचरति— नासिकासे प्राण संचारता है।
२ चोरेण तस्य नासिका कृत्ता— चोरने उसकी नासिका काटी।
३ तस्य नसि व्रणः संजातः— उसके नाकमें व्रण हुआ है।
४ वनिताभिः नासिकासु आभूषणानि धार्यन्ते— स्त्रियोंने नाकोंमें भूषण धारण किये जाते हैं।

आकारान्तः स्त्रीलिंगो ' निशा ' शब्दः।

१	निशा	निशे	निशाः
सं०	हे निशे	हे निशे	हे निशाः
२	निशाम्	निशे	निशाः, निशः
३	निशया,	निशाभ्यां,	निशाभिः,
	निशा	निड्भ्यां	निड्भिः

४	निशायै,	निशाभ्यां,	निशाभ्यः,
	निशे	निड्भ्यां	निड्भ्यः
५	निशायाः,	निशाभ्यां,	निशाभ्यः
	निशः	निड्भ्यां	निड्भ्यः
६	निशायाः,	निशयोः,	निशानाम्,
	निशः	निशोः	निशाम्
७	निशायाम्,	निशयोः	निशासु,
	निशि	निशोः	निट्सु

'निशा' शब्द भी 'रमा' शब्दके समान ही है। परंतु पूर्ववत द्वितीयाके बहुवचनके बाद इसके प्रत्येकमें दो दो रूप होते हैं। एक 'रमा' शब्दके समान रूप है और दूसरा भिन्न है। पाठक इसके विशेष रूपोंका निरीक्षण करें।

वाक्यानि।

१ निशि चंद्रमाः प्रकाशते— रात्रीमें चांद प्रकाशता है।
२ कृष्णपक्षस्य निशासु चोराणां भयं भवति— कृष्णपक्षकी रात्रियोंमें चोरोंका भय होता है।
३ द्वाभ्यां निशाभ्यां त्वं तत्र गमिष्यसि— दो रात्रियोंसे तू वहां जायेगा।
४ चंद्रमाः निशायाः पति— चांद रात्रीका पति है।

आकारान्तः स्त्रीलिंगो 'जरा' शब्दः।

१	जरा	जरसौ, जरे	जरसः, जराः
सं०	हे जरे	हे जरसौ, जरे	हे जरसः, जराः
२	जरसम्, जराम्	जरसौ, जरे	जरसः, जराः
३	जरसा, जरया	जराभ्याम्	जराभिः
४	जरसे, जरायै	जराभ्याम्	जराभ्यः

५	जरसः, जरायाः	जराभ्याम्	जराभ्यः
६	जरसः, जरायाः	जरसोः, जरयोः	जरसां, जराणाम्
७	जरसि, जरायाम्	जरसोः, जरयोः	जरासु

यद्यपि 'जरा' शब्द 'रमा' के समान ही आकारान्त है, तथापि इसके कई रूप 'रमा' शब्दके रूपोंके समान होते हैं और कई भिन्न होते हैं। पाठक इन रूपोंको इस पाठमें देखें और इसकी विशेषताका स्मरण रखें।

वाक्यानि।

१ जरसः पुरा मा मृथाः— वृद्धावस्थाके पूर्व न मर।

२ हे मनुष्य! त्वं जरसे यत— हे मनुष्य! तू वृद्धावस्थाके लिये यत्न कर।

३ देवाः जरया रहिताः भवन्ति— देव जरासे रहित होते हैं।

सूचना

पाठकोंको स्मरण रहे, कि इन शब्दोंके कंठ करनेकी कोई आवश्यकता नहीं है। परंतु इन रूपोंकी विशेषताको ध्यानमें धरना चाहिये। किसी किसी स्थानपर ये रूप आते हैं तो इनको अच्छी प्रकार पहचानना चाहिये।

पाठ २

इस पाठमें निम्नलिखित श्लोकोंका अभ्यास कीजिये—

वैशम्पायन उवाच—

ततः संप्रस्थितो राजा कौन्तेयो भूरिदक्षिणः।
अगस्त्याश्रममासाद्य दुर्जयायामुवास ह ॥ १ ॥

अन्वयः— वैशम्पायनः उवाच- ततः भूरिदक्षिणः कौन्तेयः राजा संप्रस्थितः अगस्त्याश्रमं आसाद्य दुर्जयायां उवास ह।

संस्कृत-टीका– ततः तस्मात् स्थानात् भूरिदक्षिणः बहुदक्षिणः कौन्तेयः कुन्तीपुत्रः राजा युधिष्ठिरः संप्रस्थितः सम्यक् प्रस्थितः चलितः। स राजा अगस्त्याश्रमं आसाद्य प्राप्य दुर्जयायां उवास दुर्जयानामके स्थाने स्थितः।

अर्थ— पश्चात् इस स्थानसे बहुत दक्षिणा देनेवाला कुन्तीपुत्र राजा युधिष्ठिर चला। वह राजा अगस्त्यके आश्रमको प्राप्त होकर दुर्जया नामक स्थानमें रहा।

तत्रैव लोमशं राजा पप्रच्छ वदतां वरः।
अगस्त्येनेह वातापिः किमर्थमुपशामितः॥ १॥

अन्वयः— तत्र एव वदतां वरः राजा लोमशं पप्रच्छ इह वातापिः अगस्त्येन किमर्थं उपशामितः?

संस्कृत-टीका— तत्र एव तस्मिन् दुर्जयानामके स्थाने एव वदतां वरः वक्तॄणां श्रेष्ठः राजा युधिष्ठिरः लोमशं मुनिं पप्रच्छ पृष्टवान्। इह अस्मिन् स्थाने वातापिः नामकः राक्षसः अगस्त्येन मुनिना किमर्थं किं उद्देशेन उपशामितः मारितः?

अर्थ— वहां ही वक्ताओंमें श्रेष्ठ राजा युधिष्ठिर लोमश मुनिसे पूछने लगा कि यहां वातापिको अगस्त्य मुनिने क्यों मारा था?

आसीद्वा किं प्रभावश्च स दैत्यो मानवान्तकः।
किमर्थं चोदितो मन्युरगस्त्यस्य महात्मनः॥ २॥

अन्वयः— मानवान्तकः दैत्यः च किं प्रभावः आसीत्? महात्मनः अगस्त्यस्य मन्युः किमर्थं च उदितः?

संस्कृत-टीका— सः मानवान्तकः मानवानां मनुष्याणां अन्तकः दैत्यः असुरः किं प्रभावः कीदृशप्रभाववान् आसीत्? महात्मनः अगस्त्यस्य मुनेः मन्युः क्रोधः किमर्थं किं कारणेन च उदितः उत्पन्नः।

अर्थ— वह मनुष्योंका नाश करनेवाला राक्षस किस प्रभावसे युक्त था और महात्मा अगस्त्यको क्रोध किस कारण उत्पन्न हुआ था?

लोमश उवाच—

इल्वलो नाम दैतेय आसीत्कौरवनंदन ।
मणिमत्यां पुरि पुरा वातापिस्तस्य चानुजः ॥ ४ ॥

अन्वयः— लोमशः उवाच- हे कौरवनन्दन ! इल्वलः नाम दैतेयः पुरा मणिमत्यां पुरि आसीत् । तस्य च अनुजः वातापिः ।

संस्कृत-टीका— लोमशः उवाच- हे कौरवनन्दन ! हे धर्मराज ! इल्वलः नाम दैत्यः पुरा पूर्वकाले मणिमत्यां मणिमतिनामकायां पुरि नगर्यां आसीत् । तस्य च अनुजः भ्राता वातापिः वातापिनामकः आसीत् ।

अर्थ— लोमश-मुनि बोले- हे धर्मराज ! इल्वल नामक राक्षस पूर्व समयमें मणिमति नामक नगरीमें था और उसका भाई वातापि नामक था ।

समास

१ भूरिदक्षिणः- भूरि दक्षिणा यस्य सः = (बहुत दक्षिणा देनेवाला)
२ अगस्त्याश्रमः- अगस्त्यस्य आश्रमः = (अगस्त्यका आश्रम)
३ मानवान्तकः- मानवानां अंतकः = (मनुष्योंका अंतक)
४ अन्तकः- अन्तं करोति इति = (नाश करनेवाला)
५ कौरवनंदनः- कौरवस्य नंदनः = (कौरवका पुत्र)

संधि ।

१ प्रस्थितो राजा = प्रस्थितः राजा
२ तत्रैव = तत्र एव
३ अगस्त्येनेह = अगस्त्येन इह
४ आसीद्वा = आसीत् वा
५ मन्युरगस्त्तस्य = मन्युः अगस्त्यस्य
६ वातापिस्तस्य = वातापिः तस्य

सूचना

पाठक इन समासों और संधियोंका अच्छी प्रकार अभ्यास करें। क्योंकि संस्कृतमें सर्वत्र इनका उपयोग होता है और ध्यानपूर्वक इनका अभ्यास करके अच्छा ज्ञान संपादन करनेसे ही संस्कृतमें अच्छी गति हो सकती है।

संधि किये हुए वाक्य।

१ इल्वलो नाम दैत्यः पूर्वकाले मणिमतीनगर्यामासीत्। तस्य चानुजो वातापिनामको राक्षस आसीत्।

२ तत्रैव वदतां वरो राजा लोमशं पप्रच्छ। इह वातापिरगस्त्येन किमर्थमुपशामितः ?

३ मानवान्तको दैत्यश्च किं प्रभाव आसीत्? महात्मनोऽगस्त्यस्य मन्युः किमर्थं चोदितः ?

४ महिलाभिर्विद्याध्ययनमवश्यं कर्तव्यम्। अवश्यं कर्तव्यमध्ययनं महिलाभिः। महिलाभिरध्ययनमवश्यं कर्तव्यम्।

पाठ ३

इस पाठमें इकारान्त स्त्रीलिंगी शब्दोंके रूप देखिये—

इकारान्तः स्त्रीलिंगो 'मति' शब्दः।

१	मतिः	मती	मतयः
सं०	हे मते	हे मती	हे मतयः
२	मतिम्	मती	मतयः
३	मत्या	मतिभ्याम्	मतिभिः
४	मत्यै, मतये	मतिभ्याम्	मतिभ्यः
५	मत्याः, मतेः	मतिभ्याम्	मतिभ्यः
६	मत्याः, मतेः	मत्योः	मतीनाम्
७	मत्याम्, मतौ	मत्योः	मतिषु

इस शब्दके रूपोंके समान निम्नलिखित शब्दोंके रूप होते हैं—

शब्द ।

नियतिः	= दैव	धूलिः	= धूलि, मिट्टी
प्रकृतिः	= प्रकृति, स्वभाव	केलिः	= खेल
बुद्धिः	= बुद्धि	रात्रिः	= रात्री
ज्ञातिः	= जाति	स्मृतिः	= स्मरण
व्यक्तिः	= व्यक्ति	कान्तिः	= तेज
उक्तिः	= कथन	द्युतिः	= प्रकाश
श्रुतिः	= श्रवण, वेद	प्रीतिः	= प्रेम
वेदिः	= वेदी	भूतिः	= ऐश्वर्य
औषधिः	= औषधि	भूमिः	= जमीन
तिथिः	= तारीख	अवनिः	= भूमि

संस्कृत--वाक्यानि ।

१ प्रकृत्या यत् वक्रं तत्समं न भवति — स्वभावसे जो टेढा है वह सीधा नहीं होता।

२ विशुद्धया बुद्ध्या युक्तः मनुष्यः बन्धनात् मुक्तः भवति— शुद्ध बुद्धिसे युक्त मनुष्य बन्धनसे मुक्त होता है ।

३ ज्ञातिभिः बान्धवैः च सह धर्मं समाचर— जातियों और भाइयोंके साथ धर्मका आचरण कर ।

४ सतां उक्तिः सदा एव हितकारिणी भवति— साधुओंकी उक्ति सदा ही हितकारी होती है ।

५ भूतिं इच्छद्भिः मनुष्यैः श्रुत्या विहितं कर्म कर्तव्यम् — उन्नति चाहनेवाले मनुष्योंको श्रुतिसे विहित कर्म करना चाहिये ।

६ तारकाणां द्युतौ यत् तेजः भवति तत् न कुत्र अपि अन्यत्र दृश्यते— ताराओंके प्रकाशमें जो तेज होता है, वह नहीं कहीं भी अन्यत्र दिखाई देता है ।

७ यदा आकाशं धूल्या व्याप्यते तदा विद्यार्थिभिः अध्ययनकर्म न कर्तव्यम्— जब आकाश धूलिसे व्याप्त होता है, तब विद्यार्थियोंको अध्ययनका काम नहीं करना चाहिये।

अब दीर्घ ईकारान्त शब्दोंके रूप देखिये—

ईकारान्तः स्त्रीलिंगो 'गौरी' शब्दः।

१	गौरी	गौर्यौ	गौर्यः
सं०	हे गौरि	हे गौर्यौ	हे गौर्यः
२	गौरीम्	गौर्यौ	गौरीः
३	गौर्या	गौरीभ्याम्	गौरीभिः
४	गौर्यै	गौरीभ्याम्	गौरीभ्यः
५	गौर्याः	गौरीभ्याम्	गौरीभ्यः
६	गौर्याः	गौर्योः	गौरीणाम्
७	गौर्याम्	गौर्योः	गौरीषु

इसके समान निम्नलिखित शब्दोंके रूप बनते हैं—

खर्जूरी = खजूर वृक्ष
केतकी = केतकी वृक्ष
कदली = केल
भारती = वाणी
वाणी = भाषा
सरस्वती = एक नदी
नगरी = शहर
पुरी = नगर
नारी = स्त्री
जननी = माता
धरणी = पृथ्वी
धरित्री = पृथ्वी
मेदिनी = पृथ्वी
सौदामिनी = बिजुली

वाक्यानि।

१ तव खर्जूरीणां वनं दर्शनीयं वर्तते— तेरा खजूरियोंका वन देखने-योग्य है।

२ केतक्याः पुष्पं त्वया अत्र न स्थापितम्— केतकीका फूल तूने यहां नहीं रखा।

३ तस्य राज्ञः नगरीषु मर्कट्यः बहवः सन्ति— उस राजाकी नगरियोंमें बंदरियां बहुत हैं ।

४ जननीभिः पुत्राणां पालनं क्रियते— माताओंद्वारा लडकोंका पालन किया जाता है ।

५ प्रेममय्या वाण्या मित्राणि वशे कुरु— प्रेमयुक्त भाषणसे मित्रोंको वशमें कर ।

६ मेदिन्यां शूराः एव विजयन्ते— पृथ्वीमें शूर ही विजय करते हैं ।

७ मेघमण्डलात् सौदामिनी पतिता— मेघमण्डलसे बिजुली गिर पडी ।

८ जननी जन्मभूमिः च स्वर्गात् अपि गरीयसी— माता और जन्मभूमि स्वर्गसे भी श्रेष्ठ हैं ।

ईकारान्तः स्त्रीलिंगः 'स्त्री' शब्दः ।

१	स्त्री	स्त्रियौ	स्त्रियः
सं०	हे स्त्रि	हे स्त्रियौ	हे स्त्रियः
२	स्त्रियम्, स्त्रीम्	स्त्रियौ	स्त्रियः, स्त्रीः
३	स्त्रिया	स्त्रीभ्याम्	स्त्रीभिः
४	स्त्रियै	स्त्रीभ्याम्	स्त्रीभ्यः
५	स्त्रियाः, स्त्रियः	स्त्रीभ्याम्	स्त्रीभ्यः
६	स्त्रियाः, स्त्रियः	स्त्रियोः	स्त्रीणाम्
७	स्त्रियाम्	स्त्रियोः	स्त्रीषु

पूर्वोक्त शब्दके रूपोंमें और इस शब्दके रूपोंमें जो भेद है वह पाठक स्मरणमें रखें,- द्वितीयाके रूपोंमें भेद विशेष है ।

वाक्यानि ।

१ स्त्रीणां स्वभावः प्रेममयः भवति— स्त्रियोंका स्वभाव प्रेममय होता है ।

२ स्त्रीषु जीवत्सु पुत्राणां कल्याणं भवति— स्त्रियोंके जीवित रहनेतक पुत्रोंका हित होता है ।

३ श्रूयन्ते पुराणेषु स्त्रीणां अपि शौर्यस्य कथाः— सुनी जाती हैं पुराणोंमें स्त्रियोंकी भी शौर्यकी कथाएं।

४ एकान्ते परकीयाभिः स्त्रीभिः सह भाषणं न कर्तव्यम्— एकान्तमें परकीय स्त्रियोंके साथ भाषण नहीं करना चाहिये।

ईकारान्तः स्त्रीलिंगः 'श्री' शब्दः।

१	श्रीः	श्रियौ	श्रियः
सं०	हे श्रीः	हे श्रियौ	हे श्रियः
२	श्रियम्	श्रियौ	श्रियः
३	श्रिया	श्रीभ्याम्	श्रीभिः
४	श्रियै, श्रिये	श्रीभ्याम्	श्रीभ्यः
५	श्रियाः, श्रियः	श्रीभ्याम्	श्रीभ्यः
६	श्रियाः, श्रियः	श्रियोः	श्रीणां, श्रियाम्
७	श्रियाम्, श्रियि	श्रियोः	श्रीषु

इसी प्रकार निम्नलिखित शब्दोंके रूप होते हैं—

शब्द।

धीः = बुद्धि	तंत्रीः = वीणा
ह्रीः = लज्जा	लक्ष्मीः = संपत्ति
तरीः = नौका	श्रीः = शोभा

वाक्यानि।

१ मनुष्यः धिया ज्ञानं गृह्णति— मनुष्य बुद्धिसे ज्ञान लेता है।

२ तंत्रीणां मधुरः शब्दः श्रूयते-वीणाओंका मधुर शब्द सुना जाता है।

३ विद्या लक्ष्म्या सह प्रकाशते— विद्या लक्ष्मीके साथ प्रकाशती है।

संधि किये हुए वाक्य।

मनुष्यो धिया ज्ञानं गृह्णन्ति। श्रूयते शब्दो मधुरस्तंत्रीणाम्। विद्या लक्ष्म्या सह प्रकाशते।

पाठ ४

रामायणम् ।

१ सीता उवाच– हे राम ! सुव्रतां स्वकां नारीं पतिव्रतां मां केन हेतुना वनं नेतुं न रोचयसे ? यदि एवं दुःखितां मां नेतुं न इच्छसि, तर्हि विषं पास्यामि मरिष्यामि च। हे अनघ राम ! अहं मनसा अपि त्वद्दते अन्यं पुरुषं न द्रष्टुं इच्छामि। त्वया विना एष निरयः स्यात्। इति मम परां प्रीतिं जानन् मया सह एव वनं गच्छ। विरहशोकं मुहूर्तं अपि सहितुं न उत्सहे। किं पुनर्वर्षाणि चतुर्दश ? २ राम उवाच— हे देवि ! तव दुःखेन स्वर्गं अपि न रोचते। अतः वनाय मां अनुगच्छस्व। हे सीते ! आरभस्व वनवासक्षमाः क्रियाः। देहि ब्राह्मणेभ्यः विविधानि रत्नानि। मा चिरय। संत्वरस्व। ३ लक्ष्मणः अपि सर्वं श्रुत्वा शोकं सोढुं असमर्थः रामं उवाच– अहं धनुर्धरः त्वां वनं अनुग-

---

भाषा--वाक्य ।

१ सीता बोली– हे राम ! उत्तम व्रतवाली अपनी स्त्री मुझ पतिव्रताको किस हेतुसे वनको ले जाना पसंत नहीं करता है ? यदि ऐसी दुःखिता मुझको ले जाना तू नहीं चाहता, तो विष पीऊंगी और मरूंगी। हे निष्पाप राम ! मैं मनसे भी तेरे विना दूसरे पुरुषको देखना नहीं चाहती। तेरे विना यह नरक ही होगा। ऐसी मेरी श्रेष्ठ प्रीति जानकर मेरे साथ ही वनको तू जा। विरहशोकको घडीभर भी सहन करनेका उत्साह नहीं है। फिर कैसे चौदह वर्ष ? २. राम बोला– हे देवि ! तेरे दुःखके कारण स्वर्ग भी मैं पसंद नहीं करता हूं। इसलिये वनके लिये मेरे पीछे चल। हे सीते ! आरंभ कर वनवासके योग्य क्रियाएं। दो ब्राह्मणोंके लिये विविध रत्न। देरी न कर। त्वरा कर। ३. लक्ष्मण भी सब सुनकर शोक सहन करनेके लिये असमर्थ होकर रामसे बोला— मैं धनुर्धर तेरे पीछे वनको

मिष्यामि। मया समेतः अरण्यानि विचरिष्यसि। त्वया विना अहं देवलोकं अपि न वृणे। न अमरत्वं न च अपि लोकानां ऐश्वर्यं कामये। ४ एवं वनवासाय निश्चितः सौमित्रिः सान्त्वैः बहुभिः रामेण निषिद्धः। परंतु सः पुनः उवाच- अनुज्ञातः अहं भवता पूर्वं एव। किं पुनः इदानीं निवारणं क्रियते? ५ अनेन सुप्रीतः रामः उवाच- हे सौमित्रे! व्रज, आपृच्छस्व सर्वं सुहृज्जनं। हे लक्ष्मण! राज्ञः जनकस्य महायज्ञे ये दिव्ये धनुषी, अभेद्ये कवचे, अक्षयसायकौ तूणीरौ, द्वौ खड्गौ च, सर्वं तत् आयुधं आदाय क्षिप्रं आगच्छ। ६ वैदेह्या सह ब्राह्मणेभ्यः बहुधनं दत्त्वा रामलक्ष्मणौ पितरं द्रष्टुं जग्मतुः। तदा रामं सीतां लक्ष्मणं च पदातिं एव दृष्ट्वा शोकोपहतचेतसः जनाः ऊचुः। आकाशगैः अपि भूतैः या सीता द्रष्टुं न शक्या तां एव सीतां अद्य राजमार्गगताः जनाः पश्यन्ति। रामः सूतं उवाच- आख्याहि

जाऊंगा। मेरे साथ तू अरण्यमें संचार करेगा। तेरे विना मैं स्वर्गको भी नहीं चाहता। अमरत्व तथा लोकोंका ऐश्वर्य भी नहीं चाहता। ४. इस प्रकार वनवासके लिये निश्चय करनेवाले लक्ष्मणका बहुत शांतिके वचनोंसे रामने निवारण किया। परंतु वह फिर बोला— आज्ञा दी है मुझको आपने पहिले ही। क्यों फिर अब निवारण किया जाता है? ५. इससे आनंदित हुआ राम बोला, हे लक्ष्मण! जा और पूछ अपने मित्रजनोंसे। हे लक्ष्मण! राजा जनकके बडे यज्ञमें जो (दो) दिव्य धनुष्य, (दो) अभेद्य कवच, (दो) अक्षय तूणीर, और (दो) तलवारें (रखी हैं) वह सब शस्त्र लेकर शीघ्र आ। ६. सीताके साथ ब्राह्मणोंको बहुत धन देकर राम और लक्ष्मण पिताको देखनेके लिये गये। तब राम, सीता और लक्ष्मणको पैदल चलते देखकर शोकसे व्याकुलचित्त होकर लोग बोले कि आकाशके भूतों-प्राणियोंसे भी जो सीता देखना असंभव थी, वही सीता आज मार्गके ऊपरसे चलनेवाले लोग भी देखते हैं। रामने सूतसे कहा- कह मेरे विषयमें

मां पितुः। सः अपि रामप्रेषितः क्षिप्रं निश्वसन्तं नृपतिं दृष्टवान्। कथितं च तेन अस्मै। अयं अत्र रामः सत्यपराक्रमः ते सुतः द्वारि तिष्ठति। सर्वान् सुहृदः आपृच्छय त्वां इदानीं द्रष्टुं इच्छति। हे जगतीपते! इदानीं तं रामं पश्य।

पितासे। उसने भी रामसे प्रेषित होकर शीघ्र ही श्वास जोरसे करनेवाले राजाको देखा। और उसने उससे कहा। यहां यह सत्यपराक्रमी राम तेरा पुत्र द्वारमें खडा है। सब मित्रोंसे पूछकर अब तुझे देखनेके लिये आया है। हे राजा! अब उस रामको देख।

सूचना

पाठक इस पाठका अच्छी तरह अभ्यास करें और संधि विग्रह बनानेका प्रयत्न करें।

संधि किये हुए वाक्य।

राम उवाच— हे देवि! तव दुःखेन स्वर्गमपि न रोचते। अतो वनाय मामनुगच्छस्व। हे सीते! आरभस्व वनवासक्षमाः क्रियाः। देहि ब्राह्मणेभ्यो विविधानि रत्नानि। मा चिरय। सन्त्वरस्व। लक्ष्मणोऽपि सर्वं श्रुत्वा शोकं सोढुमसमर्थो राममुवाच। अहं धनुर्धरस्त्वां वनमनुगमिष्यामि। मया समेतोऽरण्यानि विचरिष्यसि। त्वया विनाऽहं देवलोकमपि न वृणे। नामरत्वं, न चापि लोकानामैश्वर्यं कामये। एवं वनवासाय निश्चितस्सौमित्रिस्सान्त्वैर्बहुभी रामेण निषिद्धः।

पाठ ५

इस पाठमें उकारान्त स्त्रीलिंग शब्दोंके रूप देखिये—

उकारान्तः स्त्रीलिंगो 'धेनु' शब्दः ।

१	धेनुः	धेनू	धेनवः
सं०	हे धेनो	हे धेनू	हे धेनवः
२	धेनुम्	धेनू	धेनूः
३	धेन्वा	धेनुभ्याम्	धेनुभिः
४	धेन्वे, धेनवे	धेनुभ्याम्	धेनुभ्यः
५	धेन्वाः, धेनोः	धेनुभ्याम्	धेनुभ्यः
६	धेन्वाः धेनोः	धेन्वोः	धेनूनाम्
७	धेन्वां, धेनौ	धेन्वोः	धेनुषु

इसी प्रकार निम्नलिखित शब्दोंके रूप होते हैं—

शब्द ।

रज्जुः = रस्सी	हनुः = ठोडी
रेणुः = धूलि	तनुः = शरीर
शतद्रुः = नदी	कुः = पृथ्वी

वाक्यानि ।

१ रज्वा हस्ती बध्यते— रस्सीसे हाथी बांधा जाता है ।
२ रेणुभिः गृहं आच्छिन्नं— धूलिसे घर आच्छादित है ।
३ तनूनां रक्षणं कार्यम्— शरीरोंकी रक्षा करनी चाहिये ।

अब दीर्घ ऊकरान्त स्त्रीलिंग शब्दके रूप देखिये—

ऊकारान्तः स्त्रीलिंगो 'वधू' शब्दः ।

१	वधूः	वध्वौ	वध्वः
सं०	हे वधु	हे वध्वौ	हे वध्वः
२	वधूम्	वध्वौ	वधूः

३	वध्वा	वधूभ्याम्	वधूभिः
४	वध्वै	वधूभ्याम्	वधूभ्यः
५	वध्वाः	वधूभ्याम्	वधूभ्यः
६	वध्वाः	वध्वोः	वधूनाम्
७	वध्वाम्	वध्वोः	वधूषु

इस रीतिसे निम्नलिखित शब्दोंके रूप होते हैं—

शब्द ।

तनूः = शरीर
चमूः = सैन्य
सरयूः = एक नदी
धनूः = धनुष्य
अलाबूः = कद्दू
दिधिषूः = पुनर्विवाहित स्त्री

वाक्यानि ।

१ राज्ञः चम्वा अद्य महान् विजयः संपादितः—
राजाके सैन्यने आज बड़ा विजय प्राप्त किया ।

२ सरय्वाः नद्याः जलं पिब— सरयू नदीका जल पी ।

३ दिधीषूं पितुः गृहं नय— पुनर्विवाहित स्त्रीको पिताके घर ले जा ।

ऊकारान्तः स्त्रीलिंगो 'भ्रू' शब्दः ।

१	भ्रूः	भ्रुवौ	भ्रुवः
सं०	हे भ्रूः	हे भ्रुवौ	हे भ्रुवः
२	भ्रुवम्	भ्रुवौ	भ्रुवः
३	भ्रुवा	भ्रूभ्याम्	भ्रूभिः
४	भ्रुवै, भ्रुवे	भ्रूभ्याम्	भ्रूभ्यः
५	भ्रुवाः भ्रुवः	भ्रूभ्याम्	भ्रूभ्यः
६	भ्रुवाः, भ्रुवः	भ्रुवोः	भ्रूणाम्, भ्रुवाम्
७	भ्रुवां, भ्रुवि	भ्रुवोः	भ्रूषु

❀

इस प्रकार निम्नलिखित शब्दोंके रूप बनते हैं—

शब्द ।

वीरसूः-- वीरपुत्र प्रसवनेवाली स्त्री

भूः— पृथ्वी

वाक्यानि ।

१ वीरसूनां स्त्रीणां आभूषणानि— वीरपुत्र प्रसवनेवाली स्त्रियोंके गहने ।

२ तव भ्रुवौ शोभने स्तः— तेरी भौंएँ उत्तम हैं ।

३ भुवः पतिः राजा इति उच्यते— भूमिका पति राजा कहा जाता है ।

४ वीरसूं मातरं नमस्कुरु— वीर प्रसवनेवाली माताको नमन कर ।

अब ऋकारान्त स्त्रीलिंगी शब्दोंके रूप देखिये—

ऋकारान्तः स्त्रीलिंगो 'मातृ' शब्दः ।

१	माता	मातरौ	मातरः
सं०	हे मातः	हे मातरौ	हे मातरः
२	मातरम्	मातरौ	मातॄः
३	मात्रा	मातृभ्याम्	मातृभिः
४	मात्रे	मातृभ्याम्	मातृभ्यः
५	मातुः	मातृभ्याम्	मातृभ्यः
६	मातुः	मात्रोः	मातॄणाम्
७	मातरि	मात्रोः	मातृषु

इसी प्रकार निम्नलिखित शब्दोंके रूप बनते हैं—

शब्द ।

दुहितृ— पुत्री ।

ननान्दृ— पतिकी बहिन ।

वाक्यानि ।

१ दुहिता मातुः गृहे न वसति— पुत्री माताके घर नहीं रहती ।

२ ननान्दुः पतिः अत्र न आगतः - पतिकी बहिनका पति यहां नहीं आया।

३ पृच्छ त्वं स्वां दुहितरम्— पूछ तू अपनी पुत्रीको ।

४ मातुः माता मातामही इति कथ्यते—
माताकी माता मातामही कही जाती है ।

५ सा प्रियंवदा मम दुहितुः दुहिता अस्ति—
वह प्रियंवदा मेरी पुत्रीकी पुत्री है ।

ऋकारातः स्त्रीलिंगः ' स्वसृ ' शब्दः ।

१	स्वसा	स्वसारौ	स्वसारः
सं०	हे स्वसः	हे स्वसारौ	हे स्वसारः
२	स्वसारम्	स्वसारौ	स्वसॄः

शेष रूप मातृ शब्दके रूपोंके समान ही होते हैं। प्रथमाका द्विवचन और बहुवचन ' स्वसृ ' शब्दका ' स्वसारौ-स्वसारः ' ऐसा होता है और ' मातृ ' शब्दका ' मातरौ-मातरः ' ऐसा होता है। ' मातारौ, मातारः ' ऐसा नहीं होता। इतनी भिन्नता ध्यानमें रखना आवश्यक है ।

वाक्यानि ।

१ तव मातुः स्वसा कुत्र गता ?— तेरी माताकी बहिन कहां गई ?

२ मम स्वसारः अद्य एव अत्र आगमिष्यन्ति—
मेरी बहिनें आजही यहां आवेंगी ।

३ मम पितुः स्वसा तव मातुः स्वस्रा सह न गमिष्यति—
मेरे पिताकी बहिन तेरी माताकी बहिनके साथ नहीं जावेगी ।

४ इदं फलं तव मातामह्याः स्वस्रे देहि—
यह फल तेरी मातामहीकी बहिनके लिये दे ।

पाठ ६

रामायणम् ।

१. आकाश इव निष्कंपः दशरथः गंभीरतया तं सूतं प्रत्युवाच । हे सुमंत्र ! मे दारान् अत्र आनय । ये इह मामकाः सन्ति तान् अपि अत्र आनय । सर्वैः परिवृतः एव राघवं द्रष्टुं इच्छामि २. तथा राज्ञा आज्ञापितः सूतः राजदारान् रामं लक्ष्मणं मैथिलीं च आदाय अभिमुखः जगाम । कृताञ्जलिं आयान्तं पुत्रं रामं दृष्ट्वा राजा वेगेन तं अभिदुद्राव । परन्तु दुःखार्तः राजा रामं असंप्राप्य एव मूर्च्छितः भूत्वा भुवि पपात । तदा रामवेश्मनि ' हा राम ' इति स्त्रीणां विलापः संजज्ञे । रामलक्ष्मणौ तु सीतया सार्कं शोकार्तं नृपं परिष्वज्य तं पर्यङ्के समवेशितवन्तौ । ३. अथ रामः लब्धसंज्ञं महीपतिं उवाच- हे महाराज ! त्वां आपृच्छे । पश्य मां दंडकारण्यं प्रस्थितम् । लक्ष्मणं च अनुजानीहि । मां अन्वेतु सीता अपि वनम् । हे राजन् ! शोकं उत्सृज्य नः सर्वान्

भाषा--वाक्य ।

१. आकाशके समान न कांपनेवाला दशरथ गंभीरतासे उस सूतको बोला । हे सुमंत्र ! मेरी स्त्रियोंको यहां ले आ । जो यहां मेरे सम्बन्धी हैं उनको भी यहां ला । सबसे परिवेष्टित होकर रामको देखना चाहता हूं । २. इस प्रकार राजासे आज्ञा पा कर सूत राजस्त्रियों और रामलक्ष्मण तथा सीताको लेकर सामने गया । हाथ जोडकर आनेवाले पुत्र रामको देखकर राजा वेगसे उसके पास दौडा । परंतु दुःखी राजा रामको न पाकर ही मूर्च्छित होकर भूमिपर गिर गया । तब राजमंदिरमें ' हे राम ' ऐसा स्त्रियोंका विलाप हुआ । रामलक्ष्मणोंने तो सीताके साथ शोक करनेवाले राजाको आलिंगन देकर उसे पलंगपर रख दिया । ३. पश्चात् राम जागे हुए राजासे बोला । हे महाराज ! तुझे पूछता हूं । देख मैं दंडकारण्यको जाता हूं । लक्ष्मणको आज्ञा दो । मेरे साथ सीता भी वनको चले । हे राजा ! शोक

अनुजानीहि । ४. राजा दशरथः उवाच- हे राम ! मां निगृह्य अद्य एव त्वं अयोध्यायां राजा भव। अहं कैकेय्या वरदानेन मोहितः। ५. एवं उक्तः रामः पितरं उवाच- भवान् हि पृथिव्याः पतिः। अहं अरण्ये वत्स्यामि । न मे राज्यस्य इच्छा। वने चतुर्दश वर्षाणि विहृत्य पुनः ते पादौ गृहीष्यामि । ६. आर्तः राजा रुदन् प्रियं पुत्रं अब्रवीत् । श्रेयसे वृद्धये पुनरागमनाय च अव्यग्रः भूत्वा अकुतोभयं अरिष्टं पंथानं गच्छ । न शक्यते धर्माभिमनसः सत्यात्मनः च ते बुद्धिः सन्निवर्तयितुम् । हे पुत्र ! अद्य तु इदानीं रजनीं न गच्छ । एकाहं तव दर्शनेन तावत् साधु चरामि अहम् । वस, मां अद्य मातरं च संपश्यन् शर्वरीं इमाम् । साधयिष्यसि कल्पे श्वः सर्वकामैः तर्पितः । ७. अथ आर्तस्य पितुः भाषणं श्रुत्वा रामः अब्रवीत् । हे पितः ! यान् गुणान् अद्य प्राप्स्यामि तान् श्वः मे कः प्रदास्यति ? यः वरः त्वया युद्धे कैकेय्यै दत्तः सः निखिल एव इदानीं तस्यै दीयताम् । हे पार्थिव ! त्वं सत्यप्रतिज्ञः भव।

छोडकर हम सबको आज्ञा दो । ४. राजा दशरथ बोला- हे राम ! मुझे बांधकर आज ही तू अयोध्यामें राजा हो जाओ । मैं कैकेयीके वर देनेसे मोहित हुआ हूं । ५. इस प्रकार कहा हुआ राम पितासे बोला- आप ही पृथ्वीके पालक हैं । मैं वनमें रहूंगा । नहीं मेरी राज्यकी इच्छा । वनमें चौदह वर्ष विहार कर फिर तेरे पावोंको ग्रहण करूंगा । ६. दुःखी राजा रोता हुआ प्रिय पुत्रसे बोला- कल्याण वृद्धि और वापस आनेके लिये दुःखी न होकर भयरहित होकर कष्टरहित मार्गको जा । नहीं शक्य है धर्माभिमानी सत्यात्मा जैसे तेरी बुद्धि बदलनेके लिये । हे पुत्र ! आज तू अब इस रात्रीको न जा । एक दिन तेरे दर्शनसे तो आनंदसे चलावेंगे । रह मुझे आज और माताको देखता हुआ इस रात्रीको । कल सबेरे सब इच्छाओंको तृप्त कर चले जाओगे । ७. पश्चात् दुःखी पिताका भाषण सुन कर राम बोला- हे पिता ! जो गुण आज मैं प्राप्त करूंगा वे कल मुझे कौन देगा ? जो वर तूने युद्धमें कैकेयीको दिया था, वह सब ही अब उसे दे दें । हे

दीयतां राज्यं भरताय। न मे कांक्षितं राज्यं सुखं वा। ते दुःखं अपगच्छतु, बाष्पपरिप्लुतः मा भूः। ८. दुःखितः एव राजा रामं आलिंग्य नष्टसंज्ञः भूत्वा भूमौ पपात। कैकेयीं वर्जयित्वा समस्ता देव्यः अपि समेताः तत्र रुरुदुः। तत्र सर्वं हा-हा कृतं बभूव।

राजा। तू सत्यप्रतिज्ञ हो। दे दो राज्य भरतके लिये। नहीं मुझे इच्छा है राज्यकी वा सुखकी। तेरा दुःख दूर हो, आंसुओंसे युक्त न हो। ८. दुःखी राजा रामको आलिंगन देकर मूर्च्छित होकर भूमिपर गिर पडा। कैकेयीको छोड सब रानियां मिल कर रोने लगीं। वहां सब हाहाकार हुआ।

सूचना

इस पाठमें आये हुए संस्कृत वाक्यका सारांश समझमें आया कि नहीं यह देखें। सारांश समझने पर अर्थ समझनेमें कठिनाई नहीं होगी। बादमें स्वयंके समझे हुए अर्थकी यहां दिये गये अर्थके साथ तुलना करें। इस रीतिसे संस्कृत वाक्योंका अर्थ शीघ्र ही समझमें आयेगा।

संधि किये हुए वाक्य।

एवमुक्तो रामः पितरमुवाच-भवान्हि पृथिव्याः पतिः। अहमरण्ये वत्स्यामि। न मे राज्यस्येच्छा। वने चतुर्दश वर्षाणि विहृत्य पुनस्ते पादौ गृहीष्यामि। आर्तो राजा रुदन्प्रियं पुत्रमब्रवीत्। श्रेयसे वृद्धये पुनरागमनाय च अव्यग्रो भूत्वाऽकुतोभयमरिष्टं पंथानं गच्छ।

पाठ ७

अब इस पाठमें ओकारान्त स्त्रीलिंग शब्दोंके रूप देखिये—

ओकारान्तः स्त्रीलिंगो 'द्यो' शब्दः ।

१	द्यौः	द्यावौ	द्यावः
सं०	हे द्यौः	हे द्यावौ	द्यावः
२	द्याम्	द्यावौ	द्याः
३	द्यवा	द्योभ्याम्	द्योभिः
४	द्यवे	द्योभ्याम्	द्योभ्यः
५	द्योः	द्योभ्याम्	द्योभ्यः
६	द्योः	द्यवोः	द्यवाम्
७	द्यवि	द्यवोः	द्योषु

इस प्रकार 'गो' शब्दके भी रूप होते हैं ।

वाक्यानि ।

१ द्यवि सूर्यः भ्राजते— द्युलोकमें सूर्य चमकता है ।

२ भूमिः अधः तथा द्यौः उपरि अस्ति—

भूमि नीचे और द्युलोक ऊपर है ।

३ प्रतिदिने गवा दुग्धं दीयते—

प्रतिदिन गाय द्वारा दूध दिया जाता है (अर्थात् गाय दूध देती है) ।

४ गोभ्यः जलं देहि— गौवोंके लिये जल दे ।

५ गवां पतिः गोपतिः कथ्यते— गौवोंके पालकको गोपति कहा जाता है ।

औकारान्तः स्त्रीलिंगो 'नौ' शब्दः ।

१	नौः	नावौ	नावः
सं०	हे नौः	हे नावौ	हे नावः
२	नावम्	नावौ	नावः
३	नावा	नौभ्याम्	नौभिः

४	नावे	नौभ्याम्	नौभ्यः
५	नावः	नौभ्याम्	नौभ्यः
६	नावः	नावोः	नावाम्
७	नावि	नावोः	नौषु

वाक्यानि ।

१ नावा मनुष्यः सिन्धोः पारं गच्छति—
नौकासे मनुष्य सिंधु नदीके पार जाता है ।

२ तस्य राज्ञः सैन्यं नौभिः नदीपारं अगच्छत्—
उस राजाका सैन्य नौकाओं द्वारा नदीपार गया ।

३ नावां पतिः कुत्र अस्ति इदानीं ?— नौकाओंका मालिक कहां है अब ?

४ द्वौ पुरुषौ नौभ्यां अत्र आगतौ– दो पुरुष दो नौकाओंसे यहां आगये ।

चकारान्तः स्त्रीलिंगः 'ऋच्' शब्दः ।

१	ऋक्, ऋग्	ऋचौ	ऋचः
सं०	हे ऋक्, ऋग्	हे ऋचौ	हे ऋचः
२	ऋचम्	ऋचौ	ऋचः
३	ऋचा	ऋग्भ्याम्	ऋग्भिः
४	ऋचे	ऋग्भ्याम्	ऋग्भ्यः
५	ऋचः	ऋग्भ्याम्	ऋग्भ्यः
६	ऋचः	ऋचोः	ऋचाम्
७	ऋचि	ऋचोः	ऋक्षु

इसी प्रकार निम्नलिखित शब्दोंके रूप होते हैं—

वाच् = वाणी	रुच् = तेज

वाक्यानि ।

१ ऋचः अक्षरेषु देवाः निषेदुः— ऋचाओंके अक्षरोंमें देव रहे हैं ।

२ मनुष्यः वाचा वदति— मनुष्य वाणीसे बोलता है ।

३ ऋग्भिः द्विजाः स्तुवन्ति— ऋचाओं द्वारा द्विज स्तुति करते हैं ।

४ ऋक्षु सर्वं ज्ञानं विद्यते— ऋचाओंमें सब ज्ञान होता है ।

जकारान्तः स्त्रीलिंगः 'स्रज्' शब्दः ।

१	स्रक्, स्रग्	स्रजौ	स्रजः
सं०	हे स्रक्, स्रग्	हे स्रजौ	हे स्रजः
२	स्रजम्	स्रजौ	स्रजः
३	स्रजा	स्रग्भ्याम्	स्रग्भिः
४	स्रजे	स्रग्भ्याम्	स्रग्भ्यः
५	स्रजः	स्रग्भ्याम्	स्रग्भ्यः
६	स्रजः	स्रजोः	स्रजाम्
७	स्रजि	स्रजोः	स्रक्षु

वाक्यानि ।

१ सः स्रग्भिः स्वकीयं कंठं भूषयति—
वह मालाओंसे अपने कंठको भूषित करता है ।

२ मनुष्यैः पुष्पैः स्रक् निर्मीयते—
मनुष्योंने फूलोंसे माला निर्माण की जाती है ।

३ स्रजा तं भूषयति— मालासे उसको भूषित करता है ।

तकारान्तः स्त्रीलिंगः 'सरित्' शब्दः ।

१	सरित्, सरिद्	सरितौ	सरितः
सं०	हे सरित्, सरिद्	हे सरितौ	हे सरितः
२	सरितम्	सरितौ	सरितः
३	सरिता	सरिद्भ्याम्	सरिद्भिः
४	सरिते	सरिद्भ्याम्	सरिद्भ्यः
५	सरितः	सरिद्भ्याम्	सरिद्भिः
६	सरितः	सरितोः	सरिताम्
७	सरिति	सरितोः	सरित्सु

इसी प्रकार निम्नलिखित शब्दोंके रूप होते हैं—

विद्युत् = बिजली	योषित् = स्त्री
तडित् = बिजली	क्षुत् = भूख
वीरुत् = औषधि	समित् = युद्ध

वाक्यानि ।

१ समिति शूराः युध्यन्ते— युद्धमें शूर लडते हैं ।
२ सरितां पतिः समुद्रः— नदियोंका पति समुद्र है ।
३ तडिता वृक्षः भग्नः— बिजलीसे वृक्ष भग्न हुआ।
४ वीरुद्भिः रोगस्य निवारणं भवति—
औषधियोंसे रोगका निवारण होता है ।

सूचना

पाठक इसी तरह रूप बनाकर उनका वाक्यमें उपयोग करें ।

संधि किये हुए वाक्य।

१ लताभिर्वृक्ष आच्छादितः । आच्छादितो वृक्षो लताभिः । वृक्ष आच्छादितो लताभिः । वृक्षो लताभिराच्छादितः । २ याञ्चया पतति मनुष्यः । मनुष्यो याञ्चया पतति । मनुष्यः पतति याञ्चया । ३ महिलाभिर्विद्याध्ययनमवश्यं कर्तव्यम् । कर्तव्यमवश्यं विद्याध्ययनं महिलाभिः । विद्याध्ययनमवश्यं कर्तव्यं महिलाभिः ।

पाठ ८

पूर्व पाठोंमें जो महाभारतके श्लोक और रामायणका गद्य भाग दिया है, उसका संधियुक्त संस्कृत अब यहां देते हैं । पाठक इसका उत्तम अभ्यास करें—

(१)

महाभारतम् ।

वैशम्पायन उवाच— ततो भूरिदक्षिणः कौन्तेयो राजा संप्रस्थितः । अगस्त्याश्रममासाद्य दुर्जयायामुवास ह ।

तत्रैव वदतां वरो राजा लोमशं पप्रच्छ। वातापिरगस्त्येन किमर्थमुपशामितः?

स मानवान्तको दैत्यश्च किं प्रभाव आसीत्? महात्मनोऽगस्त्यस्य मन्युः किमर्थं चोदितः?

लोमश उवाच— हे कौरवनंदन! इल्वलो नाम दैतेयः पुरा मणिमत्यां पुर्यासीत्। तस्य चानुजो वातापिः।

सूचना

वारंवार पढनेपर यदि कोई कठिनता हुई तो उस कठिनताको दूर करने के लिये इस पुस्तकका तृतीय पाठ देखें। अब रामायणका पाठ पढिये—

(२)

रामायणम्।

सीतोवाच— हे राम! सुव्रतां स्वकां नारीं पतिव्रतां मां केन हेतुना वनं नेतुं न रोचयसे? यद्येवं दुःखितां मां नेतुं नेच्छासि तर्हि विषं पास्यामि मरिष्यामि च। हे अनघ राम! अहं मनसाऽपि त्वद्दतेऽन्यं पुरुषं न द्रष्टुमिच्छामि। त्वया विनैव निरयः स्यात्। इति मम परां प्रीतिं जानन्मया सहैव वनं गच्छ। विरहशोकं मुहूर्तमपि सहितुं नोत्सहे। किं पुनर्वर्षाणि चतुर्दश?

राम उवाच— हे देवि! तव दुःखेन स्वर्गमपि न रोचये। अतो वनाय मामनुगच्छस्व। हे सीते! आरभस्व वनवासक्षमाः क्रियाः। देहि ब्राह्मणेभ्यो विविधानि रत्नानि। मा चिरय। संत्वरस्व।

लक्ष्मणोऽपि सर्वं श्रुत्वा शोकं सोढुमसमर्थो राममुवाच— अहं धनुर्धरस्त्वां वनमनुगमिष्यामि। मया समेतोऽरण्यानि विचरिष्यसि। त्वया विनाऽहं देवलोकमपि न वृणे। नामरत्वं न चापि लोकानामैश्वर्यं कामये।

एवं वनवासाय निश्चितः सौमित्रिः सान्त्वनैर्बहुभी रामेण निषिद्धः। परंतु स पुनरुवाच। अनुज्ञातोऽहं भवता पूर्वमेव। किं पुनरिदानीं निवारणं क्रियते ?

अनेन सुप्रीतो राम उवाच— हे सौमित्रे! व्रज, आपृच्छस्व सर्वं सुहृज्जनम्। हे लक्ष्मण! राज्ञा जनकस्य महायज्ञे ये दिव्ये धनुषी, अभेद्ये कवचे, अक्षयसायकौ तूणीरौ, द्वौ खड्गौ च सर्वं तदायुधमादाय क्षिप्रमागच्छ।

वैदेह्या सह ब्राह्मणेभ्यो बहुधनं दत्वा रामलक्ष्मणौ पितरं द्रष्टुं जग्मतुः। तदा रामं सीतां लक्ष्मणं च पदातिमेव दृष्ट्वा शोकोपहत-चेतसो जना ऊचुः। आकाशगैरपि भूतैर्या सीता द्रष्टुं न शक्या तामेव सीतामद्य राजमार्गगता जनाः पश्यन्ति। रामः सूतमुवाच- आख्याहि मां पितुः। सोऽपि रामप्रेषितः क्षिप्रं निःश्वसन्तं नृपतिं दृष्टवान्। कथितं च तेनासौ। अयमत्र रामः सत्यपराक्रमस्ते सुतो द्वारि तिष्ठति सर्वान्सुहृद आपृच्छ्य त्वामिदानीं द्रष्टु-मिच्छति। हे जगतीपते! इदानीं तं रामं पश्य।

सूचना

पाठक इस पाठको दो चार वार पठन करें और यदि कोई वाक्य समझमें न आया तो पूर्व छठे पाठमें देखें। वहां ये ही वाक्य पदच्छेदपूर्वक दिये हैं।

समास।

शोकोपहतचेतसौ— शोकेन उपहतं शोकोपहतम्। शोकोपहतं चेतः यस्य सः शोकोपहतचेताः। तौ शोकोपहतचेतसौ।

(३)

रामायणम्।

आकाश इव निष्कम्पो दशरथो गंभीरतया तं सूतं प्रत्युवाच। हे सुमंत्र! मे दारानत्रानय। य इह मामकाः सन्ति तानप्यत्रानय। सर्वैः परिवृत एव राघवं द्रष्टुमिच्छामि।

तथा राज्ञाऽऽज्ञापितः सूतो राजद्वारान्रामं लक्ष्मणं मैथिलीं चादायाभिमुखो जगाम। कृताञ्जलिमायान्तं पुत्रं रामं दृष्ट्वा राजा वेगेन तमभिदुद्राव। परंतु दुःखार्तो राजा राममसंप्राप्यैव मूर्च्छितो भूत्वा भुवि पपात। तदा राजवेश्मनि हा रामेति स्त्रीणां विलापः संजज्ञे। रामलक्ष्मणौ तु सीतया साकं शोकार्तं नृपं परिष्वज्य तं पर्यंके समवेशितवन्तौ।

अथ रामो लब्धसंज्ञं महीपतिमुवाच। हे महाराज! त्वामापृच्छे। पश्य मां दंडकारण्यं प्रस्थितम्। लक्ष्मणं चानुजानीहि। मामन्वेतु सीताऽपि वनम्। हे राजन्! शोकमुत्सृज्य नः सर्वाननुजानीहि।

राजा दशरथ उवाच—हे राम! मां निगृह्याद्यैव त्वमयोध्यायां राजा भव। अहं कैकेय्या वरदानेन मोहितः।

एवमुक्तो रामः पितरमुवाच—भवान् हि पृथिव्याः पतिः। अहमरण्ये वत्स्यामि। न मे राज्यस्येच्छा। वने चतुर्दशवर्षाणि विहृत्य पुनस्ते पादौ ग्रहीष्यामि।

आर्तो राजा रुदन् प्रियं पुत्रमब्रवीत्। श्रेयसे वृद्धये पुनरागमनाय चाव्यग्रो भूत्वाऽकुतोभयमरिष्टं पंथानं गच्छ। न शक्यते धर्माभिमनसः सत्यात्मनश्च ते बुद्धिः सन्निवर्तयितुम्। हे पुत्र! अद्य त्विदानीं रजनीं न गच्छ। एकाहं तव दर्शनेन तावत्साधु चराम्यहम्। वत्स, मामद्य मातरं च संपश्यन् शर्वरीमिमाम्। साधयिष्यसि कल्ये श्वः सर्वकामैस्तर्पितः।

अथार्तस्य पितुर्भाषणं श्रुत्वा रामोऽब्रवीत्। हे पितः! यान्गुणानद्य प्राप्स्यामि तान्श्वो मे कः प्रदास्यति? यो वरस्त्वया युद्धे कैकेय्यै दत्तः स निखिल एवेदानीं तस्यै दीयताम्। हे पार्थिव! त्वं सत्यप्रतिज्ञो भव। दीयतां राज्यं भरताय। न मे कांक्षितं राज्यं सुखं वा। ते दुःखमपगच्छतु, बाष्पपरिप्लुतो मा भूः।

दुःखित एव राजा राममालिंग्य नष्टसंज्ञो भूत्वा भूमौ पपात। कैकेयीं वर्जयित्वा समस्ता देव्योऽपि समेतास्तत्र रुरुदुः। तत्र सर्वं हाहाकृतं बभूव।

सूचना

पाठक अभ्यास करते समय कोई वाक्य समझमें न आया तो पीछेके पाठमें देखें।

पाठकोंने यह पाठ दस-बीस बार अवश्य पढना चाहिये। जितना अधिक बार पढा जायगा उतना उससे अधिक लाभ होगा। अवकाशके अनुसार इसे पढना चालु रखें। ऐसा करनेसे पाठकोंको अधिक ही लाभ होगा।

उत्तम अभ्यासके बाद अपने मनसे संस्कृतमें इस कथाका सार कहा जायगा कि नहीं यह देखें और वैसा करनेतक पढनेका अभ्यास चालु रखें।

पाठ ९

अब दकारान्त स्त्रीलिंग शब्दोंके रूप देखिये—

दकारान्तः स्त्रीलिंगः 'शरद्' शब्दः

१	शरत्, शरद्	शरदौ	शरदः
सं०	हे शरत्, शरद्	हे शरदौ	हे शरदः
२	शरदम्	शरदौ	शरदः
३	शरदा	शरद्भ्याम्	शरद्भिः
४	शरदे	शरद्भ्याम्	शरद्भिः
५	शरदः	शरद्भ्याम्	शरद्भ्यः
६	शरदः	शरदोः	शरदाम्
७	शरदि	शरदोः	शरत्सु

निम्नलिखित शब्दोंके रूप इसी रीतिसे होते हैं—

शब्द ।

आपद्	= आपत्ति	संपद्	= संपत्ति
विपद्	= विपत्ति	संसद्	= सभा
समिध्	= समिधा	परिषद्	= सभा
मृद्	= मिट्टी	दृषद्	= पत्थर

वाक्यानि ।

१ आपदि एव मित्रस्य परीक्षा भवति—
आपत्तिमें ही मित्रकी परीक्षा होती है ।

२ संसदि सर्वे पंडिता वदन्ति— सभामें सब पंडित बोलते हैं ।

पकारान्तः स्त्रीलिंगो नित्यबहुवचन 'आप्' शब्दः ।

१	आपः	४	अद्भ्यः
सं०	हे आपः	५	अद्भ्यः
२	अपः	६	अपाम्
३	अद्भिः	७	अप्सु

'आप्' शब्द सदा बहुवचनमें ही रहता है । इसके एक तथा द्विवचनके रूप प्रयोगमें नहीं होते ।

वाक्यानि ।

१ अद्भिः गात्राणि शुद्ध्यन्ति— पानीसे अंग शुद्ध होते हैं ।

२ अपां पतिः समुद्रः— जलका पति समुद्र है ।

३ अप्सु अमृतं अस्ति— पानीमें अमृत है ।

४ अपां फेनेन किं भवति ?— पानीके फेनसे क्या होता है ?

रकारान्तः स्त्रीलिंगो 'द्वार्' शब्दः ।

१	द्वाः	द्वारौ	द्वारः
सं०	हे द्वाः	हे द्वारौ	हे द्वारः
२	द्वारम्	द्वारौ	द्वारः
३	द्वारा	द्वार्भ्याम्	द्वार्भिः
४	द्वारे	द्वार्भ्याम्	द्वार्भ्यः
५	द्वारः	द्वार्भ्याम्	द्वार्भ्यः
६	द्वारः	द्वारोः	द्वाराम्
७	द्वारि	द्वारोः	द्वाःसु

वाक्यानि ।

१ द्वारपालः द्वारि तिष्ठति— द्वारपाल दर्वाजेमें खडा रहता है।
२ द्वारं पिधेहि— द्वार बंद कर ।
३ त्वं केन द्वारा आगतः ?— तू किस द्वारसे आया ?
४ द्वाःसु उदकं स्थापय— द्वारोंमें जल रख ।

सूचना

यहां ध्यानमें रहे कि यह रकारान्त स्त्रीलिंगी 'द्वार' शब्द है । अकारान्त नपुंसकलिंगी 'द्वारं' शब्द इससे भिन्न है । उसके रूप अकारान्त नपुंसकलिंगी 'ज्ञानं' शब्दके समान होते हैं (ज्ञान शब्दके रूप अंक ८ में पाठ १० में देखिये) ।

संधि किये हुए वाक्य ।

१ मानवान्तको दैत्यः किंप्रभाव आसीत् ? किंप्रभाव आसीन्मानवान्तको दैत्यः ? दैत्यो मानवान्तक आसीत्किंप्रभावः ?

२ महात्मनोऽगस्त्यस्य मन्युः किमर्थं चोदितः ? किमर्थमुदितश्च मन्युर्महात्मनोऽगस्त्यस्य ? अगस्त्यस्य महात्मनो मन्युः किमर्थमुदितश्च ? मन्युरगस्त्यस्य महात्मन उदितश्च किमर्थम् ?

३ अत्रैव वदतां वरो राजा लोमशं पप्रच्छ । पप्रच्छ वदतां वरो राजा लोमशमत्रैव ।

रकारान्तः स्त्रीलिंगो 'गिर्' शब्दः ।

१	गीः	गिरौ	गिरः
सं०	हे गीः	हे गिरौ	हे गिरः
२	गिरम्	गिरौ	गिरः
३	गिरा	गीर्भ्याम्	गीर्भिः
४	गिरे	गीर्भ्याम्	गीर्भ्यः
५	गिरः	गीर्भ्याम्	गीर्भ्यः
६	गिरः	गिरोः	गिराम्
७	गिरि	गिरोः	गीर्षु

वाक्यानि ।

१ गिरा ईश्वरं स्तुहि— वाणीसे ईश्वरकी स्तुति कर ।
२ गीर्भिः मनुष्यः व्यवहरन्ति— वाणीयोंसे मनुष्य व्यवहार करते हैं।
३ तव गिरि मधुरता भवतु— तेरी वाणीमें मधुरता रहे ।
४ तस्य गिरां माधुर्यं वर्णनीयं अस्ति—
उसके वक्तृताओंकी मधुरता वर्णनीय है ।

रकारान्तः स्त्रीलिंगः 'पुर्' शब्दः ।

१	पूः	पुरौ	पुरः
सं०	हे पूः	हे पुरौ	हे पुरः
२	पुरम्	पुरौ	पुरः
३	पुरा	पूर्भ्याम्	पूर्भिः
४	पुरे	पूर्भ्याम्	पूर्भ्यः
५	पुरः	पूर्भ्याम्	पूर्भ्यः
६	पुरः	पुरोः	पुराम्
७	पुरि	पुरोः	पूर्षु

इसी प्रकार 'धुर्' शब्दके रूप बनते हैं ।

वाक्यानि ।

१ यः पुरी वसति स पुरुषः भवति—
जो शहरमें रहता है वह पुरुष होता है ।

२ शत्रूणां पुरः कः विदारकः ? —
शत्रुओंके नगरियोंका कौन विदारक है ?

३ तासां पुरां कः राजा अस्ति ?— इन नगरियोंका कौन राजा है ?

४ स्वकीयं पुरं गच्छ— अपने शहरको जा ।

५ यदा पुरि तस्य वासः भवति तदा दुन्दुभिः शब्दं करोति—
जब नगरमें उसका निवास होता है तब ढोल शब्द करता है ?

सूचना

पाठक इसी प्रकार शब्दोंके रूप बनाकर वाक्य बनानेका प्रयत्न करें ।

संधि किये हुए वाक्य।

पुरि यो वसति स पुरुषो भवति। शत्रूणां पुरः को विदारकः? तासां पुरां को राजाऽस्ति। यदा पुरि तस्य वासो भवति तदा दुन्दुभिः शब्दं करोति।

पाठ १०

इस पाठमें आप निम्नलिखित श्लोकोंका अध्ययन कीजिये—

वैशम्पायन उवाच—

युधिष्ठिरस्तमासाद्य तपसा दग्धकिल्बिषम् ।
अभ्यवादयत प्रीतः शिरसा नाम कीर्तयन् ॥ १ ॥
(म. भारत वन. अ. १५९

अन्वयः— युधिष्ठिरः तं तपसा दग्धकिल्बिषं आसाद्य प्रीत नाम कीर्तयन् शिरसा अभ्यवादयत ।

संस्कृत-टीका— युधिष्ठिरः धर्मराजा तं आर्ष्टिषेणं मुनिं तपसा तपश्चरणेन दग्धकिल्बिषं दग्धपातकं आसाद्य प्राप्य प्रीतः मनसा संतुष्टः भूत्वा

नाम कीर्तयन् स्वकीयं नाम कथयित्वा, शिरसा स्वकपिशीर्षेण अभ्यवादयत नमस्कृतवान् ।

अर्थ— युधिष्ठिरने उस तपसे निष्पाप बने हुए आर्ष्टिषेण मुनिको प्राप्त करके संतुष्ट होकर अपना नाम कहके सिरसे प्रमाण किया।

तत: कृष्णा च भीमश्च यमौ च सुतपस्विनौ ।
शिरोभिः प्राप्य राजर्षिं परिवार्योपतस्थिरे ॥ २ ॥

अन्वयः— ततः कृष्णा च भीमः च सुतपस्विनौ यमौ च। शिरोभिः राजर्षिं प्राप्य परिवार्य उपतस्थिरे ॥

संस्कृत-टीका— ततः तदनंतरं कृष्णा द्रौपदी, भीमः च सुतपस्विनौ उत्तमतपोयुक्तौ यमौ नकुलसहदेवौ शिरोभिः स्वकीयैः शीर्षैः राजर्षिं राजश्रेष्ठं आर्ष्टिषणं प्राप्य नमस्कृत्य तं परिवार्य सर्वत: आवृत्य उपतस्थिरे उपविष्टाः।

अर्थ— पश्चात् द्रौपदी, भीम, नकुल और सहदेव ये अपने सिरोंसे उस राजर्षिको प्रणाम करके उसके चारों ओर बैठ गये ।

तथैव धौम्यो धर्मज्ञः पांडवानां पुरोहितः ।
यथान्यायमुपाक्रान्तस्तमृषिं संशितव्रतम् ॥ ३ ॥

अन्वयः— तथा एव पांडवानां पुरोहितः धर्मज्ञः धौम्यः यथान्यायं तं संशितव्रतं ऋषिं उपाक्रान्तः ॥

संस्कृत-टीका— तथा एव तेन एव प्रकारेण पांडवानां पंडुनंदनानां पुरोहितः उपाध्यायः धर्मज्ञः धर्मशास्त्रज्ञः धौम्यः मुनिः, यथान्यायं न्यायं रीतिं न उल्लंघ्य यथा भवति तथा, तं संशितव्रतं नियमवन्तं ऋषिं आर्ष्टिषेणं, उपाक्रान्तः प्राप्तः ।

अर्थ— उसी प्रकार पांडवोंके पुरोहित धौम्य मुनि भी यथायोग्य रीतिसे उस नियमयुक्त ऋषिको प्राप्त हुए ।

अन्वजानात्स धर्मज्ञो मुनिर्दिव्येन चक्षुषा ।
पांडोः पुत्रान्कुरुश्रेष्ठानास्यतामिति चाब्रवीत् ॥ ४ ॥

अन्वयः— सः धर्मज्ञः मुनिः दिव्येन चक्षुषा पांडोः पुत्रान् कुरुश्रेष्ठान् अन्वजानात् । आस्यतां इति च अब्रवीत् ।

संस्कृत-टीका— सः धर्मज्ञः धर्मशास्त्रज्ञानयुक्तः मुनिः आर्ष्टिषेणः दिव्येन अलौकिकेन चक्षुषा नेत्रेण अन्तर्ज्ञानेन इत्यर्थः । पाण्डोः पुत्रान् पाण्डवान् कुरुश्रेष्ठान् इति अन्वजानात् ज्ञातवान् । तथा च तान् पाण्डवान् आस्यतां उपविशतां इति च अब्रवीत् ।

अर्थ— वह धर्म जाननेवाला मुनि आर्ष्टिषेण दिव्य दृष्टिसे ये पांडुपुत्र कौरवश्रेष्ठ हैं ऐसा जानकर ' बैठ जांय ' ऐसा बोले ।

कुरूणामृषभं पार्थं पूजयित्वा महातपाः ।
सह भ्रातृभिरासीनं पर्यपृच्छदनामयम् ॥ ५ ॥

अन्वयः— महातपाः भ्रातृभिः सह आसीनं कुरूणां ऋषभं पार्थं पूजयित्वा अनामयं पर्यपृच्छत् ।

संस्कृत-टीका— महातपाः महता तपः सामर्थ्येन युक्तः आर्ष्टिषेणः ऋषिः भ्रातृभिः भीमादिभिः बंधुभिः सह आसीनं उपविष्टं कुरूणां कौरवाणां ऋषभं श्रेष्ठं पार्थं पृथापुत्रं धर्मराजं पूजयित्वा संपूज्य अनामयं रोगराहित्यं कुशलं पर्यपृच्छत् पृष्टवान् ।

अर्थ— बडे तपवाले उस ऋषिने भाइयोंके साथ बैठे हुए कौरवोंमें मुख्य धर्मराजका सत्कार किया और कुशल पूछा ।

नानृते कुरुषे भावं कच्चिद्धर्मे प्रवर्तसे ।
मातापित्रोश्च ते वृत्तिः कच्चित्पार्थ न सीदति ॥ ६ ॥
(म. भारत वन. अ. १५९)

अन्वयः— हे पार्थ ! अनृते भावं न कुरुषे ? कच्चित् धर्मे प्रवर्तसे ? ते च मातापित्रोः वृत्तिः कच्चित् न सीदति ?

संस्कृत-टीका— हे पार्थ ! हे पृथानंदन धर्मराज ! अनृते असत्ये भावं स्वकीयां प्रवृत्तिं न कुरुषे त्वं न करोषि ? तथा च त्वं धर्मे स्वधर्मपालने कच्चित् प्रवर्तसे किम् ? तव मातापित्रोः मातरि पितरि च वृत्तिः वर्तनं कच्चित् न सीदति, मातापित्रोः सेवां करोषि वा न ?

अर्थ— हे धर्मराज ! असत्यको ओर तो अपनी प्रवृत्ति तुम नहीं करते हो ? धर्ममें तो प्रवृत्ति तुम्हारी है ? मातापिताओंके संबंधमें तुम्हारी वृत्ति तो न्यून नहीं हो रही है ?

संधि किये हुए वाक्य।

युधिष्ठिरस्तं तपसा दग्धकिल्बिषमासाद्य प्रीतो नाम कीर्तयन् शिरसाऽभ्यवादयत । ततः कृष्णा च भीमश्च सुतपस्विनौ यमौ च शिरोभी राजर्षिं प्राप्य परिवार्योपतस्थिरे । तथैव धर्मज्ञो धौम्यः पाण्डवानां पुरोहितो यथान्यायं तं संशितव्रतमृषिमुपाक्रान्तः । स धर्मज्ञो मुनिर्दिव्येन चक्षुषा पाण्डोः पुत्रान्कुरुश्रेष्ठानन्वजानात् । आस्यतामिति चाब्रवीत् ।

पाठ ११

वकारान्तः स्त्रीलिंगो 'दिव्' शब्दः ।

१	द्यौः	दिवौ	दिवः
सं०	हे द्यौः	हे दिवौ	हे दिवः
२	दिवम्	दिवौ	दिवः
३	दिवा	द्युभ्याम्	द्युभिः
४	दिवे	द्युभ्याम्	द्युभ्यः
५	दिवः	द्युभ्याम्	द्युभ्यः
६	दिवः	दिवोः	दिवाम्
७	दिवि	दिवोः	द्युषु

वाक्यानि ।

१ स्वकीयेन शुद्धेन कर्मणा पुरुषः दिवं गच्छति—

अपने शुद्ध कर्मसे मनुष्य द्युलोकको जाता है।

२ दिवि देवाः अधिश्रिताः— द्युलोकमें देव रहे हैं ।

३ दिवः स्थाने कस्य निवासः ? — द्युलोकके स्थानमें किसका निवास है ?

४ ऊर्ध्वं द्यौः प्रकाशते— ऊपर द्युलोक प्रकाशता है ।

सूचना

पाठक यहां इसी पुस्तकके दशम पाठमें ओकारान्त 'द्यो' शब्दके रूप देखें और इस पाठमें आये हुये 'दिव्' शब्दके रूपोंके साथ तुलना करें । इन दोनों शब्दोंका तात्पर्य साधारणतया समान है इसलिये कदाचित् संदेह होना संभव है ।

शकारान्तः स्त्रीलिंगो 'दिश्' शब्दः ।

१	दिक्, दिग्	दिशौ	दिशः
सं०	हे दिक्, दिग्	हे दिशौ	हे दिशः
२	दिशम्	दिशौ	दिशः
३	दिशा	दिग्भ्याम्	दिग्भिः
४	दिशे	दिग्भ्याम्	दिग्भ्यः
५	दिशः	दिग्भ्याम्	दिग्भ्यः
६	दिशः	दिशोः	दिशाम्
७	दिशि	दिशोः	दिक्षु

वाक्यानि ।

१ पूर्वस्यां दिशि कस्य राज्यं अस्ति ?— पूर्व दिशामें किसका राज्य है ?

२ सर्वेषां दिशां मध्ये व्याप्य कः भवति ? — सब दिशाओंके मध्यमें व्याप कर कौन होता है ?

३ दिग्भ्यः स्वाहा— दिशाओंके लिये स्वाहा ।

सूचना

पाठक यहां स्मरण रखें कि आकारान्त 'दिशा' शब्द इससे भिन्न है और उसके रूप 'रमा' शब्दके रूपोंके समान होते हैं ।

षकारान्तः स्त्रीलिंगः 'त्विष्' शब्दः ।

१	त्विट्, त्विड्	त्विषौ	त्विषः
सं०	हे त्विट्, त्विड्	हे त्विषौ	हे त्विषः
२	त्विषम्	त्विषौ	त्विषः
३	त्विषा	त्विड्भ्याम्	त्विड्भिः
४	त्विषे	त्विड्भ्याम्	त्विड्भ्यः
५	त्विषः	त्विड्भ्याम्	त्विड्भ्यः
६	त्विषः	त्विषोः	त्विषाम्
७	त्विषि	त्विषोः	त्विट्सु, त्विट्त्सु

इसी प्रकार निम्नलिखित शब्दोंके रूप होते हैं—

शब्द ।

प्रावृष् = पर्जन्यका ऋतु | त्विष् = प्रकाश
तृष् = तृषा, प्यास | रुष् = क्रोध

वाक्यानि ।

१ प्रावृषि वृष्टिः भवति— पर्जन्यके ऋतुमें वृष्टि होती है ।
२ स पुरुषः तृषा पीडितः— वह मनुष्य प्याससे दुःखी है ।
३ त्वं रुषा युक्तः न भव— तू क्रोधसे युक्त न हो ।
४ सूर्यः स्वकीयया त्विषा युक्तः अस्ति— सूर्य अपने प्रकाशसे युक्त है ।

संधि किये हुए वाक्य ।

प्रावृषि वृष्टिर्भवति । भवति वृष्टिः प्रावृषि । स पुरुषस्तृषा पीडितः । पीडितस्तृषा स पुरुषः । तृषा पीडितस्स पुरुषः । त्वं रुषा युक्तो न भव । न भव रुषा युक्तस्त्वम् । सूर्यः स्वकीयया त्विषा युक्तोऽस्ति । स्वकीयया त्विषा युक्तोऽस्ति सूर्यः ।

सकारान्तः स्त्रीलिंगो 'भास्' शब्दः ।

१	भाः	भासौ	भासः
सं०	हे भाः	हे भासौ	हे भासः
२	भासम्	भासौ	भासः
३	भासा	भाभ्याम्	भाभिः
४	भासे	भाभ्याम्	भाभ्यः
५	भासः	भाभ्याम्	भाभ्यः
६	भासः	भासोः	भासाम्
७	भासि	भासोः	भास्सु

वाक्यानि ।

१ ईश्वरस्य भासा सर्वं इदं विभाति—

ईश्वरके प्रकाशसे सब यह प्रकाशता है ।

२ सूर्यस्य भासि प्राणिनां जीवनसत्त्वं भवति—

सूर्यके प्रकाशमें प्राणियोंके जीवनका सत्व होता है ।

सकारान्तः स्त्रीलिंगो 'आशिस्' शब्दः ।

१	आशीः	आशिषौ	आशिषः
सं०	हे आशीः	हे आशिषौ	हे आशिषः
२	आशिषम्	आशिषौ	आशिषः
३	आशिषा	आशीर्भ्याम्	आशीर्भिः
४	आशिषे	आशीर्भ्याम्	आशीर्भ्यः
५	आशिषः	आशीर्भ्याम्	आशीर्भ्यः
६	आशिषः	आशिषोः	आशिषाम्
७	आशिषि	आशिषोः	आशीःषु

वाक्यानि ।

१ योगिनः आशिषा अहं कृतार्थः अस्मि—

योगीके आशीर्वादसे मैं कृतार्थ हूं ।

२ तेषां आशीर्भिः युष्माकं कल्याणं भविष्यति—

उनके आशीर्वादोंसे तुम्हारा कल्याण होगा ।

हकारान्तः स्त्रीलिंगः 'उपानह्' शब्दः।

१	उपानत्, उपानद्	उपानहौ	उपानहः
सं०	हे उपानत्, उपानद्	हे उपानहौ	हे उपानहः
२	उपानहम्	उपानहौ	उपानहः
३	उपानहा	उपानद्भ्याम्	उपानद्भिः
४	उपानहे	उपानद्भ्याम्	उपानद्भ्यः
५	उपानहः	उपानद्भ्याम्	उपानद्भ्यः
६	उपानहः	उपानहोः	उपानहाम्
७	उपनाहि	उपानहोः	उपानत्सु

वाक्यानि।

१ हे भृत्य ! मम नूतनां उपानहं अत्र आनय—
हे नौकर ! मेरा नया जूता यहां ला।

२ तथा एतां पुराणां उपानहं तत्र नय—
तथा यह पुराणा जूता वहां ले जा।

३ मम द्वौ अपि उपानहौ आर्द्रे स्तः— मेरे दोनों जूते गीले हैं।

संधि किये हुए वाक्य।

१ विभातीश्वरस्य भासा सर्वमिदम्। २ सर्वमिदमीश्वरस्य भासा विभाति। ३ योगिनोऽस्मि कृतार्थोऽहमाशिषा। ४ कृतार्थोऽस्म्यहमाशिषा योगिनः। ५ मम द्वे अप्युपानहावार्द्रे स्तः। ६ ममाऽप्युपानहौ द्वे आर्द्रे स्तः। ७ तथा पुराणामेतामुपानहं तत्र नय। ८ तथा तत्रोपानहमेतां पुराणां नय। ९ तेषामाशीर्भिर्युष्माकं कल्याणं भविष्यति। १० कल्याणं भविष्यत्याशीर्भिर्युष्माकं तेषां। ११ भविष्यति युष्माकं कल्याणमाशीर्भिस्तेषाम्। १२ मम नूतनामुपानहमत्रानय। १३ आनयोपानहमत्र नूतनां मम। १४ नूतनामत्रानयोपानहं मम।

पाठ १२

इस पाठमें निम्नलिखित श्लोकोंका अध्ययन कीजिये—

कच्चित्ते गुरवः सर्वे वृद्धा वैद्याश्च पूजिताः ।
कच्चिन्न कुरुषे भावं पार्थ पापेषु कर्मसु ॥ ७ ॥

(म. भारत वन. अ. १५९)

अन्वयः— कच्चित् ते सर्वे गुरवः वृद्धाः वैद्याः च पूजिताः ? हे पार्थ ! पापेषु कर्मसु कच्चित् भावं न कुरुषे ?

अर्थ— तुम सब गुरु, वृद्ध, वैद्योंकी पूजा तो करते हो ? हे धर्मराज ! पापकर्मोंमें तो तू भाव नहीं करता है ?

सुकृतं प्रतिकर्तुं च कच्चिद्धातुं च दुष्कृतम् ।
यथान्यायं कुरुश्रेष्ठ जानासि न विकत्थसे ॥ ८ ॥

अन्वयः— हे कुरुश्रेष्ठ ! सुकृतं प्रतिकर्तुं च दुष्कृतं हातुं च कच्चित् यथान्यायं जानासि न विकत्थसे ?

अर्थ— हे कुरुओंमें श्रेष्ठ ! पुण्य करने और पाप दूर करनेके लिये यथायोग्य रीतिसे तो तू जानता है और (केवल) भाषण तो नहीं करता ?

यथार्हं मानिताः कच्चित्त्वया नन्दन्ति साधवः ।
वनेष्वपि वसन्कच्चिद्धर्ममेवानुवर्तसे ॥ ९ ॥

अन्वयः— त्वया यथार्हं मानिताः साधवः कच्चित् नन्दन्ति ? वनेषु वसन् अपि धर्मं एव अनुवर्तसे ?

अर्थ— तेरे द्वारा यथायोग्य संमानित हुए साधु आनंदित तो हैं ? वनमें वसता हुआ भी तू धर्मके अनुसार ही बर्ताव तो करता है ?

कच्चिद्धौम्यस्त्वदाचारैर्न पार्थ परितप्यते ।
दानधर्मतपः शौचैरार्जवेन तितिक्षया ॥ १० ॥

अन्वयः— हे पार्थ ! त्वदाचारैः धौम्यः कच्चित् न परितप्यते ? दानधर्मतपः शौचैः आर्जवेन तितिक्षया ?

अर्थ— हे धर्मराज ! तेरे आचारोंसे धौम्यमुनि तो दुःखी नहीं होता ? दान, धर्म, तप, (शौच) शुद्धता, (आर्जव) सरलता और (तितिक्षा) सहनशक्ति आदि तो ठीक हैं ?

पितृपैतामहं वृत्तं कच्चित्पार्थानुवर्तसे ?
कच्चिद्राजर्षियातेन पथा गच्छसि पांडव ॥ ११ ॥

अन्वयः— हे पार्थ ! पितृपैतामहं वृत्तं कच्चित् अनुवर्तसे ? हे पांडव ! राजर्षियातेन पथा कच्चित् गच्छसि ?

अर्थ— हे धर्मराज ! पिता और पितामहके बर्तावके समान आचरण तो करते हो ? हे पांडव ! राजर्षियोंके गये हुए मार्गसे तो तुम जाते हो ?

स्वे स्वे किल कुले जाते पुत्रे नप्तरि वा पुनः ।
पितरः पितृलोकस्थाः शोचन्ति च हसन्ति च ॥ १२ ॥

अन्वयः— स्वे स्वे कुले पुत्रे वा पुनः नप्तरि जाते पितृलोकस्थाः पितरः शोचन्ति च हसन्ति च किल ।

अर्थ— अपने अपने कुलमें पुत्र अथवा फिर पोता उत्पन्न होनेपर पितृलोकमें रहनेवाले पितर शोक करते हैं और कभी हंसते भी हैं ।

किं तस्य दुष्कृतेऽस्माभिः संप्राप्तव्यं भविष्यति ।
किंचास्य सुकृतेऽस्माभिः प्राप्तव्यमिति शोभनम् ॥ १३ ॥

अन्वयः— तस्य दुष्कृते अस्माभिः किं संप्राप्तव्यं भविष्यति ? अस्य च सुकृते अस्माभिः शोभनं किं प्राप्तव्यं इति ?

अर्थ— (पितर अपने मनमें कहते हैं कि) इसके पाप करनेपर हमने क्या प्राप्त करना होगा ? और इसके पुण्य करनेपर हमको उत्तम क्या प्राप्त होगा ?

पिता माता तथैवाग्निर्गुरुरात्मा च पञ्चमः ।
यस्यैते पूजिताः पार्थ तस्य लोकावुभौ जितौ ॥ १४ ॥

अन्वयः— हे पार्थ ! पिता, माता तथा एव अग्निः गुरुः च पंचमः आत्मा एते यस्य पूजिताः तस्य उभौ लोकौ जितौ ।

अर्थ— हे पृथापुत्र ! पिता, माता, तथा अग्नि, गुरु और पांचवां आत्मा ये जिसके पूजित हुए हैं (अर्थात् जिसने इनकी पूजा की है) उसको दोनों लोक प्राप्त हुए हैं ।

युधिष्ठिर उवाच—

भगवानार्य माऽऽहैतद्यथावद्धर्मनिश्चयम् ।
यथाशक्ति यथान्यायं क्रियते विधिवन्मया ॥ १५ ॥
(म. भारत वन. अ. १५९)

अन्वयः— हे आर्य ! भगवान् धर्मनिश्चयं यथावत् मा आह, एतत् मया यथाशक्ति यथान्यायं विधिवत् क्रियते ॥

अर्थ— हे आर्य ! आपने धर्मका निश्चय जैसा मुझे कहा है, वह मैं यथाशक्ति और न्यायके अनुसार, विधिके अनुसार करता हूं ।

सूचना

पाठक इन श्लोकोंका अच्छी प्रकार अध्ययन करें और संभव हुआ तो श्लोकोंको कंठ करें ।

संधि किये हुए वाक्य ।

हे पार्थ ! अनृते भावं न कुरुषे ? कच्चिद्धर्मे प्रवर्तसे ? ते च मातापित्रोर्वृत्तिः कच्चिन्न सीदति ? कच्चित्ते सर्वे गुरवो वृद्धा वैद्याश्च पूजिताः ? हे पार्थ ! पापेषु कर्मसु कच्चिद्भावं न कुरुषे । हे कुरुश्रेष्ठ ! सुकृतं प्रतिकर्तुं च दुष्कृतं हातुं च कच्चिद्यथान्यायं जानासि न विकत्थसे ? त्वया यथार्हं मानिताः साधवः कच्चिन्नन्दन्ति ? वनेषु वसन्नपि धर्ममेवानुवर्तसे ? हे पार्थ ! त्वदाचारैर्धौम्यः कच्चिन्न परितप्यते ?

पाठ १३

रामायणम् ।

सुमन्त्रस्य प्रत्यागमनम् ।

अथ दुर्मनाः अनुज्ञातः सुमन्त्रः हयोत्तमान् योजयित्वा अयोध्यां नगरीं प्रत्यावर्तत । ततः द्वितीये अहनि सायाह्नसमये अयोध्यां समनुप्राप्य सः सारथिः निरानन्दां तां नगरीं ददर्श । सः शोकाकुलपरमदुर्मनाः सुमन्त्रः तां निःशब्दां शून्यां दृष्ट्वा चिन्तयामास । कच्चित् रामवियोगसंतापेन सगजा साश्वा सजना सजनाधिपा पुरी शोकाग्निना तु न दग्धा ? इति चिन्तापरः सूतः शीघ्रयायिभिः वाजिभिः नगरद्वारं आसाद्य त्वरितः प्रविवेश । शतशोऽथ सहस्रशश्च सूतं अभिधावन्तः नराः क्व रामः क्व रामः इति पप्रच्छुः । राघवं गंगापारं विसृज्य, धार्मिकेण महात्मना अनु-

---

सुमंत्रका वापस आना ।

इसके बाद दुःखित मनवाला सुमंत्र उत्तम घोडोंको रथमें जोडकर अयोध्या नगरीको वापस लौट पडा । अब दूसरे दिन सायंकालके समय अयोध्या पहोंचकर उस सारथिने आनन्दरहित नगरीको देखा । वह शोकसे युक्त अत्यन्त दुःखित मनवाला सुमन्त्र उस नगरीको शब्दरहित शून्य देखकर सोचने लगा । क्या कहीं रामके वियोगके संतापसे हाथियों, घोडों, आदमीओं और मनुष्योंके स्वामी-राजासहित नगरी शोकरूपी अग्निसे जल तो नहीं गई ? इस प्रकार चिन्तामग्न सूत शीघ्र चलनेवाले घोडोंसे नगरके दरवाजेको प्राप्त करके उसमें शीघ्रतासे प्रविष्ट हुआ । सैकडों और हजारों सूतकी तरफ दौडते हुए मनुष्य राम कहां है ? राम कहां है ? इस प्रकार पूछने लगे । रामको गंगाके परले पार छोडकर उस धर्मात्मा महात्मासे

ज्ञातः अहं निवृत्तोऽस्मीति तान् पौरान् निजगाद। वृत्तान्तं अमुं विज्ञाय बाष्पपूर्णमुखाः नराः अहो धिक् इति निश्वस्य हा राम इति विचुक्रुशुः। सः पिहिताननः सुमन्त्रः राजमार्गमध्येन यत्र राजा दशरथः आसीत् तदेव गृहं उपययौ। सः रथात् शीघ्रं अवतीर्य राजवेश्म च प्रविश्य महाजनसमाकुलाः सप्तकक्ष्याः अभिचक्राम। स अष्टमीं कक्ष्यां प्रविश्य आतुरं दीनं पुत्र शोकपरिप्लुतं राजानं पाण्डुरेव गृहे अपश्यत्। तं आसीनं राजानं अभिगम्य अभिवाद्य च सुमन्त्रः यथोक्तं रामवचनं प्रत्यवेदयत्। स विद्रुतमानसः राजा तूष्णीं एव तच्छ्रुत्वा रामशोकाभिपीडितः सन् मोहं उपगतः। मूर्च्छिते पृथिवीपतौ अन्तःपुरं आविद्धम्, बाहू उच्छ्रित्य च चुक्रोश। तदा सुमित्रया सह कौसल्या पतितं पतिं उत्थापयामास वचनं च इदं अब्रवीत्। हे महाभाग वनवासात् अनुप्राप्तं

आज्ञा पाया हुआ मैं लौट आया हूं, इस प्रकार उन नगर-निवासियोंको बोला। उस समाचारको जानकर आंसुओंसे भरे हुए मुखवाले मनुष्य 'अहो धिक्कार है' इस प्रकार लम्बे सांस लेते हुए 'हा राम' कहते हुए फूट फूट कर रोने लगे। वह मुखको ढांपे हुए सुमन्त्र राजमार्गके बीचसे जहां राजा दशरथ था उसी घरको गया। वह रथसे जल्दी उतरकर राजगृहमें प्रवेश कर बहुत मनुष्योंसे भरी हुई सात कक्षाएं पार गया। उसने आठवीं कक्षामें प्रवेश करके दुःखित, दीन, पुत्रशोकसे अत्यन्त खिन्न राजाको सफेद घरमें देखा। उस बैठे हुए राजाके पास जाकर अभिवादन करके सुमन्त्र, जैसे कहा था वैसा रामका वचन निवेदन करने लगा। वह अस्थिर चित्तवाला राजा चुप करके उसे सुनकर रामशोकसे अत्यन्त पीडित हुआ हुआ मूर्च्छित हो गया। राजाके मूर्च्छित हो जानेपर अन्तःपुर अत्यन्त दुःखित हुआ। और हाथ ऊपरको उठा उठाकर जोर जोरसे रोने लगा। तब सुमित्राके साथ कौसल्या गिरे हुए पतिको उठाने लगी और यह वचन बोली- हे

इमं दूतं कस्मात् न प्रतिभाषसे ? देव ! यस्याः भयात् सारथिं रामं न अनुपृच्छसि सा कैकेयी इह न तिष्ठति, तस्मात् विश्रब्धं प्रतिभाष्यताम् । मुहूर्तेन प्रतिबुद्धः सः शोकोपहतचेतनः राजा दशरथः रामे वनं प्रव्राजिते षष्ठीं रात्रिं चिन्तां अभ्यपद्यत । स अर्धरात्रे स्वकृतं दुष्कृतं अस्मरत् ।

चित्रकूटे भरतागमनम् ।

पितुः आज्ञां परिपालयतः वनं प्रयातस्य रामस्य विरहेन भरतः नितरां चिखिदे । तातस्य अन्त्येष्टिक्रियां संपादयित्वा प्रजाजनैः अवबोध्यमानः अपि राज्यासनं सः न जग्राह । रामं वनात् हठात् प्रत्यवर्तनाय कृतनिश्चयः सद्यः एव प्रचचाल । तं गच्छन्तं अवलोक्य सर्वे अपि नगरवासिनः अनुययुः । ग्रामात् ग्रामं, नगरात् नगरं, वनात् वनं, आश्रमात् आश्रमं पर्यटन्तः विदितरामवृत्तान्तः

महाभाग्यवान् ! वनसे वापिस आए हुए इस दूतको क्यों जवाब नहीं देता ? हे देव ! जिसके भयके मारे तू सारथिके साथ रामके विषयमें बात नहीं करता, वह कैकेयी यहांपर नहीं है । अतः निःशंक होकर बातचीत करो । थोडी देरमें संज्ञाको प्राप्त हुआ हुआ, शोकसे जिसकी चेतनता नष्ट हो गई है ऐसा राजा दशरथ रामके वनमें चले जानेके बाद छठी रातको चिन्ताको प्राप्त हुआ । उसने अर्धरातमें अपना किया हुआ दुष्कर्म स्मरण किया ।

चित्रकूटमें भरतका आना ।

पिताकी आज्ञाका पालन करते हुए वनमें जाते हुए रामके वियोगसे भरत अत्यन्त दुःखी हुआ । पिताकी मरनेके बादकी क्रियाको करके प्रजाके मनुष्योंसे समझा जानेपर भी उसने राज्यासनको ग्रहण नहीं किया । रामको वनसे बलपूर्वक लौटा लानेके लिए किए हुए निश्चयवाला शीघ्र ही चल पडा । उसे जाते हुए देखकर सब नगरवासी उसके पीछे चल पडे । एक गांवसे दूसरे गांवमें, एक शहरसे दूसरे शहरमें, एक जंगलसे दूसरे जंगलमें,

कथमपि चित्रकूटगिरिं अनुप्रापुः। लक्ष्मणः तु ससैन्यं आयान्तं भरतं विलोक्य संदेहपरवशेन मनसा रामं अवोचत्, नूनं अयं भरतः अस्मान् अरण्ये प्राप्तान् निःसहायान् मन्यमानः जिघांसया समायातः अस्ति, दर्शनोत्सुकः चेत् किमर्थं न आयातः एकाकी ? किं आसीत् इह सैन्यस्य प्रयोजनमिति ?

एक आश्रमसे दूसरे आश्रममें, भटकते हुए रामका वृत्तान्त जानते हुए चित्र-कूट पर्वतको किसी प्रकार प्राप्त हुए। लक्ष्मण सेनाके साथ आते हुए भरत-को देखकर संदेह-पूर्ण मनसे रामको कहने लगा, कि अवश्य भरत जंगलमें आए हुए हमको निःसहाय समझता हुआ मारनेकी इच्छासे आया है। यदि दर्शनकी इच्छा होती तो अकेला क्यों न आता ? यहां सेनाकी क्या जरूरत थी ?

समाप्त

संस्कृत-पाठ-माला।

(चोवीस भाग)

[संस्कृत-भाषाका अध्ययन करनेका सुगम उपाय]

संस्कृत-पाठ-मालाके अध्ययनसे लाभ—

१– अपना काम-धन्धा करते हुए फुरसदके समय आप किसी दूसरेकी सहायताके विना इन पुस्तकोंको पढकर अपना संस्कृतका ज्ञान बढा सकते हैं।

२– प्रतिदिन एक घंटा पढनेसे एक वर्षके अन्दर आप रामायण-महाभारत समझनेकी योग्यता प्राप्त कर सकते हैं।

३– पाठशालामें जानेवाले विद्यार्थी भी इन पुस्तकोंसे बडा काम प्राप्त कर सकते हैं।

इस पद्धतिकी विशेषता यह है—

भाग १–३	इनमें संस्कृतके साथ साधारण परिचय करा दिया गया है।
भाग ४	इसमें संधिविचार बताया है।
भाग ५–६	इनमें संस्कृतके साथ विशेष परिचय कराया है।
भाग ७–१०	इनमें पुल्लिंग, स्त्रीलिंग और नपुंसकलिंगी नामोंके रूप बनानेकी विधि बताई है।
भाग ११	इसमें " सर्वनाम " के रूप बताये हैं।
भाग १२	इसमें समासोंका विचार किया है।
भाग १३–१८	इनमें क्रियापद-विचारकी पाठविधि बताई है।
भाग १९–२४	इनमें वेदके साथ परिचय कराया है।

प्रत्येक पुस्तकका	मूल्य ॥)	और डा. व्य. ≠)
२४ पुस्तकोंका	मूल्य १२)	और डा. व्य. १।)

मंत्री— स्वाध्याय मण्डल,

पोस्ट– 'स्वाध्याय मण्डल (पारडी)', पारडी [जि. सूरत]

मुद्रक और प्रकाशक– व. श्री. सातवलेकर, भारत मुद्रणालय, पारडी (जि. सूरत)